कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M 2184 विषय वैदिक

नाव कात्यायन सूत्रं व्याख्यासह (1-6 अध्याय)

लेखक / लिपीकार महादेव रामचंद्र दशासहस्त्र MSS.

पृष्ठ 180 काळ शके 1792 पूर्ण / अपूर्ण

m०२१४

कात्यायन श्रौतसूत्रे देव याज्ञिक भाष्यम्

मज्ञाध्यायपर्यन्तम् – धामाकर

॥ श्रीगणेशाय नमः ॥ उक्ताः परिभाषाः ॥ इदानीं श्रुतिक्रमं मंत्रक्रमं चानुसारयन्नाचार्यः प्रथमं पौर्णमासे
ष्टिमुपदिदिक्षुस्तस्याउपक्रमकालमाह ॥ पूर्वां पौर्णमासीमुत्तरां वोपवसेदिति ॥ ॥ द्वे पौर्णमास्यौ
पूर्वोत्तरा च । तत्र पूर्वा चतुर्दशीयुक्ता प्रतिपदुत्तरा । कुतः । एषा ह संवत्सरस्य प्रथमा रात्रिर्यत्फाल्गुनी पौर्ण
मासी योत्तरेवोत्तमा या पूर्वेति श्रवणात् । तत्र पंचदशी मुख्या प्रतिपद्गौणी । कुतः । अवैकल्यादि विक
लादि दोषप्रसंगादुभयोर्मुख्यार्थतानुपपत्तेः । उपवसेदित्यनेनात्रानशनं न विधीयते । कुतः । अपरा
ह्णे व्रतोपायनीयमश्नीतेत्यनेन विरोधात् । किं तर्हि । आग्रायणउपवसीत्यादौ नियतद्रव्यपरिमाणवत्कालद
शनसत्यवदनक्रोधभोगलोपादिवर्जनादियमनियमकारित्युपवसनीत्यस्य प्रयोगस्य दृष्टत्वादत्रापि पु
र्णपराविरोधपरिहाराय सप्तम्यार्थो न सीयते । तत्रायमर्थः । पूर्वां पौर्णमासीं पंचदशीतिथिमुपवसे
त् । उत्तरां वा प्रतिपदं । पूर्वस्यां उत्तरस्यां वा पौर्णमास्यां स्नानसिद्धता स्नानमांसमैथुनवर्जनादिनायमनि
यमकारी भवेत् । यागोपक्रमं कुर्यादिति भाष्यार्थः । सर्वे संप्रत्येवोपवसेत् । तथाउत्तरामेवोपवसेदिदु
भयथाश्रुतत्वात् । पूर्वां पौर्णमासीदिसत्योपान्वध्याह्नसद्यस्नेनोपपूर्वस्य वसतेरान्यारस्य कर्मसं

शला कर्मणि द्वितीये तिथि द्वितीया। अनशनवायमभोजनार्थस्योपवसेः प्रयोगो न भवति। तदाधारस्य
कर्मसंज्ञानिषेधात्। तथा च वार्त्तिकं। अभ्यवहार्यार्थस्य प्रतिषेध इति। तत्रोत्तरोपवासपक्षे च सद्यए
वयागं वक्ष्यति सद्यो वा प्रातरिति। शांखायनः। ऽपोष्य पौर्णमासे न हविषा यजेत तथामावास्ये
न द्व पौर्णमास्यां न मावास्येन याप [illegible] यं स्तमयं पूर्णऽदियाद्यां वास्तमिते ते पौर्णमास्यौ स्वोनदृष्टे
तियदृह श्वनस्य त ते अमावास्ये तत्रे न्यायां यथाकामीति। अथनामाद्व त्ति चंद्रमाऽच्यते। पूर्णोमाः
पूर्णमास इयं पौर्णमासी पूर्णचंद्रे सर्थः। तिथिद्वैधे सति पूर्वोऽत्तरा वा या पौर्णमासी पूर्णचंद्रा तामु
पवसेत्। तस्यामुपक्रमं कुर्यात्। न्हपूर्णचंद्रायामिति। तथा च काठके। पूर्णे पौर्णमासीमुपवसे
त्। अदर्शने अमावास्यायामिति। मानवे च। पूर्णे चंद्रमस्युपवसेत् पौर्णमासीमदर्शने ऽमावास्या
यां पूर्वे चेति। न निर्णयश्चैवं। यश्च कालस्तिथिद्वैधे बहूपाभो यदि विद्यते। पर्व तत्रोत्तरं कार्यं हीने पूर्व
मुपक्रमेदिति। षड्भूपालः षड्घटिकापरिमाणः। तथा। पर्वणो यश्चतुर्थांशः आद्याः प्रतिपदस्त्रयः।
यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिरिति। तथा। न यष्टव्यं तुरीयांशे सोऽयागेः प्रतिपदः के

चित्। रक्षांसि विलुंपंतीति श्रुतिरेषा सनातनीति। तथा। प्रतिपद्यप्रविष्टायां यदि लिष्टिः समाप्यते। पुनः
प्रणीय चरु होमेष्टिः कर्तव्या साग्निभिर्द्विजैरिति। तिथेः परस्या घटिका श्च यास्युर्न्यूना स्तथैवा स्यधि
का श्च तासां। अर्द्धं वियोज्यं तत्थाप्रयोज्यं ह्रासे च वृद्धौ प्रथमे दिने तद् इति पर्वसंधिज्ञानोपायः। तथा
संधिर्यद्यपराह्णे स्याद्यागं प्रातः परेहनि। कुर्वाणः प्रतिपद्भागे चतुर्थे पि न दुष्यतीति। एतत्पूर्णमा
सीविषयमेव। अमायां तु। त्रिमुहूर्ताद्वितीया चेत्प्रतिपद्यापराह्णिकी। अन्वाधानं चतुर्दश्यां
परतः सोमदर्शनात्। अपराह्णोऽत्र पंचधा विभक्तस्याह्नश्चतुर्थो भागः। तत्रापराह्णे भवास
कला अपराह्णव्यापिनी अपराह्णिकी साधुः। केचित्। पंचधा विभक्तस्य चतुर्थपंचमभागव्या
पिनीत्यर्थः। अपरे तु। अंतिमपंचमभागमात्रव्यापिन्येवापराह्णिकी साधुः। तथा चाह। पर्व
णोंशे त्रतीये पि कर्तव्येष्टिर्द्विजातिभिः। तथा। पर्वणोंशे द्वितीये पि कर्तव्येष्टिर्द्विजातिभिः। अनयो
रुत्तरार्द्धं। द्वितीयासहितं यस्माद्दुर्शायं ह्यात्रि विलीयनाहनि। अतो यागदिने चंद्रदर्शनं यस्ततो मर्ज।
प्रवर्त्तिकालस्तु। आवर्तनात्प्राग्यदि पर्वसंधिः कृतानस्मिन्प्रकृतिं विलुप्ताः। तत्रैव यागः पर

नोयदिस्यात्तस्मिन्विकल्पः प्रवर्त्तते एतत्। आग्रयणे तु विशेषः। अथो पूर्वाण्हे पुनीप क्षेयेद दर्शो स्याः
परमुत्कमाग्रयणकं प्राक्पौर्णमास्या अतदिति। एतच्च सर्वः कालपौर्णमासपक्षए वेति कालनिर्ण
ये कालं ज्ञात्वा विधिमुपदिशति॥ ॥अग्न्याधानमध्वर्युर्यजमानोवा॥ ॥अध्वर्युर्यजमा
नोवाग्न्याधानं करोति। अग्न्याधानमिति वक्ष्यमाणः संज्ञा। अग्न्याधानव्रतोपायनेत्यादौ सं
व्यवहारार्था। वा शब्दो विकल्पार्थः। नन्वध्वर्युः कर्मसु वेदयोगादिति परि■ भाषितत्वादध्वर्युः प्रा
प्तएव किमर्थमध्वर्युग्रहणं अतो यजमानोसै तावदेन वक्तव्यं। सत्यं। एतावदिष्युच्यमाने होतृत्वेदवि
हि■तमग्न्याधानं समाख्यया होतुः प्राप्नोति तस्मा प्यध्वर्युकर्तृकता सि■ध्यर्थमध्वर्युग्रह
णमित्यदोषः। तदेवाग्न्याधानमाह॥ ॥ममाग्ने वर्चो विहवेष्वस्तु वयं हे ध्याना स्तन्वं पुषेम। मह्यं
नमन्तां प्र■दिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेमेत्याहवनीये समिधमादधाति॥ ॥प्रतिक
र्मेज्जिरणमप्रसंगइति परिभाषितत्वात्पौर्णमासे प्ययर्थं गार्हपत्यात् ज्वलंतमाहवनीयमुद्धृत्य दक्षिणा
ग्निं चादधात्य तस्मिन्नुद्धृते आहवनीये अध्वर्युर्यजमानो वा ममाग्ने वर्चो इत्यादिना मंत्रेण समिध

रे.भा०१

२

माद्धानि। अग्नेरुपरि भागमास्थापनि। उद्धरणं पपुनं खरेपं च भुसंस्कारं कृत्वाऽध्वर्युणा कर्तव्यं। समा
ख्यानात्। समिदाधानमात्रेव चनाद्यजमानस्योपदेशात्। गार्हपत्यादिति। कुतः। तस्मादेतं गार्ह
पत्यात्प्राञ्चमुद्धरंतीति गार्हपत्याद्धि स आदृतो भवतीइत्यादि श्रवणात्। गार्हपत्यादाहवनीयं ज्वलंतं प्र
णयतीति मननिबे। असौ समित्प्रादेशमात्री। समित्संविज्ञं वेदं च सुसलौ लुखलमहाः। नाम्युखास्रं
ध्रुपरनाशं म्यास्तुकु पुष्कराणि च। शासस्वरू विषाणानि चरूणां मेक्षणानि च। कुयात्प्रादेश
मात्राणि महावीरास्त्रयस्तथेति परिधि प्रकारवचनात्। शमी चपालाशाध्यन्यतमवृक्षजाः पा
भास्यः समिध्यः कार्याः स्वादियस्तदलाभतः। शमीरोहितकाश्वत्थास्तदभावे र्वैकतसौ। त
था। पालाशखदिराश्वत्थशंम्युदुंबर ॰ आ अपि। अपामार्गार्कदुर्वीचकुशाश्चेसपरेध्वि
डुरिति। सत्र चः समिध्यः कार्याऋज्वाः श्लक्ष्णाः समास्तथा। शस्त्रादशांगुला स्तासुद्वादशां
गुलेकास्तथा। आर्द्रपक्काः समच्छेदास्तर्जन्यगुलवर्तकाः। अपाटिता अविशास्वाः कृमिदोष
विवर्जिताः। दग्धाः कृशास्तथास्थूला ह्रस्वा दीर्घास्तु वर्जयेत्। ममाग्नरस्य यजमानकनका

३

ग्न्यन्वाधानपक्षेऽन्येक्रयजमानके द्वियज्ञसत्राहीनगणयज्ञादावुक्तः। आनयोरग्नेवर्ज्यं आवाभ्यां
नमेताभितिद्वियजमानके। अस्माकमग्नेनचौऽस्मभ्यंनमेताभितिबहुयजमानके। तन्न्याग्न्य
न्वाधानं मुख्यएवेतरान्वारब्धः करोति। अध्वर्युकर्तृकपक्षे तन्तुहस्त्व। मंत्रादौ च सर्वत्रौंका
रः प्रयोज्यः। तदुक्तं। ब्रह्मारंभे विरामे च यागहोमार्चने ध्रुवंति। तथा च स्मां ■ श्वायनः। दानय
ज्ञजपस्वाध्यायजपध्यानसंध्योपासनप्राणायामहोमदैवपित्र्यमंत्रोच्चारणब्रह्मारंभादीनि
प्रणवमुच्चार्य प्रवर्तयेदिति। दागन्यपरिशिष्टे च। ब्रह्मयज्ञजपो होमो दैवपित्र्यकर्म च॥
अनोंकृतं सर्वं न भवेत्सिद्धिकारकमिति॥ ॥तुष्णीं द्वितीयां॥ ॥द्वितीयां समिधं तुष्णी
मंत्रवर्जमाहवनीये ऽभ्यादधाति। द्वितीयाग्रहणाल्मंत्रोप्राप्नोति तन्निवृत्त्यर्थं तुष्णीमित्यु
क्तं॥ ॥एवमितरयोरग्न्योः। इतरयोर्गार्हपत्यदक्षिणाग्निसंज्ञयोरग्न्योरेवमनेन प्रका
तेन रेणाग्न्यन्वाधानं करोति। ममाग्ने इति मंत्रेण प्रथमां समिधं आदधाति। तुष्णीं द्वितीयां।
अत्रापि प्रथमं गार्हपत्ये ततो दक्षिणाग्नाविति। कुतोयं क्रम इति चेदुच्यते। अग्न्यन्वाधानं

तावद्देवतापरिग्रहार्थं।तास्वदेवताः प्रथमं गार्हपत्ये पत्नीसंयाजषुड्यंते। तदादक्षिणाग्नाविति।तेनमुख्य
क्रमार्थंग्रहार्थमयं क्रमोवसीयते।अथाग्न्यन्वाधानेपक्षांतरमाह॥ ॥महाव्याहृतिभिर्वाप्राक्
संस्थं॥ ॥भूर्भुवः स्वरिति ■ तासां महाव्याहृतयइतिसंज्ञा।तदाहकात्यायनः।भूर्भुवः स्वरितिसो
महाव्याहृतयोऽग्निवायुसूर्यदेवताक्रमेणेति।वाशब्दोविकल्पार्थः।अथवामहाव्याहृतिभिर्भूर्भु
वः स्वरितिताभिः प्राक्संस्थं गार्हपत्यदक्षिणाग्न्याहवनीयेष्वग्न्यन्वाधानंकरोति।तत्रप्रथमंगार्हपत्ये
भूरितिमंत्रमथमां समिधं ■■■■ ।तूष्णींद्वितीयां।ततोभुवइतिमंत्रेण दक्षिणाग्नौप्रथमां तूष्णींद्वि
तीयां।ततः स्वरितिमनेनमंत्रेणाहवनीयेप्रथमां तूष्णींद्वितीयामिति प्राक्संस्थमित्यस्यार्थः। अग्न्यन्वा
धानस्यतृतीयंपक्षमाह॥ ॥तूष्णींवायथापूर्वं॥ ॥वायथापूर्वं।वाशब्दोविकल्पार्थः।तूष्णींअमंत्र
मेववायथोक्तंप्रत्यगाग्नि समिद्ध्याल्पक्रमग्न्यन्वाधानंयथापूर्वं करोति।यथापूर्वमिति योयःपूर्वमुत्पन्नो
ग्निस्तस्मिन्नग्नौपूर्वं।तेनप्रथमंगार्हपत्येततआहवनीयेततोदक्षिणाग्नाविति।अस्मिन्पक्षेयुगपदेवस
मिद्ध्याधानं।भेदेकारणाभावात्।तदेतत्त्रि■ विकल्पमप्यग्न्यन्वाधानंदृष्टार्थं।अग्न्यन्वाधानस्य

हार्योर्दृश्यत एवाग्नीधनं तु धारणं च। उभयं चैतदिष्यत एव समासि पर्यंतं अग्निकार्यस्य सत्त्वात्। केचिद
ग्न्याधानं देवतापरिग्रहार्थमाहुः। कुतः श्रुतेः। तथाहि। ममाग्ने वर्च इति पूर्वेद्युरग्निं गृह्णाति देवता
एतत्पूर्वेद्युर्गृहीत्वा श्वोभूते यजन्त इति। नैवमित्यपरे। नह्यग्निधारणे दृष्टप्रयोजने सत्यदृष्टदेवताप
रिहारार्थत्वमर्थवादमात्रोपयुक्तात् वाक्यशेषात् कल्पयितुं शक्यं। तस्माद्धारणार्थमेवेति। एवं
सत्यपि एतत्सर्वद्वयमपि शिष्टैरपि अंगीकृतमस्ति। अत्राहापस्तंबः। अथातो दर्शपूर्णमासौ व्या
ख्यास्यामः। प्रातरग्निहोत्रं हुत्वान्यमाहवनीयं प्रणीयाग्नीन्वादधाति नगरजाश्रियो न्यमग्निं प्रणयंति देवा
गा लु धिदइति। अपि वा सममाग्नेरसाहवनीयमुपसमिंध्य उत्तरं गार्हपत्यमुत्तरया न्वाहार्यपचनमिति व्या
हृतिभिरन्वाधानमेके समामनंतीति। तथा। समुह्य सम्यगार मनुसिंप्रसायतान्यलंकुर्वंतरति॥ ॥अह
नि [illegible] मांसं मैथुनं वर्जयेत्॥ ॥ अस्मिन्प्रक्रमे अहनि मांसं मैथुनं वर्जयेत्। मासं नाश्नीयात्। मैथुनं
स्त्रीभोगं च परिसजेत्। ननु ह्यनि सदा मैथुनं प्रतिषिद्धमेव पर्वणि तु रात्रावपि तत्किमर्थं प्रतिषिध्य
ते। सत्यं। सत्यं पुरुषार्थः। इह तु दर्शपूर्णमासप्रकरणे विधानात्। कर्मधर्मार्थमिति। अनयोः को विशेष

स्मार्तः प्रति
षेधः २०

रत्निचेत्प्रायश्चित्तेमानंतरं इति ब्रूमः। पुरूर्थापचारे स्मार्तमेव प्रायश्चित्तं। कर्मधर्मे पुनः कर्मनैगुण्य
निमित्तं भुवः स्वाहेत्यादिकं श्रौतं प्रायश्चित्तं भवति॥ ॥केशश्मश्रु वपते वाशिखं॥ ॥अग्न्या-
धानानंतरं यजमानः केशश्मश्रु वपते वेति वापयेदित्यर्थः। अंतर्भूतो ण्यर्थोयं। वाशब्दो विकल्पा-
र्थः। वपते न वपते वेति। यदा च वपते तदा अशिखं शिखायाः वपनं न कारयीतेत्यर्थः। केशाः शि-
रसि जाताः। श्मश्रुशब्देन मुखजानि लोमान्युच्यंते। केचिच्छाशब्दमशिखमित्यनेन सह योज-
यंति। अशिखं वा सशिखं वेति। तन्मते केशश्मश्रुवपनं नित्यमेव वस्तुत्रकारप्रस्थानादयमर्थो
वसीयते। येन आधाने पौर्णमासवदिसु त्कहान् कृत्वम क्षत्रसंभार सामवपनचातुर्मास्येष्वेवमा
दिनां वपनस्य विकल्पमाह। यदि पौर्णमासे वपनं विकल्पेन स्यात्तदा पौर्णमासवदिति नैवाध्या
नेऽपि विकल्पस्य सिद्धत्वात्पुनर्विकल्पो न वक्तव्यः स्यात्। उक्तश्च। अतएवं ज्ञायते पौर्णमासे वपन
स्य विकल्पो नास्तीति। मानवे विशेषः। केशश्मश्रु यजमानो वा वपेत् दक्षिणोपक्रमाच्च केशान्स-
व्योपक्रमाच्च श्मश्रूणां च यथासंकल्पितं कारयेत्तेन कक्षोपलीन खां च कारयितेति॥ ॥अप

राह्णे व्रतोपायनीयमश्नीतः सर्पिषा सुहितौ ॥ ॥ अह्नोऽपरो भागो अपराह्णः। अपराह्णे पत्नीयज
मानौ सर्पिषायुक्तं च नोपसिक्तं व्रतोपायनीयमन्नमसुहितावन्तर्हितौ यथा भवतस्तथाऽश्नीतः।
भुंजीतेत्यर्थः। व्रतोपायनीयमिति व्रतं भोजनं येनान्नेनोपेयते क्रियते अमाषाऽमांसाऽलवणा
दिना यद्व्रतोपायनीयं अन्नं तदश्नीत। तदाह शांखायनः। पत्नीयजमानौ व्रतमश्नीयातां प्राग्वत्सा
नपाकरणात् छंदतोऽन्नं मांसलवणमिथुनमाषयेनद्रव्येण पथ्यमाणः स्यादिति। स च सर्वेणि सर्पि
ष्मद्भुविष्यं लघुभोजनं। नसायं नोपवासस्या नैतलामिषविवर्जितं इति पुलस्त्यः। आपस्तंबः। अर
सिश्चान्नस्य यच्चैनयोः प्रियं स्यात्तदेवैतस्मिन्नहनि भुंजीयातामधः शयीयातामिति। भरद्वाजः।
वर्जयेत्सर्वकालेषु स्त्रीतैलामिषवर्जं। कलहं क्रीतविक्रीतं प्रहासं बहुभाषणं। तैर्यत्रिकं व्रतयाश्च
र्यां यथ्यमाणो विवर्जयेदिति। शालांकिः। कुथारकान्कुलित्थांश्च चणकान्कोद्रवांस्तथा। अन्नतं
बहुवादं च क्रयविक्रयमेव च। दंतधावनं चपुर्वेऽधुर्यागस्यैतानि वर्जयेत्। मसुरान्लवणान्क्षारा
न्चणकान्कोरदूषकान्। माषान्मधुपरान्नं च वर्जयेत्सर्वमिति द्विजः। बौधायनः। सर्वमेवैतदेहः कौशी

धान्यं विवर्जयेदन्यच्चतिलेभ्य इति। कात्यायनोपि। लवणं मधुमांसं च क्षारान्सर्वोयेनाद्यते उपवासे
न भुंजीत नो रात्रौ नान्नं चनेनेति। तथा। शाकं मांसं मसूरं च चणकं कोरदूषकान्। माषान्मधुपरान्नं च
वर्जयेदौपवस्तके। तथा। अमासु तु खिलाप्य छंपरा न्नानि चसंसजेदिति। तथा। तिलमुद्गादृते शैव्यं
सस्ये गोधूमकोद्रवौ। चणकं देवधान्यं च सर्वशमनकं तथैवं च। सजिक्षारं यवक्षारं टङ्कणक्षारमे
व च। व्रत ■ स्थो वर्जयेन्नित्यं सामुद्रं लवणं तथेति। अत्र सामुद्रं लवणं तथेति विशेषोपादाना
सैंधवमानसादेरनिषेधः प्रतीयते। तस्य हविष्यत्वात्। तथा चोक्तं। मुन्यन्नानि पयः सोमो मांसं
यच्चानुपस्कृतं। अक्षारलवणं यच्च अमानससंभवं। पवित्रे परमे ह्येते प्रसक्तमपि सर्वद
ति। सर्पिर्विसनेन नियमः क्रियते सर्पिषा युक्तमेव न मश्नीयादिति। अतोर्थात्तैलादिनिवारितं भवति
। मानवे। पाणिप्रक्षाल्योपवसथ्यमन्नशनमश्नीतो न च माषेभ्यो मांसाच्च। सर्पिर्मसौ णमास्याभु
क्षानसुहितौ स्याताम् इति। आपस्तंबसूत्रे च। पुरावर्हिषः आहूतौ जायापत्नी मश्नीतः पुरावस्तानाम
पाकृतीरमभावास्यायां पौर्णमास्यायोपवस्ते तौ नातिसुहितौ भवतो माषमांसमाज्येनाश्नीयातां त

दभावे रथ्यापयसावे। अतः पौर्णमासी व्रत एव सुहितान्विसयं नियमः। नदर्शे। कुतः। प्रकरणाविरो
धेऽपि वाक्यस्य बलीयस्त्वात्। तथा च श्रूयते। सर्वे पौर्णमासे नोपवसेत्य नसत्रासुहितस्स्यादिति श्रु
तेः। पितृभुसाचार्या अप्येवमेव व्याख्यातवंतः। अयं च रागप्राप्त एव नित्येऽशने सर्पिरादिनियमः
कृतार्थो विधीयते। अशनं पुरुषार्थ[illegible]मेव। तेनासामर्थ्यादिना यद्यशनं कर्तुं न शक्यते तदा नियमा
नुग्रहार्थमशनं न कर्तव्यं। नहि नियमार्थो क्रियाप्रवृत्तिः। नियमस्य क्रियांगत्वादिति। अयमेवार्थमा
हाप्युर्तस्वामिभाष्ये। अशनं स्तुरक्षितिचानार्थंत[illegible] स्यास्मिन्काले नियमः सत्याभिधायां श्रुवि
च। अतो नावर्त्तत इष्टिबहुत्वेऽपि॥ ॥अन्तरेणाग्नी गत्वापरेणाहवनीयं प्राङ्मुखस्तिष्ठन्नग्निमीक्षमाणो
ऽप उपस्पृश्य व्रतमुपैत्यग्ने व्रतपत इदमहमिति वा॥ ॥व्रतसाशनानंतरं यजमानोऽपराग्नी गा
र्हपत्यदक्षिणाग्नी अंतरेण तयोरंतरालमार्गेण गत्वा आहवनीयमपरेण आहवनीयापरस्मि
न्प्रदेशेऽदूरे प्राङ्मुखस्तिष्ठन्नभिमुखस्तिष्ठन्नग्निमाहवनीयमीक्षमाणो विलोकयन्नपऽउपस्पृश्यो
दकं स्पृष्ट्वाऽग्ने व्रतपते व्रतमिति मंत्रेण वा इदमहमनृतादिति मंत्रेण वा व्रतमुपैति शास्त्रे

दे॰ भा॰ २

२ध्व–त्तरेणाहवनीयं च [illegible] गार्हपत्यं च प्राङ्मुखः प्रपद्य पश्यत्यन्ति। सोऽग्निमेवाभीक्षमाणो व्रतमुपैमि २

हिंसासत्यादिनियममंगीकरोति। व्रतशब्देन कर्मांगभूताः शास्त्रतो नियमा उच्यंते। कर्मांगभूताय मानि
यमाय व्रतं तदुपगमार्थो ऽग्ने व्रतपत इत्ययं मंत्रः इति तंत्ररत्ने उक्तं। व्रतमुपैष्यन्नग्ने व्रतपते व्रतं चरिष्या
मीति इमं मंत्रमन्तराहवनीयसमुपैमीति च श्रुतत्वात्। आपस्तंबः। बर्हिषी आच्छेतेषु पौर्णमासे व्रतमुपैति
वत्सेष्वपाकृतेष्वमावास्यायां प्रणीतासु प्रणीयमानास्वासन्नेषु वा हविःषु व्रतमुपैत्युभयत्र साधा
रणमनशनमग्न्याधानं व्रतोपायनमित्येके। व्रतोपायनमशनमग्न्याधानमित्येके। अग्न्याधा
धानं व्रतोपायनमशनमित्येके। पयस्वती रोषधय इत्यप आचम्य सुपस्थश्यत्त्वापरेणाहवनीयं दक्षि
णाति क्रामेदित्येकेवा तदूर्ध्वं यजमानस्य संचरो भवतीति। अत्र प्राङ्मुखतिनवाच्यं। आहवनीयमपरेण [illegible]
तिष्ठतोऽग्नीक्षणविध्यानसामर्थ्यादेव पूर्वाभिमुखतायाः [illegible] प्राप्तत्वात्। ससं। प्रोषित तस्यापि यजमानस्य
व्रतोपायने प्राङ्मुखत्वविध्यानार्थं प्राङ्मुख इत्युक्तं। अत एव व्रतादन्यथ्यानसमानं सागादिकमग्निदिङ्मु
खेनैव कर्तव्यं प्रवसतेति गम्यते। तथा चोक्तं। सर्वदा यजमानो वासने तद्दिङ्मुखः स्युरिति। आ
पस्तंबोपि। प्रवसन्काले विहाराभिमुखो याजमानं जपति। प्राङ् विष्णुक्रमान्क्रामति प्राङ्मुखो देसगो

चिर
७

मतीऽपतीति। वरुणप्रघासेऽध्वाग्निप्रणयनानंतरं यदा व्रतोपायनं क्रियते तदा उत्तरवेदिकाहवनीय
पश्चाद्दूरे तिष्ठंस्तमेवेक्षते तत्रैव हविषां श्रुतस्स्यात्। तेन पुरस्तात्तदिदमर्थवादाच्च। उदकस्पर्शमा
त्रमित्यपरे। तेन पुरस्तादिदमर्थवादस्तु दीक्षाकालीनस्नाने पावनत्वादाख्येयः। न[illegible]त्रा व्यत्यये वार्थवा
दस्य श्रव[illegible]णात्॥ ॥सत्यवाद्यतः॥ ॥अतःपरं यजमानः सत्यवादी स्यात्। सत्यं यथार्थवचनं। सत्यै
सत्यमेव वदेदिति श्रुतेः। सत्यं यथार्थवचनं। एवशब्दः प्रतिपक्षभूतानृतनिवृत्त्यर्थः। ननु पुरुषस्योप
नयनप्रभृत्यामरणाद्दृष्टं तत्तदेव सत्यवदनं प्राप्तमेव। यथाग्न्याध्यानोत्तरकालं द्वितीयं सत्यवदनं या
वज्जीवं विहितमस्ति। तस्यानादेतस्याग्न्याधेयस्य सत्यमेनोपचारः सत्यं वदनीति। तथा च वक्ष्यति
सूत्रकारः। [illegible] अनृतातिथ्यपनोदप्रतिदानबीभत्सपत्नाभ्युदकान्निवर्जयेदिति। तदिममर्थं
सत्यवदनं विधीयत इत्याशंकायामाह॥ ॥कर्मांगत्वात्सत्यवदनं॥ ॥व्रतोपायनादुत्तरकाले सत्य
वदनं तत्कर्मांगं यच्चोपनयनोत्तरकालीनं अग्न्याधेयोत्तरकालीनं तत्तु पुरुषः। यदीदमपि पुरुषध
र्मतेनोपदिश्येत तत[illegible] तदुपदिष्टस्योपदेशोऽनर्थकस्स्यात्। कर्मांगत्वेन चेदिदमप्राप्तं पुनरुपदिश्यते॥

धर्मस्य । कः पुनर्विशेषः कृतार्थपुरुषार्थयोरुच्यते । पुरुषे वदने सति तदपचारे कृते किमपि वैगुण्यं न भवति । वै
परीत्ये च न सगुणत्वं । क्रतुधर्मे पुनः ससवदने सति तदपचारे प्रयाजाद्यपचार इव क्रतोर्वैगुण्यं भव
ति । अनपचारे च न सगुणत्वं प्रायश्चित्तगतविशेषः कर्मांगत्वे कर्मांगापचारनिमित्तं श्रौतं प्रायश्चि
त्तं भवति । पुरुषार्थस्मार्तससवदनापचारे स्मार्तमेवेति । न च व्याख्यानोत्तरकालीनं ससवदनं
तदपचारे श्रौतमपि प्रायश्चित्तं भवत्येव ॥ न तदर्थं पुनरेतत्सूत्रं कर्तव्यं । सत्यं । कर्मांगत्वाय आ
र्ग्वैदिकयाजुर्वैदिकहौत्रादिविशेषः । तद्विशेषनिमित्तं विशिष्टप्रायश्चित्तं यथा स्यादित्येवमर्थः पुनः
कर्मांगत्वेनोपदेशः । तथा चार्ग्वेदिके सामिधेन्यनुवचनादौ कर्मणि क्रियमाणे यदि ससवदनापचा
रः स्यात्तदा होत्रिके भूः स्वाहेति प्रायश्चित्तं भवति । याजुर्वैदिकप्रणीताप्रणयनपरिस्तरणादौ क्रियमा
णे ससवदनापचारे तु भुवः स्वाहेति । सामवेदविहितब्रह्मत्वादिकर्मणि क्रियमाणे ससवदनापचा
रे तु स्वः स्वाहेति । पुरुषधर्मे पुनः स्वकर्ममध्ये तदपचारनिमित्तं प्रायश्चित्तं नैव प्राप्नोति क्रतुवै
गुण्याभावात् व्यवधानाच्च ॥ ॥ वत्सारण्येषधीनामधीयाद्धा ॥ ॥ अहर्भोजने नियमवि

शेषडन्नः। इदानीमवसरप्राप्तं सायाशने विशेषउच्यते। वक्ष्ये भवं वक्ष्यं सायं वा आरण्यौषधीनां व
श्यामाकादीनामारण्यौषधीनां श्यामाकनीवारादिप्रभृतीनां संबंधी किंचिदश्नीयाद्वा यजमानः न
नाश्नीयादिति विकल्पः। अथातोऽशनाशनस्यैवेति प्रवृत्तस्य सनाऽरण्यमेवाश्नीया ■ धानारण्या
ओषधयो यद्वा वक्ष्यमिति श्रुतत्वात्। अथातोऽशनाशनस्यैवेति अत्र चतसृभिः कंडिकाभिर्गृहीतव्रत
स्य यजमानस्य सायाशने आर[illegible]न्नियम्यत इति हरिस्वामिनः। अत्रारण्याशनं विहितं। अष्टाध्यायां
तु यद्यारण्या ओषधीरश्नाति वर्हिर्षो मेध्यमश्नाति यदि वानस्पत्यमश्नाति मेध्यमश्नातीति
वक्ष्यारण्यानिर्दिष्ट स्वयं हैवैते रात्री अग्निहोत्रं जुहुयात् सयदुग्धापाश्नाति तेऽपि नान्देवत्सो भवतीति
श्रुतत्वात्। अतो विकल्पः सूचितः। आपस्तंबः। आरण्यं सायमश्नोऽश्नात् माषमांसमपि वा काममाषा
मार्गा दामधुत आप्रशनाति काद यो न वा किंचिच्चन तस्य सायमश्नीयात्। येन प्रातर्वक्ष्यमाणः स्यादारण्या
योपवत्स्यन्नयोऽश्नातिन्वेति। ने सायमश्नीयात्ता मारण्यं वायस्य च श्वो यक्ष्यमाणः स्यान्नतस्य सा
यमश्नीयादिति मानवे। यद्यपि स्वश्रुत्यापस्तंबमानवसूत्रेषु सायाशन एव प्रातहोष्यमाणस्य द्रव्य

स्यप्रतिषेधः प्रतीयते तथापि शांखायनसूत्रे मध्याह्ने दिनिषेधो दृश्यते । तत्सूत्रं प्रागुदाहृतं ॥ ध
॥ आहवनीयगृहशय्याध्यः ॥ ॥ रात्रौ सपत्नीको यजमानो अधो भूमौ आहवनीयगृहशाय्यी स्या
त् । आहवनीयागारे अधो भूमौ शयीतेत्यर्थः । अध्वरलिनिसखट्वाद्यपेक्षया नीयलाइमाविसर्थः । या
वद्यंत धीनलक्षणवस्त्रादि खरस्थाग्न्यपेक्षया नीचं भवति तावन्नविरुध्यते । नादर्शांतापि लोके त्रे
यमामुच्चारदर्शनात् । आत्मापेक्षयाप्रशस्ततरः श्रेयान् । आपस्तंबः । अमावास्यायां आगर्तापि वा
सुप्यादुपरिष्टेचन शयीतापि वापरिश्रयीत ब्रह्मचारिते नग्न्यादुभयत्र आगणमेके समामनंति ॥
आहवनीयागारे गार्हपत्यागारे शेतेत इति । मानवे च । अथव्रतचर्याहवनीयागारे धः शयीत गार्हपत्या
गारे पत्नीति ॥ ॥ गार्हपत्यस्य वा ॥ ॥ अथवा पत्नी यजमानौ गार्हपत्यस्य गृहे आगारे शयीयातां ।
स आहवनीयागारे वैतां रात्रिं शयीत गार्हपत्यागारे वा देवान्वा एष उपावर्तंते यो व्रतमुपैति स या
ते वो पावर्त्तते तेषामेवैतन्मध्ये शेते धः शयीताध्वः स्तात् किं वपि श्रेयस उपचार इति श्रवणात् । एतद्धा
धः शय्यां तं व्रतं यजमानस्य श्रूयते । तदेनमेतत्क्षत्रमुपयंतं विडप्रातर्नीय श्यत इत्सासनेपदप्रयो

गार्हस्वामिनमुपयंतं दर्शीति। एत[न्] मेव चोपेतव्रतमधिकृत्यातःपरमशननियमइतियजमानः।
भत एव चोपेतव्रताधिकारादनुपेतव्रतस्य संध्योव्रतमुपैविषते। नारण्याशननाश्याया नियमो भवतः
मांसवर्जनं तु तस्यापि स्त्रीणां त्वांतरीयं भवति। उपेतव्रतसंयोगाभावात्। अतएवाहनि मांसमैथुने
वर्जयेदित्याह। उपेते चानुपेते चव्रतेतस्मिन्नहनीत्यभिप्रायइतिहरिस्वामिनः॥ ॥संध्योवा॥
अथ वा संध्य एव समानेहन्येव सर्वं भवति। पौर्णमासेय ध्युहः कर्तव्यं उत्तं तदेकस्मिन्नेवाहनि अ
ग्न्यन्वाधानादिकर्मापवर्गांतं भवतीसूर्यः। समानेहनीसर्थे स ध इति शब्दः संध्यः परुरित्यादि
नातिपातः। ननु य दासमानेह्नि सर्वं क्रियतेतदा किमग्न्यन्वाधानदिने सर्वं क्रियतेउतयागदिने
अग्न्यन्वाधानादि सर्वमिति संशयइत्याह॥ ॥प्रातः॥ ॥प्रातर्यागदिन एव प्रतिपद्दिन एव स
र्वमग्न्यन्वाधानादिकर्मापवर्गांतं कर्तव्यं॥ न पूर्वेद्युरग्न्यन्वाधानदिने। कुतः। प्रतिपदः प्रधानका
लत्वात्। अंगानां प्रधानकालत्वन्याय्यत्वात्। तत्र चव्रतोपायनीयाशनानारण्याशनान्यत्रागा
रशयनादिनभवंति। उक्तकालाभावात्। रागप्राप्तत्वैवैतेषु द्व्यादिषु नियममात्रविधानाच्च।

१

नर्हि रागसस्तदानीमशक्यतात्कानि प्राप्नुवंति। अन्यत्कल्पनादिसर्वं भवत्येव। व्यवस्थितविकल्पोयमितिके
चित्। तथा चाह कात्यायनः। संधिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः॥ सा पौर्णमासी विज्ञेया सद्य
स्कालविधौ तिथिरिति। तथा। पूर्णिमा प्रतिपत्संधिर्यदि संगवमंतरा। आवर्त्तनं च यस्यास्तर्हि
सद्यस्कालविधिर्भवेदिति। एतदपि वैकल्पिकं संध्यस्तदा वा क्रियते समस्तमिति वचनात्। अथ
वैकल्पमेवेदं सद्यस्कं कर्तव्यं। संध्या वा प्रातरिति। यदा प्रातरुत्तरो पर्वा सपक्षस्तदा संधेः समानेह्न्येव
सर्वं कर्तव्यं। न तु प्रतिपद्युपक्रम्य द्वितीयायां यागः। कुतः। पौर्णमास्यां पौर्णमास्या यजेतेति वचनात्।
प्रतिपत्सु गौणी पौर्णमास्येव अवश्यं ह्युपकर्षेऽपकर्षे वा कर्तव्ये युक्तं यदंगानां प्रधानं प्रत्युत्कर्ष इति॥ ५
अग्निहोत्रं हुत्वा ब्रह्माणं वृणीते वसिष्ठं॥ ॥ अत्रापि प्रातरित्यनुवर्तते। प्रातरग्निहोत्रं हुत्वा भूपते भु
वनपत इत्येवमादिना मंत्रेण यजमानो वसिष्ठं पुरुषं ब्रह्माणं वृणीते। यो वेदत्रयविहितं कर्म सम्यक्
जानातीति सोत्र वसिष्ठशब्देनोच्यते। तादृशस्यैव वेदत्रयविहितकर्मणां कृताकृतप्रत्यवेक्षणेऽधि
कारात्। अग्निहोत्रं हुत्वेत्येतद्दमावास्यार्थमुच्यते। अत्र प्रयोजनाभावात्। तत्रोदिते पौर्णमास्यतं १

त्रंप्रक्रमियादनुदित अमावास्येति। अतोमावास्येष्टौ अग्निहोत्रानंतर्यविधानार्थमग्निहोत्रं हुत्वेत्युक्तं। अ
नएव प्रातरिष्टेतदपि तदर्थमेव माभूत्सायमग्निहोत्रानंतरमेव वरणमिति। वरणं चान्वाधानादेव क
र्तव्यं। वितानस्योत्तरतः प्राङ्मुखोपविष्टं ब्रह्माणमुदङ्मुखोपविष्टो यजमानः स्फ्यं सव्येन गृहीत्वा द
क्षिणेन यवसहितेन ब्रह्मणो दक्षिणं जान्वालभ्य वृणीते। अमुकसगोत्र शर्मन् पौर्णमासेष्ट्या वयं य
क्ष्यामहे तत्र भूपते भुवनपत इत्यादिना मंत्रेण। वृणीमह इति वरणमंत्रे बहुवचनस्मरणा। तेन स्मा
नाधिकरण्यार्थं वयं यक्ष्यामह इति सर्वत्र वरणवाक्यप्रयोगो युक्तः। न चाहं यक्ष्ये अहं वा यक्ष्यामह
इति। अविरुद्धश्च बहुवचनांतः। तथा स्मर्यते। अस्मदो द्वयोश्चेति अस्मद एकस्मिन्नर्थे द्वयोश्चार्थ
योर्बहुवचनं स्यादित्यर्थः। एतच्च यजमानः करोति। दानवाचनेत्यादि परिभाषितत्वात्। एतच्च व
रणमपवृत्तस्य ब्रह्मणः कर्मणि प्रवर्तनार्थं। तेनाग्न्याधेये ब्रह्मणः पूर्वमेव वृतत्वात्। वक्ष्यमाणेष्ट्या
दिषु ब्रह्मवरणाभावः। सोमयागे च दीक्षणीयाप्रायणीयादिषु। पुनराधेये चाग्नेये पंचकपाले॥
वृतो जपत्यहं भूपतिरहं भुवनपतिरहं महतो भूतपतिर्भूर्भुवः स्वर्देव सवितरेतं त्वा वृणते बृहस्पतिं

प्रह्माणं तदहं मनसे प्रब्रवीमि मनो गायत्र्यै गायत्री त्रिष्टुभे त्रिष्टुब्जगत्यै जगत्यनुष्टुभे अनुष्टुप्प्रजापतये प्रजा
पतिर्विश्वेभ्यो देवेभ्यो बृहस्पतिर्ब्रह्मणां ब्रह्माहं मनुष्याणामिति॥ ॥सवनो ब्रह्मा अहं भूपतिरि
त्यादिकं मंत्रं जपति। ब्रह्मणश्च वरणजपयोः प्राप्तियोगपद्ये सिध्यर्थं यदा वृतस्तदा जपति तेन वरणा
त्ते एव मानेष्ट्यादौ च जपस्याप्यभावः सिद्धमिति॥ ॥वाचस्पते यज्ञं गोपाय स्वाहा॥ ॥ततो ब्रह्मात
त्रोपविश्य वाचस्पते यज्ञं गोपायेतीमं मंत्रं आह ब्रवीति। केचिद्यजमानमेवमिच्छंति। तन्ना
कृतः। कण्वानां ह्येवं प्रख्यते देवस वितरिसु वा वाचस्पते यज्ञं गोपाय स्वाहेति अतो ब्रह्मैवाह इति
जपशेषत्वा जपे ससस्य प्रवृत्तिः। जपशेषत्वाच्च स्यादेव काण्वीयानां इति याज्ञिकाः। सूत्रका
रस्याप्ययमेवाभिप्रायो येन व[illegible] सेतद्ब्रह्ममिति वचोरिति। एवं च ससतिये चात्र यजमानः
कर्ता भविष्यत्तदा स ऊहणमकरिष्यन्न चवक्तं। तस्माद्ब्रह्मण एवात्र कर्तृत्वमिति॥ ॥अपरेणा
हवनीयं दक्षिणातिक्रामति॥ ॥दक्षिणतो ब्रह्मयजमानयोरासने इति परिभाषितत्वात्। ब्रह्मा
सनं दक्षिण[illegible]तोस्ति। उत्तरत उपचारो यज्ञ इति परिभाषणाद्ब्रह्मवरणमुत्तरतः। अतउ
पवेशनाया वाश्यं दक्षिणतो ब्रह्मणा गंतव्यं। तत्र मार्गविशेषमाह। आहवनीयमपरेण वा दक्षिणेनेति।

दक्षिणाग्निसाचमसयोरंतरमध्यायंसप्तम्यर्थे। दक्षिणस्यां दिश्यतिक्रामतिवा। आहवनीयं पूर्वेणेति वच
नाद्यगार्हपत्याहवनीययोरंतरालेगमनेप्यदोषः॥ ॥ ओंहैदेधिषव्योदनस्तिष्ठान्यस्य सदनेसीद्यो
स्माकं तरइतिब्रह्मसदनमीक्षते॥ ॥ ओंहैदेधिषव्यइतिअनेनमंत्रेणब्रह्मा ब्रह्मसदनं ब्रह्मोपवे
शनार्थं चात्वालादिवक्षाभ्दर्भं कुशास्तृतं प्रागग्रमासनं ईक्षते पिलोकयेदेव॥ ॥ ब्रह्मसदनात्तृणं
निरस्यति निरस्तः पराव्रासहतेनयंद्विष्मइति॥ ॥ ईक्षणानंतरं ब्रह्मा निरस्तः पराव्रसुरितिमंत्रेण
ब्रह्मसदनादेकं तृणं निरस्यति नैरृत्यां दिशि प्रक्षिपति। शांखायनेदर्शनात्। समानं हौत्रात्तृणनि
रसनमिति होतुरप्युपदिष्टं होतृषदनाद्धुष्टुं तृणमुभयतः प्रच्छिद्य दक्षिणापरमवांतरदेशे निरस्ये
ति। कात्यायनेप्येवमेवास्ति। तस्मात्तृणमादायोभयतः प्रच्छिद्य दक्षिणा तस्तृणं निरस्यतीति। मानवे च।
आसनात्तृणमुभयतः प्रच्छिद्य निरस्तः परावसुः सहपाप्मनेति दक्षिणाप्रत्यस्याभ्येन निरस्यतीति।
अतएव तृणनिरसनोपदेशात् आसनादिकुशास्तीर्णानि कार्याणीति गम्यते। यद्यथा तत्र तृणनिर
सनं संभवति। अतो ऽपगतानि ब्रह्मवरणात्प्रागेवोपकल्पनीयानीति। अर्थप्रसंख्यानाद्भ्योप

पकूल्पनमिसुक्तेः। दे आसने विहरस्योत्तरतो ब्रह्मयजमानयोर्वरणार्थे। दे चदक्षिणतस्तयोरुपवे
शनार्थे। दे चाध्वर्योरुपवेशनार्थे। एवं च गार्हपत्यस्योत्तरतः। द्वितीयमाहवनीयसमीपेवेदेरु
त्तरतइति॥ ॥इदमहं बृहस्पतेः सदसिसीदामिप्रसुतोदेवेनविंसेत्रातदग्नयेप्रब्रवीमितद्वायवे
तत्पृथिव्याइति॥१॥ ब्रह्मसदनआहवनीयमभिमुखउपविशति॥ ॥इदमहमिसनेनमंत्रेणब्र
ह्मा ब्रह्मसदने आहवनीयमभिमुख आहवनीयसंमुखउपविशति। प्रस्तुते एव ब्रह्मसदनेपुन
र्ग्रहणंनियमार्थं॥ ब्रह्मसदने एव यदाउपविशति तदाहवनीयाभिमुखो नरथचक्रा ■ दौ। ध्रुं
देगसुतेत्पुपरिध्यावांसध्विरत्रुचांवामाणिडत्करंवाभिमुखउपविशतीतिविशेषः। मानवे
विशेषः। ब्रह्मण्युपचरसन्यस्यवाकर्मकुर्वाणयोनेदीष्टाऋत्विजां स्याद्गपासीतापिवादर्भमु
ष्टिमुदपात्रंवाब्रह्मसदने न्यस्येदशून्यासनमेवंस्यादिति॥ ॥वाक्यतआनुयाजप्रसवात्॥ ॥
इतः प्रभृतिआनुयाजप्रसवात् ब्रह्मावाक्यतः कृतवाग्यमस्यादित्ति। ब्रह्मन्प्रस्थास्यामीत्येतल्लैष
पर्यंतमि■सर्थः॥ ॥भागपरिहरणादिवा॥ ॥अथवाभागमस्यपरिहरतीत्येत ■■ स्याभ्य

गपरिहरणादारभ्या प्रसवाद्ब्र[illegible]ह्मभागप्यतो भवति। नादित आरभ्य। कुतः। अथास्मै ब्रह्मभा
गं पर्याहरंतीति प्रक्र[illegible]ससैवाचं यम एवस्याद्ब्रह्म प्रस्थास्यामीसत्तस्माद्वचसइति श्रुतत्वा
त्। आप्रसवादितिमर्यादायामाङ्। नत्वभिविधौ। तथादृष्टत्वात्। मत्रवाशब्दो वधारणे। तेन
भागपरिहरणाद्येवनाक्यतो भवतीति सिद्धांतः॥ ॥आवत्तावषट्कारासु॥ ॥पुर्णाहुतिषु
पाहुतिषट्होतारा हुतिसाविश्याहु[illegible]सोष्याहुतयोऽवषट्काराः तास्ववषट्कास्वाहुतिषु ब्रह्मवरणा
द्युपवेशनांतमावृत्तानुष्णीममंत्रकं क्रियामात्रेण सर्वं कर्तव्यं। तुष्णीवरणं ब्रह्मसदनेस्त
णं तृणनिरसनमुपवेशनं च। आवर्धन्वस समस्तममंत्रकं विधिमाह। शाखांतरे तुष्णी
श्रवणादाचार्यप्रयत्ना अनुष्णीमिति गम्यते। आव[illegible]ट्कारासु चेसे नावतैव कर्मसमं
त्रकं प्राप्नोसेव॥ ॥अत्रवाग्व्रतोपायनं॥ ॥अस्मिन्नवसरे वा ब्रह्मवरणोत्तरकालं ब्रह्मणि
स्वासनउपविष्टे सति यजमानः यथोक्तं व्रतोपायनं करोति वा पूर्वदिन एव। पुर्वं ह्युक्तं मंतरे
णापरागनीग हापरे हवनीयं प्राङ्तिष्ठन्नग्निमीक्षमाणोपउपस्थ। स्यव्रतमुपैस्यग्ने व्रतपतइदम

न्भिप्तिवेत्ति। वाशब्दो विकल्पार्थः॥ ॥व्याहृसनैष्णवं मंत्रं जपेत्॥ ॥ब्रह्मा वाग्यतः सन्व्याहृस
ब्रांसानाचं विसृज्य मानुषीं वाचं [illegible] मुच्चार्य वैष्णवं विष्णुदेवत्यं प्राकरणिकमेनं मंत्रं जपे
त्। स वै वाचंयम एव स्यादिति प्रकृत्य स यदि पुरा मानुषीं वाचं व्याहरेत्तत्रो वैष्णवीमृचं वा या
जुर्वा जपेदिति श्रुतत्वात्। मानुषीं मनुष्यलुब्धप्रभवां संस्कृतामपि। वैदिकाक्षरव्यतिरिक्ता
।कात्यायनः। शुचिर्वाग्यतः शालीस्यान्नायज्ञियां वाचं ब्रूयाद्वैष्णवीमृचं याजुर्वा जपेदिति वान
मो विष्णवे रसे वज्रुयाद्दिति॥ ॥अध्वर्युश्च॥ ॥अध्वर्योरपि शूर्पाग्निहोत्रहवण्यो राद्दानानं
तरं हविष्कृदाह्वानं यावद्वाग्यमनं वक्ष्यति तस्मिन्वाग्यमनेऽध्वर्युर्व्याहृसब्रांसा वाचं वि
सृज्य मानुषीं वाचमुच्चार्य चकाराद्वैष्णवं मंत्रं जपेत्। अत्रापि श्रूयते। यां वा अमुं हविर्गृही
ष्यन्वाचं यच्छति तां विसृजत इति प्रकृत्य स यदि पुरा मानुषीं वाचं व्याहरेत्तत्रो वैष्णवीमृ
चं यो यो जुर्वा जपेदिति। केचिच्चकारेण यजमानश्चेति व्याचक्षते। यजमानस्यापि दी
क्षाकाले अंगुलयं च नोत्तरकालमास्तमयाद्वाग्यमनं विहितमस्ति। तस्मिन्वाग्यमने सति

यजमानो व्याहृतः सर्वैष्णवं मंत्रं जपेत्। अत्रापि हि श्रूयते। अथ यद्वाचंयमो निरति प्रक्रम्य अथ यद्वा
चंयमो व्याहरति तस्मादुहैष विस्रष्टो यज्ञः पराङ् वर्तते तत्रो वै ष्णवीमृचं वा यजुर्वा जपेदिति।
यजमानवाचंयमस्य स्वहस्ते घेवा यमस्यापचारे हाध्वर्युरेवमेन भवति। शाखांतरेतु सामान्येन
वाग्यमलोपे वैष्णवमंत्रजपः प्रोक्तोऽस्ति अकाले वाचं विसृज्य वैष्णवीं निगद्य पुनर्यच्छेदिति।
पठ्यते
आपस्तंबः। ब्रह्माणं प्रवृक्तः श्रूयते। आहवनीयमभ्यावृत्यास्ते कर्मणि वाचंयच्छति मंत्रवसु
कमसु यथाकामी तुष्णीं वेषुयत्क्षिप्रमतो व्याहरेद्वैष्णवीमृचं व्याहृतीं यजुर्वा वाचंयच्छती
ति॥ ॥प्रणयय संदेवतावद्भिः यत्तं नाकस्य पृष्ठे यजमानो अस्तु॥ सप्त ऋषीणां सुकृतां यत्र लोक
स्तत्रेमं यज्ञं यजमानं धेहीतो प्रणयेति प्रणीताः प्रसौति॥ ॥ब्रह्म चपः प्रणेष्यामीत्यध्वर्युणामंत्रितो
ब्रह्मा प्रणयज्ञमिति समं मंत्रं पठित्वा ॐ प्रणयेत्यनेन प्रणीताः प्रणीयमानाः प्रसौति अनुमानात्॥
अनेकयजमानके स्यमंत्रस्योहो भवति। यजमानोऽस्तां यजमानौ धेहीति द्वियजमानके। अहीने
ग्गकुलीयायो यजमानाः संतु यजमानान् धेहीति बहुयजमानके ऽहीनसत्रगणयज्ञादौ॥

एवमामंत्रितओंकारेण॥ ॥वक्ष्यमाणेषु हविःप्रोक्षणपरिग्रहेध्माबर्हिःप्रोक्षणसामिधेन्यनुवचने
षु आमंत्रित इदं करिष्यामीसेवंपृष्टो ब्रह्मा एवममुनैवप्रकारेण ओं मध्यमपुरुषैकवचनेन ओंका
३ रेण ओं भारप्रयुक्तेन प्रसौति। तत्र च। ओं परिगृहाण। ओं ३ अनुब्रूहीसेवंशब्दस्यार्थः॥ ॥प्रोक्षयज्ञमिति
४ प्रो हवींषि॥ ॥हवींषि हविःप्रोक्षणेऽध्वर्युणा ब्रह्मन् हवींषि प्रोक्षिष्यामीसेवमामंत्रितो ब्रह्मा प्रोक्षयज्ञमि
ति मंत्रेण प्रसौति॥ ॥इध्माबर्हिषी च॥ ॥इध्माबर्हिषी च प्रोक्षणे ब्रह्मन्निध्मं प्रोक्षिष्यामीसे
वमध्वर्युणामंत्रितो ब्रह्मा चकारात्प्रोक्षयज्ञमिसेनेन मंत्रेण प्रसौति॥ ॥ब्रह्मस्वातेपरिगृहाणवेदि
ं सुगावोदेवाः सदनानिसंतस्यां बर्हिःप्रथतां स्वाध्वनार्दिं स्वाप्यथिवीं देवीं देव्यस्त्विति वेदिंपरि
गृह्णंतं॥ ॥ब्रह्मन्पूर्वपरिग्रहंपरिगृहीष्यामि ब्रह्मन्नुत्तरंपरिग्रहं परिगृहीष्यामीसेवंपृष्टो ब्रह्मा
वेद्यंपरिगृह्णंतं वेदः परिग्रहं कुर्वंतं मध्वर्युं ब्रह्मस्वातेपरिगृहाणेसेवमादिना मंत्रेण प्रसौति॥ ॥प्रजा
पतेनुब्रूहियज्ञमितिसामिधेनीरनुवक्ष्यंतं॥ ॥ब्रह्मन्सामिधेनीरनुवक्ष्यामीसेवं होत्रामंत्रितो ब्र १४
ह्मा सामिधेनीरनुवक्ष्यंतं सामिधेनीनामनुवचनं करिष्यंतं होतारं प्रजापतेऽनुब्रूहियज्ञमिसेनेन

मंत्रेण प्रसौति॥ ॥देवतावर्द्धं यः इत्यमिति सर्वत्रानुषजति॥ ॥सर्वत्र पूर्वोक्तेषु प्रोक्षयज्ञमिसा
दिकेषु सर्वेषु त्रिषु पि मंत्रेषु देवतावर्द्धं यत भा दूस्येत्या दिकं मंत्रं यजमानं चप्येही संतमनुषजति
।सयोजयतीत्यर्थः। तत अप्रोक्षयज्ञं देवतावर्द्धं यहं पृथिवीदे वीदेव्यस्तु देवतावर्द्धं यहं प्रजापते
नु बुद्धिय ज्ञं देवतावर्द्धं यहं रस्येवं सिध्यति। अत्र वरुणप्रघासेषु ध्वर्युद्धिले ध्वर्युपरं व चनंद्वि
च नांतमुहं। ॐ प्रोक्षतमिति। अनेकयजमानके सत्राहीनादौ नानागार्हपत्ये प्रसाग्नि स्तवनीयपुरो
डाशेषु दवसानीयासु च बहुनो भवंति॥ विरोधात्। तत्र ब्रह्म हविः प्रोक्षिष्या मइत्यामंत्रणे। प्रोक्ष
तयज्ञं देवतावर्द्धं यत्तसु यभाक स्वष्ट ष्टे यजमानाः संतु। यजमानां श्च प्यत। ॐ प्रोक्षतेति। वरु
णप्रघासेषु पूर्वोत्तरपरिग्रहेषु ध्वर्युपरं वेदिपरं च व चनं द्विवचनांतमुहं। तत्र ब्रह्म पूर्वापरि
ग्रहोपार ग्रहीष्याव इति। ब्रह्म नुत्तरोपरिग्रहोपरिग्रहीष्याव इत्यामंत्रणे। ॐ बृहस्पतीप रिग्रहं
तं वेदी सुगावो देवाः सदनानि संतु तनयो वर्हिषी प्र थेनां स्याव्वं न र्हिं रस्ये द व्यो देवो दे व्यो
तदे स्तां वसावर्द्धं यतं युवा भाक स्येत्यादि यजमानं च प्यतं। ॐ परि गृह्णी तामिति। ॐ डमा यिनामय

न्येयजमानपरेन्च। इध्माबर्हिषोः प्रोक्षणे हविःप्रोक्षणवदूहः। अनेन यजमानके बर्हिषि ध्रुवसामीप्यास्रुवाध्व
र्युस्रुपरिग्रहे बृहस्पतयः परिगृह्णीतं वेदीं सुगावो देवाः सदनानि सन्त्वास्मिन्वर्हिषि प्रथंतां साध्वंतरि
ं स्नाप्यध्विध्वो देव्यो देव्यः संतु देवतावर्धयत स्रुवं भागस्य पृष्ठे यजमानाः संतु। यजमानां श्वयता भं
परिगृह्णीतेति। इध्माबर्हिषोः प्रोक्षणे हविःप्रोक्षणवत्। सुगावो देवाः पितरः सदनानीति महापितृयज्ञे
ऊहइस्यनेन याज्ञिकाः प्राहुः। हरिस्वामिमते वरुणप्रघासेषु कुम्भ्यामुहो न भवति। तच्चास्य युक्तिकं चातुर्मा
स्यप्रकरणे एव वक्ष्यामः। याज्ञिकानां मते ब्रह्मत्वमंत्रेषु वरुणप्रघासेषु ऊहभावः॥ ॥मित्रस्य त्वा चक्षु
षा प्रतीक्ष इति प्राशित्रं प्रतीक्षते॥ ॥मित्रस्येत्यनेन मंत्रेण ब्रह्मा प्राशित्रमवदीयमानं आह्रि
यमाणं वा चक्षुषा प्रतीक्षते विलोकयति। तथाहापस्तंबः। मित्रस्य त्वा चक्षुषा प्रेक्ष इति प्राशित्रमवदी
यमानं प्रेक्षत इति। मानवे च। मित्रस्य त्वा चक्षुषा न्वीक्ष इति प्राशित्रमाह्रियमाणं प्रेक्षत इति। आश्व
लायने कण्ठे पंच। प्राशित्रमिति ब्रह्मणो भागस्य यवमात्रं पिप्पलमात्रं वा वत्तस्य नामधेयं सव्य
वहारार्थं न प्राशित्रमिति तं भवतीत्यादे॥ ॥देवस्य त्वेति प्रतिगृह्णाति॥ ॥नदध्वर्युणा समर्प्यमाणं

प्राशित्रं बिलात्यदेवस्य होतिमंत्रेणांजलिना सपात्रं प्रतिगृह्णाति तत्प्राशित्रं गृह्णाति देवस्य त्वेसादि श्रु
तत्वात्। आश्वलायनसूत्रे। प्राशित्रमाह्रियमाणमीक्षते मित्रस्य त्वा चक्षुषा प्रतीक्ष इति देवस्य
त्वा गृह्णामीति तदंजलिना प्रतिगृह्य पृथिव्यास्त्वेति कुशेषु प्राग्दंडं निधायांगुष्ठोपकनिष्ठिका
भ्यामसं■■ स्वादन्प्राश्नीयादग्नेष्ट्वेति। वैतानसूत्रे च। व्युह्य तृणानि प्राग्दंडं स्थंडिले निदध्या
त्पृथिव्यास्त्वेति। अत्र भक्षणपक्षे प्यासादनमुक्तं। पृथिव्यास्त्वेति सादयत्यपो वा बर्हिषि॥ ब्रह्मा
तत्प्राशित्रं प्रतिगृह्य वेदेर्दक्षिणोदेशे स्तृतानि बर्हींषि व्यपोह्यापसार्य पृथिव्यास्त्वेति मंत्रेण तत्रो
सृदेशे प्राशित्रं प्राग्दंडं सादयति ब्रह्मैव सपात्रं। कुतः प्राग्दंडं सादयतीति। आश्वलायनादिसू
त्रेषु प्राग्दंडं निधायेति दर्शनात्॥ ॥ पुनरादाय देवस्य त्वेत्यनामांगुष्ठाभ्याम अग्नेष्ट्वेति प्राश्नाति दंतैर
नुपस्पृशन्नत्र चेत्॥ ॥ अत्रावशिष्टमवसरे चेत्प्राशित्रं ब्रह्मा प्राश्नाति तदा देवस्य त्वेत्यनेन मं
त्रेण पुनरनामिकांगुष्ठाभ्यां पात्रान्मध्यमादायाग्नेष्ट्वेत्यनेन मंत्रेण दंतैरनुपस्पृशन्नर्वायन्त
त्प्राशित्रं प्राश्नाति भक्षयति। तत्प्राश्नात्यग्नेष्ट्वास्येन प्राश्नामीति तन्नत्वाद्भिः स्वादेदिति श्रुतत्वात्॥

निदध्याति वा ऽसंदेशे॥ ॥यद्येव त्रेनप्राश्नाति तदा संदेशे निदध्याति आसादयति। वाशब्दो विक-
ल्पार्थः। पूर्वमासादनमुक्तं परं तु स्थानं नोक्तं तदिहोच्यते। यदि [illegible] तरे प्राशनं तदर्थं तदा प्रतिगृह्य
संदेशे निदध्याति। एवं च सादनपक्षे ऽपरिष्टादेव प्राशनं मात्रं। एवं सादस्य दृष्टार्थता भवति। इतरथा
हि अदृष्टार्थता स्यात्। कालांतरे प्राशित्रस्य प्राशनं सूत्रकारो वक्ष्यति। अथवा ब्रह्मा प्राश्नातीति। तेना
त्र भक्षणपक्षे प्रतिगृह्य सादनमकृत्वैव पुनर्द्रव्यमनामिकांगुष्ठाभ्यामादाय भक्ष्यः। कालांत
रे भक्षणपक्षे तं संदेशे आसादनमिति पितृभूतिः। कर्कश्च॥ अन्ये तत्र भक्षणपक्षे ऽप्यनियत
देशे सादनं। उपरिष्टाद्भक्षणपक्षे तं संदेशे निधानं प्रयत्नेन स्थापनं कर्तव्यमित्याहुः। तथा चैतो
न सूत्रे। ब्रह्मत्वानि प्रागदंडस्थंडिले निदध्याति पथि व्यासेति। अत्र भक्षणपक्षे प्यासादनमुक्तं
। श्रुतौ हि तत्प्रतिगृह्णाति यस्यानंतरं तं प्राश्नातीति श्रुतत्वात्। प्रतिग्रहणानंतरमेव भक्षणं तदनं
तरमेव भयास्मै ब्रह्मभागं पर्याहरंतीति श्रुतत्वाद्भागपरिहरणात्प्राक् प्राशित्रहरणं भक्षणीयं॥

अत एव सूत्रकृता विकल्प उक्तः॥ ॥प्रक्षाल्य पात्रं नाभिमालभेत या अपसंतरिति॥ ॥याअपसं

तरित्सनेन मंत्रेण। यामप्स्वंतर्देवतास्ताइदं हं शमयंतु स्वाहा। कृतं जठरमिंद्रस्य गच्छ परिनाभे
मा संप्तक्ष्णाऽऊर्ध्वं मे नाभेः सीदेन्द्रस्य त्वा जठरे सादयामीति॥ ॥ततो ब्रह्मा पात्रं प्राशित्रहरणं प्र
क्षालयत्यप्सु तरित्सनेन मंत्रेण नाभिमालभते मंत्रांते स्पृशति। पात्रमित्येकवचनं प्रासपेक्षं। कु
ण्डयोः प्राशित्रहरणेइति प्रतिपत्तौद्वयोः अवपात्। अतएकेन पात्रेणाभिध्यानं कार्यं। अपरस्मिंत्र
वदानमित्यनयोर्पात्रप्रक्षालनं। भक्षणानंतरं आचमनमर्थात्प्राप्तमिति न सूत्रितं। अथापआ
चामति अथपरिक्षालयपात्रमिति हि श्रूयते। पात्रप्रक्षालनं चोपकारे कर्तव्यो ऽकरो वा अलिरिक्तस
प्रतिष्ठेदस्युक्तत्वात्॥ ॥एतं तं नरति समिदा मंत्रितः प्रसौति॥ ॥समिधमादाय यदा मंत्रेण त
त्समिदामंत्रणं। समिदा मंत्रितः समिधमादाय अध्वर्युणा ब्रह्मन्प्रस्थास्यामीत्येवमामंत्रितो ब्रह्मा एत
तं तेदेव सवितरिति मंमंत्रं प्रतिष्ठाप्रसौति। सयत्राह ब्रह्मन्प्रस्थास्यामीत तद्ब्रह्मा अपत्येतं तन इति श्र
वणात्॥ ॥प्रतिष्ठेति ब्रूयाद्वा॥ ॥अत्र प्रतिष्ठेती मंमंत्रं ब्रूयाद्वानवेति विकल्पः। सयदि नानुमन्येत
ब्रूयात्प्रतिष्ठेति यद्युक्त[illegible] मये तापिनोऽङ्क्रियेतेति श्रुतत्वात्। वरुणप्रघासे प्रतिष्ठत्वमिति प्रयोगः।

सजेषु दवसान्नीयासुप्रतिष्ठ नेति॥ ॥कर्मापवर्गे समिध्यमादध्याज्जुहोत्युपतिष्ठेत वा नमः कृ
तायेत्यादिस्वाहेति यथेतत्तमेवैवमंत्रं सूत्रं॥ ॥नमः कृताय कर्मणे अकृताय कर्मणे नमः।
अयाश्चाग्ने जातवेदा अंतरः पूर्वो अस्मिन्निषद्य॥ सन्वन् सनिं सुविमुचा विमुंचधे
ह्यस्मे द्रविणं जातवेदः स्वाहा॥ ॥कर्मणोऽपवर्गः समाप्तिः कर्मापवर्गः। तस्मिन्कर्मापवर्गे समा
प्तौ ब्राह्मणतर्पणानंतरं ब्रह्मा यथेतमेव यथागतं प्रस्रागत्य वरणोत्तरकाले स्वासनऽपवेशा
नार्थं येन मार्गेण गतो भवति आहवनीयमपरेण वा पूर्वेण वा तेनैव मार्गेण प्रस्रागत्य नमः
कृतायेति मंत्रेणाहवनीये समिध्यमादध्याति। अथवा तेनैव मंत्रेणाज्यस्थाल्याः स्रुवेण
जुह्वां संगृह्य ■ तमाज्यं गृहीत्वा जुहोति। अथवा तेनैव मंत्रेणाहवनीयमुपतिष्ठते। होमप
क्षे इदं जातवेदस इति देवतोद्देशः। मंत्रलिंगात्। मंत्रमध्ये स्वाहाकाराम्नानमुपस्थानस
मिदाधानयोरपि प्राप्त्यर्थं। होमे तु परिषयैव स्वाहाकारस्य प्राप्तत्वात्। एतदारादुपकारकं कर्म
गप्रयाजादिवत्। अतश्चाग्रहोमे ध्रीयादौ यावदुक्तं तावधि ■ न्ने च पित्र्यादौ निवर्तते॥ ॥एत

मेतमिष्टिपश्वोः ॥ ॥ एतस्मागुक्तं व्रत जपा दिकमिष्टिपश्वोर्ब्राह्मणः कर्मसमर्थः। ब्राह्मण-
स्यार्त्विक्कर्मण्यनभ्यस्तस्य। नह्यिष्टिग्रहणं कर्तव्यं। कुतः प्राप्तत्वात्। पशुग्रहणमपि न कर्तव्यं।
प्रकृतिवदित्यतिदेशेन तत्रापि प्राप्तत्वात्। कर्तव्यं चाप पशुग्रहणं। पशुप्राशनेन ब्रह्मानुज्ञाप्राप्त्य
र्थं। अन्यथा पशोः सान्नाय्यविकारत्वात् सान्नाय्यस्य च प्राशनाभावात् प्राशनप्रसक्तावन्न
प्राप्नोति। अनुज्ञातु दुरापास्तैव। तस्मा ■■■■■■■■ दर्थं च स्वेतिपशुं प्राशनीभिः प्राशनी
सने नाविहितं पशोः प्राशनं ब्रह्मानुज्ञापूर्वकं यथा स्यादित्येवमर्थं पशुग्रहणं। इष्टिग्रहण
मपि कर्तव्यं। भक्ष्ये ते हि तस्मान्पशावेवैतद्ब्रह्मत्वं स्यात् अन्याभु■दित्येवमर्थं ब्रह्मवरण
प्रस्तावाद लभ्यवक्तव्यत्वा च यावत्किंचन ब्रह्मत्वेन सर्वमभिहितं ॥ २ ॥ अतः परं प्रणीताप्र
णयनादि आध्वर्य■वमुपदिशन्ति ॥ ॥ गार्हपत्यमुत्तरेणोदपात्रं निध्यायाल्लभते भुक्त्वा भुक्तक
रिष्यामीति ॥ ॥ ततोऽध्वर्युर्गार्हपत्यस्योत्तरतः समीपे उदपात्रं उदकस्य पात्रं उदपात्रं नि■ धा
य ब्रह्माध्वर्युस्थापयित्वा भुक्त्वा भुक्तं करिष्यामीत्यनेन मंत्रेण तदुदपात्रमालभते मंत्रांते हस्तं

नस्य शाखि। उत्तरेणसयं सहसंमंता देन प्रसयो दुरेर्थे। तथो गे ■ गार्हपत्यमिसे च पाकिती ■ येद्धि
नीया। उदकस्य पात्रं उदपा । यद्यपि उदपात्रमिति सामान्येनोक्तं। तथापि चमसस्यैतत् ज्ञेयं। चम
सेनापः प्रणयतीति शाखांतरात्। स्वशाखायामपि प्रतिपत्तौ श्रूयते। शीर्षं चमसं प्रणीताप्रणय
नमिति। अतोयं चमसः चैसे वारणः वारणा चहोमसंयुक्तानीति परिभाषणात्। स च चतुर
स्रो द्वादशांगुलदीर्घश्चतुरंगुलखातः संवृत्तश्च भवति। परिशिष्टा सूत्रकारप्रस्थानाच्च
चमसवत्सुवेणेति सूत्रस्य चतुरस्रतां विद्यात् तु चमवदिस्यनेन चमसस्य चतुरस्रतामा
ह॥ सवै प्रातरयए व प्रथमे नेति प्रकृत्य साडसि च्यो जरेण गार्हपत्यं सादयतीति चसुतत्वात्। गार्हप
त्यस्योत्तरेणोदपात्रं निधायेत्युक्तं। नाडसि चेति चमसस्योपरि स्थिकापुरस्थिता पुनस्तेनैव मंत्रेण कु
तश्चिज्जलाशयादुद्धृत्य गार्हपत्यस्योत्तरेदेशे समीपए व स्थापयतीत्यर्थः। आलंभोधिप्रतिपत्तिः
पात्रस्येति कर्कः। उदकस्येति याज्ञिकाः॥ ॥ ब्रह्मन्नपः प्रणेष्यामि यजमान वाचं यच्छेत्याह॥ ॥
आलंभनानंतरं ब्रह्मन्नपः प्रणेष्यामीति ब्रह्माणमामंत्रयते प्रच्छतियजमानं वाचंयच्छेत्यनेनाध्व

धैर्यजमानं वाग्यमने ध्येषयति। यदाप प्रणीतानां सर्वार्थत्वं संयवनार्थत्वं वा तदा यस्मिन्कस्मिंश्च
रुश्रपणार्थं पयो घृतं वा विहितं। यथा वैश्वदेवश्चरुः पयसि वेति घृते चरुरादित्येभ्य इति च। तत्र पयसो
घृतस्य प्रणयनं कर्तव्यं। तत्र ब्रह्मन्नपः प्रणेष्यामि ब्रह्मन्नपः घृतानि प्रणेष्यामीत्येवमूहः कर्त
व्यः। यत्र च मेथार्थं दधि प्रणीयते तत्र ब्रह्मन्नपः दधीनि प्रणेष्यामीत्यूहः कार्यः। पिच्छायामपि प्रण
यनात्पूर्वमेव निवान्या दुग्ध्वा तद्दुग्धस्य प्रणयनं कर्तव्यं। अत्र चाध्वर्युरुपयेन प्रणीतापात्रे सं
स्रुतपिंडादिना मर्यादा कर्तव्या। यथोदकघृतोद्धः संकरो न भवति। प्रणीतानामदृष्टार्थत्वे तु द्रव्यां
तरस्य प्रणयनमेव न भवति। तत्र दृष्टार्थत्वे संभवति। अ॰ दृष्टार्थत्वं तत्र वचनाभावे दुःशक्यमि
ति। तत्र परस्यैः प्रतिषेधात्तु विधेर्यज्ञविधौ निरूढे पुनः प्रतिप्रसवादुपसदि प्रणयनवचनात्तु व्यप्र
कृष्टे दृष्टार्थत्वात्सर्वार्थत्वं युक्तं। संयवनार्थत्वं तु तस्यैवैकदेशानुवादः। अदृष्टार्थत्वपक्षेऽप्यु
पसदि प्रणयनवचनं। सर्वविधेः प्रतिषेधोऽनुविधि शतविधेः प्रतिप्रसवश्चोपपद्यते। एवात्रजै
मिनेर्मते प्रणीताः संयवनार्था एव। कर्काचार्याणां मते सर्वार्था एव। इतरेषामदृष्टार्था भवेति।

अनेकयजमानकेयजमानौवाचंयच्छतः। यजमानावाचंयच्छंतेतियथायथमूह्यः॥ ॥अनुज्ञातउत्त
रेणाहवनीयं संप्रतिनिदध्यात्तिकस्येति॥ ॥ब्रह्मणाप्रणयेसनुज्ञातोऽध्वर्युः प्रणीताः प्रणीयगार्ह
पत्यसमीपतआहवनीयसमीपं नीत्वाहवनीयमुत्तरेणाहवनीयस्योत्तरतः समीपएवसंप्रतिआ
र्जव्येन बर्हिर्वेदीप्रणीतानिदध्यातिआसादयतिकस्येतिमंत्रोत्ते। संप्रतीतिवाहवनीयमतिक्रम्यन
वाप्राप्यासप्रणयतिकस्मायुनक्तीति ताउत्तरेणाहवनीयंप्रणयतीति तानाभिहृत्ससादयेन्नोअ
नासाः सादयेदितितस्माडसंप्रसेवोत्तरेणाहवनीयंप्रणयतीतिचश्रुतत्वात्। प्रणयतिरत्रनिधा
नार्थः। तेननिधानएवमंत्रः। संप्रतिशब्दश्चान्वर्थः। संप्रतिशब्दस्यप्रादिप्राप्तादधिकरणभुक्तेन्यःप
दार्थव्ययीभावःसमासः। संप्राप्यतिष्ठत्यस्मिन्नतिक्रामतीतिसंप्रति। नै तिरीयश्रुतेःऽउत्तरेणाहवनीयं
दर्भेषुसादयित्वा दर्भैः प्रच्छादयेति। उपविलं चमसंपूरयित्वेति च। आपस्तंबेच। उत्तरेणाहवनीय
मसंस्पृष्टदर्भेषुसादयति। नैनंगमयतिनेलयेत्सा संस्थाहोदर्भैराच्छादयेति। काठकेच। उत्तरतोग्नेःसाया

ध्रुते निधायदर्भैरपिधायेति। अतःप्रणीतानांदर्भेषुसादनंदर्भैरपिधानंकर्तव्यं। ब्रह्मानुज्ञा

तरत्तिप्रैषाद्यो आरणादूर्ध्वमनुज्ञावचनं यथा स्यादित्येवमर्थत्वसिद्धं। तेन ब्रह्मन्नपः प्रणेष्यामीत्यस्या
नंतरमेव प्रणयय यज्ञमिति न पठनीयं। किंतु यजमानवाचं यच्छेत्स्यानंतरमेवेति।। ।।नांतरेणग
च्छेयुः।। ।।प्रणीताहवनीययोरंतराले प्रवृत्ता अप्रावृत्तानगच्छेयुः। तानांतरेण संचरेयुरितिश्रव
णात्। कांस्यवानस्पत्यमार्त्तिकैर ■ भिचार ब्रह्मवर्चसप्रतिष्ठाकामाय यथासंख्यं।। ।।अभिचा
र ब्रह्मवर्चसप्रतिष्ठाकामायजमानाः कांस्य वानस्पत्यमार्त्तिकैः पात्रैर्यथासंख्यं प्रणयेति। तत्राभि
चरन्प्रथमेन कांस्येन पात्रेण प्रणीताप्रणयनं करोति। ब्रह्मवर्चसकामो वानस्पत्येन द्वितीयो तेन पा
त्रेण प्रतिष्ठाकामो मार्त्तिकेन प्रणयेनेति यथासंख्यशब्दार्थः। अत्र तु गुणादेवैतत्फलं न तु क्रतोः
। कांस्यादीनामेव फलसंबंधश्रवणात्। अतश्च विकारे एषा प्रवृत्तिः पुरुषार्थत्वात्। प्रवृत्तौ यत्क्रत्व
र्थमंगमातं तदेव विकारेष्वतिदेशेन गच्छति। आपस्तंबः। कांस्येन प्रणयेद्ब्रह्मवर्चसकामस्य मृ
ण्मयेन प्रतिष्ठाकामस्य दोहनेन पशुकामस्येति। अत्र वानस्पत्यस्य कामसं ■ योगेना कामसंयो
गेन च श्रवणं। कामसंयोगे नैवोत्तरयोः तस्माद्वानस्पत्यं क्रत्वर्थमतस्तद्विकृतिषु प्रवर्त्तते।।।

स्तैरग्नीन्परिस्तीर्य पुरस्तात्प्रथमं द्विशः पात्राणि संसादयति॥ ॥अध्वर्युः प्रणयनानंतरं
स्तैर्दर्भैः प्रागुदगग्रैरग्नीनाहवनीयगार्हपत्यदक्षिणाग्नीन्क्रमेण परिस्तीर्य तत्रापि प्रथमं पुरस्ता
त्प्राच्यां दिशि परिस्तरणं ततः प्रदक्षिणक्रमेणोदक्संस्थं पुरस्तात्प्रथममभिसेततत्स्त्रौतं। ततश्चैतदपश्चा
रश्चौतं प्रायश्चित्तं। ततः प्रदक्षिणापवर्गस्तु स्मार्तमिति॥ अत्राहापस्तंबः। उदगग्रैः प्रागग्रैश्च दर्भैर
ग्नीन्परिस्तरणात्तु दगग्याः पुरस्तात्पश्चाच्चेति। ततो द्विशः पात्राणि संसादयति द्विद्ध्यादिति। द्विद
र्थे द्विशः। एकेन प्रयत्नेन द्वयोर्द्वयोः संग्रहेव निधानं करोतीत्यर्थः। अथ तत्रैः परिस्तरणात्तिद्वंद्वमा
त्रा [illegible] ण्युदाहरतीति श्रुतेः। द्वंद्वं द्वंद्वसक्षिप्तन्यर्थे द्वंद्वरहस्यसमर्थ्यादावचन व्युत्क्रमणयत्नपात्रप्र
योगाभिव्यक्तिर्द्विसनेन द्वंद्वशब्दो निपातितः। उदाहरति। उद्धेराहरसासादयितमिति गम्यते। सु
त्राश्चासादनएव द्वंद्वता। त दर्थेत्यादाहरणमिति। पात्राणीति सामान्यनिर्देशेन प्रयोजनवन्त्याद्य
हपात्राणि गृह्यन्ते। पांतिरक्षंति हविराधेभिरिति पात्राणि। ननु पिबंत्येभिरिति किं न गृह्यते। नैत
देवं। अस्यां हि व्युत्पत्तौ स्रुवस्यैव जुह्वाश्च पात्रत्वं स्यान्न शूर्पादीनां इतरथा तु सिद्धं भवति। इध्मा

बर्हिषी अपि पात्रे। ताभ्यामप्यग्निर्बध्योः पालनात्। नन्वेवमग्निहोत्रहवण्यादिष्वपि पात्रत्वप्रसंगः। नैष दोषः। ते
पां करणत्वे नानिर्देशात्। तथा देवैषां मंत्रा शुद्धस्तभावाद्योवा मेध्य इति वाक्यशेषविरोधाच्च। स्रु
चीक्षीनि क्रियासिद्धानां प्रसिद्धानि॥ ॥यजमानो वा॥ ॥अथवा यजमानः पात्राण्यासादयति विशिष्टे
देशे स्थापयति। तान्येन पात्राण्याह॥ ॥स्रुवाग्निहोत्रहवणी स्फ्यं कपालं शम्या कृष्णाजिनमुलु
खलं मुसलं दृषदुपलमर्थवच्च॥ ॥स्रुवाग्निहोत्रहवण्यादीनि दश पा त्राणि यथोपदिष्टमासा
दयति। स्रुवं चाग्निहोत्रहवणी च स्रुवाग्निहोत्रहवण्यौ द्वंद्वैकवद्भावो वा यः। एवं सर्वत्र वक्ष्यमाणेष्वपि द्वे
योः समासः कपालमिसेकवद्भावादिदमेकं द्वंद्वं। तेन बहुभिरपि कपालैरेकमेव पात्रमिति
द्रष्टव्यं। कपालानि भिन्नघटादेर्ग्राह्याणि। अभित्राप्यपि रौक्मणकपालवद्भिर्भितानि भवंती
सैकदेति धूर्तस्वामिनः। स्रुवं च नउत्तणमयमीषिका वेणुदलनिर्मितेना भवति। यदि न गान्वाय
द्विवेणुनां यदीषिकाणामिति वाक्यशेषात्। अर्थवच्चेति। अर्थः प्रयोजनं सोऽस्यास्तीत्यर्थवत्
येन येन पात्रेणात्र प्रयोजनं तत्सर्वमासादयतीत्यर्थः। तत्रोपयोगक्रमेणार्थवतामासादनं कर्तव्यं।

तथा च कात्यायनः। प्राचं प्राचमुदगुदगग्नेरुदगग्नेः समीपतः। ततस्थासादयेत्सौत्रं यथाविनियुज्य द्रव्यं वा
तदिति तत्रैवं। अग्नौ वा पात्री वा। व्रीहयो यवा वा। तत्रैवं। अग्नौ व्रीहयश्च। अग्नौ यवाश्चेति वा। अथ
वा पात्री व्रीहयश्च। पात्री यवाश्चेति वा। पवित्रच्छेदनानि पवित्रे च। उपवेषः संयवनार्थमुदकं च।
आज्यस्थाली आज्यं च। अमावास्यायां दोहनचतुष्टयं। वेदार्थः कुशमुष्टिः। दक्षिणार्थो अन्वाहार्य
तंडुलाश्च। दर्भतृणमग्निश्च। इध्मा बर्हिश्च। स्रुवो जुहूश्च। उपभृद्ध्रुवा च। प्राशित्रहरणे अष्ट
तावदानं च। द्विपुरोडाशपात्र्यौ इति कर्कादयः। तदयुक्त■मिति केचित्। स्वसूत्रे शाखांत
रसूत्रेषु सादनप्रतपनोपस्तरणादिष्वेकस्याएवदर्शनात्। यच्चेडापात्री पिष्टपात्र्योर्भेदमा
हुः। तदप्ययुक्तं। शाखांतरसूत्रेषु तयोर्भेददर्शनात्। तथा तैत्तिरीयसूत्रं। प्राशित्रहरणं चेडापा
त्रं च मेक्षणं च पिष्टपात्री चेति। मानवे। प्राशित्रहरणे डापात्र्याज्यधानपात्री संयवनपात्रीति।
आपस्तंबः। उपभृतं ध्रुवां वेदं पात्रीमाज्यस्थालीं प्राशित्रहरणमिडापात्रमिति। विवृतो चातुर्मास्या
दौ यत्र चर्वादिभिर्व्यवहिता नाः पुरोडाशाः। तत्र भवतु पुरोडाशपात्रीभेदः। योक्त्रं सुतकुशाश्च॥

परिध्ययः कुशस्तीर्णं होत्रषदनं च। इडापात्री षडवत्तं च। अंतर्धानकटः पूर्णपात्रं च। प्रत्येकमपवर्ग
सम्भिदप्यासाद्यते। परिधीनाम पिपृथगासादनमष्टादशकाष्ठकेध्मपक्षे यदा चैकविंशतिकाष्ठके
ध्म इति पक्षस्तदा तस्मादेवेध्मात्रीणि काष्ठान्यादाय विकल्पेन परिधिपरिधानविधानात्। तद्वै
कमिध्मस्यैवैतान्परिधीन्दध्यादिति। एकविंशतिर्वा तत्र परिधीनेक इति सूत्रार्थः। ए
वमत्र पात्राण्यनुपादानक्रमेणासादनमुक्तं। तथा चाह पितृभूत्याचार्याः। पात्रीध्याज्यं पवि
त्रार्थोऽध्वच्छिद्रः संयवनोदकं। स्थाली चाज्यं च वेदश्च दक्षिणार्थोऽदकुस्तं॥१॥ इध्मो बर्हिः स्त्रुव
श्चैव संमार्गी हविर्ग्रहणियापि च॥ योक्त्रं युनक्रुशाश्चैव पक्षे परिध्ययस्त्रयः। पात्रीपिष्टं कुशास्तीर्णेष
डवत्तं कृतावृत्तं। अपवर्गी सम्भिसक्षे एतदर्थवदुच्यत इति॥२॥ अत्र च यस्य यस्य पात्रस्य येन क्र
मेण प्रथमं का र्यार्थं ग्रहणेनोपादानं तेनैव क्रमेण तस्य तस्यासादनं युक्तं। एवं च सूत्रसंदर्भार्थताम
वति। प्रोक्षणं च। विनियोगक्रमेण सादने च तत्स्थानस्था। हविर्ग्रहणे पात्र्याः हविर्ग्राह्यस्य च देश
विप्रकर्षात्। आज्यनिर्वापे स्थाल्या आज्यस्य च। तस्मादुपादानक्रम एव पितृभूतिर्याज्ञिकसम्मतः।

पत्रासादने युक्तः। एवं विकृत्वा यथि यस्य यस्य पात्रस्य प्रथमं ग्रहणं क्रियते क्रमार्थं तस्य तस्य पूर्वं पूर्वं
मासादनं इतरतः पश्चादिति। ननु शूर्पाग्निहोत्रहवण्यादिपात्राणां पंचद्वंद्वादि समाम्नातानि ततश्च
तेषामेव हि राज्या ■ सादनं स्याभेतरेषामिति। उच्यते। नियमार्थमेतत्समाम्नातं। शूर्पाग्निहो
त्रहवण्यैव द्वंद्वता। स्फ्यस्य कपालैरेव सहेति। एवं सर्वेषु। इतरयोपयोगक्रमेण द्वंद्वता स्यात्।
तदा च स्फ्यस्य कपालैः सह द्वंद्वता न स्यात्। अत एव नियमाद्धि वृत्तौ पश्चादिके कपालाभा
वे स्फ्य एक एवासाद्यते। यत्तस्त ■ त्र कपालानि द्वंद्वतासंपादकानि न संति। यदि च स्फ्यस्याग्नि
क्रमेण पात्रेण द्वंद्वता क्रियते तदैकस्यापि पात्रस्य यथाशु ■ तद्वंद्वता न स्यात्। तत्र च बहूनामनु
ग्नहोच्याप्यरति। एकस्यैव पृथगासादनं युक्तमेवं शूर्पादिसर्वेषु पात्रेषु वाच्यं। ततश्च शूर्पादि
रश्च क्रमध्ये विवृत्तौ यस्याभावस्तत्सहचरितं द्वितीयमेकमेवासादनीयमिति। अर्थवदासा
दितानां तु नियमसमाम्नायाभावाच्चायं नियमः। तत्र यस्य कस्यचिद्येनकेन सहद्वंद्वता
कर्तव्या कर्काचार्यास्तु विनियोगक्रमेणासादनमाहुः। अथ पात्राणामासादनस्थानमाह॥

आहवनीयपक्षे
तत्रैव

श्रपणस्य पश्चादुत्तरतो वा ।। ।। श्रप्यंते नेन हवींषि इति यस्मिन् स श्रपणो गार्हपत्यो वा आहवनीयो
वा । यः श्रपणो भवति तस्य पश्चात् प्राक्संस्थान्युदगग्राणि प्रागग्राणि वा पात्राण्यासादयति । अथ
वा श्रपणस्योत्तरतः प्रागग्राण्युदगग्राणि वा उदक्संस्थान्यासादयेत् । तदुक्तं कारिकायां । उत्त
रे चेदुदक्संस्थं प्राक्संस्थं पश्चिमे भवेदिति । तेन विपुलस्थानसंभव उत्तरत उदक्संस्थं पश्चात्
प्राक्संस्थमिति । असंभवे तु यथासंभवं । तदप्युक्तं । प्राचं प्राचमुदगग्नेरुदगस्य समीपतः इति । सर्व
स्य गार्हपत्ये हवींषि श्रपयंति गार्हपत्ये तस्य पात्राणि संसादयंतीति । तथा यस्याहवनीये हवींषि
श्रपयंत्याहवनीये तस्य पात्राणि संसादयंतीति च श्रुतत्वात् ।। ।। कर्मणे वामिति शूर्पमग्निहोत्रहव
ण्यादाय वाचं यच्छति ।। ।। कर्मणे वामित्यनेन मंत्रेणाध्वर्युः शूर्पमग्निहोत्रहवणीं चादत्ते कर्मणे
वामिति । अथ वाचं यच्छतीति श्रुतत्वात् । मंत्रश्चोभयार्थः । द्विवचनांतत्वात् । तत्र यद्यैकस्याद
नविस्मरणे द्विनरपि द्विवचनांतत्वान्न प्रयुज्यते । शूर्पाग्निहोत्रहवण्यासादनं च हविर्ग्रहणार्थं ।
अतो ग्रहणाभावे पयस्यापश्चादौ न भवति । नाग्यमस्तु तत्पदार्थधर्मः । तेन पश्चादावपि

पात्रप्रोक्षणकाले भवत्येव॥ ॥प्रतपनं प्रत्युष्टं निष्टप्तमिति वा॥ ॥तयोरा तयोः शूर्पाग्निहोत्रहवण्यो
र्गार्हपत्येऽग्नौ प्रतपनं करोति। प्रत्युष्टं रक्ष इति मंत्रेण निष्टप्तं रक्ष इत्यनेन वा। गार्हपत्ये संस्कार इति भाव
णात् गार्हपत्येऽग्नौ प्रतपनं करोति। अथ प्रतिपत्ति प्रत्युष्टमित्यादि श्रुतत्वात्। मंत्रयो राक्षसहातृत्वात् तदुच्चारणा
नंतरं अपउपस्पृशेत्। प्रत्युष्टे राक्षसे इति हि कात्यायनेनोक्तं। प्रतपनं च हविर्ग्रहणार्थः संस्कारः
। ततश्च हविर्ग्रहणाभावे न भवति॥ ॥गच्छत्सु र्वंतरिक्षमिति श्रपणस्य पश्चादनस्तिष्ठत् समंगि॥ ॥
उर्वंतरिक्षमिति मंत्रेणाध्वर्युरनः शकटं प्रतिगच्छति। कथंस्थितं अनः श्रपणस्य पश्चात्तिष्ठत्। गा
र्हपत्यादपरस्मिन्देशे स्थितं। पुनः कीदृशं समंगि। संयुक्तमंगैः युगयोक्त्रवरत्रादिभिः समंगि।
सर्वांगोपेतं शकटं तत्राग्नेः प्राङ्मुखं च। श्रपणशब्देनात्र सूत्रे गार्हपत्य एवोच्यते नाहवनीयः। तथा च
श्रूयते। सजघनेन गार्हपत्यं प्राङ्मुखमनो वा स्थितं भवति यस्य दक्षिणं चक्रमाहवनस्योधिहविर्नि
र्वपतीति। पिन्यायां च सजघनेन गार्हपत्यमित्यनुवादाश्च॥ ॥धूरसीति धुरभिमर्शनं॥ ॥यु
गस्य प्रांतौ धूःशब्देनोच्यते। यावनुडुहस्कंधयोरुपरि निधीयते। अध्वर्युरनः समीपे गत्वोत्तर

तोवस्थितो क्षुरसीति मंत्रेण क्षुराभिमर्शनं करोति। प्रथमं दक्षिणस्याः ततउत्तरस्या इति। कुतः प्रादक्षि
ण्यानुग्रहात्। उदकसंस्थासपतेऽथ। स क्षुरमभिमृशति क्षुरसीत्यादि श्रवणात्। अत्रापस्तंबः उ
र्वंतरिक्षमन्विहीति शकटायाभिव्रजसपरेण गार्हपत्यं प्राञ्चीषं वानडुयुगं शकटमवस्थितं भवति
। श्रीहिमधवमद्य क्षुरसीति दक्षिणां युगं क्षुरमभिमृशत्युत्तरां वेति। तस्योत्तरां क्षुरमभिमृशतीति
तैत्तिरीयसूत्रे। काठके। उर्वंतरिक्षमिति प्रस ऊं सच्छदिष्ठाय शकटायगच्छसनति कन्यगार्हप
त्यंदक्षिणां क्षुरमालभते। क्षुरसीसति कन्यदेवानामिति शकटमिति। मानवे चाप - स्तंबसूत्रव
त्। तेनैककस्या एव क्षुराभिमर्शनं युक्तं। दक्षिणस्या उत्तरस्या वा स्वशाखायामप्येकवचनश्रुतेः
देवानामिसुपस्तंबवनस्पश्चादीक्षां॥ ॥अभिमृश्य जपतीति शेषः। ततोध्वर्युरुपस्तंबनस्य
पश्चादुत्तरामीषामभिमृश्य जपतीति श्रुतेः। कुस्तंभीमिति कुत्सितोसल्पत्वात्। कुस्तंभः कोःक
भावः। पृषोदरादित्वात् कस्तंभः। कस्तंभस्य भार्येव पुंयोगादाख्यायामिति ङीप्। कस्तंभीमन
सउपस्तंभीनां जघनेनतस्यापश्चात्समीपएवेषामभिमृश्य जपती त्यर्थः। तत्रापस्तंबः।

तद्देवानाम ॥ स्मिसस्मिन्नमिमस्युत्तरामीषामालभ्य जपतीति । एवमेवमानवेपि ॥ पित्र्येपि
तृणामस्मि वह्नितमं॰ पित्र्ये तु तममस्तु हः । एकदैवत्ये आतिथ्यापवमानेष्ट्यादौ देवस्यासीति ।
स्त्रीदैवत्ये प्रायणीयादावेकदेवत्ये देव्या असीति । द्विदैवत्ये देवयोरसीति । यथामुहः कार्यकृत्की
चार्याः । केचिदत्रलिंगवचनयोरनूहमिच्छंति । प्रकृतावपि सान्नाय्यसांदर्शेष्ट्यादावसमवे
तश्रुतत्वात् । अतो यथाश्रुतमेव सर्वत्र प्रयोज्यः । यज्ञपतिशब्दोऽनेकयजमानके द्वेधे ।
माते यज्ञपतिर्ह्वारिषतिद्विवियजमानके । मा ते यज्ञपतयो ह्वार्षुरिति बहुयजमानकेष्विति ॥ ॥
विष्णुस्त्वेसारोहणं ॥ ॥ तस्यानसः पश्चात्सरीसविष्णुस्त्वेसनेनमंत्रेण दक्षिणचक्रस्योपर्या
रोहणं करोति । तस्य दक्षिणचक्रमारुह्येति शाखांतरात् । अथाक्रमते विष्णुस्त्वाक्रमतामि
तिश्रुतेः । अत्राहापस्तंबः । विष्णुस्त्वाक्रम्येति सव्ये चक्रे दक्षिणं पादमध्याधायाकूतमसिह
विर्धानमिस्यारोहयतीति । तैत्तिरीयसूत्रे । अथ विष्णोः क्रमोसीति दक्षिणं चक्रं क्रमित्वाध्या
रूढप्रउगे श्रुर्पं निदध्याति श्रुर्पस्तु चमिति । एवमेव मानवेपि ॥ ॥ प्रेयत्सच्छरूवा तायेति

हविर्ध्यान्॥ ॥आरोहणानंतरं उरु वातायेत्यनेन मंत्रेण हविर्ध्यानं प्रेक्षते। व्रीहीन्यवान्वा। अथ
प्रेक्षत उरु वातायेति श्रुतत्वात्। एतच्च हविःप्रेक्षणं हविषः संस्कारः। अतश्च नानाबीजेषु देवस्य
हविःषु चातुर्मास्यादिषु च प्रतिबीजमीक्षणं कर्तव्यं॥ ॥अपहतमिति निरस्यदन्यत्॥ ॥हवि
ष्क्यो यदन्यत्तृणमध्यवपतितं भवति तृणकाष्ठादिकं तदपहतमित्यनेन मंत्रेण निरस्यति नीचैः
प्रक्षिपति। अथापास्यपहतमिति श्रुतेः। नानाबीजेषु सर्वेभ्यो ब्रद्धहीला युगपदेव निरसनीयं। श्र
व्यत्वात्। मंत्रस्य राक्षसत्वादपामुपस्पर्शनं कार्यं॥ ॥अविध्यमानेभिमृशेत्॥ ॥अस्मिंस्तृण
काष्ठादिकेऽविध्यमानेऽनेनैव मंत्रेण हविर्ध्यानेनाभिमृशेद्धस्तेन स्पृशेत्। अथापास्यपह
तं रक्ष इति यद्यत्र किंचिदापन्नं भवति यद्युनाभ्येवमृशेदिति श्रुतेः। अभिमर्शनं च नानाबी
जेष्वां प्रतिबीजं मंत्रेण कर्तव्यं॥ ॥यच्छंताभिसालभते॥ ॥यच्छंतामित्यनेन मंत्रेणाध्वर्युर्ह
विर्ध्यान्व्रीहीन्यवान्वालभते स्पृशति। अथाभिपद्यते यच्छंतां पंचेति श्रुतेः। नानाबीजेषु त
भेदेन समं त्रकं कुर्यात्॥ ॥देवस्य हेतिग्रहणासाग्नेयं चतुरो मुष्टीन्॥ ॥ततोध्वर्युर्मुष्टिना

श्रीहीन्यथान्वा तुष्णीमादाय देवस्य त्वेतिमंत्रेणाग्नेयं चतुरो मुष्टीन्निर्वपतीति शाखांतरात्। अत्र मुष्टि
त्रयं मंत्रेण प्रक्षिप्य चतुर्थं तुष्णीमिति। तदुक्तं मुष्टे चोत्तमइति। तत्राहापस्तंबः। त्रिर्यजुषा तु■ष्णीं
चतुर्थमिति। एवमेव सर्वेषु सुत्रेषु। ग्रहणानंतरं च शुर्पे हविः प्रक्षेपणीयं। यद्यप्यग्निहोत्रहवण्यां ग
ह्णातीति सुत्रकृतानोक्तं तथापि हविर्गृहण्यामपः कृ होतिवक्ष्यमाणत्वादेवमुक्तं भवति। तेन यद्यपि
ग्रहणकाले एतावदेवोक्तं शुर्पाग्निहोत्रहवण्यादायेति। तथाप्यत्र विशेषोपदेशादग्निहोत्रहवण्यां गृहीत्वा
था शुर्पे प्रथक्प्रथक् प्रक्षेप इत्यभिप्रेतिगम्यते। एवं शुर्पादानस्यापि दृष्टार्थता भवति। अग्निहोत्रहवण्या
भरिष्यमाणं हविरनंतरं गृहीष्यते। आपश्च तत्र करिष्यंतइति।। ।।एवमग्नीषोमीयं।। ।।एवमेवाग्नी
षोमीयं हविर्गृह्णाति। अग्नीहोत्रहवण्यां चतुरो मुष्टीन्देवस्य त्वेतिमंत्रेण अग्नीषोमाभ्यां जुष्टं गृह्णामी
संतेन।। ।।यथादेवतमन्यत्।। ।।अन्यदप्यैन्द्राग्नादिकं हविर्यथादैवतं गृह्णाति। यायद्देवतायथा
देवतमिति। अभ्युदितेष्टयभिप्रायेवीणेयामव्ययीभावः। तत्राह निर्वापात्पूर्वं चंद्रोदयविज्ञाने वै
कृताभ्यो देवताभ्यो निर्वापे देवतान्तवद्भूतमस्ति। अनुअनेनैव सूत्रेण सिद्धरेवान्यमेवमग्नीषो

मीयमिति वाच्यं वा। अग्नीषोमाभ्यां जुष्टमिति मंत्रसमाम्नायास्य प्रदर्शनार्थत्वात्। अन्यथा हि परा
दिनापुर्वोत्तरस्य तत्वाच्छिलिंगोप्याग्नेयग्रहणेन प्राप्नोति। तस्मादस्यार्थमेवमग्नीषोमीयमितिसू
त्रं॥ ॥हुतायहेतिशेषाभिमर्शनं॥ ॥उपयुक्तादन्यः शेषः। हुतायहे स नेन मंत्रेणानासिद्धि
तस्य हविष्यशेषस्य गृहीतावशिष्टस्याभिमर्शनं कुर्यात्। अथाभिमृशति हुताय हानाराततु
यइति श्रुतेः। नानाबीजेषु समंत्रकमभिमर्शनं कार्यं॥ ॥स्वधितिप्राङ्गीध्रस्ते॥ ॥ततोध्वर्युः
स्वरभिविरव्येषभिस नेन मंत्रेण प्राङ्गीध्रस्ते प्राच्यां दिशि धारणं विलोकनं करोति। तद्वै तदछिन्निरो
धसंज्ञात श्रमापनयनार्थमीक्षणं। यतः श्रूयते। परिवृतमिव वा एतदनो न भवति तदस्यैतेनं च
क्षुः पाप्मगृहीतमिव भवति। परिवृतमिव परिसमंताद्धि[illegible]छितमीवे तदनो भवति। अत एव वा
नयशेषादे तदनश्चक्षुर्भं स्यात्। अत एव काट्टके। सयदि क्षाय शकटाय व्रजतीति। च्चिंतायाः प्र
योजनं हविर्ग्रहणाभावे प्राङ्गीध्रगताभावः। श्रमाभावात्। पित्र्यायां तु दक्षिणायामेवेक्षणं।
दिग्विपर्ययेन तस्यास्तत्र प्राचीत्वात्॥ ॥दृंहेतामिसबरोहति॥ ॥दृंहेताभिसनेनमं

आहवनीयपर्यंत श्रौतत्रेण

त्रेणानसः सकाशादवरोहति अपतरति। अथावरोहति इदमहं तामिति श्रुतेः॥ ॥ गच्छध्वमुर्वन्तरिक्षमि
ति॥ ॥ अनसो वरूथेष्वोर्वन्तरिक्षमिति मंत्रेणोत्तरदेशं प्रति गच्छति। अथ प्रेहि उर्वन्तरिक्षमन्वेमीति
सोऽसावेनं बध्नुरिति श्रुतेः। अपणस्य सादयति पृथिव्यास्त्वेति॥ ॥ श्रपणो गार्हपत्य आहवनीयो
वा यस्मिन् श्रपणं करिष्यन् भवति तस्य श्रपणस्य पश्चाद्धुर्यस्थानि गृहीतानि हवींषि सादय
ति पृथिव्यास्त्वेति अनेन मंत्रेण। यस्य गार्हपत्ये हवींषि श्रपयतीति प्रक्रम्य जघनेनो तर्हि गा
र्हपत्यं सादयेत्। तथा यस्याहवनीये हवींषि श्रपयतीति प्रक्रम्य जघनेनो तर्ह्याहवनीयं सा
दयेत्। पृथिव्यास्त्वा नाभा विसादीति श्रवणात्। वरुणप्रघासेषु चतुर्थेषु मेषमिथुनकरंभपात्रा
र्थं गृहीतानां यवानां दक्षिणाग्नेः पश्चात्सादनं त्र्यंबकेषु गार्हपत्यस्य दक्षिणतः इति॥ पात्र्यां वा
स्फ्येऽपक्षितायां॥ ॥ वा विकल्पे। अथवा स्फ्येऽपक्षितायां पात्र्यामेतत्सादनः संबंधे सर्वं कर्म
प्रसेतव्यं। उतो पात्र्यै गृह्णातीति प्रकृत्य स्फ्यमुत ह्येव स्याद्दुपोष्य गृह्णीयादिति श्रुतेः। उतशब्दो
वाक्यपूरणार्थः। पात्र्यैरिति पंचम्यर्थे चतुर्थी पात्र्या अपि गृह्णीयुरित्यर्थः। तर्हि स्फ्यंपात्र्या

अधस्तादुपोह्य। ऽहं बैतत्कर्यै। अत्राग्निरणेद्रष्टव्यः। अस्माल्लेर[illegible]यिवेसर्थः। अत्र विशेषमाह॥ ॥धुरि
षारोहणानिपात्रीबिलेजपति॥ ॥अत्र धुरिषारोहणेस्तसंबंध्या मंत्रा लक्ष्यंते। पात्रीतो ग्रहणप
श्चे धुरिषारोहणसंबंध्यानियजूंषि पात्रीबिलेपात्र्यामुख्ये गर्ते स्वाते जपति। ऽतो पात्र्यै गर्णहस
नंतरायमुतह्वियजूंषिजपेदिति श्रुतेः। अनंतरायं अविच्छेदं। अविच्छिद्यावच्छिद्येत्तियावत्। त
रो५तह्वि धुरिषारोहणानाम भावात्तदभिचारीनियजूंष्यंतरिसांतरामुक्तापरिस्यान्येषामपहतमिस
दीनां समवेतार्थानां प्रयोगः प्राप्नोति। तद्धावेसर्थमुच्यते। अनंतरायमिति अंतरापूर्वस्य इणः अमी
त्येण मुल्। अंतरिसां तरिसांतरायं। अंतरायमनंतरायं। केपुनस्ते देषां मंत्राणामर्था भवंतितिए
नयेअनक्ति। कथं धुस्तावध्रुवीतेर्वच कर्मणइति सापि किंचिदागच्छद्धिंहिंसितत्राप्यमिरक्षितस
वंगतलात्। हविर्गृहीष्यग्निर्धुर्स्ता मति कामति तस्या अपि निन्हुतेधुरसीत्यादिना अनोनत्रपा
त्र्यपि हविर्हविष्या धारयतीतिवद्विहितममित्यादिशब्दैरुच्यते। विष्णुस्त्वा धर्याल्मकस्तत्रपादे
नक्रमते। अत्र तुहस्तेनेति विशेषस्तस्मात्सिद्धप्रयोगाणां पात्र्यामभिहितएवार्थाइति हरिस्वामी।

२८

यदि तु पात्र्यां गृह्णीयात् तदा धुरि षाढ्यभावे न तदनुष्ठानं तं व्यवधानमंतरायमंतरेण तत्तत्काशक-
यजुंषि जपेदित्यर्थः। इति माधवाचार्याः। मानवे। पात्र्यां वा स्पर्शमुपक्रम्य नो मंत्रांस्तु जपेदिति
आपस्तंबे च। यदि पात्र्यां निर्वपेद् दक्षिणतः स्पर्शमुप[illegible]धाय तस्यां सर्वा शकटमंत्रान् जपेदिति।
तैत्तिरीयसूत्रे। यद्यु वै नानो भवति जघनेन गार्हपत्यं स्पर्शं नि[illegible]दधाति स्फ्यमुपरि पात्रीं पात्र्यां पुरो-
डाशीयानावपति स्थपुर्वीं पात्र्या अभिमृशति धुरसी सादि। पात्रीतो ग्रहणपक्षेपि पात्री गार्हपत्यसां-
तरेण नगंतव्यं पात्रीतः पश्चाद्देशे उत्तरस्मिन् चोपविश्य प्राङ्मुखो ग्रहणं कुर्यात्। दक्षिणासीनार्थ
तं गृह्णातीत्युदङ्ङासीन आसीनः गृह्णातीति प्राचीविपर्यये नुवाददर्शनात्। पित्र्यायां च दक्षिणा प्राची
। यं वेषु लुकी चीप्राचीति। अनस्यपि प्राङ्मुखोपविष्टेन ग्रहणं कार्यं। अग्नि[illegible] वी लब
धुर्यस्ता मे तदसे च भवति हविर्गृहीष्यं तस्माद् वै तं भि[illegible]कृते तथो हैनमेषो नियंतमग्निधुर्यो नि
हिनस्तीति। अस्यार्थः। युगस्य धुरि भावो धुर्यः। भवेच्छेदसीतिवः। हविर्ग्रहणाय शकटस्य परिश्रित
प्रदेशं पश्चाद्भागं यास्वन्नं ध्वयुस्त धुर्यं [illegible] धौरस्यम[illegible]सग्निमसे च अति क्रमिष्य भवति न

२७

२ पात्रीपक्षे अवरोहणमंत्रेण किं कर्तव्यमित्यपेक्षायामाह॥ ॥इदंहंताभिसुत्थानं॥ ॥२

इति क्रमेण स्रु[illegible]कुर्ध्येत्। तस्य प्रसादनायैन भुरसीति मंत्रो ध्यारणेन तस्या एवाग्नये निकुरुते अपलय
ति। अपक्रमजनितं स्वापराधं प्रशमयन्प्रसादयतीत्यर्थः। अत एव श्रुतिबलाघी त्री गार्हपत्ययोरंतराले
गमनं न सिध्यति। अतः पात्र्याः पश्चादुत्तरतो वा प्राङ्मुख उपविश्य ग्रहणं कुर्यात्। तत्र स्थानासं
भवे तु पात्र्यामंतरेणैव गत्वा दक्षिणतः प्राङुपविष्टेनैव ग्रहणं कार्यं हविर्ग्रहीत्वा शेषमभिमृश्य प्राची
मवेक्ष्य इदंहंताभिसनेन मंत्रेणासनादुत्थानं करोति उत्तिष्ठतीत्यर्थः॥ ॥कुशौ समावप्रशीर्णाग्रा
वनंतरगर्भौ कुशैश्छिनत्ति पवित्रे स्थ इति॥ ॥पवित्रे स्थ इत्यनेन मंत्रेणाध्वर्युः कुशैः करणभू
तैः कुशौ छिनत्ति मूलच्छेदनेन प्रादेशप्रमाणौ करोति। कुशशब्देनैकं तृणमुच्यते। न तु समस्तशा
खाः। तेन कुशावित्यनेन दर्भतृणे द्वे इत्यर्थः। कीदृशौ कुशौ समौ मूलादारभ्याग्रपर्यंतं तुल्यप्रमाणौ
पुनः कीदृशौ कुशौ अप्रशीर्णाग्रौ अक्षारिताग्रौ अग्रवंतौ। तथा अनंतर्गर्भौ न विद्येते तृणमध्ये ग
र्भौ ययोस्तावनंतरगर्भौ गर्भे हि सति संख्यांतरं स्यात्। तथा चापस्तंबः। समावप्र[illegible]च्छि
न्नाग्रौ प्रादेशमात्रौ पवित्रे कुरुते तृणं काष्ठं वा तत्र यच्छिनत्ति न नखेनेति। तैत्तिरीयस्तु नेपि॥

२१

बर्हिषः पवित्रे कुरुते प्रादेशमात्रे समे अप्रतिच्छिन्नाग्रे अनन्तर्च्छिन्ने इति। मानवे च। बर्हिषः पवित्रे
कुरुते प्रादेशमात्रे समे अच्छिन्नप्रान्तरे इति। अत्र पवित्रयोरेव समं तोल्कः छेदनेन पवित्रे एव
समे कार्ये। न तु समप्रमाणौ कुशौ छित्वैव संग्रहः। भिन्नप्रमाणौ अपि छित्वा समौ कार्यौ वि
ति तात्पर्यं॥ ॥ त्री॰ वा॥ ॥ अथवा त्रीन् कुशान् कुशेन छिनत्ति पवित्रे स्थ इत्यनेन मंत्रेण। अयं चा
ग्रहितत्वे पवित्रत्रयपक्षोऽपि प्रवर्तत इति कर्कः। द्वयो ग्रहितार्थत्वादनभिविध्यानात् त्रिषु न प्रवर्त
त इति इति पितृभूतिः। अत्रापि प्रादेशान् कुशान् समान् तथा अप्रशीर्णाग्रान् तथा अनन्तर्गर्भान् इति
विशेषणान्युक्तानि। पवित्रे करोतीति प्रकृते सति वेदे भवतोऽथो अपि त्रीणि इत्युभयस्य श्रवणात् तुल्य
विकल्पोऽयं॥ ॥ हविर्ग्रहण्यामपः कृत्वा ताभ्यामुत्पुनाति सवितुर्व इति॥ ॥ हविर्गृह्यते यस्यामिति
हविर्ग्रहणी अग्निहोत्रहवणी तस्यामपः कृत्वा स्वयमेवोदकमासिंच्य ताभ्यां पवित्राभ्यामुत्पुनाति
उत्क्षिपति सवितुर्व इत्यनेन मंत्रेण। ताभ्यामेताः प्रोक्षणीरुत्पुयत्ताभिः प्रोक्षयतीति। सकृदुत्पुना २८
ति सवितुर्व इति श्रुतत्वात्। अत्राहापस्तंबः। स शुः कायामग्निहोत्रहवण्यामप आनीय पूर्ववदुत्पुयेति।

मानवे। अतिसृष्टा यामप आसिंचेति। अतएव हविर्ग्रहण्यामित्युपदेशादादानप्रतपनविधाना
च्च तस्या हविर्ग्रहणं क्रियत इति प्रतीयते। तेन हविर्ग्रहण्यामित्यग्निहोत्रहवण्यामित्यर्थः। कुतः।
अग्निहोत्रहवण्या हवींषि निर्वपतीति शाखांतरात्। तेन पश्वादौ हविर्ग्रहण्यभावे पिपात्रप्रोक्षणा
र्थे अग्निहोत्रहवण्यामेवापः क्रियंते।। ।। तास्थानं तयोः।। ।। तयोः पवित्रयोः हस्ता अग्निहोत्र
हवण्यां स्थिता आपः स्थानं ज्ञेयं। अतऊर्ध्वं पवित्रे तास्वेवस्थाप्येते यावत्तासां संभवः। प्रो
क्षणीषु पवित्रे भवतः इति श्रवणात्। तासु च बर्हिषः मूलं निःषिक्तासु पवित्रे निधाय प्रोक्ष
णीतास्विति सूत्रसात्।। ।। सव्ये कृत्वा दक्षिणेनोद्गृंगयति देवीरापइति।। ।। ततस्ता अग्निहोत्रह
वणिस्था एता पः सव्येपाणौ कृत्वा सोदकमग्निहोत्रहवणीं सव्यहस्ते निधाय ततो देवीरापइति
मंत्रांते दक्षिणेन पाणिनोद्गृंगयति अपऊर्ध्वं चालयति। ऊर्ध्वं नयति सव्यहस्तस्थामेवाग्नि
होत्रहवणीं दक्षिणेनोर्ध्वमुत्कृष्टातीत्यर्थः। ताः सव्ये पाणौ कृत्वा दक्षिणेनोद्गृंगयतीति श्रु
तेः। अत्र दक्षिणेनेति न वक्तव्यं। स्मृतित एव प्राप्तत्वात्। वाच्ये वा। सव्यहस्तस्थितानामे

मेवप्रोक्षणीनामुद्दिंगयति यथा स्यादिति। अनेकयजमानके स्मिन्मंत्रे ऊहो भवति। यज्ञपतीमृ
ष्यालु यज्ञपतीदेवयुवामिति द्वियजमानके। यज्ञपतीन्सुष्यालुन्यज्ञपतीन्देवयुवद्दति बहुषु।
पित्र्यसेच। यज्ञपतिंदेवपिस्युवमिति॥ ॥प्रोक्षिताःस्थेति तासां प्रोक्षणं॥ ॥प्रोक्षिताःस्थे
तिमंत्रेण तासामेवाग्निहोत्रहवण्याः स्थानामपामेकदेशेन तासामेव प्रोक्षणं कुर्यात्। नन्वे
वं स्वात्मनि क्रिया विरुध्यते नैष दोषः। एकदेशेनैवैकदेशस्य प्रोक्षणोपपत्तेः। अथोच्य
ते। नैकदेशास्ताः शुद्धेन तानिः शुद्धिनोच्यते। ताभ्यामेताः प्रोक्षणीरसुयताभिः प्रोक्ष
ती सत्रतदपिनकिंचिदेतत्। तथापि द्वैकदेशेनैवहविषः प्रोक्षणमिष्यते पात्राणां च। इत
रथा ह्येकस्मिन्नेव हवींषि सर्वासु प्रोक्षणीषु उपयुक्तासु हविरंतरायपात्रेभ्यश्चापोऽर्थं
चान्याउसाधिरन्। नच एतद्वा वीष्टं। तस्मादेकदेकदेशेनैवेति॥ ॥हविराग्नेयं साग्नी
षोमाभ्यां वेति॥ ॥ततः प्रोक्षणीनां प्रोक्षणानंतरं प्रोक्षणीभिर्हविः प्रोक्षति अग्नये त्वा जुष्ट
मिति। अग्नीषोमाभ्यामिति च मंत्राभ्यां। चकारेण प्रोक्षणमित्येतत्सदमनुवर्त्तत

नयथाश्रुतेसंबंधंप्राप्नोतीति। प्रोक्षतीत्येवं विपरिणम्य संबध्यते। अतएव पृथक्प्रोक्षण
विधानात् हवींषि शूर्पे च पृथक् पृथक् स्थापनीयानि। यथा स्रुवं च प्रोक्षणं कार्यमिति। तत्संहता
व प्नांति तत्संहृतपिंडं पंसीं सव घाते पेषणयोरेन सहत्व विधानाभाव्यत्र सहत्वं॥ ॥यथादेवत
मन्यत्॥ ॥अन्यद्धविर्यथादेवतं प्रोक्षति। इदं त्वाग्निभ्यां जुष्टं मि सेवमित्यर्थः॥ ॥पात्राणि
दैव्यायेति॥ ॥दैव्याय कर्मणेरसमेनन मंत्रेण पात्राणि प्रोक्षति। अ[illegible]थयस्य पात्राणि प्रोक्षति
दैव्याय कर्मणेर सादि श्रुतेः। तत्र शुंधध्वमिति प्रोक्षणमंत्रगत बहुवचनसामर्थ्यात्सर्वाणि
पात्राणि एकत्र राशीकृत्य प्रोक्षणं कार्यं। कर्काचार्यास्तु प्रोक्षणस्य पात्रोद्देशेन विधानात्स
मुदित[illegible]स्य चाचोदितत्वात्प्रतिसंस्कार्यं च संस्कारावृत्तेः न्याय्यत्वाच्च प्रतिपात्रं प्रोक्षणं कर्तव्यं।
बहुवचनं पूजार्थमित्याहुः। कर्काचार्यैर्यदुक्तं प्रतिपात्रं प्रोक्षणमिति तदसत्। यथा व्रीहिप्रोक्ष
णे जातेः प्रोक्षणं। न व्यक्तिप्रोक्षणं तद्वदत्र[illegible] प्रोक्षणे पि जातिप्रोक्षणं न व्यक्तिप्रोक्षणं। अने
न बहुवचनमप्युप[illegible]न्नं। आपस्तंबः। उत्तानानि पात्राणि पर्यावर्त्य शुंधध्वं दैव्याय कर्म

णमिति त्रिः प्रोक्ष्येति। एवं सर्वेषु सूत्रेषु॥ पितृ[?]सूत्रे च दैव्याय पित्र्याय कर्मणे शुंधध्वं दैवपित्र
याय याय इत्यूहः कार्यः। प्रतिपात्रं प्रोक्षणप[?]क्षे च केवलप्रधानार्थेषु शूर्पकपाल कृष्णाजिनोलू
खलमुसल[?]तानदानोपसर्जन्यादिषु पित्र्याय कर्मण इति प्रयोगः। अंगप्रधानार्थेषु दैव्याय पि
त्र्यायेति। केवलदैवकर्मार्थे दैव्यायेति॥ ॥असंचरे प्रोक्षणीर्निधाय॥ ३॥ शम्यासीति कृष्णा
जिनादानं॥ ॥असंचर इति यस्मिन्स्थाने कोपि न संचरति न गच्छति प्र[णी]ताहवनीययोरं
तराले सोऽसंचरस्तत्र प्रोक्षणीर्निधाय याभिरद्भिर्हविषः पात्राणां प्रोक्षणं कृतं ताः प्रोक्ष
णीरित्युच्यंते। ताः प्रोक्षणीरग्निहोत्रहवण्यां स्थापयित्वा संचरे निधाय स्थापयित्वा शम्यासीत्य
नेन [?]मंत्रेण कृष्णाजिनादानं कृष्णमृगस्य चर्मणो हस्तेन ग्रहणं कुर्यात्। अथ कृष्णा
जिनमादत्ते शम्यासीति श्रुतेः। ताभ्यां तरेण संचरेयुरिति सूत्रात्। अत्र प्रणीताहवनीययोरंत
राले असंचरशब्देन गच्छतेः प्रवृत्तत्वात्। यद्यपि गार्हपत्याहवनीयौ न व्यवेयादित्यसमप्य ३
संचर[?]वस्तत्प्रवृत्तत्वान्न गच्छेत्तत्र सिद्धः। आपस्तंबसूत्रे विशेषः। प्रोक्षणीशेषमग्रेण

गार्हपत्ये निधायेति। असंचरेऽत्र चाभिधायेति मानवे। प्रोक्षणीरिति यौगिकशब्दो न संस्कारनिमित्तो
जातिनिमित्तो वा। प्रोक्षणीशब्दाभिधाता स्मरणादावसंस्कृतास्वपि अप्सु शब्दप्रयोगात्। आज्यप्रोक्षणी
रूपध्यस्येव मादावसंस्कृतासु चापोऽन्तर्हिते। कृष्णाजिनमित्यत्र कृष्णस्याजिनमिति षष्ठीतत्पुरुषो
न कर्मधारयः। कृष्णं चतदजिनं चेति। कुतः। सकृष्णो भुक्तो वा चार्तस्य देवा अन्वविदन् चर्मेवा
भूत्वा या जुहुयुरिति चर्मवाचत्वं कृष्णस्येति वा शेषश्रुतेः। अत्र कृष्ण इति कृष्णमृगोऽभिधीयते
। किं प्रयोजनं नमस्याश्चिंतायाः। कर्मधारये तु यस्य कस्यचित् कृष्णं चर्म माह्यं। तत्पुरुषे तु मृगच
र्मैवेति। तदेतदानमव[illegible]घातार्थे अन्तश्चावघाताभावेऽपि आदेयं भवति॥ ॥अपेस्य पात्रेभ्यो
वधुनोत्स्यवधूतमिति॥ ॥यद्गृहीतं कृष्णाजिनमासादितेभ्यः पात्रेभ्योऽपेस्यापनी[illegible] यप
रेनीक्षा वधूतत्त्वसनेन मंत्रेणावधुनोति। धुञ् कंपने। नीचैः कंपयति। यत्तेऽसुग्नमममेध्यमय
ज्ञियं तत् कंपयित्वा ध्वःपातयतीत्यर्थः। अत्र कृष्णाजिनस्यैवापनयनं कर्तुरिति कर्कः। अति[illegible]
नेस्येव पात्राण्यवधुनोति यध्वस्यमेध्यमभूत् तद्ध्वस्यैतदवधुनोतीति श्रुतेः। हरिस्वामिनस्त्वा

दे॰ भाष्यर
३१

ध्वर्योरेवातिक्रमणं ध्यास्यात्तवंतः। अति नयाति क्रम्येत्यर्थः। अतिपूर्वस्य नमेर्गाल्यपीत्यनु
नासिक लोपः। हृस्वलोपस्य पिति कृति तुक्। पात्राण्यतीत्य इं कारणं। यद्वा भुरस्य कृध्माजि
ध्माजिनस्यामेध्यं अभुतत्वस्मादेव दव धुनोति। नचपात्राणि मेध्यानि संति पुर मेध्यानि क
तुं युक्तमित्यभिप्रायः। अतः पात्रेभ्यो पेत्य नीयाध्वर्युरेवातिक्रम्य कृध्माजिनमवधुनोतीत्यु
क्तवान्॥ ॥प्रत्यग्रीवमास्तरणात्यदि[illegible]त्या स्वगिति॥ ॥चर्मण्युत्तरलोमानि प्राग्ग्रीवाणी ति प्रा
ग्रीवता चर्मणामुक्ता तस्यायमपवादः। अवधुननानंतरं कृध्माजिनं विहारादुत्तरप्रदेशे
प्रत्यग्रीवमास्तरणात्यदित्या स्वगसी त्यनेन मंत्रेण। प्रतीच्या ग्रीवा यस्य तत्प्रत्यग्रीवं। तत्प्रतीची
नग्रीवमुपस्तरणातीति श्रुतेः। प्रतिपूर्वादंचेः क्विप्। प्रतीच्यां दिशि देशे यर्थे दिक्। शाद्भ्यः
सप्तमी सादि सूत्रेणास्तीति। तस्या चावेलुगिति लुक्। ततः प्रसंच शत्र छ्वदि भाषां चेरदिक्स्त्रि
यामिति स्वार्थकः। स्वप्रत्ययः। ईआदेशः। अंचतेर्नकारलोपः। अचईत्यकारलोपः। चाद्रुप
सर्गस्य दीर्घः। प्रतीचीनोदेशः। तस्मिन् ग्रीवा यस्य तत्प्रतीचीनग्रीवमिति। एवं प्राचीनग्री

३१

नादयोपि व्याख्येयाः। किं पुनरत्र प्रेक्षा ग्रीवायामवयवे नावयवि नोपेक्षितत्वात्। कृष्णाजि
नस्यास्तरणार्थे योदेशो निरूपितस्तदपेक्षया प्राचीनग्रीवमिति गम्यते। उपस्तृणातिस्तम्भ आ
धारणे श्लेष उपपूर्व आच्छादने विकाशे। अन्यार्थयोर्विस्तारणं तत्र प्रवर्त्तते। परार्थे विकाशयती
सर्थः। तैत्तिरीये। कृष्णाजिनमवधूनोत्यूर्ध्वग्रीवामुद्गृह्य वद्धावधूतमभिसर्थेत्पुरस्तात्प्रतीची
नग्रीवोत्तरलोमोपस्तृणातीति। आपस्तंबः। उत्तरेण गार्हपत्यमुलूखलदेशे वा प्रतीचीनग्रीवमुत्त
रलोमोपस्तृणातीति पुरस्तात्प्रतीचीनं सदमुपसमस्यतीति। मानवे। पश्चादुलूखलस्यास्तृणाति प्रस
ग्रीवमुत्तरं प्रतीचीनसदं प्रसस्यति नैरिकमवस्जंतीति॥ ॥ सव्याभुन्ये निदधात्युलूखलमद्रि
रसि ग्रावासीति वा॥ ॥ सव्यहस्तेनाभुन्ये अमुत्रैव कृष्णाजिने अद्रिरसीति मंत्रेणोलूखलं निदधा
ति। ग्रावासीति अनेन मंत्रेण वेति विकल्पः। अभिनिहितमेव सव्येन पाणिना भवत्यथ दक्षिणे
लूखलमाहरति। अथोलूखलं निदधात्यद्रिरसि वानस्पत्यो ग्रावासि पृथु[illegible]बुध्न इति वेति श्रुतेः।
प्रतिलेखमयोः॥ ॥ प्रतिलादिहास्त ग्वोक्षिप्य बन्धमवयवः। पूर्वयोरद्रिरासि ग्रावासीत्येतयोरुभ

योर्मं त्रयोः शेषः। तेनैवं प्रयोगः। अद्भिरसि वानस्पत्यः प्रातिहादित्यास्त्वग्वेत्तु। ग्रावासि पृथुबुध्नः
प्रातिहादित्यास्त्वग्वेत्तिवा॥ ॥हविरावपत्यग्नेस्तनुरिति॥ ॥ततोऽध्वर्युरुलूखलमध्ये हविरा
वपति कंडनार्थं मध्ये प्रक्षिपत्यग्नेस्तनुरिसनेन मंत्रेण। अथ हविरावपत्यग्नेस्तनुरिति श्रुतेः। हे हविः
त्वमग्नेस्तनुरसि इत्येवं हविषोऽग्नेः संबंधादुच्यते। तेन दार्षद्उतावग्ध्येअपांतनुरसीत्यूहः। पित्र्ये यज्ञे च
देववीतयइत्यस्य स्थाने पितृवीतयइतिप्रयोगः। आत्राहापस्तंबः। अनुसृजत्यजिनं तस्मिन्नुलूख
लमधिवर्तयत्यनुसृजन्नुलूखलमग्नेस्तनुरसीति तस्मिन् हविरावपतीति। एवमन्येष्वपि सूत्रेष्वसि।
वाचं विसृजते॥ ॥हविरापावानंतरं अध्वर्युर्वाचं विसृजते॥ ॥हविष्कृता वा॥ ॥वाशब्दो वि
कल्पार्थः। अथवा हविष्कृताह्वानेन सह हविष्कृदाह्वानकाले वाचं विसृजते अध्वर्युर्यजमा
नश्च। अत्रापि हि श्रूयते। वाग्वै हविष्कृता वाच्यमेवैतद्विसृजत इति। अथ नानाबीजेष्ट्या विकृ
तौ वि[illegible]पिसते। यथादेवसुहविःषु। तत्र नानाबीजानां तं[illegible]णा हननासंभवात्सर्वोयेण बहन्यमा
नेषु भवतीति संशयः। किं माध्ये हविरुलूखले प्राप्ते वाग्विसर्गः किंवा अनियमः। अथवा अंतं इति।

कि तावत्प्राप्नोति। नियमकारिणः शास्त्रस्याभावादनियमः। अथवा मुख्य आधिए एव वाग्विसर्गः।
एवं सति मुसलादानादयो विसृष्टवा[illegible]च्य क्रियमाणाः प्रवृत्तिवहूता न भविष्यंति। अंत्येनुवा
ग्विसर्गे क्रियमाणे मुसलादानादयो वाग्यमनेन क्रियमाणा न प्रवृत्तिवहूता भवेयुस्तस्मादाधिए
वहविष्षु मुख्य[illegible]ले प्राप्ते वाग्विसर्ग इत्येवं प्राप्ते आह॥ ॥नाना बीजेष्वंते सामर्थ्यात्॥ ॥नाना
बीजेष्वन्यएव हविष्षु दुष्टु मुख्यले प्राप्ते वाग्विसर्गःस्यान्नानियमो न मुख्य इति। कुतः। सामर्थ्यात्। अ
स्ति हि चोदकस्य सामर्थ्यमुत्तरेष्वपि हविःषु प्रक्षिप्यमाणेषु वाग्यमानं प्रदेष्टुं तथो हि मुख्ये हविषु प्रक्षि

७श्री

प्यमाणे वाग्यमनं चोदकः प्रविंसेव मुत्तरेष्वपि न[illegible]श्चिद्विशेषः। नन्वसेव हविषि वाग्विसर्गे क्रियमाणे

भवति

मुसलादानादयो वाग्यमनेन क्रियमाणा नैर्विवृत्ता भवेयुः। तत्र चोदको बाधितः स्यात्। न चोदको बाध्य
ते। अस्ति हि नियमस्यानियमं बाधितुं सामर्थ्यं। नियंस्यते वाग्यमो हविषि प्रक्षिप्यमाणे मुसलादानादिषु
त्वनियमः। तस्मादेते वाग्यमेनाविसृष्टवाचा क्रियमाणा अविगुणा एव। हविषस्तु विसृष्टवाचाप्र
क्षिप्यमाणस्य वैगुण्यं। तस्मात्पथोभयोरवैगुण्यं स पक्षः स्वीकार्यः॥ ॥व्रह्मावेति मुसलमा

दत्ते॥ ॥अध्वर्युरुलूखलमध्येहविरावापानंतरं ब्रह्म[illegible] ब्रह्मवे॰ सनेनमंत्रेणमुसलमादत्ते हस्तेन गृह्णा
ति। अथमुसलमादत्ते ब्रह्मवासीतिश्रुतेः॥ ॥सद्दमित्यवदधाति॥ ॥सद्दमित्यनेनमंत्रेणतदा
तंमुसलमुलूखलमध्येवदधाति।प्रक्षिपति। तदवदधाति सद्दंदेवेभ्यइतिश्रुतेः। कर्कमतेतु सद
दंदेवेभ्यइत्यत्र देवाभ्यादेवायदेव्यैइत्येवंदेवानामसीतिवत्। पितृयज्ञेच सद्दंपितृभ्यः इत्यूहः का
र्यः॥ ॥हविष्कृदेहीतित्रिराह्वयति॥ ॥ततोध्वर्युरवघ्नन्हविष्कृदनंकुर्वन् हविष्कृदेहीत्यनेनमंत्रेणत्रि
वारंहविःष्कृतमाह्वति। आकारयति। हविरेतीतिहविष्कृत्पत्नीवाआग्नीध्रोवा। वक्ष्यमाणस्तत्राह। अ
थहविःकृतमुद्वादयतिहविष्कृदेहीतिश्रुतेः॥ ॥अतःपत्न्यवहंत्यन्योवा॥ ॥अतःआह्वानादूर्ध्वंप
त्नीव्रीहीनवहंति। अन्योवा। अव[illegible]हननंतुक्षायकर्तव्यं। हविष्कृदुत्तिष्ठतीतिवचनात्। अतइतिग्र
हणमूर्वमध्वर्युरवघातेप्रवृत्तोस्तीतिगम्यते। तत्कुतोवचनात्। तथाचशाखांतरे श्रूयते। हविष्कृदेही
ति त्रिरवघ्नन्ना[illegible]ह्वयतीति। अत्रत्रिरित्यस्य आह्वयतीत्यने[illegible]नेति नावघातेनसंख्यानियमः। अन्यश
ब्देनात्राग्नीध्रोभिधीयते। सन्निकर्षात्समाख्यानुग्रहाच्च। अस्तिचाग्नीध्रोध्वर्युशब्देनाभिधानं॥

आश्विनमध्वर्यवो भक्षयंतीति प्रकृत्य अथ आश्विनं भक्षयंत्यध्वर्युः प्रतिप्रस्थाताग्नीध्र इति। तस्मा
दन्यशब्दो भाग्नीध्रस्याभिधायकः। ननु अन्यशब्देन ब्रह्मा कथं नाभिधीयते। उच्यते। वचनं वि
ना ब्राह्मणः कर्तृत्वायोगात्। नवै ब्रह्मा प्रचरति न इति श्रुते न संचरतीति प्रतिषेधात्। वृतानृ
स तत्प्रसंवेक्षणे या पत्नवाध। तदुक्तं सैत्रैतरा आये वहविष्षु दुपात्तहत्तितदिदमध्ये तहितैयव कश्चो
वोतिष्ठतीति श्रुतत्वात्। अपि शब्दान्य अपि अन्यो यः कश्चिदित्यविशेषेपि अप्रवृत्तानामनधिका
रात्प्रवृत्तानामेव वर्त्विग्यजमानानामन्यतमः सोपि वेदसंबंधात्स्थाना विरोधाच्चाग्नीध्र एवयुक्तःन
[illegible]ति। होतुस्सावधात्तुर्वे द्विके हविः करणे संबंधस्यैव। ब्रह्मयजमानावपि दक्षिणत आसाते तौ विशे
वचनादेव तत उत्तिष्ठतो नेष्यादविशेष वचनात्। उपोत्थाय चावहंति। हविष्षु वृद्ध उपोत्थानस्य
दृष्टार्थत्वमेवगम्यते इतिहपिस्वामिनः॥ ॥ आवहतसाहंस चोदषदुपलेकुक्कुटोसीतित्रिः शम्यया
द्वि [illegible] दृषदं सवदुपलां॥ ॥ आह्वयतीति स त्र्यंतं साम्येक वचनेन तु त्रियापदं। अध्वर्यैं हविष्कृतं
हविषः कर्तारं पत्नीं हवि: कृतनकतार यग्नीध्रं वाकंडनार्थमाह्वयति आवहार[illegible] यति॥ ७

उप

दे॰ भा॰ ब्य॰ २

३७

अध्वर्योरन्यः आग्नीध्रो विहारस्योत्तरतऽउपविष्टः शम्यया करणभूतया दृषदुपले आहन्ति। अ
त्रैवायं विशेषः। दृषदं शम्यया द्विर्द्धि माहन्ति कुट्टयति। उपलां च शम्यया सकृदेकवारमाहन्ति
तत्र कुक्कुटोसीत्ययं मंत्रस्त्रिष्वपि योक्तव्यः। वारद्वयं दृषदाहनने। सकृदुपलाहनन इति। यदि द्वो
च्यते तदा द्विर्दृषदमहत्यत्रैककृत्व एकमावृत्तौ सकृन्मंत्रवचनं कृत्वा द्वितीयेनेन सकृन्मंत्रवचनं
प्राप्नोति तन्माभूत्। प्रत्याहननमंत्रावृत्तिर्यथा स्यादित्येवमर्थं त्रिरित्युक्तं। अन्यद्रतिकृतनच्या
त्। सम्पत्रैव बहाविद्धृतमुद्वादयति तदैव दृषदुपले समाहन्तीति। यत्र यस्मिन्काले त्वेवाध्वर्युरु
द्वादयति तत्र काले एको न्यः स एवाग्नीध्रः पूर्वोक्तैरेव कारणैर्दृषदुपले समाहन्ति कथं समाहन्तीति
विशेषापेक्षायां तस्मात्शम्यया समाहन्तीति वक्ष्यमाणत्वात्। शम्यया करणभूतया द्विर्दृषदं स
कृदुपलामिति शास्त्रान्तरात्। एकद्व इति न संख्यावचनः। समाहन्तीत्यनेनैकवचस्यासिद्धत्वात्। अ
तः संख्यावचनत्वे अनर्थकः। अन्यवचनेन तु नानर्थकः। अध्वर्यव एवाग्निः समाहननमध्वर्योः श्रूय
ते। दृषदुपले इति द्वितीया श्रुतेः। करिष्यमाणकार्ये दृषदुपले संस्कार्ये इति शम्यते॥ ३७

शम्यादृषी २

अवतीक्ष्णीकरणार्थं हि माहननं घट्टते। न हि शम्याघातेनाश्मा तीक्ष्णो भवति। तस्माद्द्वितीया शुम्या
घातयोः संस्कारत्वमाशंक्यते। यो वै तं पितुमयमित्ति हन्सः प्रतिज्ञायते। तथ्यैव स्मादेत्तान्मंत्र
वाच्यं प्रयुङ्क्तायेति लक्ष्कारणं वक्ष्यत इति शेषः। ननु विध्येयार्थस्यासंबंधुर्वाच्यो न वाच्यमुद्धस
तीसुपन्यस्तांश्च तर्हि समाहंतीति। तनैवं विज्ञायते। दृषदुपले समाहंति वाच्यं प्रयुक्तास्यतंत
तत्त्वं संस्कर्तुं तद्वादनं चावांतरसन्निधानेरवघातांगत्वं तत्र योपसदा वसस्य पिपेषणे न घा
तांगत्वा कार्यं। अवघाताभावे च्ये स्यादेव निवर्त्तते। सूत्रकारस्तु महाप्रकरणादपूर्वयागांग
तामंगीकृत्याहत्यावघाधर्मिमा न ह्यत्वादिति हरिस्वामिनः। ननु सूत्रे दृषदुपले इति न वाच्यं द्वि
दृषदं सवदुपलां इत्यनेनैव सिद्धत्वात्। सत्यं। उभयत्र सूत्रेणैतत् ज्ञापयति यत्समाम्नायस्य
शाखांतरीयेणापि विशेषणेनाकांक्षता भवति। तेन यद्यपि सामान्येन द्वितीयायां समाम्नायोपदेशो
दृषदुपले समाहंतीति। तथापि तदाहननमात्रेणाशास्त्रार्थानुष्ठानस्य सिद्धिः। किंतु द्वि दृषदं सव
दुपलामिति विधिविशेषेण। अतः क्वचिदाकांक्षता प्रसाधनार्थमुभयस्य सूत्रणं। अन्नवपनादग्नी

ध्रः कर्तव्य न कपालोपधानवद्विधिविरोधात्। स यत्रैष इति श्रुतिवाक्ये एष शब्देनाध्वर्योः परामर्शे
ऽएकशब्देनाग्नीध्र इति। कपालोपधाने पेषणयोस्तु नैवं। तत्र हि सकपालान्येवान्यतरऽपदधा
ति दृषदुपले अन्यतर इत्यनिर्धारितः कर्तृविशेषः। इह तु निर्धारोऽस्ति। अथ हविष्कृतमुद्वादय
तीत्यत्र निःसंदिग्धः संख्ययोर्वादने अध्वर्युः कर्ता। स एव च स यत्रैष इत्यनेनैष शब्देन परा
मृश्यते। तस्मादत्र विरोधादग्नीध्रः कर्तव्यः। किं तु वचनादिति। तथा च मानवे। आग्नीध्रो दृष
दुपले समाहन्तीति। आपस्तंबे च। आग्नीध्रोऽश्मानमादाय तेन दृषदुपले समाहन्ति सा वित्रेवाश्म
न्या मादाय तया समाहन्तीति। अस्याश्चिंतायाः प्रयोजनं। पश्चाद्दैनिव्यापारे आग्नीध्र एवाध्वर्युव
चनमिति। हरिस्वामिनां मते तु यत्रावघातस्तत्र भवति। यत्रावघाताभावस्तत्र न भवती
त्युक्तं प्राक्॥ ॥वर्षवृद्धमसीति शूर्पमादत्ते॥ ॥ततोऽध्वर्युस्तुषेषु विमुक्तेषु वर्षवृद्धमसीस
मेनमंत्रेणानुकल्पाद्धविरुद्वपति बहिर्निष्क्रासयति। शूर्पादानस्य दृष्टार्थत्वाद्युवयोः शूर्पं क
रोति। अथ हविरुद्वपतीति श्रुतेः। उलूखलान्निष्क्रास्य शूर्पमभिवपतीत्यर्थः॥ ॥परापूतमिति

निष्पुनाति॥ ॥परापूतमित्यनेनमंत्रेणहविर्निष्पुनाति। निष्पवनेनतुषान्पृथक्कृत्वाधःपातयति

।शम्यास्वांतरेप्रस्कंदयतीतिवचनात्। अथनिष्पुनातिपरापूतमितिश्रुतेः। यदिव्रीहयोयदियवा

इत्येतदेवयवाक्रयस्रोषाद्व्रीहियवाः पुरोडाशप्रकृतिहोमनियम्यंते। ताविमौव्रीहियवाविति चयदि

शब्दविकल्पस्तयोः। अत्राहापस्तंबः। वर्षवृद्धमसीतिपुरस्ताच्छूर्पमुपहरत्सु तरलोनावर्षवृद्धा

स्येह अभिमंत्र्यप्रतिहावर्षवृद्धंवेष्टि सुदृपतिपुरापूतमिसुकूरेपरापुनातिवर्षवृद्धमितितुषा

न्प्रस्कंदतोनुमंत्रयतेमध्यमेपुरोडाशकपालेतुषानोप्यरक्षसांभागोसीसधस्तात्कृष्णाजिनस्यो

पवसुत्तरमपरमवांतरदेशमास्तेनोपवीतीतिबद्धयब्राह्मणमभिः कपालंसंस्पर्श्यप्रक्षालनि

धायापडुपसृष्टेदिति। मानवेच। आततुषेषुवर्षवृद्धमसीतिपुरस्तात्प्रत्यक्शूर्पमुपोहतिप्रति

हेसुधन्तिपरापूतमिसुकूरेनिष्पुनातिप्रविध्यौरक्षसांभागइतितुषान्प्रविध्यंतेपुरोडाशक

पालेतुषानोप्यदमहभिसधस्तात्कृष्णाजिनस्योपरिवपतीति। तैत्तिरीयेतु। तुषान्कृत्वात

तसः शूर्पमुपयच्छवर्षवृद्धमसीतितस्मिन्पुरोडाशीयानुद्वपतिप्रतिसूतेति। अथोदकपयी

रक्षसपरापुनाति परापुतमिति सव्येन तुषानुपहस्ते मां दिशमभिनिरस्यति रक्षसां भागोसीत्यथापउपस्प
र्शयति॥ ॥अथ परापुतमिति तुषानभिनिरस्यति॥ ॥आग्नेयस्य मध्यमे कपाले तुषानोप्य ऊ॰ध्मानिन
स्याधस्तात्तुषानभिनिरस्यत्युत्करदेशे। काठके। तुषान्बर्हिर्वेदिमभिनिरस्यतीति। अयत्तुषान्प्रहृंसप
हतं रक्ष इति श्रुतेः। प्रहृंति प्रक्षिपति शाखांतरीयो विशेषः पूर्वसूत्रेऽनप्रदर्शितः। माध्यंदि
नीयायां कणापासनेऽयं विधिरुपदिष्टः। न तु तुषनिरसने। शाखांतरेषु कणानामपासनमेव
नास्ति। कणानां होमविधानात्॥ वा॥ वायुर्वइति विविनक्तु॥ ॥वायुर्वइत्यनेन मंत्रेण विविनक्ति
।विविचिरपृथक्भावे। सतुषान्निस्तुषांश्च पृथक्करोतीत्यर्थः। अथापविनक्ति वायुर्वइति श्रुतेः।
विचिरपृथग्भावे। अत्र सूत्रांतरे। अथापउपस्पृश्य विविनक्तु वायुर्वइति पात्र्यां तंडुलान्प्र
स्कंदयतेति। कर्काचार्यास्त्वेवं व्याचक्षते। पृथक्करोति तंडुलान्कणांश्च वितुषीकरणायअ
तुषीन्सतुषांश्चेत्यर्थः। वितुषीकरणाये सत्रसतुषाणामिति ह्येयं। तच्चैलद्धि बेन्कीकर

पं तुषनिरसना पूर्वं प्रतिपत्तव्यं सामर्थ्यात्। अशेषाणां निरसनं ह्येवं सति भवति। उक्तं च य एवाशेषस्य तत्प्र
सरणा दिति। सूत्रक्रमश्च यथा श्रुतरसविरोधः। यद्यपि न कैश्चि दाचार्यैरेवं व्याख्यातं तथापि स्वसूत्रे सामर्थ्यात्
तरसूत्रेषु चादृश्यमानत्वात् तद्वर्ण्यं। तत्र नानाबीजेष्वयांउलूखलस्यैकत्वादेकास्य ह विषः फलीकर
णां तं कर्तव्यं। एतावत्स्वर्ये तस्याः बंधात् तस्यैकपदार्थत्वात् सदा ... र्थेन चानुसमयइष्यते। तथा च मा
नवे। नानाबीजानां मुख्येषु ह विषुत्तमाकृत्य सावपनप्रभृति फलीकरणांतमेकैकस्य निर्वापवतां
तं यवानामिति। तत्र च हविरावपनमुसलयोजनं कंड … ह विरूहपन विवेकीकरण पुनः कंड
न तुषनिरसन अभिमंत्रणफलीकरणनिधानानि सर्वेषां ह विषां ग्रहण क्रमेण पृथक् पृथक्
मंत्रवंति कर्तव्यानि। अन्यत्सर्वं तंत्रेण॥ ॥रेतोन इति पात्र्यामोप्याभिमंत्रयते॥ ॥तान्ख
व्यकृता तंदुलान ध्वर्युः स्त्रक्षीमेन पात्र्यामोप्य पात्र्यां प्रक्षिप्य देवो वइति मंत्रेणाभिमंत्रयते।
तंदुलान्स्व चक्षुषा विलोकयित्वा मंत्रं पठतीत्यर्थः। तथा चोक्तं। स्पर्शनेनाभिमर्शनेन कश्चिदालोकयन्न
पि। अनुमंत्रणीयं सर्वं सदैवमनुमंत्रयेदिति। महाचार्यैरप्युक्तं। मंत्रमुच्चारयन्नेव मंत्रार्थं हेतेन

संस्मरेत्। सोपि तं तन्मनाभुतास्यादेतदनुमंत्रणमिति। नानाबीजेषु पृथगेवाभिमंत्रणं कालस्याभिन्नत्वात्।
॥ ॥त्रिः फलीकरोति॥ ॥अभिमंत्रणानंतरं तंडुलान्त्रिः फलीकरोति। फलानि [illegible] ष्पत्तौ निष्पादयन्ति सर्वेषा
मपिरजो भागात्मकेन सूक्ष्मतुषरूपेणानुपेताः फलाः अफलान्फलीकरोति। अवहत्या वहतसूक्ष्मतुषेभ्यो
वियोज्य निष्पुयनिरजस्कानुज्वलान्करोतीत्यर्थः। त्रिरिति त्रिःपर्यायान्वारत्रयमेवमेव करोतीति मंत्रानु
पदेशात्तूष्णीमेव। अथात्रिः फलीकरोतीति श्रुतेः॥ ॥देवेभ्यः शुंधध्वं देवेभ्यः शुंधध्वमित्येके॥ ॥एके
शाखिनो देवेभ्य इत्यनेन मंत्रेण फलीकुर्वंतीति। अर्थादन्ये तूष्णीमेव कुर्वंतीति गम्यते। मंत्रांतरस्यानुप
देशात्। वीप्सा प्रतिपर्यायं सकृत्सकृन्मंत्रप्राप्त्यर्थः। नेह त्वप्रतिप्रहारं मंत्रावृत्तिर्युज्यते। कर्कमते तु देवे
भ्य इत्यस्य देवाभ्यो देवाय देव्यै इत्यादि विपरिणामो देवानामसीति देवशब्दवत् [illegible] ज्ञेयः। पित्र्य इत्यपि
त्स्यः शुंधध्वमिति फलीकुर्वंतीति मंत्रेण फलीकरणं विधाय तदुत्थानं कुर्यादिति प्रतिषि[illegible]ध्यतस्मा
दतूष्णीमेव फलीकुर्यादित्युक्तं श्रुतौ। आपस्तंबः। त्रिः फलीकर्तव्या इति संप्रेष्यति याजमानस्य पत्नी
साभिहत्यावहंति यो वा कश्चिदविध्यमानायामिति॥ ॥फलीकृतकणानिदधाति॥ ॥उक्तप्रकारेण

तत्र प्रकारेण तंडुलान्फलीकृत्य कणान्सूक्ष्मरूपान्निदधाति सुगुप्तान्स्थापयति। सप्रयोजनं ह्येतत्। वक्ष्यति
हि प्रतिपत्तिं पुरोडाशकपालेन कणानपास्यतीति। अतस्तदर्थं यत्नेन रक्षणमत्र विधीयते। अनेनैव तेषां
कणसंज्ञा च विधीयते। संव्यवहारार्थात्पादृक्रमात्सिध्यतीति प्रवृत्तिफलीकरणं कणनिधानार्थं फली
कृतेषु तं। तेन प्रतिपत्तीयं पदार्थं तया कणस्थापनं क्वचित्कर्त्तव्यं।। ।।पेषणोपधाने युगपत्।। ।।तं
डुलानां पेषणं कपालानामुपधानं च तदुभयं युगपदेकस्मिन्नेव काले सहैव कर्त्तव्यं। सर्वै कपालान्येवा
न्यतरदुपदध्याति दृषदुपले अन्यतरदिति प्रवृत्तस्तद्वा एतदुभयं सह क्रियत इति श्रुतेः। आग्नेयो ष्टाक
पाल इत्यस्यायमर्थः। अष्टसु कपालेषु संस्कृतो ष्टाकपाल इति। तत्र श्रो[illegible]त्ति वाक्येनैव कपालानामु
पधानाङ्गत्वे सिद्धे तेनोपधानमात्रं विधीयते। ननु चानुपहितेषु श्रवणानुपपत्तेरर्थप्राप्तमुपधा
नं तदप्यविधेयमेव। नैतदेवं पुरोहितान्यपि कथंचिदासाद्य तेषु श्रपयेत्। तत्र च नैकान्ततोऽर्था
दुपधानं प्राप्नोतीति विधेयं। तथा कंडनेनापि तंडुलाः पिष्टीकर्तुं शक्याः इति पेषणमपि न नियोगतः
प्राप्नोतीति तदपि विधेयं। न च दृषदुपले अन्यतरदुपदधातीत्यनुषंगादुपधानमात्रोच्यते। न पेषणं।

नैष दोषः। उपधानग्रहणं पेषणलक्षणार्थं। कुत एतत्। मस्तिष्क एव पि [illegible] नीत्ति वाक्यशेषात्। अन्यत
रस्याध्वर्योराग्नीध्रस्य वा व्यपदेशः। कुत एतद् अध्वर्योस्तावत् समारम्भात् आग्नीध्रोऽपि सन्निधानात्। देव
संयोगाद विरोधाच्च। यौगपद्ये तेन च विहिते तयोरन्यतर उपधाने अन्यतरः पेषणे प्राप्नोति वेसनन्तरग्रहणे
निसानुवादादेव तत्र पेषणस्य सामाद्विधिसंबंधात् कपालोपधानस्य विप्रकृष्टत्वात् पेषणे अध्वर्युः क

भ५ र्तुं ▪ तु मर्हति कपालोपधाने चाग्नीदिति। तदुक्तं जैमिनिना। अंगिगुणविरोधे च तादर्थ्यादिति। अतो
विरोधादेव कपालोपधाने चाग्नीध्रः कर्तव्यः। वचनात्। तत्र च यत्र य विरोधो नास्ति वरुणप्रघासेष्व
▪ र्योर्मेषकरणे प्रतिप्रस्थातुः कुंभपात्रमेषीकरणे च। तत्रोभयोर्यथा स्वं स्वयमेव दक्षिणाग्नौ कप
रोपधानं। नाग्नीधरति। तत्रवाचः क्रम वर्तिहा धुतिमंत्रक्रमानुसारे ▪ णपूर्वमुपधानमुपदिश्य
ति॥ ॥ध्रुवक्षितिरसीत्युपवेषमादायाग्नेरंगारान्प्राचः करोति॥ ॥उपवेषोंगारापोहनसमर्थं हस्ता
कृतिकाष्ठं। ध्रुवक्षितिरसीत्यनेन मंत्रेण तमुपवेषमादायतेनोपवेषेण खरस्थानअपरभागात् गार्ह
पत्यांगारान्प्राचः करोति खरस्य प्राग्भागे प्रेरयति। अपाग्नेरित्यनेन मंत्रेण पश्चाद्भागस्य कपालो

२ उहनं द
क्षिणार्द्धे २

पधानार्थं दृढीकरणाय। सम्यः कपालान्युपदधाति स उपवेषमादत्ते धृष्टिरसीति तेन प्राच्योंगारानुदु
हत्यपाग्न इति च श्रुतेः। ततोंऽगारापोहनस्य कपालोपधानार्थं दृढीकरणार्थं सार्थविहत्या तदभावः।
ध्यानाभंजनोपधाने च उभयोरप्यंगारेष्वेवाधिश्रयण प्रसिद्धेः। पितृयज्ञे च दक्षिणार्द्धे तु तत्रार्द्धे क
पालोपधानविधानात्। त्र्यंबकेषु चात्तरार्द्धे दक्षिणार्द्धे गारप्रकरणं उत्तरार्द्धे कपालोपधानविधाना
त्।। ।।आदेवयजनमिसंगारमादत्त कपालेनावच्छादयति ध्रुवमसीति।। ।।आदेवयजनमिस
नेनमंत्रेण तेनोपवेषेणांगारेभ्योंगारेभ्यः सकाशात् एकमंगारमादत्त पुरोडाशश्रपणस्था
ने आनीय ध्रुवमसीत्यनेन मंत्रेण तमंगारं कपालेनावच्छादयति। अथांगारमास्कौतीति प्रकृत
तं मध्यमेन कपालेनाभ्युपदधातीति श्रुतेः। आस्कौत्याकर्षयतीत्यर्थः। अयं पदार्थो भर्जने।
चरुस्थाल्यां न भवति। पितृयज्ञे च पितृयज्ञं वहे श्रुहुः।। अमुष्यान्निति द्विषद्धेवाभि चरन्।।
कर्मणा शत्रोः पीडनमभिचारः। तत्राभिचरन् परस्याभिचारं कुर्वन् ध्रुवमसीत्येतन्मंत्रमध्ये
द्विषत्वध्वे वैरिवाचके शब्दे व्यत्यस्य सम्मिन् स्थाने अमस्य अमुष्येत्येवं षष्ठ्येकवचनांतं शत्रोर्ना

मशब्दं व्यपदेत्। अमुष्य वध्यायेति भ्रातृव्यस्य वध्यायेति यदि नाभिचरेद्यद्यु अभिचरेदमुष्य व
ध्यायेति ब्रूयादिति श्रुतेः। अत्र द्विषदित्यस्य न स्वरूपग्रहणमात्रं। किं तु तत्समर्थानामपि भ्रातृव्यादि
शब्दानां तथा श्रुतत्वात्। तेनास्मिन् मंत्रे भ्रातृव्यपदस्थाने व्ययमादेशः सिध्यति॥ ॥अन्यत्रा
पि॥ ॥न केवलमत्र द्विषच्छब्दे अमुष्येत्ययमादेशः किं तु अन्यत्रापि अभिचरन् द्विषच्छब्दे श
त्रुनाम गृह्णीयात्। तद्यथा। द्विषतो वध्योसि भ्रातृव्यमवबाधे वस्त्राभिमर्शने जपेद्द्विषतो
वध इत्यत्र योस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगित्येवमादिषु तत्र तत्र तथा श्रुतत्वा
त्। अथो इदं च ऋ स्कन्धं प्रहरस्यमुष्मै त्वा वज्रं प्रहरामीति यद्यभिचरेदिति। द्विषतो वध इति यदि
नाभिचरेदमुष्य वध इति ब्रूयादिति। यद्यु अभिचरेदमुमतो मा मौगिति ब्रूयादिति च। यदा
भिचारबुध्या ध्रुवमसीत्यादीनां प्रयोगः क्रियते तदा तदुच्चारणोत्तरकाले उदकोपस्पर्शनं क
र्तव्यं। अभिचारणीयकं मंत्रमुक्त्वाऽपस्पृशेदिति सूत्रितत्वात्। अभिचारणं प्रयोजनमस्याभाव
भिचारणिकः। प्रयोजनमिति सूत्रेणाहीयि ठक्। तेनाभिचारबुध्यभावे मंत्रस्याभिचरणप्र

योऽनन्नाभावान्नाभिचारणिकत्वं। अतस्तदु आरंभोदकोपस्पर्शनाभावः॥ ॥सव्यांगुल्या
ऽनुन्येंगारमभिदध्यात्सग्ने ब्रह्मेति॥ ॥मध्यमकपालोपधानानंतरं सव्यांगुल्याऽनुन्ये भविमु
क्ते मध्यमकपाले अग्ने ब्रह्मेति मंत्रेणांगारमभिदध्याति। अभिनिहितमेव सव्यस्य पाणेरंगुल्या भ
वति। अथांगारमभ्युत्ति अग्ने ब्रह्मन्गृह्णीष्वेति श्रुतत्वात्। ध्यानाभर्जनस्यापि प्रथमकपालधर्मा भवंति।
तेन ध्रुवमसीत्युपधानं अग्नेरूपरि विशेषः। ततः सव्यांगुल्याऽनुन्येंगारनिधानं भवति। अदृष्टार्थ
त्वात्। सव्याऽनुन्ये कपालेऽग्ने ब्रह्मेतिमंत्रेणांगारनिधानं प्रतिकपाले भवतीति कर्कः। तच्चयुक्तं।
आपस्तंबोप्येवमाह। अपि वा मध्यममुपधाय सव्यस्य पाणेरंगुल्याभिनिधाय निर्दग्धं रक्षो निर्दग्धा अ
रातय इति कपालेंगा[illegible]रमभ्याधाय धर्त्रमसीति तस्मादपरं धरुणमसीति तस्मात्पुर्वं यथायोगमि
तराणि तस्य गुल्या निधानमंगाराध्यिवर्तनं च यथा जसनेयिनः समामनंतीति॥ ॥धरुण
मिति पश्चात्॥ ॥मध्यमकपालस्य पश्चाद्धरुणमसीति मंत्रेणद्धितीयं कपालमुपदधाति। अ
थ यस्य पश्चात्तदुपदधाति धरुणमसीति श्रुतेः॥ ॥पुरस्ताद्धर्त्रमिति॥ ॥मध्यम स्यैव कपालस्य

पुरस्तात्तृतीयं कपालमुपदधाति। अथ यत्पुरस्तात्तदुपदधाति पत्रेमसीति श्रुतत्वात्॥ ॥नि धाभ्यद
क्षिणतः॥ ॥तस्यैवमथ मदक्षिणत श्चतुर्थं कपालमुपदधाति। यथा यद्दक्षिणतस्तदुपदधाति वि
श्वाभ्यस्त्वेति श्रुतेः॥ ॥समं विभज्येद्दक्षिणत एवमुत्तरत श्चैनस्थेति॥ ॥चतुर्णां कपालानामुप
धानानंतरं यान्यवशिष्टान्यष्टानां मध्ये चत्वारि तानि सममेव विभज्येद्दक्षिणतउपदधाति। एवमेव
द्वे एवोत्तरत श्चतस्रो व्यंचितइति तेषां सर्वेषां प्रत्येकमुपधानमंत्रः। येदक्षिणतोद्वे उपधीयेते त
४८ योर्मध्ये एकं चतुर्थात्पूर्वं द्वितीयं चतुर्थादपरं। ततः उत्तरतः प्रथमं पश्चात्ततः पूर्वमित्येवं प्रादक्षिण्ये
नोपधानं कर्तव्यं। उत्तरतोयत्कपालद्वयं तदप्ययं प्रमाणमिति वानवे। स्मार्तं चैतत् प्रादक्षिण्यत
त श्चतदपचारे स्यात्तं प्रायश्चित्तं। ननु द्वे दक्षिणत एवमुत्तरत इत्यनेनैव सिद्धत्वात् समं विभज्येति न
वक्तव्यं। सत्यं। तत्र सिध्यति। अग्नीषोमीयार्थत्वेन तत्। नह्येकदेशन कपालः। तत्रहि वक्ष्यति॥ ॥एव
मेकादशाग्नीषोमीयस्याधिकं दक्षिणतइति॥ ॥तत्र चतुर्णामुपधानानंतरं अवशिष्टान्यसमं वि
४८.
भज्याधिक्यं यादक्षिणतउत्तरतश्चोपदध्यात्। एवं समविभागे क्रियमाणे यदधिकं तद्धक्षिपतत्

पदध्यादित्यर्थः सिध्यति। अन्यथाऽसंख्याधिक्यमथाशंक्येत। नहि द्वेदक्षिणतत्वमुत्तरतइत्येवोक्ते
अग्नीषोमीयेऽग्रेचावसिष्टानां विभ[illegible]धानं सिध्यति॥ ॥तूष्णींवा॥ ॥अथवा तूष्णीमेवचतु
र्थ्याधिकानि सर्वाणि कपालानि उपदधाति न मंत्रेण। तूष्णीं वै वेतराणि कपालान्युपदधाति चितस्थो
र्ध्वचित इति वेति श्रुतेः। अत्रतैत्तिरीयसूत्रे विशेषः। अथ तानि कपालानि प्रक्षालितानि जघने
गार्हपत्यस्य मुपसादयत्येव दक्षिणतएकादशो ततो जघनेन गार्हपत्यमुपविश्य धृष्टिमादत्ते धृष्टि
रसीति॥ ॥एवमेकादशाग्नीषोमीयस्य॥ ॥एवमुक्तेनैव प्रकारेणाग्नीषोमीयस्य पुरोडाशस्यैका
दशकपालान्युपदधाति। एवं शाखानां गाराहरणकपालोपधानादि सर्वमतिदिश्यते। विशेषमाह॥
॥ ॥अधिकं दक्षिणतः॥ ॥चतुर्णामुपधानानंतरमवशिष्टानां सप्तानां समविभागे क्रियमाणे य
दधिकं विभक्तुं न शक्यते तद्दक्षिणत उपदधाति। तत्रायं क्रमः। प्रथमं मध्ये। द्वितीयं तत्पश्चात्। मध्यस्य
पुरस्तात्तृतीयं। तस्य दक्षिणतश्चतुर्थं। तस्मात्पूर्वं किंचिदुत्तरालं[illegible] पंचमं पंचमचतुर्थयोरंतराले ष
ष्ठं। चतुर्थस्य पश्चात्सप्तमं। तस्य पश्चादष्टमं। ततो नवमप्रभृतीनि त्रीण्युत्तरतः प्राक्संस्थानि। एतानि

सर्वाणि कपालानि निरंतराणि संश्लिष्टानि समानानि च योमध्ये यानि यथांतराभुमिर्न दृश्यते। अत्र
मध्यमपंक्तिकपालानि समचतुरस्राणि भवंति। एवं च षडंगुलदीर्घी मध्यमपंक्तिर्भवति दक्षिणो
त्तरपंक्तौ तु न मध्यमपंक्तिसमे। किं तु किंचित्ततोन्यून्येन हतिरिक्ते। कुतः। पुरोडाशस्य कूर्माकारो
त्वा हस्ताकारस प्रसिद्धे [illegible] यावत्कपालं प्रथनविधेश्च तदर्थं कपालन्यूनेरपि अर्थात् स्ताकारता याः
गम्यमानत्वात्। हे मंत्रेतु चतुर्थोपधानानंतरं सम विभागेन चतुरादिदक्षिणतश्चतसार्ये वोत्तरत
इति। अत्र कः सूत्रे विशेषः। [illegible]था प्रथमस्य कपालस्योपधानमेव कपालाय यथाद्वयोरेवद्वि
कपालोयेव मतद्वर्धे मुक्तेदिति। अतएव वचनादेक कपाले प्रथमकपालधर्मेण तस्योपधानं
द्विकपाले प्रथमद्वितीयधर्मेण तद्वयोरुपधानं। त्रिकपाले त्रयाणामपि प्रवृत्तिवदेवोपधानं॥
परिमाणे तु सर्वत्र पुरोडाशपरिमाणापेक्षया अथा कल्प्यं। जामदग्निचतुरात्रे पुरोडाशि
नीषु पवहस्तु चतुःकपाले सौम्ये अश्वप्रतिग्रहेष्टौ वारुणे च चतुर्थकपालस्य दक्षिणतः
ओपधानं विश्वाव्यइति मंत्रेण। पंचकपाले च चतुर्थस्योपधानंतं पंचमस्योपधानं प्रादक्षिण्या

नुग्रहात्। षट्कपाले तु समं विभज्य येहादिन्यायेन चतुर्थस्य पश्चात्पंचमं षष्ठमुत्तरतः। सप्तकपाले
चतुर्थस्य पुरस्तादेकं पश्चादेकं च सप्तममुत्तरत इति। नवकपालेषु चतुर्थकपालोपधानानंतरं
अवशिष्टानि कपालानि विभज्य त्रीणि दक्षिणतः तन्मध्ये चतुर्थस्य पूर्वं पंचमं चतुर्थस्य पश्चा
त् षष्ठं सप्तमं च द्वे उत्तरतः। त्रयोदशकपालेषु षट् दक्षिणतः अष्टावुत्तरत इति। अत्रैषिस्तिषेत्रेम कपाल
ध्य ▪ मास्वशफप्रमाणं षडंगुलं वृत्तं कृत्वा तत्प्रागपच्छेदेन समं त्रेधा विभज्य मध्यमभागस्यातीर्य
गपच्छेदो द्वेधा विभागः कार्यः। दक्षिणोत्तरभागयोस्तु खंडचंद्राकारयोः पुरोगशाक संख्येनुरोधेन ती
र्यक् विभागः कार्यः। अत्र षट्कपाले दक्षिणो भागो द्वेधा। उत्तरे त्वेकमेव कपालं खंडचंद्राकारं उत्तर
भागप्रमाणं। सप्तकपाले दक्षिणो भागस्त्रेधा। उत्तरः एकधा। अष्टकपाले दक्षिणस्त्रेधा। उत्तरो द्वे
धा। नवकपाले दक्षिणो भागश्चतुर्धा उत्तरो अष्टकपालवत्। दशकपाले दक्षिणश्चतुर्धा मध्य
मोत्तरौ त्रेधा। एकादशकपाले दक्षिणतः पंचधा। इतरौ त्रेधा। द्वादशकपाले दक्षिणतः पंचधा म
ध्ये त्रेधा उत्तरतश्चतुर्धा। त्रयोदशकपाले दक्षिणतः षोढा। उत्तरश्चतु ▪ र्धा। मध्यमः सर्वत्र त्रे

ध्यैव। एककपालं चेत्साङ्गि संमितं। द्विकपाले वृत्तस्य तीर्यगपच्छेदेन द्वेधा विभागः। त्रिकपाले वृत्तस्य ती
र्यक् समं त्रेधा विभागः। चतुष्कपाले वृत्तं संप्राच्यमपच्छिद्योत्तरभागस्य त्रेधा विभागः। दक्षिणत एकं।
पंचकपाले पि वृत्तं प्राचद्वेधापच्छिद्योत्तरत्रेधा विभागः। कपालानि कूर्मणाप्युपायेन तु तथा करणीया
नि। यथा कपालचितिः क्षेत्रं वृत्तं संपूर्यते॥ ॥भस्मनाभिसंगारैरभ्यूहति॥ ॥भस्मनाभिसनेन
तानि कपालानि गार्हपत्यांगारैरभ्यूहति आछादयति। अथांगारैरभ्यूहति भस्मनाभिसादि श्रवणा
त्। एककपाले तप्यस्वेमुहः। कपालद्वयेत व्येथाभिति। तच्चैतदंगाराभ्यूहनं कपालानां सुत
प्तकरणार्थं॥ सुतप्तान्यसतीति वा भस्मशेषात्। सुतप्ते ष्वधिश्रितः पुरोडाशः पच्यते। एवं च
कपालस्य भस्मग्नाहितो पि ध्यानाभर्जनस्यांगारैरभ्युहनं न भवति। प्रसिद्ध भावात्। भर्जनस्य हि
ध्वस्तादेव तापनमिति॥ ॥उपसर्जनीरधिश्रयति॥ ॥अंगारैरभ्युहनानंतरमग्नीदेवोपस
र्जनीरधिश्रयति गार्हपत्य एव। पिष्टसंयवनार्था आप उपसर्जनीशब्देनोच्यंते। तदधिश्रय
णं चंदनार्थं तप्ताभिर्हि संयवनं यदा क्रीयते तदा पिष्टानां मार्दवं भवति। एवं च पुरोडाशपाका

आहवनीयपश्चिमे पात्रोपसर्जनी अधिश्रयणं तत्रैव॥

थीत्येवैतान्। तत्र यदा आहवनीये हविः श्रपणं क्रियते तदोपसर्जन्यधिश्रयणं कपालोपधानं
चाहवनीय एव कर्तव्यं। यदा गार्हपत्ये श्रपणं तदोभयमपि गार्हपत्य एवेति। पित्र्ये यज्ञे यद्दक्षिणाग्नौ श्रप
णविधानात् यथार्थनिबन्धनी दुग्धोपसर्जन्यधिश्रयणमपि दक्षिणाग्नावेव कार्यं। ननु पेषणोपधा
नयोः सह कर्तव्यतोक्तेः रूपधानानन्तरं पेषणमेवाभिधेयं तत्कथं अन्तरोपसर्जन्यधिश्रयण
मुक्तं। सत्यं। उपधानवत् पेषणेन सहोपसर्जन्यधिश्रयणस्यापि यौगपद्ये प्राप्तेर्थं तत्र चोप
सर्जन्यधिश्रयणेपि विरोधादेवाग्नीत् कर्तृत्वं। तेन विरोधाभावे पर्वविज्ञस्यामुपसर्जन्यधिश्रयण
मध्वर्युणैव कर्तव्यं। अथ पेषणमाह॥ ॥ कृष्णाजिनमादत्ते पूर्ववत्प्रतिकृष्णाजिनं॥ ॥ फली
कृतकणनिधानानन्तरमेवाध्वर्युः कृष्णाजिनमादत्ते कृष्णाजिने प्रति च पूर्ववद्विधिर्भवति
पूर्वं यदि सादानमवधुननं आस्तरणं सव्यावृत्यकरणं चेति। अथ योदपदुपलेऽवदधाति
कृष्णाजिनमादत्ते शर्मासीति तदवधुनोत्यवधुतमिति। तत्प्रतीचीनग्रीवमुपस्तृणाति यदि सा स्थे
सादेरपि श्रवणात्। सव्यावृत्यकरणमिति शास्त्रान्तरात्। तथा च मानवे। आदानावभ्रमत्रित्व

कृष्णाजिनस्यसमानमास्तरणान्नैरितृमवस्तृणातीति आपस्तंबश्च ॥ अत्र कृष्णाजिनादानादि प्रागधि
वर्तनान्तं स्तेति। तत्रोक्तं मनुस्सूत्रे कृष्णाजिनमधिषवणमसीति तस्मिन्नुलूखलमधिवर्तयती
ति॥ ॥तस्मिन्दृषदं धिषणासीति॥ ॥तस्मिन्कृष्णाजिने सव्यामनुन्ये दृषदमुपदधातीति॥ धि
षणासीत्यनेन मंत्रेण। अत्र दृषदमुपदधाति धिषणासीति मन्त्रेः॥ ॥पश्चाद्ग्राव्यामुपोह
सुकीचीं दिवइति॥ ॥पश्चाद्दृषदः पश्चाभ्राग्रेउदीचीमुदगग्रां शम्यामुपोहति दृषदो
ध्वस्ताप्रवेशनयति। अथ शम्यामुदीचीनाग्रामुपदधाति दिवस्कंभनीरसीति सुतता
त्। इयं च दृषदः उपर्युपधेया। कुतः उपधानक्रमादंतरिक्षसंस्तनात्। जिव्हासंस्तवाच्चे
ति चेत् तदयुक्तं॥ अदृष्टार्थकल्पनाप्रसंगात्। अतउपधानस्य चापेक्षितत्वादेवविशेषाश्र
वणे सतितत्रोपधीयमानो करोति तत्रोपधेयेति गम्यते। यदुक्तमुपधानक्रमादिति तन्नकिं त्वि
त्। नहियमस्याश्चादुपधीयते न तस्मुर्वस्योपरीति किंचित्कारणमस्ति। यदप्यंतरिक्षस्यैवरूपेण
सं॰ तरिक्षस्यसंस्तवेदिति सोप्यंतरालवर्तित्वमात्रनिमित्तोंतरिक्षसंस्तवः। देशतो हि सरूप

उपलांतरालवर्त्तित्वं शम्यायाः कार्यविरोधीति वक्तव्योपधानकालः ततो यदंतरालवर्त्तित्वं नाम तद्वेक
पेक्ष्यायमंतरिक्षायसंस्तवः । अवश्यं चैतदेवमभ्युपगंतव्यं । अन्यथा देशांतो तरालवर्त्तित्वे सति
शम्यायाः धुपर्युपधाने ततभान्योपधानमेव न संवर्त्तेत । प्रतिज्ञापर्वतीवेक्षितिः चसाक्षात् दृषत्सं
बंधमेवोपलायादर्शयति । इतरथा तु शम्यया व्यवहितयोर्दृषदुपलयोः संबंधाकुतोऽपि साशंका
येनतन्निवक्तये प्रतिज्ञापर्वती वेक्षितिर्नेदंयोन्यंऽहीन सा ज्ञ इत्थेयोच्यते । एवं जिह्मासंस्तवोऽप्य
न्यतः सामान्यादिति गंतव्यं । कालेंतरस्तावदंतराल संबंधस्थित एव । किंच्चाधस्तात्सद्भावा
गस्य प्रवेशिता शम्या दृषदः प्रान्प्रवणतां करोति निश्चलां च । अतोऽदृष्टार्थत्वादधस्तादे
वोपधेया । तथा । चलिंगं । स अघेनेन शम्यापि धीयमाणानामवशीयं पिशानि यातं दुलाभिवे
ति । अतश्चाधस्तादुपहिताया एव भवति नोपरि ॥ ॥दृषदुपलौ धिषणासीति ॥ ॥धिषणा
सीत्यनेन मंत्रेण दृषदि दृषदडुपर्युपलामुपदधाति । अथोपलामुपदधाति धिषणासीत्यादि श्रुतेः ॥
ननुपेषणार्थत्वादुपलाया दृषद्येवोपधानं प्राप्नोतीति किमर्थमुक्तं दृषदीति । सत्यं दृषदुपलया

दे॰ भाष्य २

५५ ८गोपधानं नश्नं न्यायाइतिनियमार्थमिसदोषः॥ ॥धान्यमसीतितंडुलानोप्यपिनष्टिप्राणायत्वेति
प्रतिमंत्रं॥ ॥धान्यमसीतिमंत्रेणदृषदितंडुलानोप्यदृषदिउपरितंडुलान्निध्यायाप्राणायत्वेतिप्रति
मंत्रंपिनष्टि।पिष्ट चूर्णने।चूर्णयतिपिष्टत्वमापादयतीत्यर्थः।अथहविरधिवपतिधान्यमसीति
।अथपिनष्टिप्राणायत्वेतिच श्रुतत्वात्।डुवप् बीजप्रक्षणे।अत्रप्रक्षेपणमात्रेप्रक्षिपतीत्यर्थः॥
पित्र्यज्ञेध्विनुहिपित्रिनिसेवमुहुः।अग्न्याधानामयनेचत्तरसमयेषुसवनीयेषुनरसमाक्षिध्विनु
हीसेवमुहुः।पिनष्टिइसेवंत्रिरपिमंत्रेषुव्याहारः।साकांक्षत्वात्।अत्रापस्तंबः।प्राणायत्वेतिप्रा
ती॰ ७ चीमुपलांप्रोहत्यपानायत्वेतिप्रतीचीं [illegible] व्यानायत्वेतिमध्यदेशेव्यवधारयतितत्रः सततंपिन
ष्टीति।मनुः।प्राणायत्वेतिप्राचीमुपलांप्रोहत्यपानायत्वेतिप्र तीचीं प्रकर्षयतिव्यानायत्वेतिमध्य
देशेव्यवगृह्णातीतिदीर्घामितिसंततंप्राचीं दीर्घाकोपिनष्टीति॥ ॥दीर्घामितिवृद्धप्याज्ञिनेप्रोह
ति॥ ॥सर्वेषुतंडुलेषुपिष्टीभूतेषुदीर्घामितिमंत्रेणतानिपिष्टानिवृष्णाजिनेप्रोहति।उपलया ५५
प्रेरयित्वा प्राच्यां कृष्णाजिनस्योपरिपातयतीत्यर्थः।दीर्घामनुप्रसितिमायुषेधामितिप्रोहती

ति श्रुतत्वात्। कृष्णाजिने पिष्टानि प्रस्कंदयतीति शाखांतरात्। आपस्तंबः। असंवपंतीपि षाणु निकुरू
जादिति संप्रेष्यति दासी पिनष्टि पत्नी वा। अपि वा पत्न्यवहंति शूद्रापि नष्टीति॥ ॥ चक्षुषे त्वेतीक्षते॥
ततः कृष्णाजिने पतितानि पिष्टानि चक्षुषे त्वेत्यनेन मंत्रेणेक्षते। चक्षुषा पश्यति ईक्षत इति व्याख्यातारः।
सांकांक्षत्वात्। यागसाधनभूतद्रव्यसंस्कारोयं। ततश्च पेषणाभावे चर्विष्टयां तंडुलानामीक्षणं भव
त्येव। वाजप्रसवीयजुहोतौ चयने वाजपेये च सर्वौषधीनामपि॥ ॥ पिष्यमाणेषु निर्वपत्याज्यम
हीनामित्याज्यं॥ ॥ पिष्यमाणेषु तंडुलेषु अध्वर्युराग्नीध्रो वा अन्यो यजमान एव महीनामित्यनेन
मंत्रेणाज्यस्थाल्यामाज्यं निर्वपति। पात्रांतरादाज्यस्थाल्यां प्रक्षिपतीत्यर्थः। आज्यस्थालीलक्षण
मुक्तं छंदोगपरिशिष्टे। आज्यस्थाली प्रकर्तव्या तैजसद्रव्यसंभवा। महीमयी वा कर्तव्या सर्वास्वा
ज्याहुतीषु च। आज्यस्थाल्याः प्रमाणं तु यथाकामं तु कारयेत्। सुदृढामव्रणामद्रामाज्यस्थालीं
प्रचक्षत इति। पिंषति पिष्टान्यभीध्यते कपालान्यथैक आज्यं निर्वपतीति श्रुतेः। भट्टहरिस्वामि
नः। अध्वर्युराग्नीध्रो वा अन्य एकः स चयं सन्निधेयजमानो मंत्रानध्यनादेक इति पुल्लिंगनि

ईशा च न पत्नी। ब्रह्मा च परितोषणस्य परद्रव्यपृथक्करणे नातिसमर्थः। अतः स्वामिना यजमा
नेनैवात्राज्यनिर्वापं कर्तुमलमिति। स एवान्यः। एवं च निरुप्याज्यं वेदोसीति यजमानो वेदं करो
तीति सूत्रे वेदकरणेन समानकर्तृकमाज्यनिर्वपणं गम्यमानमनुपपन्नं भवति। अतो यजमा
नेनैवाज्यनिर्वापं कृत्वा वेदं करोति। तदुक्तं सूत्रकृता। निरुप्याज्यं वेदोसीति वेदं करोति कुशमु
ष्टिं सव्यावृत्तं वत्सजानुं त्रिवृतं मूलतः ॰यं चापशुब्रह्मवर्चसान्नाद्यकामा यथासंख्यमिति।
मनुः। वेदं करोति वत्सजानुं प्रसव्यमावेष्ट्य तूलैर्द्विभिर्णातरतूलेषु शुल्बं प्रति निधाय त्रिरावे
ष्ट्य स्वमप्रसुत्तरं प्रदक्षिणं प्रादेशमात्रे शुल्बावसरिवास्यो करे मूलानि गमयति तूशानिदध्याति
वेदं कृत्वा वेदं करोतीति। तैत्तिरीयसूत्रे वेदं करोति वत्सजानुं पशुकामस्य स्तूलकार्यमन्नाद्यका
मस्य त्रिवृतं तेजस्कामस्योर्ध्वाग्रं स्वर्गकामस्येति। भौगाक्षिः। वेदं करोति दर्भमुष्टिं प्रसव्य
मावेष्ट्योपमूलं भयाग्राणाः शुल्बं कृत्वा त्रिपरिहरस्यगुणेषु शुल्बांतमवकृष्य यग्र्य शु
ल्बान्प्रादेशे छित्वा ग्राग्रीध्रे निधायो करे मूलानि ततो वेदकरणमिति। आपस्तंबः। दर्भाणां

वेदं करोति वस्तजानुंपर्शुकामस्य मुतकार्यं मन्नाद्यकामस्य विवृधिरसं ब्रह्मवर्चसकामस्य
शुल्बाह्लादे शेपरिवास्यवेदपरिवासनानि निदध्यातीति। वस्तजुर्वस्तजानु तुल्यः मुतकार्यं
मुलवल्क्रियते। यत्र धान्यं निधीयते समुत इति त्रिवृदेकशिरा स्त्रिवृधिराः। त्रीणि शिरां
सीति केचित्। कामाभावे प्येता आवृतयः अकामस्यान्यस्याविधानादिति तन्मध्ये वेदपरि
वासनानि सर्वाण्येव वेदाग्राणीति च॥ ॥पात्र्यां सपवित्रायां पिष्टान्यावपति देवस्य त्वेति॥
ततः सपवित्रायां पात्र्यां पिष्टान्यावपति। कृष्णाजिनमुसाध्वेत्तेनैव पात्र्यां प्रक्षिपतीति हरि
स्वामिनः। देवस्य त्वेत्यनेन मंत्रेण। पवित्रन्तति संयवति। पात्र्यां पवित्रे अवध्याय देवस्य त्वेति
श्रुतत्वात्। पात्र्याभिसाकारविशेषयति महति पात्रे इत्यर्थः। आपस्तंबः। प्रक्षालितायां पात्र्यां
निष्टसोपवातायां पवित्रवसां पिष्टानि संयवतीति। तथा संवपन्यां च यत्र ति तामभिवाय स
यन्विसृजत इति। पात्र्यामावपनं च संयवनार्थं। अतश्चरुतंडुलेषु न भवति। सपवित्रता तु
चरावपि वर्त्तते अदृष्टार्थत्वात्॥ ॥श्रपणस्य पश्चादुपविशसंर्त वेदिवा॥ ॥संयवनानंतरं

दे·भा·२

७६ क्षपिशपा त्रीमासादयेत्तदुक्ताय श्रपणस्यगार्हप त्यस्यपश्चादुपविशति। अथवापेषणदेशादु
त्थायांतर्वेदिमध्येउपविशन्ति। वेदेरंतः अंतर्वेधाः करिष्यमाणायाः प्रादेशोलक्ष्यतेयस्मिन्देशे
१८३ शास्त्रेणवेदिर्विहितातस्यदेशस्याभ्यंतरेउपविशतिपिष्टंपात्रींहीत्वातामेवतत्रासादयती
त्यर्थः। कुतएतत्। परस्तःपिष्टानांसंयवन श्रुतेः। विधानेविहितेसौकार्यदेवोपवेशनंप्रालमे
वानुघेते। अंर्तवेदीतिपृथगुपादानाद्धश्रपणशब्देनात्र गार्हपत्येभिधी यते। अथवाश्रपणस्यप
श्चादुपविशसेतावतैवपाक्षिकोतर्वेद्युपवेशनेसिद्धेयदंतर्वेदीत्युच्यतेतत्गार्हपत्ये श्रपणपक्षेप्यं
तर्वेद्युपवेशनंविकल्पेनयदास्यादिति॥ ॥उपसर्जनीरा [illegible] नयसन्यः॥ ॥अध्वर्यो
रन्यआग्नीध्रउपसर्जनीरुष्णास्यानीयउपविश्यपात्रीस्थपिष्टानामुपरीनयतिनिनयतीत्यर्थः॥
अथैव उपसर्जनीभिरेतिताआनयतीतिश्रुतेः। अस्याअर्थः। एकोन्यआग्नीध्रउपसर्जनीभिःउप
शमार्थेसंसृज्यतेसंभिश्यतेहविराभिरित्युपसर्जन्यआपः समापओषधीभिरितिमंत्रलिंगात्॥
शाखांतरात्तुतसाभिःसहेतिसहयुक्तइतिरत्नीयामुष्णीत्वाआगच्छतिगार्हपत्याद्वेदिदेशं॥ताआनय ७६

त्तिप्रवृत्ते पिष्टे कः कस्य हस्ते वर्त्तते स एवाग्नीध्रः ॥ ॥पवित्राभ्यां प्रतिगृह्णातीति समापद इति॥ ॥अध्वर्युस्ता अग्नीधानीय
मानाः उपसर्जनीसंज्ञा आपः समापद इति मंत्रांते पवित्राभ्यां प्रतिगृह्णाति। तां पवित्राभ्यां प्रतिगृह्णातीति श्रुतेः॥ ॥संयौ
तिजनयत्यै त्वेति॥ ॥ततो ध्वर्युर्जनयत्यै त्वेति मंत्रेण संयौति। युमिश्रणे॥ पिष्टान्यद्भिः संमिश्रयतीत्यर्थः॥ अ
त्राहापस्तंबः। प्रोक्षणीर्वशिष्टान्युत्सुय प्रणीताभिः संयौसन्यायायजुषो सुयद्यप्रणीता नाधिगच्छेत्स्रुवेण प्र
५ मा णीताभ्य आदाय आदाय वेदेनोपयम्य संपोक्षद्भिरगमतेति पिष्टे ध्वानीयाभ्यः परिप्रजाइति तत्ताभिरनुपरि
प्लाव्य जनयत्यै त्वेति संयौतीति। मनुरपि। वेदोपयामः स्रुवेण प्रणीता माहरतीति समाप ओषधीभिरिसा सिंचतीति तत्ताभ्य
ग्याभ्य इति। तथा पः थ गध्वमिति तत्ताभिः सारयति पिष्टानि परिसन्नयतीति च। लौगाक्षिः। प्रणीतास्तासा घतवती
री समापद्यसासिच्यते। नैतिर्यां स्रुवेपि। अथ परिकर्मिणमाह। आहरापइति आनये साह। आहर प्रैषकारः प्रणीताभ्यः
स्रुवेणोपहरस वेदेनोपयम्य पाणिनां तत्क्षीयै वं मदतीभ्य क्षाऽभयीः समानीयमानाः प्रतिमंत्रयते समापद्यसा
दि। पुर्वक्ष नेनैवोक्तं। तपं तिपिष्टसंयवनीया आप इति। चरानुपसर्जनीनिनयनं भवसे वत्तत्राप्युदकार्थस्य विध
मानत्वात्। संयवनं तु न भवति कायलोपात्॥ ॥समं पिभरस्यासं हरिष्यन्नालभत इदमग्ने रिदमग्नीषोमयो
रिति॥

संयवनानंतरं समं विभज्य द्वौ पिंडौ कृत्वा असंहरिष्यन्पुनर्मिश्रणमकरिष्यन्नूक्रमेणैतौ पिंडावालभेत। उद
कंसस्थौ पात्र्यां निहितौ। अवरोहमुत्तरं हवीषोः सुक्तेः। इदमग्नेरितिदक्षिणमाग्नेयमालभेत। इदमग्नी
षोमयोरित्युत्तरमग्नीषोमीयं। अथ द्वेधा करोति यदि द्वे हविषी भवतः। पौर्णमास्यां वै द्वे हविषी भव
तः। स यत्र पुनर्न संहरिष्यन्स्यात्तदभिमृशतीदमग्नेरिदमग्नीषोमयोरिति नानावा एतदग्नेहविर्भ
वंति तस्सहावबध्नंति तस्सहपिंडं बंति तस्पुनर्नाना करोति तस्मादेवमभिमृशतीति [illegible]तत्वात्। य
दि द्वे इति ब्रुवन्नमा[illegible]वास्यापि प्रवृत्तं वेत्ति दर्शयति पौर्णमास्यां वै द्वे नित्यं इत्यभिप्रायः। ऐंद्राग्नवाजिस्व
मावास्यायां [illegible]मपि द्वे भवत एव अत एवानयोर्हविषोर्ग्रहणं प्रोक्षणं च पृथक्कृत्वा [illegible] तत एकत्र संयोज्य
सहैव कंडनपेषणसंयवनानि कृत्वाधुना विभज्य यथास्वमालंभः कार्यः। अतश्च दृष्टार्थोयमालंभः।
तेनैकस्मिन्हविषि न प्रवर्तते। किं प्रविभागपूर्वो ह्यालंभः। न चैकस्मिन्विभागोस्ति। ननु समं विभज्येत्येता
वता सिद्धे असंहरिष्य[illegible]न्नेत किमर्थं। उच्यते। विषमेपि विभागे प्राप्ते आलंभानंतरं पुनरपि सह

सह विभागकरणवारणार्थमित्तदिति पिर[illegible]मुक्तिः। अथ चैवं योजना असंहरिष्यन्निति सनेनालंभस्य कालो

तरं विधीयते। यस्मिन्काले संहरिष्य[illegible]ति तदेव विभज्यालभते। नेमं कालं प्रतीक्षते। तेन चरूणां फलीकरणांत एव विभज्यालंभः। पौष्णस्य तु पे[illegible]षणांत एव विभज्यालंभः। पुरोडाशानां तु संयवनांते। अत एव श्रूयते। स यत्र पुनर्न संहरिष्यन् भवेत्तदभिमृशतीति। यत्र यस्मिन्काले सोध्वर्युः पुनः संहरिष्यन् स्यात् पुनर्मिश्रीकरणं करिष्यन्न भवेत्तस्मिन्नेव काले विभज्याभिमृशतीति। तेन यवादीनां विभज्यालंभे पुरोडाशसंयवनोत्तरकाल तानियमो न भवतीति नास यीर्थः। एवं चरूणां पुरोडाशैः सह विभागे ज्ञेयं। चरूणां तु परस्परं चरुषु ष्वेहेतीक्षणांत एवं। ईक्षणस्य प्रवृत्तौ सहदृष्टत्वात्। अत्रापि अविरोधाच्च॥ ॥ यथा देवतमन्यत्। अन्यदैं द्रा ग्नादिकं हविर्यथादैवतं यायायस्य देवता तस्य षष्ठ्यंत नाम्नो च्चारणेनाभिमृशेत्। इदमग्नेरिदमिंद्राग्न्योरित्येवं॥ ॥ एषेत्येसाज्यमधिश्रयत्यन्यः॥ ॥ अध्वर्योरन्य आग्नीध्र इषेत्वेसनेन मंत्रेणाज्यं गार्हपत्येधिश्रयति। यो ब्राह्मणा वाज्यमधिश्रयतीति श्रुतेः। अधिश्र[illegible]यामीति याध्याहारः साकांक्षत्वात्॥ ॥ अपत्नीकस्याहवनीये तद्धारपिणः॥ ॥ अपत्नीकस्य रजोदोषप्रसवप्रवासादिना असन्निहितपत्नीकस्य तद्धारपिण इत्याहवनीयश्रपिणः आहवनीये हविःश्रपणं कुर्वतो यजमानस्याहवनीये आज्यमधिश्रयति॥ ।

९ आहवनीयश्रपिणापि गार्हपत्ये त्वा अधि
श्रयति॥ ०

यतत्संवंस्तु
यते १
७८

आहवनीय आप्येणोपि सन्निहितायां पत्न्यां गार्हपत्ये सत्येवोयस्याहवनीये हवींषि श्रपयंतीति प्रसस्य यस्यो
पत्नीन भवत्य एव तस्याहवनीये धिश्रयतीति। यस्यपत्नीनस्यात्तस्याहनियमेनाहवनीय आपीतस्याग्रे
प्रथममाज्याधिश्रयणमप्याहवनीय एव कर्तव्यमिति हरिस्वामिनः। शाखांतरे चैवं श्रूयते। यस्यन्नसेह
निपत्न्यनालंबुकी स्यात्तामवरुध्य यजेतेति। अनालंबी रजस्वला॥ केचिदपत्नीको मृतपत्नीक
इत्याहुः। तद्विषयमप्येतत्। तस्यापत्नीकाग्निन आध्यानं श्रूयते। आश्वलायन ब्राह्मणे। तदाहुरपत्नी
कोप्यग्निहोत्रमाहरे आहरे दित्याहुरे दित्याहुः यदि नाहरेदनद्धापुरुषः स्यादनद्धापुरुष इति न देवा
न पितृन्न मनुष्यान्प्राप्नुवतीति तस्मादपत्नीकोप्यग्निहोत्रमाहरेत्तदेषा यज्ञगाथाभिगीयते यजे
त सौत्रामण्यामपत्नीकोप्यसोमपः। मातापित्रोरनृणार्थाय यजेत वचनाच्छ्रुतेरिति तस्मात्सौमंया
यजेत्तस्मादपत्नीकस्याध्यानं कुर्वेत्सपत्नीकोग्निहोत्रं जुहोति श्रद्धा पत्नी सत्यं यजमानः श्रद्धा सत्यं
तदित्युत्तमं मिथुनं श्रद्धया सत्येन च मिथुनेन स्वर्गंलोकं जयतीति। तथा च पत्न्यां मृतायां त्रिकांडमंडनो
प्याह। स्त्रीमात्रमविशेषेण दग्ध्वान्ये वैदिकाग्निभिः। विवाहाद्यादहत्ते यद्वा ध्यानमेवास्ति चेद्वधुः। एकाकी

७८

वाद्धीताग्नीन्विवाहस्थेऽन्नसिध्यति। नित्ये स्थाग्रयणान्यग्नीहोत्रं कर्मास्य नेतरदिति। आविशेषेणेति। प्रथ
मां द्वितीयां वा इति विशेषरहितं स्त्रीमात्रं दग्ध्वेत्यर्थः। तथा पत्नीमरणे व्यग्नीनां रक्षणमप्युक्तं। तस्मा
त्कार्यैकदेशेन दग्ध्वा प्युर्वमारिणी। पत्नी ज्येष्ठेतरावापि यज्ञपार्श्वे निरूपितं। कात्यायनः। मृता
यामपि भार्यायां वैदिकाग्नीन्नहि सत्त्यजेत्। उपाधिनापि तत्कर्म यावज्जीवं समापयेदिति॥ ॥घ
र्मोसीति पुरोडाशं युगपत्॥ ॥घर्मोसी सनेन मंत्रेणाध्वर्युः पुरोडाशं कपालेष्वधिश्रयति॥
आज्येन युगपत्। आज्येन सहाधिश्रयणं पुरोडाशाधिश्रपणं चरुहैव भवतीत्यर्थः। अधिव
णस्ये वै पुरोडाशमधिश्रयत्यसावाज्यं तद्वाए तदुभयं सह क्रियतइति श्रुतेः। एषोध्वर्युः पुरोडाश
मधिवणत्ति। अधिश्रयणोति। असावाग्नीध्र आज्यमधिश्रयतीति। असाविति समाख्यासन्नि
हिताध्वर्यपेक्षया विप्रकृष्टतरमग्नीध्रमदसा पुरस्थवचनेनाह। अत्र पुरोडाशाधिश्रपणं वि
देन कपालेभ्योंगारान्पराकृत्य कर्तव्यं। तथा चाहापस्तंबः। इदमहमित्ति वेदेन कपालेभ्योंगारा
नपोह्य घर्मोसीसाग्नेयं पुरोडाशम ॰ ष्टाकपालेष्वधिश्रयत्येवमुत्तरमुत्तरेष्वेवमनुपूर्वाण्ये

वैष्वतऊर्ध्वं कर्माणि क्रीयंते। समानजातीयेन कर्मणैकैकमपवर्जयतीति यानि विभवंति सकृतानि क्रीयंत इति। अत्र विरोधादन्यस्य कर्तृत्वं तेन विरोधाभावे पशावाज्यैः शैपयस्यादौ चाध्वर्योरेवाज्याधिश्रयणमिति कर्कः। तत्कथमप्युपपद्यत इति स एव वेद। यत्तु सोनै वाहननेवचनादग्नीध्रः कर्तृत्वं मुक्तं। स यत्रैष हविष्कृतमुद्वादयंति तदेकोदृषदुपलेसमहतीस्तनया श्रुत्या। अत्रापि तादृश्यैव श्रुतिरस्ति॥ अभिवर्णत्येवैष पुरोडाशमाधिश्रयत्यसावाज्यमिति। अतोत्रापि वचनादग्नीध्रः कर्तृत्वं। तेन व्यावर्तेप्यध्वर्यौ वाहननवदग्नीध्र एवाज्याधिश्रयणमिति युक्तमुपपश्यामः। सहाधिश्रयणविधानाद्विरोधादेवान्यस्मिन्प्रासे यदन्यग्रहणं सु व्यक्तं करोति तदविरोधे युपसदादावन्य एवाज्याधिश्रयणे कर्ता यथा स्यादित्येवमर्थमिति संप्रदाय इत्येवं यत्कर्काचार्यैरुक्तं तदेव साधु। व्याख्यानांतरं तु न हृदयंगमं युक्तमिति॥ ॥उरु प्रथा इति प्रथयति यावत्कपालमनति पृथुं॥ ॥उरु प्रथाः ■ इत्यनेन मंत्रेणाधिश्रितं पुरोडाशपिंडं यावत्कपालमनति पृथुं प्रथयति। यावत्कपालमिति यावंति यत्परिमाणानि पृथुनि कपालानि तावंति पृथुं करोतीत्यर्थः।

कीदृशो। सनतिपृथुं अतिशयतः पृथुरितिपृथुरतिविपुलः न अतिपृथुरनतिपृथुस्तं अनतिपृथुं नाति
विपुलं लौकिकापूपसदृशमित्यर्थः। तं प्रथयतीति प्रवृत्तस्तत्र सत्रा पृथुं कार्यीदृश्वशफमात्रं कुर्या
दित्युहैक आहुर्यावंतमेव स्वयं मनसा न सत्रा पृथुं मन्येत तं वै कुर्यादिति श्रुतेः। तत्र सत्रेति सत्राश
ब्दः सत्यनामसु पठ्यते। यद्वा सत्राशब्दश्च सत्यस्य स्पष्टवचनो त्र शान्तपथे। यथ्यस्य स्पष्टमेव तद्विस
विरोधश्च एव। ततश्च न स्पष्टं पृथुं न कुर्यादिति। अन्ये त्वेवमन्य[illegible]र्थं गम्यमानं दृष्ट्वातिशब्दस्यैवा
र्थे सत्राशब्दं वर्णयंति। तेषां सत्रा नाम श्रुति विरुध्यते नाहैव सत्रा संके नोदुर इति चातिशब्देन
सह प्रयोगश्चापपद्यते दनुपन्नः। तस्मात्सत्यवचनो सत्राशब्दो मानुषं। मनुष्यराजकं मंडलं कु
र्यादिति कस्तदे ति। अश्वशफापि नियतपरिमाण एव महतो श्वस्य महान् अल्पस्याल्पः नियत
परिमाणं च यस्त्वन्यपरिच्छेद ह्यायाल्पमित्यभिप्रायः। यावंतमेव स्वयं मनसेति न युगशम्याद्विव
दश्वशफो मानाया भ्युपेतव्यः। मनसैव यावंतं पश्यमाना श्वशफपरिमाणोद्देशेन नाति पृथुं मन्ये
त दैवतस्सौ विष्टव्के ते ऽध्यवदानपर्याप्तमन्येन तत्परिमाणं विशिष्टं कुर्यात्। अत्राहापस्तंबः। ऽरत्न

थ स्वेति पुरडाशं प्रथयति सर्वाणि कपालान्यभिप्रथय[illegible]तुं गमनमनुपावृत्तिं कूर्मस्यैव प्रतिकृतिम
श्वशफमात्रं करोति यावन्तं वामन्येत तत्रा[illegible]प[illegible]थुं करोतीसेकेरप्ति। मनुरपि। इदमहमिति वेदेनक
पालेभ्यो भस्मापोहति घर्मोसि विश्वायुरिसधिश्रयसेवमुत्तरमेकैकं कर्मोभयोः कुर्यादुरुप्रथस्वे
तिया वत्कपालं कूर्मो वृत्ति प्रथयतीति। लौगाक्षिरत्ति। पिंडो वृत्ता घर्मइसधिश्रियोरुप्रथस्वेति प्रथ
यति कूर्मरूपाविति। सूत्रांतरेन्य। संयुज्य स्रुह्यभिमन्त्र्ययस्यग्नये त्वाग्नीषोमाभ्याममुष्मा इति य
थादेवत्तं पिंडं करोति मखस्य शिर इति। तं दक्षिणेषां कपालानां प्रसुह्यांगारास्ते षधिश्रयणान्ति। घर्मो
सि विश्वायुरिति प्रथयस्युरुप्रथस्वोरुतेयज्ञपतिः प्रथतामिति तन्वंतं कूर्मप्रकारं करोति सर्वाणिक
पालान्यभिप्रापयतीति। अत्र सर्वेषु सूत्रेषु पुरोडाशयोः क्रमेणाधिश्रयणविधाना सहाधिश्रय
णमनुपपन्नं। तेनैकस्यैव पुरोडाशस्य आज्यस्य च सहाधिश्रयणं। द्वितीयादीनां तु क्रमेणैव। ननु या
वत्कपालमित्युक्ते तावत्परिमाणत्वेव पथुर्भवष्यति। नन्वनाधिकपरिमाणस्तत्किमर्थमुच्यते। अ ५·
न्ति पृथुमिति। सत्यं उच्यते। कपाले परिमाणे पूर्वं सिद्धे तेन पुरोडाशप्रथनपरिमाणज्ञापनमुपपद्यते।

न च तत्प्राकृत्सिद्धं। अतः कपालपरिमाणज्ञापनार्थैवैतदनतिपृथुग्रहणमिति। तेन तावत्परिमाणान्येव कपा
लानि कुर्यात्। यावत्परिमाणेषु यावत्कपालेषु यावत्कपालं विस्तारितः पुरोडाशो लौकिकापूपवन्नाति
पृथुर्भवति। अतः षडंगुलवर्ती कपालश्चितिर्यथा संपद्यते तथा कपालपरिमाणमाश्रयणीयं। अ
नेकयजमानके तु अस्य मंत्रस्योहो भवति। उरु ते यज्ञपती प्रथेतामिति द्वियजमानके। उरु ते यज्ञपतयः
प्रथंतामिति बहुयजमानके। चरौ चकारीभावात्प्रथनाभावः। अत्राधिश्रयणं प्रथनमद्भिरभिमर्श
नं चेति त्रयमेकैकस्य कृत्वा परस्परं कर्तव्यं बहुषु हविःषु। अन्यथासुन्तेषु कपालेष्वधिश्रपणात्पिंडः
शुष्येत तथा सति प्रथनं न संभवति। तेनार्थादेवं कर्तव्यं। पुरोडाशांगस्याधिश्रपणादयः तदंगस्यात्क
मः पदार्थानुसमयरूपं तदाश्रयणे च पुरोडाशशोषप्रसंगः। न चांगानुरोधेन प्रधानबाधो युक्तः।
यत्र यत्र तु नास्ति प्रधानबाधो दर्शपूर्णमासादौ द्वित्रिचतुरादिहविष्षु तत्र पदार्थानुसमयेनैव कर्त
व्यं॥ ॥अग्निष्ट इत्यद्भिरभिमृशति सकृत्त्रिर्वा॥ ॥अग्निष्टे त्वचमिसनेन मंत्रेण तं पृथुकृतं पुरो
डाशं सकृदेकवारमद्भिरभिमृशति। सोदकेन हस्तेन सर्वतः स्पृशति प्रथने क्रियमाणे यत्र यत्र विदी

दे॰ ब्रा॰ २

५७

५ तरित ७॥२
ओं ५

णं भवति तदद्भिः संदध्यादिति संयोजयतीत्यर्थः॥ ॥त्रिर्वा॥ ॥नास्त्रयं वाभिमन्त्र्य शान्तिं नसवक्त। नमद्भि
रभिमन्त्र्य शान्तिं सकृत्त्रिर्वा तत्पदेवास्यात्राब ध्वं तोवेसुक्तत्वात्। तदद्भिः संदध्यातीतिवाक्यशेषात्। अस्मि
न्पक्षे सकृन्मंत्रेण द्विस्तूष्णीं। एकद्रव्ये कर्मापवृत्तौ सकृन्मंत्रवचनमित्युक्तत्वात्। पिष्टलेपे नावि
क्षारयं स्त्रिः परि[illegible] मार्ष्टीति मानवे। तच्चेत् प्रीत्युत्तमद्भिः श्लक्ष्णी करोत्यनतिक्षारयन्निति सा पस्त
बः। एतत् ध्रौनस्यात्॥ ॥पर्यग्नि करोत्यंतरितारातयः इति सहाज्यं॥ ॥सहाज्यं आज्यसहितं पुरो
डाशं अंतरितमित्यनेन मंत्रेण। उल्मुकेन पर्यग्नि करोति। तं पर्यग्निं करोतीति श्रुतेः। सकृदित्येकवचनमविव
क्षितं। उद्देश्यगतत्वात्। एवं सर्वेषु संस्कारवाक्येषु ज्ञेयं। प्रातिपदिकार्थस्तु विवक्षितत्वः। तेनसान्नाय्ये
पर्यग्निकरणाभावः। पिष्टलेपानयनं पात्र्यंगुलिप्रक्षालनं च पर्यग्निकरणात्प्रागेव कर्तव्यं सामर्थ्या
त्। अन्यथाग्निसंयोगात्कालविलंबाच्च शोषणे सति प्रतिपत्तिकाले क्षालनमतिदुष्करं स्यादिति। प्र
तिपत्तिश्च चोदिता। पात्र्यंगुलिप्रक्षालनमात्रे भ्योनिनयति पिष्टलेपाञ्जुहोतीत्युत्पत्तिश्च न चोदिता। ५७
अतः सामर्थ्यादुत्पत्तिर्ध्यवसीयते। अत्र काठके विशेषः। प्रसुष्टमित्युल्मुकेन युगपत्त्रिः परिहृत्येति। आ

पस्तंबः। अंतरितमिति सनीणिहवींषि त्रिः पर्यग्निकुर्वतेति॥ ॥देवस्त्वेति श्रपणं॥ ॥पर्यग्निकरणानं
तरं देवस्त्वेत्यनेन मंत्रेण पुरोडाशस्य श्रपणं करोति। तं श्रपयति देवस्त्वेति श्रुतेः। मनुः। देवस्त्वेत्यु
ल्मुकेनाभितापयति दर्भैस्त्वचं ग्राहयतीति। आपस्तंबः। देवस्त्वेत्युल्मुकैः प्रतितपति दर्भैरभिज्वा
लयति। ज्वालेनैव विदहतः श्रपयेति वा चंचिस्तजते आग्नीध्रो हवींषि स्युश्रतानि करोतीति। लौगाक्षि
रपि। देवस्त्वेत्यभितप्याग्निष्टद्व्यादीप्तेन तत्त्वचं ग्राहयतीति। ९ तच्च श्रपणं सामर्थ्याच्चरोरधस्तादुल्मु
कप्रेरणेन कर्तव्यं धानानां च। पुरोडाशस्य तूपरीति॥ ॥माभेरिति आलभते॥ ॥तौ पुरोडाशौ माभेरि
त्यनेनालभते प्रत्येकं। सोभिमृशति माभेरिति श्रुतेः। अभिमर्शनं च श्रतात्मकत्वापनार्थं। तमभिमृश
तीति तं वेदादीनीति वाक्यशेषात्। अतश्च वेदादावपि प्रवर्तते। धानासु च माभैरिमाधि गच्छ इत्येवमु
हः। अधिश्रयण मंत्रेण पर्यास्थ विश्वायुरिति॥ ॥अन्तमेरूरिति श्रुतावभिवासयति भस्मनावे
देनोपवेषेण वा॥ ॥श्रतौ पुरोडाशावन्तमेरूरित्यनेन मंत्रेण वेदेनोपवेषेण वा करणभूतेन भस्म
नाभिवासयति भस्मना आच्छादयतीत्यर्थः। यदा श्रुतो थाभिवासयतीति श्रुतेः। अश्रतयोः पुनः

दे. ध्य२

५२

श्रपणप्रदानार्थं स्तनग्रहणं। स्तनावितिद्विवचननिर्देशः प्रदर्शनार्थः। यथेह यदा स्तनौ तथाभिवा
सयतीत्येकह युक्तमभिवासनमुभयोरन्क्रमेवाधिश्रयणप्रथनस्य ■ श्रपणपर्यग्निकरणान्येकत
युक्तान्युभयोरपि पुरोडाशयोर्भवंतीति। कुतः। उद्देशगगतैकत्वसंख्याया अविवक्षितत्वादिति। वि
रोधाश्चराव अभिवासनस्याभावः। यजमानयोः प्रजायजमानानां प्रजेति। यथायथमनेकयजमानके
ऊह्यः। अत्रा ह्यापस्तंबः। वेदेन पुरोडाशौ सांगारं भस्माध्युहतीति। सांगारेण भस्मना प्रच्छाद्येति का ह
के।। ।।पात्र्यंगुलिप्रक्षालनमास्येभ्यो निनय ■ सभितप्यप्रसंगसंस्पंदमानं त्रितायत्वेतिप्रति
मंत्रं।। ।।त्रितायत्वेति मंत्रं पात्र्यंगुलिप्रक्षालनमिति पिष्टलिप्तपात्रीप्रक्षालनं पिष्टलिप्तांगुलि
प्रक्षालनं चाभितप्यपात्रास्थमेव ज्वलतोल्मुकेन तापयित्वा प्रयत्नसंस्थमसंस्पंदमानं पर
स्परसंसगतिमप्राप्नुवदास्येभ्यो देवताभूतेभ्यो निनयति। अथ पात्रीनिर्णेजनमंगुलिप्रणेजनमा
स्येभ्यो निनयति तदभितप्तपतितथैषं स्तं भवति स निनयति त्रितायत्वेत्यादि श्रवणात्। नन्नाना ५२
ती निनयेतिच। नानापृथक्परस्परमसंस्पृश्येत्यर्थः। आस्यग्रहणं भागदेवताज्ञापनार्थं। आस्येभ्य

इति च नु [illegible] र्थ्या आसा नाम त्रे देवताह्वावगमात्। ततश्चात्रास्यानुद्दिश्य त्यागः कार्यः। अतश्चास्विष्ट
कृद्भयरूपमेतत्कर्मप्रतिपत्तिरूपमपुर्वोत्पादकं च। तेन द्रव्यविनाशेपि स्विष्टकृद्देवद्रव्यान्त
रेणापि निनयनं कर्तव्यं। अपरे तु द्रव्यप्रधानत्वात्तद्विनाशे नोत्पत्तिमिच्छंति। अत्रापस्तंबः। अं
गुलिप्रक्षालनं पात्रीनिर्णेजनं चोल्मुकेनाभितप्य स्फ्येनांतर्वेदि त्रिस्त्रोलेखालिखति। प्राची
उदीचीर्वा तास्वसंस्पंदयन्नुदेत्रि निनयति प्रसगवर्गमेकतायस्वाहेत्येतैः प्रतिमंत्रं निनीय यथागमि
तपेदिति। मनुः। पुर्वार्द्धे [illegible] धात्रतीयमात्रे प्रागुदीचीस्फ्येन त्रिस्त्रोलेखालिखति। एकतायस्वा
हा द्वितायस्वाहा त्रितायस्वाहेत्येतैरसंस्पंदयंल्लिखासु पिष्टलेपं निनयतीति। तैत्तिरीयसूत्रे॥
अथ तत्पात्रीसंक्षालनं गार्हपत्यादंगारेणाभितप्य दक्षिणांतर्वेदि प्रतीचीनं त्रिस्त्र लेखासु निन
यतीति। आप्तेभ्यस्त्वुच्यमाने मानुदिशा शंका यथा आप्त्या अपि देवतांतरं त्रितादयोपि देवतां
तरं। अथ पुनराप्तेभ्यस्त्रितायेति प्रतिमंत्रं निनयतीत्युक्तेस्सत्येवं ज्ञायते यत्ते त्रितादयस्तए
वाप्त्याः यथाप्त्यास्तएव त्रितायेंद्र इति। तथा च श्रूयते। ततआप्त्याः संबभूवुस्त्रितो द्वितएक
त इति।

दे. ५२

५२

अतोऽविशेषणविशेष्यभावेनोभयोस्त्यागे प्रयोगः कार्यः। इदं त्रिताया आप्यायस्वेदं द्वितायाआप्यायस्वेदमेकताया आप्यायेति॥ ॥अन्वाहार्यं दक्षिणाग्नावधिश्रयति॥ ॥ततोऽध्वर्युरन्वाहार्यसंज्ञकं दक्षिणार्थं तंडुलरूपं दक्षिणाग्नावधिश्रयति॥ अन्वाहार्यइति दक्षिणार्थस्योदनस्य संज्ञा। तथैदेतदूनं यज्ञस्यान्वाहरति तस्मादन्वाहार्यो नामेति श्रुतेः। ततो देवा एतां दर्शपूर्णमासयोर्दक्षिणामकल्पयदन्वाहार्यं नेद दक्षिणं हविरसदिति श्रुतेश्च। अत्राऽऽपस्तंबे विशेषः। दक्षिणाग्नावन्वाहार्यं महांतमपरिमितमोदनं पचति क्षीरेन भवतीसेकरति काठके च। अन्वाहार्यमोदनं दक्षिणाग्नौ मतं महांतमपरिमितमिति। मानवेप्येवमेवास्ति। अतश्चतुर्णां मृत्विजां तृप्तिर्यावता संभाव्यते तत्परिमाणं ततोऽधिकं वान्वाहार्यमोदनं कुर्यात्॥ ॥अथवा व्रतोपायनं॥ ॥अत्रास्मिन्काले व्रतोपायनं व्रतग्रहणं कर्तव्यं शाखांतरात्॥५॥
अपरेणाहवनीयं वेदिं खनति॥ ॥खनतिरत्र करोत्यर्थे। आहवनीयमपरेण वेदिं करोति। अग्निपुरस्तात्समाध्यायेत्युक्तत्वात्। अपरेणाहवनीयमित्युक्तं खननीति प्रस्तुतामाह॥ ॥त्र्यंगुलखातां॥ ॥त्र्यंगुलपरिमाणं खातमस्याः सा त्र्यंगुलखाता तां त्र्यंगुलखातां वेदिं करोति। अथ वेदेः परिमाणमाह॥

५२

व्याममात्रीं पश्चात्॥ ॥पश्चादिति अपरस्यां दिशि तीर्यक्प्रमाणेन व्याममात्री व्यामप्रमाणां कुर्या
त्। व्याममात्रीं पश्चात्स्यादित्याहुरिति श्रुतेः। चतुर्भिररत्निभिर्व्यामो भवति॥ ॥त्र्यरत्नीं प्राचीं॥ ॥त्रयः
अरत्नयः प्रमाणमस्याः सा त्र्यरत्निः तां त्र्यरत्नीं। अरत्नित्रयप्रमाणां प्राचीं पूर्वापरयतां दीर्घां वेदिं कु
र्यात्। त्र्यरत्निः प्राचीति श्रुतेः। पुरस्तात् तीर्यक्प्रमाणमप्यरत्नित्रयात्मकमेव क्वचिद्दर्शनात्त्र्यरत्नित्रयः
पुरस्तादिति। सा वै पश्चाद्वरीयसी स्यान्मध्ये संह्वारिता पुनः पुरस्तादुर्वीति श्रुतेश्च॥ ॥अपरिमितां
वा॥ ॥अथवा अपरिमितां वेदिं कुर्यात्। न परिमिता अपरिमिता तां अपरिमितां। नेन पूर्वोक्तप्रमा
णन्यूनप्रमाणां वा अधिकप्रमाणां वा कुर्यादित्यर्थः। नात्र मात्रास्ति यावतीमेव स्वयं मनसा मन्येत
तावतीं वेदिं कुर्यादिति श्रुतेः। अत्र वेद्याः प्रमाणं नास्त्येव यावन्तीं यत्प्रमाणविशिष्टामेव वेदिं स्व
यं मनसा हविरासादनादिकार्यपर्याप्तां मन्येत तत्परिमाणविशिष्टां वेदीति श्रुत्यर्थः। व्याममात्री
त्यादेरयमर्थः। पश्चिमपार्श्वे चतीर्यक्प्रमाणमेतद्द्रष्टव्यं। व्याममात्रीति त्र्यरत्निः प्राचीं दैर्घ्यमे
तत्। पूर्वपार्श्वे त्रितीर्यक्प्रमाणं नोक्तं। तदेवमिव ह्रियेषां प्रश्रंसंतीति वचनाद्ग्राम एव मानादन
इति कल्पनीयं॥

दे॰ प॰ २
५७

नात्रमात्रास्तिपुर्वमानप्रतिषेधोविकल्पार्थः। ननुविनैवविधिप्रतिषेधाभ्यांअनियमप्राप्तौतीस
नियमकारिणौविधिप्रतिषेधावनर्थकौस्यातां। नैषदोषः। विधिनाविनाव्यामादिमानद्रव्येणमा
तव्येसयमर्थोनसिध्यति। प्रतिषेधेनापिविनातद्वर्जितानसिध्यति। ततश्चषोडशिग्रहणाग्रहणव
दयंव्यामादिमानद्रव्यस्यविकल्पोद्रष्टव्यः। सावैपश्चादिति। वरीयसीउत्तरी। सङ्कारिताङ्काकौ
ल्यै। संकु■टितासंकुचितेत्यर्थः। पुरस्तादुर्वी। मध्यापेक्षया। तस्यानंतरस्यापेक्षयाप्रयुक्तत्वात्। व
रीयसीसथमुरुस्तस्यप्रकर्षः। उरुत्वत्रपुरस्तादुर्वीत्येतत्। ततश्चमध्यापेक्षयापुरस्तादुर्वी। ततोप ■
श्चादुत्तरा। किमर्थंपुनरिदमुच्यतेनियमार्थं। व्यामाध्यनियमेतावद्वक्तव्यएव। व्यामादिनियमप
क्षेपश्चात्परिमाणमुक्तंस्यात्। प्राक्परिमाणंचयत्तुमध्यमस्यसंहारितंतदपेक्षयाचोरुत्वमेतदप्रा
समेनविधेयंपृथ्वीश्रोण्यौ। अस्याःसापृथुश्रोणिः। विमृष्टांतराङ्गुलीसंहतिश्रोणितोविमृष्टंनुनमं
तरंअवकाशोययोस्तौविमृष्टतरौ। तथाविधावंसौयस्याःसातथोक्ता। संमार्ष्टेतिमध्यदेशेहस्तेन ५८
गृहीतुंशक्या ■ कृशोदरीतियावत्। एवंभूतांप्रशस्तयोषितोकारांवेदिंकुर्वन्देवेभ्यःप्रियंकरोतीति॥

अस्मिन्सूत्रग्रंथे द्वावेवाप[illegible]मितेशब्दौ श्रुतिवाक्यानुसारणादपरिमाणवाचिनौ। अपरिमितावा। अ
परिमितेर् को वेति च। अन्यत्वपरिमितं प्रमाण्यभ्युपरस्सुक्त्वा पूर्वोक्तपरिमाणादतिशयेनाधिकप
रिमाणवाचकावति। अपरिमितपक्षेपि सावैप श्चाद्वरीयसी स्यादित्याद्यनुसारेणैवाधिकमानं भव
सेव। अपरिच्छिन्नदेशो खननस्तरणादेः कर्तुमशक्यत्वात्॥ ॥प्राक्प्रवणामुदक्प्रवणां वा॥ ॥प्रवणेऽ
स्मिन्नापोऽनेन वेति प्रवणं नीचं प्रवर्तते वनमुदकमस्मिन्निति तदेव निम्नं। प्राक्प्राच्यां दिशि प्रवणं
निम्नं नीचमस्याः सा प्राक्प्रवणा तां वेदिं कुर्यात्। उदक्प्रवणां वेति। सा वै प्राक्प्रवणा स्यादिति। अथो
दक्प्रवणेति श्रुतेः॥ ॥मध्यसंगृहीतां॥ ॥मध्ये संगृहीता संकुचिता मध्यसंगृहीता तां मध्य
संगृहीतां एवंविधां मध्यप्रदेशे संकुचितां वेदिं कुर्यादिं कुर्यादित्यर्थः। मध्ये संग्राह्येति श्रु
तेः। संग्रहसाधनप्रकारश्चापरिशिष्टे उक्तः। आनीय रज्जुं पूर्वार्द्धमिश्राद्धं यावदेव तु। द्विगुणीकृ
सतां रज्जुमंतेतस्यास्तु शंकुकौ॥ भ्रामयेत्तेन मानेन तया रज्ज्वाष्टभागया। बाह्यतस्तु तुरीयेण भा
गेनालिख्य संग्रहावितिः। क्वचिद्वेदिश्रोण्यंसयोर्मध्ये तया रज्ज्वाष्टभागयेति पाठः॥ ॥अग्निमभि
तोंऽसौ॥

अस्या वेदेरंसौ। आग्नेयैशानकोणौ अग्निमाहवनीयमभिभूतो भवतः। अभितोग्निमंसाउन्नयतीति
श्रुतेः। आहवनीयस्य दक्षिणोत्तरपार्श्वयोर्वै ध्वंसाउन्नयति ऊर्ध्वं प्रापयतीति। अंसयोर्मध्ये आह
वनीयो भवतीत्यर्थः। अतोंसावपि वेदेरेवावयवौ श्रोणिवत्। ■ अतश्च तयोरपि खननस्तरणादयो वे
दिसंबंधाः संस्काराः प्रवर्त्तंते। सूत्रकारोप्यपो हव बर्हिः ष्यं स्वदेशे प्राशित्रं निदध्यादित्युक्त्वा अंस
योरपि बर्हिस्तरणं सिद्धं दर्शयति॥ अत्रायं साधनोपायः॥ षडरत्निरज्जुमित्याद्युक्तीयरत्न्यंतेतल्लक्षणार्थं॥ ततो
रत्नेश्चतुर्थे भागे लक्षणमाकर्षणार्थं। तृतीयरत्न्यंते प्राच्यंतांकनार्थं। ततश्चतुर्भागोनेऽरत्नौ अंस आ
कर्षणार्थं। ततश्चतुर्भागोनेंसाकर्षणार्थं॥ ततः सोऽर्धारत्नौ याश्चस्यं च पाशो विपर्यासे न साधनोपा
यः॥ विपर्यासपक्षे तु षडरत्निरज्जुमुभयतः पाशौ बद्ध्वा प्रथमं सार्धारत्न्यां तेंसांकनार्थं। ततो
र्धारत्नौ श्रोण्यंकनार्थं। ततोरत्नेश्चतुर्थे भागे आकर्षणार्थं। ततोरत्नेश्चतुर्थे भागे आकर्षणा
र्थं॥ अरत्नित्रये च प्राच्यंतांकनार्थं। अपरिमितपक्षाश्रयणे च प्राचीप्रमाणं पुरस्तात्तीर्यक्प्रमाण
वेंच तुल्यं। पश्चात्तीर्यक्प्रमाणं च प्राचीप्रमाणात् तृतीयभागेनाधिकमिति युक्तं ■ तथा कल्पनीयं।

५ सप्रेषित ओषधीमूलोच्छेदपर्यंतं नि ■ म्नां वेदिं खनति। तस्मात्र्यंगुला वेदिः स्यादिति।

तत्र च प्राचीप्रमाणं रज्जुद्विगुणां कृत्वा रज्ज्वो मूलाग्रसुरस्तात्तिर्यक्प्रमाणस्यार्द्धं मूलरज्ज्वो व्यांतिम चतुर्थभा
गस्यादौ आकर्षणार्थं लक्षणमिति। अथ खननप्रमाणे पक्षांतरमाह॥ ॥ आमूलोच्छेदनादोषधीनां॥
प्राक्प्रवणा मुदग्वा इ स्मात्सूत्रात् मंडूकप्लुतिन्यायेन वा शब्दो ■ त्रानुवर्त्तते। अध्याह्रियते वा। अथवा आ
ओषधीनां मूलोच्छेदनाद्वेदिं खनति। त्र्यंगुलं वा। अस्मिन्पक्षे विशेषमाह॥ ॥ ओषधीनां मूलान्युच्छेत
वै ब्रूयात्॥ ॥ अध्वर्युरग्नीधं प्रत्योषधीनां मूलान्युच्छेत्तवा इतीमं प्रैषं ब्रूयात्र्यंगुलखननं विधाय।
तदुत्थानं कुर्यादोषधीनां वै समूलान्युपाम्लो च तस्मादोषधीनामेव मूलान्युच्छेत वै ब्रूयादिति श्रुतेः।
मूलानि च भूमिमध्ये दूरमपि यावत्प्रसरंति तावत्प्रमाणं खननं वेदेः कर्तव्यं। अतस्त्र्यंगुलखात मूलोच्छे
दनयोर्विकल्पः। प्रैषश्च मूलोच्छेदनपर्यंतं खननपक्ष एव तत्रैव श्रवणात्। अत्रौषधिमूलोच्छेदो वेदिस
ननपरिमाणोपलक्षणार्थः। तेन दर्शपूर्णमासादावपि यावत्ति खाते मूलोच्छेदनं संभाव्यते तावत्ख
नितव्यं। अत्रापस्तंबः। स्फ्येन तमास दमुद्धरति तथा ॥ षनति द्व्यंगुलं त्र्यंगुलं चतुरं ■ गुलावै यो
प्रार्थिया। सुलब्धे तावतीं पृथुमात्रीं रथवर्त्मिमात्रीं सीतामात्रीं प्रादेशमात्रीं वा पुरीषवतीं नैतामात्रा भ

त्तिरश्चनतिदक्षिणतो वर्षीयसी प्राक्प्रवणा मुदक्प्रवणां वेत्ति॥ ॥आहार्यपुरीषां पशुकामस्य॥ ॥पशुकामस्य य
जमानस्याहार्यपुरीषां वेदिं कुर्यात्। आहार्यमन्यस्मात्प्रदेशादाहरणीयं पुरीषं यस्याः सा तथा। तत्रश्च प्रागनुमा
र्जनोद्धेदिं स्फ्यकाशादेतिपुरीष ■ मात्री सार्या न्यः पुरीषमानीय वेदिमध्ये प्रक्षेपणीयं। एतच्च पुरुषार्थं प्रणयने
कांस्यादिवत्। अतश्च विकृतौ न भवति। निष्कामे नापि वेदिः पुरीषवत्सेव कार्या वेदिपुरीषं तत्रैव ति। न ततो निष्कास्य
तेवन्चनाभावात्। तथा च श्रूयते। पुरीषवतीं कुर्वीतेति। एवा तावेदिर्नाभिदः स्फ्यकृष्णी करणीयाविं तु पाशुलैव कार्येत्य
र्थः। आपस्तंबः। प्राग्चौवेधं सा वुत्तनयति प्रतीची श्रोणी पुरस्तादंहीयसी पश्चात्स्थवीयसी मध्ये संनतरा भव
ति। यन्मुत्तमतिशो ते स्फेयनतायिनत्ति न न रवे नय पुरीषमतिशे तउत्करे ता निपसाहृ्न्चार्य पुरीषां पशुकाम
स्य कुर्यादिति॥ ॥वेदिं परिसमुह्य वित्तृतीयम्नीदुत्तरतउत्करं करोति॥ ॥अन्वाहार्याधिश्रयणानंतरं प्रथमं वे
दिमानमध्वर्युः करोति। यथोक्तं। ततोग्नीद्वेदिं परिसमुह्य दर्भैर्वेदिमध्येपत्तितं तृणपुरीषादिकमपसार्य वेदेरुत्तरतो वि
तृतीये परिसमुह्नापसारितस्य तृणपुरीषादेरुत्कररराशिं करोति। उत्कीर्यत इत्युत्करः वितृतीयं च वेदेः प्रकृतहासदीय
मेव। गार्हपत्याहवनीययोरंतरालं वितृतीयं चत्वालवक्तो तं। गार्हपत्याहवनीययोरंतरं खोद्धासस्य धावागंतुक समंत्रेष्वा

विम्यस्त्वापरविस्तृतीयलक्षणेनदक्षिणायम्यत्तस्मिन्नग्निर्विपर्यस्योत्तरतःउत्करस्समर्थःप्रकारः। अपिवांतरत्रिभागेनया

नयारत्न्वापुर्वार्द्धेसमचतुरस्रंकृत्वायोन्या [illegible] मग्निर्वि प[illegible] र्यस्योत्तरांसेउत्करइति। विपर्यासश्चैवंवित्तृती

यलक्षणेनोत्तरतआयम्येतिप्रथमेप्रकारे। गार्हपत्याहवनीययोरंतरत्रिभागेनयारत्न्वापरार्द्धेसमचतुर

स्रंकृत्वाचतुरस्रस्योत्तरांसेउत्करइतिद्वितीयःप्रकारः। आपस्तंबः। बथानदेवस्यवित्तुरित्युत्तरतःपुरस्ताद्वि

त्तृतीयेवेदेरूदस्विपदेपरिमितेवादेवेनिवपतिसउत्करइति। लौगाक्षिः। द्वन्द्वोत्तरतोनिवपतिसउत्करइति। मान

वे। उत्तरतोलेखनामग्नीध्रःप्रक्रममात्रेउत्करेपाणिकोष्ठंकृत्वोपविशतीति। लेखास्थानंचतेनैवप्रागुक्तं। पु

र्वार्द्धेवेध्यावित्तृतीय [illegible] मात्रेप्रागुदीचीस्फ्येनतिस्रोलेखालिखतीति। वित्तृतीयंसामर्थ्याद्वेदेर्ग्राह्य।

तथ्यपुर्वंवित्तृतीयंपरिशिष्टकारवचनात्। आचार्याभिप्रायाश्च। चात्वालोत्करावंतरेणसं चरइति। सन्निहि

तोग्निःचात्वालस्योत्करःपुर्ववित्तृतीयेभवतीकर्कः॥ ॥देवस्यत्वेतिस्फ्यमादायसत्तृणंसव्येकृत्वादक्षिणेना

लभ्यजपतींद्रस्यबाहुरसीति॥ ॥ततोध्वर्युर्देवस्यत्वाआददेध्वरकृतमितिमंत्रेणसत्तृणंस्फ्यमादायसव्ये

पाणौकृत्वादक्षिणेनपाणिनातमेवसव्यहस्तस्थितंसत्तृणंस्फ्यमालभ्यस्फ्यइंद्रस्यबाहुरितिसंमंत्रंजपति।

संहितास्वरेण॥

सतृणमित्युक्तत्वात् तृणस्य सहत्वमात्रं। आदानं तु स्तम्बस्यैव। प्रयोजनं तृणादानविस्मरणे तूष्णीमेव तृणादानं॥ स यस्य
मादत्ते देवस्य हेति तं सव्ये पाणौ कृत्वा दक्षिणेनाभिमृश्य जपतीति श्रुतत्वात्। स्पृशतीति शीलतनुकरणे। नीथणी
करोतीत्यर्थः। अप्रयोजनं तत्तनुकरणसंस्कारः। तदर्थं दक्षिणाभिमर्शनं च। ततश्च यत्तदर्थमनुकारः कर्तव्यः। संशय
नीतिप्रत्यर्थनिर्द्देशादित्तिहरि स्वामिनः। पितृयज्ञे च आददे ध्वरकृतं देवपितृभ्यस्त्वा गृह्णामीति प्रासेपि दक्षि
णास्य हणं सव्य हस्तस्य स्तम्बस्यैवालंभनविधानार्थं। अन्यथा भूमौ निधायालंभः प्राप्नोति। तद्देवतद्धृत्या दानं स्तं
बयजुर्हरणार्थे। अतश्च तदभावेऽभावः॥ ॥नोपस्पृथिव्यामा नीतेन स्तम्भयजुर्हरिष्यन्॥ ॥स्तम्बयजुर्हर
णात्प्राक् तेनाभिमृष्टेन वज्रेण पृथिव्यामानं च नोपस्पृशेत्। तेन संस्थिते नान्यात्मानमुपस्पृशतीति पृथि
वी भिन्ति श्रुतेः॥ वेध्यान्तरणं निदध्यासुदरपृथिव्यै वर्मासीति॥ ॥तदात्तं तृणं वेध्यां वेदिमध्येऽदग्रेग
निदधाति पृथिव्यै वर्मासीति। उदगिति नियमः श्रौतः। प्राक्षिकं प्राक् तुनिवृत्त्यर्थः। ततश्च स्तम्बापचा
रे श्रौतं भुवत्तिप्रायश्चित्तं भवति॥ ॥पृथिविदेवयजनीति तृणे तन्निहिते प्रहरति। पृथिविदेवयजनी
त्यनेन मन्त्रेण ध्वर्युस्तृणेन तन्निहितेभु प्रदेशे तृणस्याप्यस्याभूमौ स्फ्येन प्रहरति। अथ तृणमन्तर्धायप्र

हरति सप्रहरसि पृथिवी सादि श्रुतेः। तृणमंतर्धाय तस्योपरि प्रहर्तव्यमिति माध्यचार्याः। पितृभूत्याचार्या आ
अपि अंतर्हिते तृणे प्रहरतीत्येवमेव व्याख्यातवंतः। कर्काचार्यास्तु प्रहरणं चैवेध्यां न तृणे। अंतर्हि न इति
सूत्रितत्वात्॥ इतरथा हि तृणे प्रहरतीत्येवमवक्ष्यत्वात्। अथ पुनरंतर्धायवचनात्तदर्थमेव तृणस्य। न प्र
हरणाधिकरणता। तृणएव प्रहरणमिति संप्रदायः। अत्राहापस्तंबः। पुरस्तात्स्तंबयजुषो वेदेन वेदिं त्रिः सं
मार्ष्ट्युपरिष्टाद्वा पुवार्धाद्वेदेर्वितृतीयदेशात्स्तंबयजुर्हरति पृथिव्यै वमीसीति। तत्रोदमग्रं वा दर्भं निध्याय पृ
थिवी देवयजनीति स्फ्येन प्रहरत्याह परतोरत्नः पृथिव्या इति स्फ्येन सतृणान्पांसूनुपादाय व्रजं गच्छेति
हरतीति। एवमेव सर्वेषु शाखांतरसूत्रेषु। पितृयज्ञेपि पृथिवि देवपितृयजनीत्यूहः। अंगप्रधानार्थ ह्यो वेदेः।
पृथिविश्चद्धोत्र वेदिवाचकः। तत्संस्कारात्मिवक्ते॥ ॥व्रजं गच्छेति पुरीमादत्ते॥ ॥यत्र स्फ्येन प्रहारः कृ
तः तस्माद्वेदिस्थानात्स्फ्येनोद्धृतं पुरीषमुद्धृत्य तान्पांसूनादत्ते हस्तेन गृह्णाति व्रजं गच्छेति मंत्रेण। वर्षतु
तइति वेति वेदिं प्रेक्षते॥ ॥वर्षतु ते द्यौरित्यनेन मंत्रेणाध्वर्युर्वेदिं प्रेक्षते यतः स्थानात्पुरीषं गृहीतं तमेव वेदिप्रदे
शं विलोकयति॥ ॥बध्यानेत्युत्करे करोति॥ ॥तदेव हस्तगृहीतं पुरीषं बध्यानेत्यनेन मंत्रेणोत्करे करोति।

उत्करस्योपरि प्रक्षिपति॥ ॥प्रहरणशेषो वाविशेषोपदेशात्॥ ॥प्रह्रियतेनेनेन मंत्रेणेति प्रहरणमंत्रान्प्रहर
णशब्देनात्राभिधीयते। ब्रजंगच्छेत्यादिमावो मोगिरंतोमंत्रः प्रहरणमंत्रस्य पृथिवीदेवयजनी
त्यस्यैव विशेषो भवति। कुतः। अविशेषोपदेशात्। अविशेषेण प्रहरणे एवोपदिश्यते। यतः प्रहरति
पृथिवीत्यादिना। अथवैवं योजना। अविशेषोपदेशात्। ब्रजंगच्छेत्यनेन पुरीषमादत्ते। वर्षिष्ठत्यस
नेनवेदिं वेदिं प्रेक्षते। बधानेत्यनेन पांसूनुत्करे करोतीत्येवं विध्यो विशेषोपदेशो विशेष्यविधानं श्र
तपथे नास्ति। केवलं सप्रहरति पृथिवीत्येवमेव सर्वोपि प्रहरणमुपक्रम्य पठितोस्ति। अतएवं ज्ञायते। प्र
हरणमंत्रस्यैवायं विशेष इति। अपरे त्वेवमाहुः। यद्यपि शतपथे विशेषोपदेशो नास्ति तथापि शाखां
तरे विशेषोपदेशोस्ति। अविशेषस्य च विशेषपरतैव न्याय्या। तस्मात्वेदेनैवायं पुरीषादानादौ यथोक्तो
विनियोगः॥ ॥अपाररुमिति द्वितीयं प्रहरणादि। अपाररुमित्यादिभिर्मंत्रैः प्रहरणादिप्रहरणादार
भ्य पुरीषस्योत्करे करणांतं द्वितीयं कर्म भवति। अत्रादिग्रहणात्पुरीषादानादीन्यदार्यान्समंत्रकान्दर्शयं
ति। अन्यथा अपाररुमिति द्वितीयं प्रहरणाद्येवमवक्ष्यत्। अथ द्वितीयं प्रह ःरस्यपाररुमिति श्रुतत्वात्॥

श्री·१

अपाररूमररोआसुरेइतिकात्यायनवचनादासुरोमंत्रः। तथाचंश्रूयते॥ अपाररुहि
वैनामासुररक्षसमासेति। तत ओऽश्वारणानंतरमघडुपस्य श्रोत्। पितृयज्ञे चेदेवपि
तृयजनादिसेवमूहः॥ ॥अभिन्यस्यसग्नीहस्तमररोदिवमिति॥ ॥ततोग्नीदररोद्वि
मितिमंत्रेणोत्तरमभिन्यस्यतिअभिनिदधातिपाणिभ्यामुत्तरस्यापिधानंकरो
ति।उद्धृताभिमुखोहस्तौ निदधातीत्यर्थः। तमग्नीदभिनिदधाति ररोदिवमिति श्रु
तेः।अभिनिधानंचहस्ताभ्यामेवहस्ताभ्यान्नैकेनहस्तेन।यतः प्रस्तरास्तरणानंतरंतमभिनि
दधातीतिविधायाहाभिनिहितरएवसव्येनपाणिनाभवसधरदक्षिणेनाग्रुंहुमतिगृह्णा
तीति।अत्रैवन्दोरेणसव्यहस्तप्रकरेपुनर्भिनिहितमेवदर्शयति।इहापियत्तमग्नीदभि
निदधातिसाभिनिधानमेवश्रुतत्वात्।ततोद्वाभ्यांहस्ताभ्यांउत्तरस्याव बोध्यनंनीचै
राक्रमणंकर्तव्यं।तथाचापस्तंबः।अररुक्वोदिवमास्काभिति।न्युसमाग्नीध्रोऽभि
नाभिगृह्णायेवंद्वितीयंतृतीयंचहरति।चतुर्थंहरन्सर्वदर्भशेषंहरतीति॥ ॥

इदमप्यासुरयजुः अपाररू   मररो आसुरे रक्षुस्तृतात्। अतऽदकोपस्पर्शनं भवति॥ ॥द्रप्सतरलितन्ती
यं॥ ॥प्रहरणादीननुवर्तते। द्रप्ससे कमिसादिभिर्मंत्रैस्तृतीयं प्रहरणादिऽकरे निवपनांतं कर्म भवति।
अथतृतीयं प्रहरति द्रप्सस्तरति श्रुततात्॥ ॥तूष्णीं चतुर्थं सतृणं॥ ॥चतुर्थं प्रहरणादिकर्म तूष्णीं
भवति। इयांस्तु विशेषः। सतृणं ऽदर्भैः हितेन सहितं पुरीषं ऽकरे करोति। तूष्णीं चतुर्थमिति श्रुतेः। सतृ
णमिति शाखांतरात्॥ ॥पूर्वं परिग्राहं परिगृह्णाति दक्षिणतः पश्चादुत्तरतश्चास्फेन गायत्रेण तिप्र
त्तिमंत्रं॥ ॥ततोऽध्वर्युर्ब्रह्माणं पूर्वं परिग्राहं परिगृहीष्यामीति। एवं ब्रह्माणमामंत्र्यो परिगृहाणेति ते
नानुज्ञातः। स्फ्येन करणभूतेन क्रमेण दक्षिणतः पश्चादुत्तरतश्च वेदिं परिगृह्णाति परिसमंता
त्स्फ्येन रेखाकरणादि रयत्ति वेदिरिति ज्ञापनार्थं परिगृह्णाति। तथा च लौगाक्षिः। स्फ्येन वेदिं परिगृ
ह्णाति यावतीं करिष्य न्निति। पूर्वं परिग्रहमिमस्य कर्मणः संव्यचारार्थौ। पूर्वेण परिगृहेण प
रिगृहीतस्यै वै। गायत्रेण हां ध्वंदसे ति प्रतिमंत्रं। एकैकेन मंत्रेणैकै कस्मिन्पार्श्वं परिगृह्णातीत्यर्थः॥ ५९

तेन गायत्रेणेति दक्षिणतो दक्षिणपार्श्वेनैऋतकोणादारभ्य पुरस्ताद्वेदिमध्यं यावत्। स्फ्येन लेखां करोति
ततस्त्रैष्टुभेनेति पश्चादुत्तरपार्श्वे दक्षिणश्रोणेरारभ्य उत्तरश्रोणिपर्यंतं। ततो जागतेनेत्युत्तरश्रोणेरारभ्योत्तरपा
र्श्वे वेदिं परिगृह्णाति पुरस्ताद्वेदिमध्यं यावत्। स वै त्रिः पूर्वं परिग्रहं परिगृह्णाति तथा गायत्रेण हि छंदसा प
रिगृह्णामीति दक्षिणतरस्मादिति श्रवणात्। एवं दोभिरभितः पर्यगृह्णन्निति अभितः समंतात्। तथापि त्रीणि द
क्षिणतो द्रष्टव्यं। अग्निं पुरस्तात्समाधायेति वचनादिति हरिस्वामिनः। तेनांसपर्यंतं आहवनीयस्य खरपर्यंतं वा
परिग्रहणं कार्यं॥ ॥ वेध्यां त्रिरुल्लिखत्याहरहर अरिरिति॥ ॥ वेध्यां वेदिमध्ये त्रिरुल्लिखत्स्फ्येनेति तिस्रो रेखाः प्रा
चीरुदगन्ताः संस्थाः कृत्वा अग्नीधं प्रत्यध्वर्युराह। अग्नीति हर अरिरिति सेवं॥ ॥ कृत्वाग्नीध्रो लेखाः संमृशति॥ ॥ अग्नी
देवं प्रेषितः सन् ताभ्यो लेखाभ्यः पांसुं स्फ्येन हृत्वा उत्करे प्रक्षिप्य तदनंतरं लेखाः संमृशति संमर्शनेन समीकरोति।
पितृयज्ञाग्निचित्योः॥ ॥ एतदुक्तं लेखाहरणं हर अरिरिति प्रैषोऽग्नीध्रस्य हरणं संमर्शनं च पितृयज्ञाग्निचि
त्ययोरेव भवति। तत्रैव श्रुतत्वात्। न दर्शपूर्णमासयोः। कुतः अश्रुतत्वादिति। तथाहि पितृयज्ञे तानन्। सत
तः प्राक्संबद्धम् हरतीति प्रकृत्य स पूर्वेण परिग्रहेण परिगृह्णाति स्वजिहरति तद्धार्यं भवतीति श्रूयते अग्नि

चित्यायामपि। अथ प्रायणीयं निर्वपति। तस्य हविष्कृता वाचं विसृजते वाचं विसृज्य स्तंबयजुर्हरति स्तं
बयजुर्हृत्वा पूर्वेण परिग्राहेण परिगृह्णाति लिखित्वाहरत्रिरिति हरति त्रिरग्नीध्र इति। अतो त्रैवं श्रूयते। तत्रै
वं भवतीति साक्षात्कृतं। पितृयज्ञाग्निचित्ययोरिति। ततश्च तयोरेव वेदे रेततसंस्काराद्धि भाव्यं वचनादिति
प्राप्ते आह॥ ॥वा तत्र दर्शनात्॥ ॥अत्र वा शब्दः पूर्वपक्षव्यावृत्त्यर्थः। न पितृयज्ञाग्निचित्ययोरेव तत्सं
स्कारा चिकीर्ष्य। किंतर्हि। अत्रापि दर्शपूर्णमासयोर्भवति। कुतः। तत्र दर्शनात्। तयोरेव तत्र पितृयज्ञाग्नि
चित्ययोर्हि अन्यविधिपरे वाक्ये लेखाकर्म निर्दिश्यंते। यतस्तत्र प्रकृतितः प्राप्तानां दर्शनमेव विधानं॥
कुतः। वाक्यस्यान्यपरत्वात्। कथमन्यपरता। पितृयज्ञे तावत् सयज्ञोपवीती भूत्वाज्याभिग्रहणमिती
ति आज्यग्रहणे यज्ञोपवीतित्वविधानपरं वचनं। यतः कर्मणः पित्र्यत्वेन प्राचीनावीतित्वमेव प्राप्नोति। तत्र
वचनाद्यज्ञोपवीतत्वं विधीयते। अन्यत्स्तंबयजुर्हरणादि प्राप्तमेवानूद्यते। अग्निचित्यायामप्यावेदेः
स्पृश्याद्विसंमर्शनां तस्य कर्मणो वसरविधानार्थं वचनं। तत्रापि सौमिकस्या वेदेरोपवसथ्यात्तु वेर्हनिष्क्रया

दानादि कर्म प्रकृतितः प्राप्तानां दर्शनमेव। अतो दर्शपूर्णमासयोरपि लेखाकरणहरणप्रेषहरणसंमर्श

नाग्निभवंतीति सिद्धं। वरुणप्रघासेषु हरत्विस्थ्रिरित्येवं प्रैषो देयः। आपस्तंबः। स्फ्येनोत्तमां तच मुद्धरंतीति॥
समुद्धृतस्याग्नीध उद्धरे ऽग्निर्निवपंतीति मानवे। खनतित्र्यंगुलं चतुरंगुलं वोद्धृतादग्नीध्यास्थ्रिहरतीति
तैत्तिरीयसूत्रेपि। अथप्राचीं स्फ्येन वेदिमुद्धरंति अथाग्नीध्र महाग्नीदितस्थ्रिहरेति तत्तस्थ्रिराग्नी
ध्रो हरति यत्राग्नीध्र स्थ्रिहरस थसंप्रैषमाह ब्रह्मन्नुत्तरमित्यादि॥ ॥अत्र वेदिकरणं यथोक्तं॥ ॥
अत्रैवानुवर्तते॥ यथोक्तं यथापूर्वमुक्तं वेदिकरणं तदस्मिन्नवसरे लेखासंमार्जना
नंतरं भवति। किंच। पूर्वमुक्तं त्र्यंगुलखातां खनति औषधीनां मूलोच्छेदनपर्यंतं वा खनतीति। तदस्मिन्न
वसरे कर्तव्यमित्यर्थः। उत्तरं परिग्राहं परिगृह्णाति सुब्रह्मास्योनी ऊर्जस्वतीति पूर्ववत्॥ ॥अत्रापि ब्रह्मन्नुत
रं परिग्राहं परिगृहीष्यामीति ब्रह्माणमामंत्र्य। ॐ परिगृहाणेत्येवं तेनानुज्ञातोध्वर्युः पूर्ववद्वेदिं परिगृह्णा
ति सुब्रह्मास्या सीत्यादिभिर्मंत्रैः प्रतिमंत्रं। तमनुविधोत्तरेण परिग्राहेण पर्यगृह्णा सुब्रह्मा स्या सीत्यादिभिः उच्
यते। उत्तरपरिग्राह इत्यस्य कर्मणः संज्ञा। उत्तरपरिग्रहादिकरोतीत्यादौ संव्यवहारार्थं। पूर्ववदिति दक्षिण
तः पश्चादुत्तरतश्चेति। प्रतिमंत्रमित्येतावतापि सिद्धे त्रयाणां मंत्राणां प्रतीकोच्चारणं तत्सत्यादिना पूर्वो

तन्यायेन मंत्रार्थज्ञापनार्थं। इतरथाहि संभ्रमाच्चास्मिन्वाचे सत्यपि वाक्यस्य समाप्तिः संभाव्येत। त्रयाणां प्र
तीके [illegible] पादेनेनक्तेऽप्येष संदेहो न भवति॥ ॥पुराक्रूरस्येत्यनुमार्ष्टि॥ ॥पुराक्रूरस्येत्यनेन मंत्रेण स्फ्ये
न वेदिमनुमार्ष्टि समीकरोति। तां संमार्ष्टीति श्रुतेः। प्रतिपूर्वं क्रिया विपर्यये वर्तते। पूर्वं खनिता
विषमा कृता अधुना तां समीकरोतीत्यर्थः। अत्राह मनुः। पुराक्रूरस्येति स्फ्येन वेदिं प्रतीचीमनुमार्ष्टीति।
आपस्तंबश्च॥ प्रतीचीं वेदिं स्फ्येन योयुप्यते इति। तैत्तिरीयसू[illegible]त्रे च॥ अथ प्रतीचीं वेदिं स्फ्येन योयुप्य
त इति तेन पुरस्तादारभ्य प्रत्यक्संस्थं अनुमार्जनं कार्यं। स्रुवस्रुतोः स्रुवे च विशेषानुपदेशात्। पशुकामस्या
नुमार्जनात्प्राग्वेदेः पुरीषं निष्कास्योत्करे प्रक्षिप्यान्यस्माद्देशात्पुरीषमानीय वेदेः पूरणीया। ततोऽनुमार्ज
नेन समीकरणमिति॥ ॥अध्वर्युर्वेदिं प्रोक्षणीर्धारयत्यन्यः॥ ॥अध्वर्योरन्य आग्नीध्रोऽध्वर्युर्वा वेदिं
वेदेरुपरिष्टात्समीपे वान्तिके वा प्रोक्षणीर्धारयति। पूर्वं हि स्रुक्संमार्गे प्रोक्षणीर्निधायेति ता एव वेदान्तीं ततः साध्व
वेदेरुपरिष्टाद्धारयति॥ ॥अथ स्फ्यमुद्यम्याह। प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः संमृड्ढि पत्नीं
संनह्याज्येनोदेहीति यदीच्छेत्॥ ॥अथ अग्नीत्कर्तृक प्रो[illegible]क्षणीधारणानंतरं अध्वर्युर्यदि प्रैषवचनं

६१

रध्येत्त दाप्रोक्षणीषु वेदिमध्येऽग्नीध्रा धार्यमाणासु वेदेः सकाशात्स्य मुखं म्यहस्तेनोर्ध्वमुखा ध्याग्नीध्रं प्र
तिष्ठा क्षणी रासादयेसादि आज्येनोदेहीसंतंप्रैषमाह। ब्रवीति। यदिप्रैषवचनं दातुं नेच्छेत्ततो न ब्रुयात्। स्व
यमेवापि अग्नीध्रोप्रेषितोपि आहननादिवह्नो क्षणीसादनाशीन्यदार्थी कुर्यात्। सवाऽपथुप र्येवप्रोक्ष
णीर्धार्यमाणा स्वथस्यस्य मुख्यध्वतीति। तथाऽन्यथैतां वाचं वदतिप्रोक्षणीरासादयेध्मेसादि। तथासंप्रे
षत्वैष सयदि कामयेत ब्रुयादेतद्यदु कामयेता पि नाद्रियेत स्वयमुध्येवैतद्विदेदमतः कर्मकर्तव्यमिति
च श्रुतेः। सुत्रे अध्वर्युर्विश्रुतो चोपर्युपरीति। अत्रोपर्यध्वर्युस्सः सामीप्य इतिद्विवं। तद्योगे चोभयतसोः
कार्यादिंगुपयीदिषु त्रिस्वितिद्वितीया। प्रैषपक्षेतदभावपक्षेच प्रोक्षण्यासादनादी नामग्नीध्र एवकर्त
त्वमितिफरिस्वानः। स्वयमेवाग्नीत् श्रुतिविहितं वेदमतः परं कर्तव्यमिति। अतोप्रेषितोपि कुर्या
दिति। अन्ये तुप्रैषपक्षेपदार्थानामध्वर्युकर्तृकत्वमाहुः। स्वयमेवाध्वर्युर्वेदेदमतः कर्मकर्तव्यमिति
काण्वपाठात्। पत्नीशब्दस्थाने कपत्नीके प्युन्हः। एकवचनांतस्यैव समाम्नानात्। नप्रकृतावपुर्व
त्वादिति न्यायात्। अथशब्दो धार्यमाणास्वेव प्रोक्षणीषु सर्वप्रैषाणां प्रापणार्थः। अन्यथा प्रैषसमनं

तरमेव प्रैषार्थानुशासनस्य सर्वत्र न्यायत्वात्प्रोक्षणीरासादयेति श्रवणानंतरमेव प्रोक्षण्यासादनं प्राप्नोति तन्मामु
त् यत्प्रैषानंतरमा सादनं यथा स्यादित्येवमर्थोऽर्थशब्दः। अत्रेध्माबर्हिःशब्दौ वरुणप्रघासेषु विपरिणम्य
ते। आज्यशब्दश्च। प्रोक्षणीशब्दस्तु नोह्यते बहुवचनांतत्वात्। तत्रैवं। प्रोक्षणीरासादयेध्माबर्हि
षीऽउपसादय स्रुचः सं मृड्ढि पत्नीं संनह्याज्येनोदेहीति। ग्रहमेधीयायां स्रुच एकत्वे स्रुचं सं
मृड्ढीत्यूहः। उपसादितु स्रुग्द्वये स्रुचौ संमृड्ढीति। अनेकयजमानकेऽव्ज्ञीषुदवसानीयासु इध्मान्बर्हि
ष्युपसादयाज्येनोदेहीत्यूहः। अत्रेदं संदिह्यते। किं य एव प्रैषार्थेऽन्यः प्रैषेऽन्यः प्रैषार्थ इति। किं ता
वत्प्राप्त एक एव प्रैषः प्रैषार्थयोरिति। कुतः। समाख्यानात्। अन्य इति श्रुतबाध्य। ननु स्वात्मनि प्रै
षो प्रतिषिध्यते। नहि कश्चिदात्मानं प्रेषयति। नायं प्रैषः। किं तर्हि। प्राप्तकाले लोट्। व्यसयेन सस ध्यम
पुरुषउत्तमस्थाने भवति। अतऽभयमेकेनैव कर्तव्यमिति प्राप्ते आह॥ ॥यथाप्रैषितमन्यः॥ ॥यथा
प्रैषितमिति यद्यत्प्रैषितं प्रोक्षण्यासादनादिकं तदन्यः करोति। अन्यश्च प्रैषं क रोति। कुतः॥ ॥पराधिकारात्॥ ६२
परशब्दोऽन्यार्थः। परमन्यमेवाधिकृत्य प्रैषः प्रवर्तते। नहि कश्चिदात्मानं प्रेषयतीदं कुर्विति। ननु तं

नायंदोषः।किंतर्हिप्राप्तकालोयामिति।तेनविरोधोनभविष्यति।तत्रोत्तरंनायंप्राप्तकालेलोट्।किंतर्हिप्रेषणएव।
कुतः।संप्रैषइतिवचनात्।तस्मादन्यःप्रैषेअन्यःप्रैषार्थइति।एवंस्थितेइदंसंदिह्यते।किमग्नीत्प्रैषेअध्वर्युः
प्रैषार्थे।उताध्वर्युःप्रैषे■अग्नीत्प्रैषार्थइति।किंतावत्प्राप्तं।अग्नीत्प्रैषेअध्वर्युःप्रैषार्थइति।कुतः।स
माख्यानुग्रहात्।एवंखलुकृत्स्नंमार्गादिषुसमंत्रकेपदार्थेषुसमाख्यानुगृहीताभवति।प्रैषमात्रेतुबाध्य
ते।इतरथासमाख्याविरुध्यते।तस्मादग्नीध्रःप्रैषइतिप्राप्तेआह॥ ॥स्वयंवाविरोधात्॥स्वयंवाध्वर्यु
रेवप्रैषस्यात्।अर्थादग्नीध्रःप्रैषार्थइति।कुतः।अविरोधात्।नह्येवंक्रियमाणेपिसमाख्याविरुध्यते॥
कथंप्रैषंस्वयंददत्स्वाज्ञयाप्रैषार्थानपिकारयति।एवंप्रैषेतदर्थानुष्ठानेचाध्वर्युसंबंधस्यविद्यमा
नत्वात्समाख्यानविरुध्यते।कुतः।तत्प्रयोजकोहेतुश्च।चकारात्कर्ताचेतिप्रयोजकस्यापिकर्तृत्व
स्मरणात्।इतरथातुपदार्थमात्रकर्तृत्वात्प्रैषेसमाख्याबाध्येत।तस्मादध्वर्युरेवप्रैषेअग्नीध्रश्चप्रैषा
र्थइति।किंच॥ ॥संप्रैषवचनाच्च॥ ॥संप्रैषेषुअध्वर्योरेववचनात्।अध्वर्युरेवप्रैषस्यात्।यदिचाग्नी
दग्नीन्विहरतिप्रतिप्रस्थातःपशुनेहिनेष्टःपत्नीमुदानयोन्नेतर्होतुश्चमस■मनुन्नयएहियजमान

होतरेतत्यजे सादावेवाध्वर्योः प्रोक्षणीरासादयेसेतं संप्रेषमध्येएवाध्वर्योर्वचनं स्यात्। तदावचनाद
ध्वर्युः प्रैषार्थेस्मादयि। नचैवं तस्माद ■ ध्वर्युरेवप्रैषे अग्नीत्प्रैषार्थ इति। अपिच। संप्रैषएवैषइति
वचनादप्यस्य प्रैषत्वं निश्चितं। ततश्च यदि अग्नीत्प्रैषं कुर्यात्तदानिरुक्तेनोक्तस्य प्रैषणमयुक्त
मापद्यते। तथ्यानिष्टं। तस्मादुक्तोध्वर्युः प्रैषणेनिरुक्तोग्नीत्तदर्थानुष्ठान इति युक्तः सिद्धांतः। जैमि
निनापितृतीयस्याष्टमेएवमेवसिद्धांतितं। प्रैषेषु पराधिकारादध्वर्युस्तुदर्शनात्कौणावाक्रमिसा
मान्यादिति। प्रैषार्थस्तुहे अग्नीध्रत्वं प्रोक्षणार्थाअपसादय। अग्निसमिन्धनार्थमिध्मंवेदिस्तर
णार्थं बर्हिश्चाहवनीयस ■ मीपेसादय। जुह्वाद्याः स्रुचः संमार्जनसंस्कारेणसंस्कुरु। यजमान
स्यपापत्नीं तां योक्त्रेणसन्नह्य बधान। यत्प्रागपिश्रितमाज्यं तेनसहहृदेस्रुध्वीवेदिदेशेआगच्छेति।
प्राक्स्तरणाद्वेदिंनावमृशेत। प्राक्स्तरणादनुमार्जनाद्दुर्ध्वेस्तरणादवाग्वेदिंनावमृशेन्नस्पृशेत्।
॥ ॥तानिहवींष्याप्रचरणात्॥ ॥स्तानिपुरोडाशचर्वादीनिहवींषिनावमृशेत्। नस्पृशेत्। आप्र
चरणात्। यावत्प्रधानचरणंनभवतितावद्धस्तेननस्पृशेदित्यर्थः। सयेहाईजिरेप्रस्रुयध्व तानि

हवींषि कृत्स्ना वेदिरित्ति च प्रकृत्स्ना क्रियत इत्याबर्हिस्तरणादिति तस्मादनवमर्शमेव यजतेत्ति च श्रुत
त्वात्। प्ररिकृत्तं बीजमाजीविके सर्थः। कृत्स्ना सर्वसंस्कारसंस्कृता। अन्यत्सुगमं। एतानि तिष्ठन्तेति
ति च विशेषो पादानाधूप्यमाणेषु हविःषु सं स्त्रियमाणायां च वेदिस्पर्शे न दोषः॥ ॥ अंगुष्ठा
गुलिभ्यां मांसं ससहिताभ्यामवद्येदेके॥ ॥अवमर्शननिषेधप्रसंगात्तत्प्रतिप्रसवार्थमेतत्।
एके शाखिनो मांसं संहिताभ्यां मांसोपलब्धितोतः प्रदेशसंबंधाभ्यामंगुष्ठांगुलिभ्यां नखाभ्या
मस्पृशंतो हवींष्यवद्यंति। अन्ये तु एतावदानसंज्ञिकेन वारणेन काष्ठेन॥ तथा चोक्तं॥ सामर्थ्यात्स्वधितिं
मांसेद्रवेषु स्यात्स्रुवस्तथा। हस्तः काष्ठे पुरोडाशमवदाने प्रकल्पत इति। अत्र स्रुवेणावद्यति स्वधितिनाव
द्यति हस्तेनावद्यति काष्ठेनावद्यतीति च हावीवदानसाधनानि श्रूयंते। तेषां सामर्थ्यादुत्तरीत्यास्व
शात् व्यवस्था ज्ञेया॥ ॥आपन्नं स्तरणान्निरस्येत्॥ ॥स्तरणात्प्राग्वेदिमध्ये तृणपर्णकाष्ठादि यदा
पन्नं पतितं भवति तदध्वर्युस्तृणान्येव बर्हिस्तरणं कुर्वन्नेवोत्करे निरस्येन्न ततः प्राक्। स यदि पुरा
बर्हिस्तरणात्किंचिदापद्येत बर्हिरेव तत्स्तृणन्नपश्येदथ यदा बर्हिस्तरणं स यदि यदाभितिष्ठतीति च

श्रुतत्वात्। स्तरणात्प्राक्स्वपित्तत्तृणाध्यपसरणार्थं हस्तेनापि न स्पृशेत्। स्तरणे क्रियमाणे तु पादेनाप्यभि
ष्ठानं न दोषायेत्यर्थः॥ ॥द्विषतो वध इति स्फ्यमुदंचं प्रहरति॥ ॥द्विषतो वध इत्यनेन मंत्रेणाध्वर्युः प्रे
षार्थमुद्यतं स्फ्यं वज्रं प्रैषांतेउदंचं प्रहरति। उदगग्रे उत्करे प्रक्षिपतीत्यर्थः। अथोदंचं स्फ्यं प्रहर
तीति श्रुतेः॥ उदकोपस्पर्शनं चाभिचारपक्षे एव नान्यदेत्युक्तं प्राक्। अत्र स्फ्यस्य पक्षेपणमुत्करे कर्त
व्यं। तथा चाहापस्तंबः। द्विषतो वध इति पुरस्तात्प्रत्यंचमुत्करे स्फ्यमुदगग्रं निरस्यति द्वेष्यं मनसा
ध्यायन्निति। मनुरपि। द्विषतो वध इति पुरस्तात्प्राङ्मुखः स्फ्येनोत्करमभिहत्याभ्युक्ष्य प्रत्यासादय
तीति। लौगाक्षिरपि। स्फ्यमुत्करे प्रत्यंचमपहत्याभ्युक्ष्याहवनेध्यान्निदधातीति। अदृष्टार्थं चैत
त्। दृष्टार्थस्यासंभवात्। प्रयाजादिवदारादुपकारकं च। अतो यावदुक्ते निवर्तते॥ ॥अवनिज्य पा
णी अपरेण प्रणीताः स्फ्यं निदधाति॥ ॥तत उत्करे पाणी अवनिज्य हस्तावुत्करे द्भिः प्रक्षाल्य प्रणीता
अपरेण प्रणीतानां पश्चात्समीप एव स्फ्यं निदधाति। आसादयत्यध्वर्युः॥ ॥इध्माबर्हिश्चापूर्व
मिध्मं॥ ॥चकारेण प्रणीता निदधाति। आसादयतीत्यनुकृष्यते। आग्नीध्र इध्माबर्हिश्चापरेण

प्रणीताः प्रणीताभ्योपरस्यां दिशि समीप एव निदध्याति उपविश्य आसादयति। अत्र विशेषः। पूर्वं प्रथमम्भि
ध्मं प्रागग्नं निदध्याति। ततो बर्हिरपि प्रागग्रमेवेध्मादुत्तरन्निदध्याति। तथा चापस्तंबः। हस्ताववनिज्य
स्फ्यं प्रक्षालयत्यग्रमप्रतिस्पृशन्नंतरेणाहवनीयं प्रागग्रइध्माबर्हिर्निदध्याति दक्षिणमिध्ममुत्तरं ब
र्हिरिति। एवमेव सर्वसूत्रेषु विधीयते॥ ॥प्रणीता दक्षिणेनवाहस॥ ॥अथवा प्रणीता दक्षिणेन प्रणी
ताम आहवनीयस्य चांतरालेन प्रदक्षिणमिध्माबर्हिराहस निदध्याति। प्रणीतानां पश्चादेव। तथा च
तैत्तिरीयसूत्रे। आहरत्येतद्बर्हिरंतरेण प्रणीताश्चाहवनीयं च तदंतर्वेदि पुरस्तात्क्रूथ्यासाधयप्रोक्षती
ति। अव्यवायार्थोयं प्रयत्नः॥ ॥स्रुवं प्रतप्य पूर्ववद्दक्षिणाग्रेरंतरतः प्राक्संमार्ष्टि अनिशितइति विप
र्यस्य बर्हिर्मूलैः प्राङ्क्रम्य॥ ॥ततोग्नौ स्रुवं पूर्ववद्दिति प्रत्युष्टमिसनेन मंत्रेण निष्टप्तमिति वा मंत्रेण
गार्हपत्ये प्रतप्यापरेउपविश्य ततोग्निदेशात् डुत्क्रम्य प्राच्यां गतावेदाग्रेरग्रे प्रतिपत्तिविध्याना
देशात् पृथक्कृत्यतैरंतरतो ▪ मुखप्रदेशे स्रुवं प्राक्संमार्ष्टि वेदाग्रैः मूलादारभ्याग्रपर्यंतं उपरिदेशे
प्रांचं संमार्ष्टि। मार्जनेन तत्संलग्नं रजः पातयतीत्यर्थः। अनिशितोसीति मंत्रेण। एवमुपरिभागे सं
मार्गानंतरं तमेव स्रुवं बहिर्बुध्नप्रदेशे वेदमूलैर्विपर्यस्य संमार्ष्टि देशभेदात् पुनरपनेनैवानिशि

नरत्ति मंत्रेणाविपर्यस्यति प्राणिसस्य विपर्ययमाहृतेन प्रसृणिसयादारभ्य बुध्नपर्यंतमित्यर्थः। देशभेदाच्च
मंत्रावृत्तिर्भवति। तथा च दर्शयते संमार्गे। जुह्वीमुपरीति। अत्र देशभेदात्प्राप्तो मंत्रस्तु जुह्वीमित्यनेन नार्य
ते। नैवं शायते देशभेदान्मंत्रावृत्तिर्भवतीति। प्राङ्क्रमणं च संमार्गमात्रे न प्रतपने। कुतः। स वै तथैव संम
ज्याध्यग्निं न्नाभिव्युक्षेदिति प्रवृत्त प्राङ्‌वै वो क्रम्येत्ति श्रुतेः। प्रतपनं तु पश्चाहवस्थानमागसैव का
र्यं। अथ स्रुवमादत्ते तं प्रतपति प्रसृष्टमित्यादि वं सर्वं श्रुयते। अतः पूर्ववद्दिसनेन वैकल्पिको मंत्रो
त्तिर्दिशति॥ ॥प्रतप्यप्रतप्यप्रयच्छति॥ ॥यस्य यस्य स्रुगादेः संमार्गो विहितो विध्यास्यते ध तस्य तस्य सं
मार्गानंतरं तत्तत्प्रतप्य प्रतप्याध्वर्यवे प्रयच्छति समर्पयति। तत्र श्रयस्रुवस्य पूर्वं प्रतपनं ततः प्राङ्क्रम्यय
यो तः से मार्गे प्रसाग्रस प्रतपनं। उपस्पर्शः। समर्पणमित्येते संस्कारा भवंति। अग्रे षपक्षे आध्वर्यवः प्रतप
नानुष्ठानपक्षे चार्थादग्नीध्रेण समर्पणं। वीप्सया प्रतपनस्य स्रुगादिसर्वपात्रविषयता गम्यते। तेन स्रु
गादीनामप्युत्तरं प्रतपनं भवति। स वै संमृज्य संमृज्य प्रतप्य प्रतप्य प्रयच्छतीति श्रुतेः। पूर्वं प्रतपनं तु
स्रुवस्यैव विशेषविधानात्। न स्रुगादीनां॥ ॥अनिशितेति स्रुचः॥ ॥अनिशितासीत्यनेन मंत्रेण जुह्वा
याः स्रुचः संमार्ष्टि स्रुववदेव वेदाग्रैरंतरतः प्राक्। वेदमूलैर्बहिः प्रसृगिति। प्रथमं जुह्वाः संमार्गः। ततः

प्रतपनं। अपउपस्थश्याध्वर्यवे सममर्पणमिति। ततएवमेवोपभृतः। एवमेव ध्रुवायाइति। आजिनीं हेतिस्रु
च्यभिक्तिश्रुतत्वात्॥ ॥स्रुचंमीप्राशित्रहरणं स्तावदानं पात्रीं च॥ ॥स्रुच्यां संमार्गानंतरं स्रुचंमीप्राशित्र
हरणं संमार्ष्टि। ततःप्रतप्य प्रयच्छेदिति। अविशेषाद्वयोरपि संमार्गः। एकवचनं आद्यपेक्षं। ततः स्ताव
दानं स्रुचमीं संमृज्य प्रतप्य प्रयच्छति। ततः पात्रीमिति। अविशेषात्पुरोडाशपात्र्योरिडापात्र्याश्च क्रमेणतु
च्छमी संमार्गप्रतपनसमर्पणानीति कर्कः। तदयुक्तं। पात्रीमित्येकवचनाद्द्वैवपात्री द्वयोः पुरोडाशपा
त्र्योरासादनार्थाभवति। शाखांतरीयसर्वसूत्रेषु आसादनोपस्तारादौ चैकस्याएवदर्शनात्॥ इडापा
त्र्यास्तु संमार्गप्रतपने कुत्रापि न ■ स्तः। तेन इडापात्रीषडवत्तयोः संमार्गप्रतपनकल्पनं निर्मूलमे
व। अतएव पितृमेधसूत्रकाराः पात्रासादने संमार्गार्हाणि पात्राणि चेत्युक्त्वा पात्रीपीठं कुशास्तीर्णं षडवत्तं कृता
कृतमिति संमार्गार्हाणि। अतः पृथगेव पात्रीषडवत्तयोरासादनमुक्तं। यदि चानयोः संमार्गोऽभिप्रेतः स्या
त्ततः पृ■थङ्निर्देशं न कुर्यात्। करोति च। अतोऽनयोर्न संमार्गोऽर्हतेति तेषामभिप्रायो गम्यते। स्रुचंमी
प्रतपने चोदकस्पर्शनाभावः। रक्षादेवत मंत्रो आरणाभावात्। चकारात्षडवत्तस्यापि संमार्गादिम

वति। प्राशित्रे ऽगसमानन्यायात्। परिशेषान्नपयोर्धर्मप्रवृत्तेः सान्नाय्यस्य च स्रुवेणावदानविधानात्। प
शुसौ मोवदानार्थस्यासेः स्थानापन्नस्य स्रुवधर्मलाभः। ततश्च स्रुवसंमार्गानंतरं असेः पूर्वं स्रुवं मंत्रे
ण प्रतपने अनिशितोसीतिसंमार्गः। पुनः प्रतप्यापउपस्थस्य समर्पणमिति। वसाहोमहवन्याः प्र
चरण्याश्च जुहूवत्तु धर्मी संमार्गप्रतपने। अन्येषामपि जुहूस्थानापन्नानां स्रुवीर्क पर्णदोहनौदुंबर
स्रुचादीनां जुहूवदेव संमार्गप्रतपनसमर्पणानि। पृषदाज्योपभृन्ध्रोपभृद्वत्। मेक्षणस्य स्रुता
वदानवत्। वाजिनभांडस्य पुरोडाशपात्रीवदिति संप्रदायः। तत्तु विचारणीयं। उपदेशातिदेश
योरभावात्। आपस्तंबादिसूत्रेषु वेदाग्रैर्वेदाग्रग्रहणमेव मूलैश्च सर्वपात्राणां समार्गडत्कं।
। ककीचार्यैरप्येवमेव व्याकृतमस्ति। मूलैरिति वेदाग्रमूलैः। अन्ये तु वेदाग्रैर्वेदमूलैरिति व्या
चक्षते। तेषामयमाशयः। सर्वाङ्गाग्रैरंतरतः संमा[illegible]र्ष्टीति मूलैर्बाह्यतः। तत्र कस्याग्रैः क
स्य मूलैरित्यपेक्षते॥ तत्रापो हि कुशा ब्रह्मयजु॰ इति शेषात्कुशाग्रैः कुशमूलैरित्येतावल्लतीय
ते। तथा तद्विकेस्रुक्संमार्जनान्यग्राबभ्यादधातीति वेदस्याह। भुवन्निति वाक्यशेषाद्वेदस्या

ग्राणि वेदमुलानीति गम्यते। हरिस्वामिन स्तु अग्रैरिति वचनाद्वेदाग्रहणं। मुलैरितवचनान्मुला
नां। अन्यतरस्मिन्गृहीते ऽभयन्न संभवतीत्युभयग्रहणं। मुलं हि पपरिछिन्नाग्रं परिछिन्न मुलं चा
ग्रमिति। सूत्रे तु वेदाग्रैरिति समस्तासदा के वलं वेदपदं निष्ठास्य मुलैरित्यनैयो ऽप्यि तु दुःशकं। न ३
तेन संन्निधानाद्वेदाग्रमुलैरिति कर्काचार्यैर्व्याकृतं। आपस्तंबसूत्रे विशेषः। पत्नीसन्नहनमेके
पुर्वे समामनंति स्रुक्संमार्जनमेके इति। तथाहवनीये गार्हपत्ये वा प्रतितप्येति। वेदाग्राणि प्रविभुज्य
तैः स्रुचः संमार्ष्टि प्राचीरुदीचीर्वोत्तानाधारयमाण इति। तथानसंप्रष्ठान्यसंप्रष्ठैः संस्पर्शयंती
ति च। पुनः प्रतप्य प्रोक्ष्याग्रेणोत्करं दर्भेषु सादयति। जघानेन वंति। संमष्ठायथास्थानमुत्ता नाः स्रुचः
सादयतीति मानवे॥ ॥संमार्जनान्यपास्य॥ति॥ ॥सर्वसंमार्गानंतरं संमीर्जनानि संमार्जनसाध्य
नानि वेदाग्रमुलानि ऽक्करे पास्यति प्रक्षिपति। तस्मादु पुरास्येदेवै तानीति वचनात्॥ ॥आहवनी
येप्रासनमेके॥ ॥एके शाखिनः स्रुक्संमार्जनानां वेदाग्रमुलानां आहवनीये प्रासनं प्राशनं कुर्वं
ति। तदेके स्रुक्संमार्जनान्यग्नाव भ्यादध्यातीति प्रवक्ष्यत्तदुतथा न कुर्यादिति श्रुतेः। अत्राहापस्तंबः॥

बे॰१ संमार्जन्यान्यद्भिः संस्पृश्याग्नौ प्रहरति यस्मिन्प्रकृत्सु करोति॥ ॥पत्नीं संनह्यतिप्रसव्यदक्षिणतउपविष्टां

॥६॥ गार्हपत्यस्य मुंजयोक्त्रेण त्रिवृता परिहरस्यधिवासो दिक्षेरास्नेति॥ ॥ततोग्नी गार्हपत्यस्य प्रसव्य■क्षिणतो

नैरृत्यां दिश्यैशानदिङ्मुखीमुपविष्टां पत्नीं यजमानस्य भार्यां त्रिवृता त्रिगुणेन मुंजमयेन योक्त्रेण संनह्यति

बध्नाति। कथं संनह्यति। अदित्यै रास्नेति मंत्रेण। तस्योक्तमधिवासः वाससो बहिः परिहरति परितो वेष्टय

ति। अथ पत्नीं संनह्यतीति प्रकृत्य योक्त्रेण संनह्यति सवा अभि वासः संनयति सव्यस्य दिक्षाइति। तथा॥

सावेपत्न्याम्राचीयज्ञमन्वासीत। तस्मादुदक्षिणतः वेद्यान्वासीतेति च श्रुतेः। आपस्तंबः। अपरेण गार्हपत्य

मध्वर्युरासीनां पत्नीं संनयति सिद्धेति। अनेन वाक्येन सर्वासां संनहनं तथैव संनहनं नाभेः कटिप्रदेशे कर्तव्यं।

कुतः। अस्ति वै पत्न्या अमेध्यं यदवाचीनं नाभेरथैतदाज्यमवेक्षिष्यमाणा भवति तदेवास्या एतद्योक्त्रेणान्तर्द

धात्यथ मध्येनैवोत्तरार्धेनाज्यमवेक्ष्यतइति वाक्यशेषात्॥ ॥दक्षिणं पाशमुत्तरे प्रतिमुच्योर्ध्वमुद्गु

हतिविस्मोर्वेब्वरति॥ ॥परितो वेष्टितादनंतरमग्नीदवतस्ययोक्त्रस्य दक्षिणं पाशं उत्तरे पाशे शंकु

स्थानीये प्रतिमुच्य प्रोतयित्वा ततः सामर्थ्याद्द्विगुणं वेष्टयित्वा तं दक्षिणे योक्त्रपाशं ऊर्ध्वमुद्गुहति।

वेष्टिते योक्त्रे मध्ये एवं प्रेरयति विष्णोर्वै ष्वा इति मंत्रेण। ऊर्ध्वमेवोद्गृह्णाति विष्णोर्वै ष्वासीति श्रुतेः। संलग्नं त्रि
गुणीकृतमुभयोरग्रमभितः प्रवरग्रंथित्रययुक्तं मंतयोः पाशाग्रंथिद्वययुक्तं योक्त्रं तेन बध्नाति दक्षिणहस्ता
भिनः। तथा सन्नह्यतीति वच्यनादसमंततो सन्नहनं बाह्यसमुपरि वेष्टयित्वोर्ध्वं योक्त्रं मध्ये गृह्णाति। ऊर्ध्वं गृह
न सामर्थ्यात्॥ ॥न ग्रंथिं करोति॥ ॥योक्त्रबंधनं कुर्वन्नग्नौ ग्रंथिं न करोति। सवैन ग्रंथिं कुर्यादिति श्रुतेः॥ ॥
ऊर्जं बिभ्रती सा न्यस्तदास्यपत्नीर्वै मखस्य यद दध्नेनेति॥ ॥वेदं सव्येन गृहीत्वा ऊर्जं बिभ्रतीसनेन मंत्रेणाग्नीदाज्यमुपाज्य
पुरोडाशाभ्यां पुर्वत आनीयोत्तरतो भूमौ निधाय। ततस्तदाज्यमपत्नीमवेक्षयति। णिजंतोपदेशात्पत्न्याज्य
मवेक्षस्वेति संप्रेषणा। सा च वेदं हस्तेन गृहीत्वा ऽदब्धेनेति मंत्रेणाज्यमवेक्षते। अथाज्यमवेक्षतरतिप्रत्यक्ष
सावेक्षते दब्धेनेति श्रुतेः। आपस्तंबः। ऊर्जं बिभ्रती सादाय वेदेनोपयम्य पत्न्याऽपाहरति तत्सा निमील्य वीक्ष्या
उद्धृत्य संतीक्ष्यत इति। मानवे च। वेदोपयामादब्धेनेति पत्न्याज्यमवेक्षत इति तद्वैतदाज्यावेक्षणं परार्थ
त्वादनेक पत्नीके एकैव करोतीति कर्कः। अथ पत्नीनामवकाशे यदंतरियाद्द्रव्यश्चात्पत्नीमिति। वाक्यशेषात्तु
सर्वा अप्याज्यावेक्षणं करोतीति गम्यते। पितृयज्ञे चाध्वर्युरेवावेक्षते। आज्यसंस्कारस्याप्रतिषिद्धत्वात्।

६८

एवं रजस्वलायां प्रसूतायां प्रोषितायां वाशेयं।पितृयज्ञे च सुहृद्भिः पितृभ्यः सुहृदः कार्यः।साचेत्थ तेद ध्वेनह्वेतिवच
नात्।अवेक्षणेव मंत्रो न प्रोक्षणे॥ ॥वेध्यां करोत्युपरं प्रोक्षणीभ्यः॥ ॥पत्न्यवेक्षणानंतरमग्नीत्तदाज्यं नीत्वा प्रोक्ष
णीभ्योपरं आसादितानां प्रोक्षणीनां पश्चाद्वेध्यां करोति उपविश्यासादयतीत्यर्थः।अथाज्यमादाय प्राङ्कुःक्राव·दि
नदंतर्वेध्यां सादयतीत्यर्थः॥ ॥आहवनीये वा स्तातत्र क्षापिणः॥ ॥तत्र क्षापिणः स्याहवनीयश्रापिणो यजमानस्य
पत्न्यवेक्षणानंतरं आज्यमाहवनीये स्थाप्य आहवनीयेधिश्रित्य पुनरुद्वास्य प्रोक्षणीभ्योपरं वेध्यां करोति।वाश
ब्दो व्यवस्थार्थः।आहवनीयश्रापिण एवमेव कर्तव्यं।गार्हपत्यश्रापिणस्तु पूर्वमुक्तमेव।कुतः एषा व्यवस्थे
त्युच्येत।आहवनीयश्रापिणो नित्यमेव श्रूयते।अथाज्यमादाय प्राङ्कुःक्रावलितदाहवनीयेधिश्रयतियस्मा
हवनीये हवींषि श्रपयति सर्वमेव यज्ञ आहवनीये श्रुतो सादितो॥ तथा तत्र तत आदत्ते तदंतर्वेध्यासाद
यतीति च॥ ॥सवितुस्त्वेसाज्यमनुनाति॥ ॥वेदमुपगृह्य सवितुस्त्वेत्यनेन मंत्रेणाध्वर्युर्वेध्यामा
सादितमाज्यं पवित्राभ्यामुत्पुनाति।प्रोक्षणीषु पवित्रे भवतस्ते तत आदत्ते साभ्यामाज्यमुत्पुनातीति श्रुतेः। ६८
प्रोक्षणीश्च पूर्ववत्॥ ॥प्रोक्षणीश्च पूर्ववदुत्पुनाति।पूर्ववदिति पवित्राभ्यां सवितुर्व इत्यनेन मंत्रेण—

स्रुवेणोपग्रहेण। चकारः उपभृत्यपि स्यादनुकर्षणार्थः। चकारो यायास्रुच कारादाज्ये च पुर्वं देवनहं अन्यथा आज्योत्प
वनेपवित्रे प्राप्ये सेरति व्याख्यातं ततः। प्रोक्षणीनां पुनरुत्सवनं रध्माबर्हिषो प्रोक्षणार्थं।। असंस्कृतभावेन
भवति।। ।।आज्यमवेक्षते तेजोसीति।। ।।आध्वर्युराज्यमवेक्षते विलोकयति। तेजोसीत्यनेनमंत्रेण। अ
थाज्यमवेक्षतश्रुतेः।। ।।यजमानो वा।। ।।यजमानो वा आज्यमवेक्षते तेजोसीत्यनेनमंत्रेण। तद्वैते
यमानमवेक्षयध्यापयेत्तीति तस्मादध्वर्युरेवावेक्षते सुभयथा श्रुतत्वाद्विकल्पः।। ।।स्रुवेणाज्यग्र
हणं।। ।।तत्र यत्राज्यग्रहणं तत्स्रुवेणैव कर्तव्यं। सामर्थ्यात्।। ।।चतुर्जुह्वां धामनामेति सर्वमंत्रः।।
जुह्वां चतुराज्यग्रहणं। चतुरः स्रुवान्पूर्णान् गृह्णीतेत्यर्थः। अत्र धामनामेत्ययं मंत्रः सर्वत्रये
ज्यः प्रथमस्रुवग्रहणे एव। सकृत्तेन यजुषा सकृज्जुह्वां गृह्णाति त्रिस्तूष्णीमिति श्रुतत्वात्। ग्रहण
लवनेत्यादिना आज्यग्रहणप्रति ग्रहणं मंत्रः प्राप्नोति तत्र अनेन वचनेनोत्तरेषु ग्रहणेषु मंत्रो निवार्यते।
नन्वेवं सति प्रागुक्तमेव वचनादाज्यइति। सत्यं। अत्र सर्वमंत्र इति पुनरारंभो वाक्यद्वयस्योपादानार्थः।
सकृत्तेन यजुषा सकृज्जुह्वां गृह्णातीत्येकवाक्यं। तस्मात् त्रिस्त्रिरेव यजुषा गृह्णीयादित्यपरं। तेनाज्यग्र

हणे त्रिर्मंत्रवचनं सकृन्मंत्रवचनमिति विकल्पः सिध्यति। सकृन्मंत्रवचनमत्र विधीयते। त्रिर्मंत्रवचनं
तु परिशेषात् परिभाषायां सिद्धमिति। तैत्तिरीयसूत्रे। प्रोक्षणीषु पवित्रे अवधायादत्ते दक्षिणेन स्रुवं स
व्येन जुहूं वेदं प्रतिष्ठुप्यत स्योगृह्णीत इति॥ ॥अष्टाकपालस्याल्पीयोनुयाजाश्रेयान्॥ ॥चेद्यदि अनुया
जाभवंति त्रयोदशपर्व स षष्टिरष्टावाज्यं गृह्णी यात्। तच्चोपभृत्याज्यमल्पीयः औपभृतत्वाद्दत्तिस्रये
याज्ञं नाल्पं गृह्णीयात्। स यच्चतुर्जुह्वां गृह्णाति भुव आज्यं गृह्णाति अष्टौ वै तादुपभृति गृह्णन्ति कनीय आज्यं ग
ह्णातीति श्रुतेः। ९ तेनैव यजुषा सकृदुपभृति गृह्णाति सप्तकृत्वानुद्वीमिति श्रुतेः। अत्रापि सकृदेव मं
त्रः। १६ अनुयाजानां निसद्धान्ते ■ धर्मो विकल्प्य विषयः। चतुरन्यत्र प्रतिविभागात्॥ ॥अत्रानुया
जवत्कर्मणोन्यस्मिन्कर्मणि अनुयाजाभाववति अन्यद्दृष्टयनुयाजके चापभृति चतुरेव चतुर्गृहीत
मेव ग्राह्यं। कुतः। प्रतिविभागात्। औपभृतस्याज्यस्य प्रयाजेष्वनुयाजेषु च यतः प्रतिविभागेनोपयोगो
दृश्यते। अर्धं प्रयाजेषूपयुज्यते। अर्धमनुयाजेष्विति। अत औपभृतस्योभयार्थत्वं गम्यते। तेन यत्रानु
याजाभावः तत्र प्रयाजार्थमेव चतुर्गृहीतं भवतीत्यभिप्रायः। किं च। ॥पश्चादिति ध्यादर्शनात्॥

पश्वातिथ्यायां चोपभृति चतुर्गृहीतस्य दर्शनादेव गम्यते। यस्त्वनुयाजाभावे न्यद्रव्यकेष्वनुयाजेषु
चोपभृति चतुर्गृहीतमेव गृह्णीयादिति। पशौ तावदन्यद्रव्यकेष्वनुयाजेषु सत्सूपभृति चतुर्गृहीतं सु
निर्दर्शयति। अथोपभृत्यामुयाज्यं चतुर्गृहीते जुह्वां चोपभृति च गृह्णाति पंचगृहीतं पृषदाज्यमिति। तथा
आतिथ्यायामनुयाजाभावे सर्वाण्येव चतुर्गृहीतान्याज्यानि गृह्णाति नह्यत्रानुयाजा भवन्तीति॥
अत्रानुयाजार्थेन चतुर्गृहीते प्रयोजनाभावात्प्रयोजनार्थमेव प्राप्ते। चतुर्गृहीतं दर्शयति॥ ॥नक्त
हेनोपदेशात्॥ ॥नैतदेवं यदुक्तमुभयार्थत्वेन श्रुतावुपदेशात्। अथ यदष्टौ कृत्वोऽपभृति गृह्णा
तीति प्रकृत्य त्वनुयाजेभ्यो हि गृह्णातीति। ननूक्तं प्रतिविभागादिति धर्मस्य प्रयाजेषूपयोगो धर्मस्यानु
याजेष्विति। सत्यं। अनुयाजार्थस्यैव सतो वचनात्प्रयाजेषूपयोगः। यथा प्रयाजार्थस्यैव जौहवस्य वचनादु
त्तराघारे। ननूक्तं पश्वातिथ्ययोर्दर्शनादिति तत्राह॥ ॥पश्वातिथ्ययोर्वचनात्॥ ॥यदा वाक्येन कृत्स्न
स्यौपभृतस्यानुयाजार्थत्वं तदा पश्वातिथ्यायां चाष्टगृहीतमेवोपभृति प्राप्नोति अतो वचनात्तत्र
चतुर्गृहीतं विधीयते। अतो विधानमेतन्न दर्शनं। तद्धि प्राप्तिपूर्वकं भवति। प्राप्तिश्च नास्तीत्युक्तमे

दे॰भा॰२

७

वास्मिन्सिद्धान्ते। वरुणप्रघासेषु महाहविषि चानुयाजार्थेऽप्यथ गृणप्स्वेतिनगम्यते। पश्वाद्याव्देवमानीयअनुयाजाः क्रियान इति शेषः। अत्रनुमः। स्यादेतदेवं यदिकृह्लेनोपदेशो भवति सकलमथोपभ्यन्तं यदिकेनद्वान्येनानुयाजार्थमुपदिश्येत। नन्पदिश्यते। यतः शाखान्तरे एतदुभयार्थत्वं श्रूयते। यदष्टौकृत्वाऽउपभ्रृति गृह्णातिप्रयाजेभ्यस्तदनुयाजेभ्यस्तत् गृह्णातीति। ननुअनुयाजार्थतापिसकलस्य श्रूयतएव। अनुयाजेभ्योऽहितं गृह्णातीति। सत्यं। शाखान्तरे उभयार्थत्वविधानादेकदेशानुवादः सइति। ननुविपरीतं कुतो न भवति। अनुयाजार्थत्वबोधकं विधायकमुभयार्थबोधकमनुवादकमिति। नैवं। अनुयाजेभ्योऽहितं गृह्णातीत्यनेन सकलस्यानुयाजार्थत्वे विहिते प्रयाजार्थे प्राप्त्यभावान्न प्रयाजानुयाजेभ्यो हीत्यनेनोभयार्थतानुवादितुं शक्या। उभयार्थत्वबोधकवाक्येन विधाने कृते इतरेण यथाप्राप्तोऽनुयाजांशोऽनूद्यत इत्यदोषः। अतः कृत्स्नस्यानुयाजार्थत्वेनोपदेशाभावात्। उभयार्थमेवोपभृतमिति सिद्धं। पश्वातिथ्ययोरपि वचनं तदेवस्याद्यद्योपभृतस्य वाक्यादुभयथार्थता न स्यात्। तस्य चोभयार्थता पूर्वमेव साधिता। अतआतिथ्यायां पशौ चोपभृति चतुर्गृहीतमेव प्राप्नोति। अतः प्राप्तिपूर्वकत्वाद्दर्शनमेवैत

७

भाविधानमिति। तेन वरुणप्रघासेषु महाहविषि चान्यद् व्यक्तेष्वनुयाजार्थमुपभृति चतुर्गृहीतमाज्यं ग्राह्यमि
तिचिंतायाः प्रयोजनमिति॥ ॥ध्रुवायां च जुहूवत्॥ ॥ध्रुवायां च जुहूवदाज्यं गृह्णीयात्। जुहूवदिति च
तुर्गृहीतं सकृन्मंत्रवचनमिति॥ तेनैव यजुषा सकृद् ध्रुवायां गृह्णाति त्रिस्तूष्णीमिति श्रुतत्वात्। चकारादुप
भृत्यपि जुहूवदेव गृह्णीयात्। तेनोपभृत्यपि सकृन्मंत्रवचनमुक्तं भवति। त्रिर्मंत्रवचनपक्षे चतुर्गृ
हीतायां ध्रुवायां च चतुर्थं तूष्णीमुपभृति च। आपस्तंबः। भूयो जुह्वामल्पीयसुपभृत्स्वल्पिष्ठं ध्रुवायामिति।
इध्मं प्रोक्षति विस्रस्य वेदिं च बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद् ग्रन्थिं कृष्णोसीति प्रतिमंत्रं॥ ॥इध्मं वे
दिं बर्हिश्च कृष्णोसीत्यादिभिः प्रतिमंत्रं क्रमेण प्रोक्षति। कथं प्रोक्षति तत्रेध्मं विस्रस्य तत्रस्थमेव कृष्णोसी
त्यनेन प्रोक्षति। प्रोक्षणीरध्वर्युरादत्ते सरध्ममेवाग्रे प्रोक्षति कृष्णोसीति श्रुतेः। अग्रे प्रथममित्यर्थः। त
तो वेदिरसीति वेदिं प्रोक्षति। अथ वेदिं प्रोक्षति वेदिरसीति श्रुतेः। ततो बर्हिः प्रतिगृह्याग्नीध्रात्समर्पितं हस्ते
नादाय पुरस्ताद् ग्रन्थिं यथा स्यात्तथा वेद्यां कृत्वोदगग्रमासाद्य बर्हिरसीति मंत्रेण प्रोक्षति। अत्र प्रतिगृह्ये
ति प्रतिपूर्वको गृह्णातिरन्यसमर्पितस्यादानेन वर्तते। तथा च श्रुतिः। अथास्मै बर्हिः प्रयच्छति तत्पुरस्ता

कृत्वासादयति तस्मोक्षति बर्हिरसीति। तत्रेध्मप्रोक्षणे ब्रह्मन्निध्मं प्रोक्षिष्यामीत्यामंत्रणं। ॐ प्रोक्षेत्यनुज्ञात
स्य प्रोक्षणं। ब्रह्मन्बर्हिः प्रोक्षिष्यामीत्यामंत्रणं। इतरदिध्मवत्। वेदिप्रोक्षणे त्वामंत्रणानुज्ञे न भवतः। अ
विहितत्वात्। वरुणप्रघासेषु ब्रह्मन्निध्मौ प्रोक्षिष्यावः। ब्रह्मन्बर्हिषी प्रोक्षिष्याव इत्यूहः। इध्मस्याग्नीस
मिंधनार्थस्यैव प्रोक्षणं। अग्नये त्वा जुष्टं प्रोक्षामीति मंत्रलिंगात्। तन्मेध्यमेवैतदग्नये करोतीति वा
क्यशेषाच्च॥ अतश्च शान्तरूक्षिये परिध्युपस्पर्शनार्थस्येध्मकाष्ठस्य न प्रोक्षणं। अग्न्यर्थत्वाभावा
त्। वेदेरपि स्तरणार्थमेव प्रोक्षणं। बर्हिषे त्वेति मंत्रलिंगात्। तन्मेध्यमेवैतद्बर्हिषे करोतीति वाक्यशे
षाच्च। अतश्च पयस्यायास्तरणाभावे वेदिप्रोक्षणाभावः। ऽपसह्वग्नीषोमीये चरुस्थायाऽपि
पुनरेकव हस्तरणं क्रियत इति भवत्येव तत्र प्रोक्षणं वेदेः। बर्हिर्मंत्रे स्रुग्भ्यस्त्वेत्यस्य बहुवचन
स्य समवायात्। स्रुक्द्वित्वे कृत्वयोरूहः। ततश्च गृहमेधीये पयस्यायां चानुवंध्यास्थानीया
यां प्रस्तरमात्रे बर्हिषि स्रुचे त्वेति प्रयोगः। ज्योतिष्टोमे शकटबर्हिषि पयस्यापक्षे स्रुग्भ्यां त्वेति प्रयो
गः। पयस्यायामस्मिन्बर्हिषि उपभृत्ध्रुवयोरासादनात्। येषां मते पयस्यायां उपभृ। दभावस्तेषां शकटबर्हि

षः स्रुचेति प्रोक्षणं। अनुवंध्यापशौ तु बर्हिरसि स्नाजुष्टमिसेवं स्रुक्शाद्ध प्रयोगवर्जित एव मंत्रः। कुतः। शक
टबर्हिषि स्रुगासादनाभावात्। तत्कुतः। अग्नीषोमीयसवनीयानुवंध्यासु पुनरेक एवास्तरणविधानात्।
त्। तैत्तिरीयसूत्रे। आहरंसेतद्बर्हिरंतरेण प्रणीताश्चाहवनीयं च तदंतर्वेदि पुरस्ताद्ग्रंथ्या साध्य प्रोक्ष
ति। अत एव प्रणीताद्दक्षिणेन वा हृसेसुकं॥ ॥शेषं मूलेषु पसिंचयस्व दिसैव्युंदनमिति॥ ॥बर्हिषः प्रो
क्षणानंतरं प्रोक्षणीशेषं बर्हिर्मूलेषु पसिंचति निनयति अदितैव्युंदनमिति मंत्रेण। तथा च श्रुतिः।
अथ याः प्रोक्षिण्यः परिशिष्यंते ताभिरोषधीनां मूलान्युपनिनयस्यदिस्याइति। अत्र मूलानीति द्विती
यया मूलानां संस्कार्यत्वं गम्यते। ताभिरिति तृतीयया चापांतत्र करणत्वं। सूत्रे विपरीतं तत्र सूत्रस्य श्रुति
मूलत्वाच्छ्रुत्यनुरोधेनैव तत् व्याख्येयं। ततश्च नेयं शेषस्य प्रतिपत्तिः। अतश्च नाशशेषाशै पुनः प्रोक्ष
णीरूपाद्य मूलोपसेचनं कर्तव्यं। शेषशाद्ध प्रयोगस्तु समस्तानामिशेकार्थः॥ ॥पवित्रे निधाय प्रणी
तासु बर्हिर्विस्रंस्य पुरस्तात्प्रस्तरग्रहणं विष्णोरिति॥ ॥मूलोपसेचनानंतरमध्वर्युर्हस्तेन प्रणीतासु
पवित्रे निधाय ततो बर्हिर्विस्रंस्य बर्हिषः पुरस्तात्पूर्वभागात् ॥ द्विष्णोस्तूपोसीति मंत्रेण प्रस्तरग्रहणं निष्ठा

सनं करोति। सव्यायं मुल्का प्रस्तर स्य पृथक्करणे मंत्रः। अथ विस्रंस्य ग्रंथिं पुरस्तात्प्रस्तरं गृह्णाति वि
ष्णोः स्तूपोसीति श्रुतेः। तेन परस्यायोग हमेधीयेपि त्र्याख्यायां च नायं मंत्रः। पृथक्करणाभावात्। पृथक्कृत
एव तत्रासाविति पित्र्यायां च हस्तगृहीतोपि प्रस्तरमात्रं शिष्टं [illegible] सुक्तेः॥ ॥ब्राह्मणे प्रदाय सन्नहनं विस्र
ंस्य दक्षिणस्यां वेदि श्रोण्यां निधायान्यैरव धाय वेदिं स्तृणात्युक्तमन्त्र दसमिति त्रिवृत्॥ ॥तं गृहीतं प्र
स्तरं आहवनीयं पुर्वेव तु च्यौ ब्राह्मणे प्रदाय समर्ष्य बर्हिषः सन्नहनं बंधनरज्जुं विस्रंस्य विमुच्य रज्जुस्व
रूपं परिसन्न्य दक्षिणस्यां वेदि श्रोणौ प्रागग्रमुदगग्रं वा यथासंभवं निधाय पुरस्ताद्बर्हिषोन्यै बर्हिः स्तृणी
स्तं स्तृतं सन्नहनमवधाय प्रधायोण म्रदसमिति मंत्रेण त्रिवृत्त्रिधातु बर्हिषो वेदिं स्तृणाति। आच्छा
दयति। अथ सन्नहनं विस्रंसयति तदक्षिणायां श्रोणौ निदधाति तस्मुनरासादयति अथ बर्हिः स्तृ
णाति त्रिवृत्स्तृणातीति च श्रुतत्वात्। पितृयज्ञे च स्वासस्थां देव पितृभ्य स्वहः। मनुः। अग्रेणाहवनी
यं पर्याहृत्य प्रस्तरं ब्राह्मणे प्रयच्छति तथा। मुखतः प्रस्तरं गृह्णातीनो सुज्याभावमज्याभवि धुनुवादि ७२
ति। ब्रह्मा प्रस्तरं धारयति यजमानो वेति चापस्तंबः॥ ॥ उपपसावा॥ ॥ वाशब्दो विकल्पार्थः॥ ८

नत्रिवृद्दिसमयंनियमः। उपपसा वृद्धा स्तृणाति। यावतीभिरावृद्भिर्वेदेः स्तरणमाच्छादनमुपपद्यते संपद्यते
तावदास्तरणीयं। पंचाव ह्रूप वद्धेति। न ह्यपरिमितादिपक्षे पसु सोमादौ च त्रिवृत्स्तरणेन सकलवेदेः
च्छादनमुपपद्यते। तेनेदमुच्यते। उपपसा अयुग्माभावतो भवतीति। अत एव शाखांतरे श्रुयते। अयुग्धा
तु वेदिं स्तृणाति त्रिधातु पंचधातु वा वेदिं स्तृणातीति च॥ ॥बहुलं॥ ॥बहुलं निबिडं घनं निरंतरं बर्हिः
स्तृणाति यथा भुमिर्न दृश्यते। तद्धि बहुलं स्तृणीयादिति श्रुतेः॥ ॥अधरमुलं॥ ॥अधरमुलं स्तृ
णाति अधराणि अधस्तान्मुलानि यस्य तदधरमुलं। पुर्वं स्तृतस्य बर्हिषो मुलानि पश्चात्स्तीर्यमा
णबर्हिषोऽग्रैः प्रच्छादनीयानीत्यर्थः। अत एव शाखांतरे उक्तं। मुलान्यग्रैः प्रच्छादयतीति॥ ॥पश्चाद
पवर्गं॥ ॥पश्चादपवर्गः समाप्तिर्यस्य तत्पश्चादपवर्गं। वेदेः पुर्वभागादारभ्य पश्चिमभागे समाप्तिर्यथा भवति
मुष्टिं ८ तथा स्तृणातीत्यर्थः। तत्रैकं वेदेः पुर्वभागे स्तीर्त्वा द्वितीयं मुष्टिं वेदेर्मध्यभागे पुर्वस्य बर्हिषो मुलान्यग्रैश्छा
दयं स्तृणाति। ततः तृतीयं मुष्टिं वेदेः पश्चिमप्रांते पुर्ववत् द्वितीयमुष्टिस्तरणेन संबद्धं पुर्ववत्स्तृणी
यादित्येवं स्तरणस्य प्रसक्तपरिसमाप्तिरित्येकः पथः। पक्षांतरमप्याह॥ ॥प्रबद्ध्वा॥ ॥वाशब्दो वि

कल्पार्थः। बर्हिः [illegible] ध्यमानो। अथवा पूर्वस्तरणबर्हिषोऽग्राणि प्रबर्हन्नूर्ध्वमुत्सादयन्। तेषामग्राणामधस्तात्
द्वितीयं मुष्टिं स्तृणाति। तस्याग्राणि बर्हन्स्तृतीयं मुष्टिं स्तृणाति। एवं च प्रागपवर्गमेव स्तरणं कृतं भवति।
अथो अपि प्रबर्हिं स्तृणीयात् स्तरणं तिर्बर्हिरानुषंगिति श्रुति - यन्नुक्रमध्वरमुत्स्व इति श्रुतेः। प्रब
र्हमिति बर्हमने प्रबर्होऽस्याऽस्त्वित्यर्थः। वेदेः पश्चिमपार्श्वे स्तीर्णं तस्याग्राणि यथा प्रागादिनो साध्यं तेषाम
धस्तादन्यस्य बर्हिषो यथा मूलानि भवन्ति तथा स्तृणीयात्। तस्याप्यग्राणि उद्साध्यान्यस्य मूलान्यधः
कुर्यादित्येवं प्रबर्हमित्यस्यार्थः। आनुषंगिस्यानुपूर्वस्य नाम। एवं चैतत् किलानुपस्तीर्णं भवतीतरथा ह्य
ध्वरमूलत्वसंपादनाय प्रागारंभं प्रसृगपवर्गं स्तीर्यमाणमनुपूर्वं स्तीर्यते। ननु पूर्वस्यैव आदनुपू
र्व्यमिति सुतरां प्रसृगपवर्गे नुपूर्वता भवति। किंतु पूर्वस्तीर्णस्योत्तरेणान्याकारस्त्वनानुपूर्व्यमित्यभि
प्राय इति हरिस्वामिनः। आनुषंगमुक्तं परस्परसंबद्धं बर्हिरध्वर्युर्वा स्तृणातीति पथक्पदस्यार्थः। अतो
स्मान्मन्त्रलिंगात्पूर्वमुष्टिं प्रतिगृह्य तस्याधस्तात् सहसत्कमेवापरं मुष्टिं स्तृणीयादिति भाव इति माध्यवाचा
र्यः। आपस्तंबः। वेदिं स्तृणाति न कुलेम नतिदुरं प्रागपवर्गं वा त्रिधातु पंचधातु वाग्रे मूलान्यभिधा

रयतिध्यातौध्यातौ मंत्रमावर्तयतीति। मार्जने। वेदिस्तरणात्परमपरमयुग्धातुबहुलमनारोकमिति। लौ
गाञ्चिरपि। दुर्भ मृदसमिति दक्षिणवेष्टं संस्तरणाति तु च्छीमुत्तरमग्नेस्तु ऽऽनिधादयन्नयुग्मिति। अथ
परिस्तरणं प्रागग्रैः कुशैः परिस्तरणाति त्रिवृत्पंचवृद्वापुरस्तात्प्रथममथपश्चान्मुलान्यग्रैः प्रच्छाद
यतीति॥ ॥अग्नेर्द्वासनमाहवनीयश्रापिणः॥ ॥आहनीयश्रापिणोयजमानस्यात्रास्मिन्काले हवि
षामुद्वासनं कर्तव्यं। कुतः। अविरोधात्। यदिदानीमुद्वासनं क्रियते तदाहवनीयकल्पने कृते सति हवींषिद
ह्येरन्। अतएवकपालोद्वासनमपिइदानीमेवकार्यं॥ ॥इध्मात्समिधमादायाहवनीयं कल्पयत्युपर्युपरिप्र
स्तरं धारयन्॥ ॥इध्मादेकां समिधमादायतदनंतरं ब्रह्मणः सकाशात्प्रस्तरं धार्यादाय आहवनीयस्योपरि
ष्टात्समीप एवप्रस्तरं धारयन्गृहीतया सन्निधाकरणभूतयाहवनी यंकल्पयति। वस्तुसामर्थ्ये। सन्निधानेन
कृतइंधनेध्मादेर्ज्वलनसमर्थंकरोतीत्यर्थः। लोकेपि काष्ठादिनापूर्वमग्निमाहृत्यपश्चात्संधुक्षणं क्रियते। ए
वमत्रापि। अथाग्निं कल्पयत्युपर्युपरिप्रस्तरं धारयन्कल्पयतीति श्रुतेः॥ ॥उल्मुकेऽडुहत्सनुयाजार्थेन्॥
चैघघेनुयाजाः प्रवृत्ते कर्मणि भवंतितदाहवनीयादेकंउल्मुकेऽडुयति अपसार्यपृथक्स्थापयति। उदुहनं चस्तुह

नवभुमिसंलग्नयोरेवपुरस्ताद्धरणं। नोपाधडहते प्रेरणार्थस्यैव सर्वदृष्टत्वात्। इह त्वनुयाजार्थमेवैतदुल्मुकोद्
हनं। यद्यु हुमेध्मीयपयस्यादिनिवृत्तिविषयः। यत्रानुयाजानामभावस्तत्रोल्मुकोद्वहनम्न भवति। अतोनुयाजा
र्थमेवैतदुल्मुकोद्वहनं। यतस्तयोः समासेनाहवनीयस्यायातयामता क्रियते अनुयाजार्थं। तेयाए तेडल्मु
कोद्वहनसनुयाजेभ्य इति तेपुनरसंस्पर्शयंतीसा श्रवणात्। अतोनुयाजार्थाहवनीयसंस्कारार्थतोल्मुक
योः ततश्चोल्मुकोद्वहनानंतरं आहवनीयानुगमे नोल्मुकात्प्रसान यनं। किंतु गार्हपत्यादेवान्वग्निरिति
पुनराहरणात्तयोः पुनरनुसमासविसर्जन्यो समानुयाजानंतरं आहवनीये समासो न कार्यः। अनुया
जानांनिवृत्तत्वादिति। आध्वर्यवप्रायश्चित्तहोतव्यमिति॥ ॥परिधीन्परिदधाति। द्रीनेकवृक्षीयान्बाहुमा
त्रान्पालाशान् वैकंकतकाश्मर्यबैल्वान्पुनीलो भेपुर्वो लाभाउतरान्खादिरौदुंबरान्वा मध्यमदक्षिणोत्तरान्ग
न्धर्वइति प्रतिमंत्रं॥ ॥गंधर्वस्त्वा विश्वावसुरित्यादिभिर्मंत्रैर्मध्यमदक्षिणोत्तरांस्त्रीन्परिधीन्परिदधाति
प्रतिमंत्रं क्रमेण। कीदृशान्परिधीन्। आर्द्रान्नसुष्कान्। पुनः कीदृशान्। एकवृक्षीयान्। वक्ष्यमाणानांपाला
शवैकंकतादिपरिधिवृक्षाणांमध्ये एकजातीयवृक्षसंबंधिनः एकवृक्षायास्तानेकवृक्षीयान्॥ त्रीन्

णि पालाशान्। अथवा त्रीनपि वैकंकतानिति। किमर्थमिदं वक्ष्यति पूर्वालाभे पूर्वालाभे उत्तरानिति। तेनैकस्य परिधे
र्द्वयोर्वा पालाशयोरभावे जातिभेदो मा भूदिति एवमर्थमेकवृक्षीयानिति। त्रयोऽपि यज्ज्ञातीयाः संभवंति तज्ज्ञातीया
नेकवृक्षीयान्। ननु मुख्यस्याभावे नैको द्वौ वा पालाशौ एको द्वौ वा वैकंकतानिति। किंजातीयान्परिधीनित्यपेक्षा
यामाह। पालाशवैकंकतकाश्मर्यबैल्वान्। पालाशान् पलाशवृक्षावयवान्। ततो वैकंकतान्। विकंकतवृक्षावयवा
न्। ततः काश्मर्यान् श्रीपर्णीवृक्षावयवान्। ततो बैल्वान् बिल्ववृक्षावयवान्। किंप्रमाणान्। बाहुमात्रान्। य
जमानबाहुप्रमाणानित्यर्थः। प्रमाणे मात्रच्प्रत्ययः। बाहुः प्रसारितांगुलिहस्त आस्कंधात्। तथा पूर्वालाभे पूर्वा

ला

लाभे पूर्वपूर्वोक्तवृक्षजातीयानामभावे अप्राप्तौ उत्तरोत्तरान्परिदध्याति। तद्यथा। प्रथमं पालाशान्परिदध्याति
पालाशाभावे वैकंकतान्। तदभावे काश्मर्यान्। तेषामभावे बैल्वानिति। खादिरौदुंबरान्वा। अथवा काश्मर्य
भावे खादिरान् खादिरवृक्षावयवान्। औदुंबरान् उदुंबरवृक्षावयवान् परिदध्याति। कुतः। यदि काश्मर्यमयान्न
विंदेदिति काश्मर्यालाभे प्रत्यस्त्रयाणामपि बैल्वखादिरौदुंबराणां तुल्यविकल्पतया श्रुतत्वात्। ननु पालाशैः
सह विकल्पः कस्मान्न भवति व्यवहितसंबंधादभावविधिना विरोधाभावाच्च। पालाशाभावे वैकंकतानामु
पादानं कः कुर्यात्। सर्वेऽपि मुख्यत्वेन खादिरौदुंबरानुपाददीत। एवं पालाशाभावे वैकंकतैः सह खादिरौदुंबरा

णानि कल्प्येपि एतदेव दूषणद्वयं। अतो बैल्वैः सह विकल्पः। तदुक्तं। अभावे हि पलाशस्य वैकंकत विधिर्यतः। तेन बि
ल्वविकल्पार्हौ खादिरौदुंबरा विति। तत्रैव पालाशास्युरिति प्रकृत्य यदि पालाशान्न विंदेद् वैकंकताः स्युर्यदि वैकंकतान्न
विंदेदथो अपि बैल्वाः स्युरथो खादिरा अथो उदुंबरा इति। ते हि वृक्षा यज्ञियास्तस्मादेतेषां वृक्षाणां भवंति
ते वा आग्नाः स्युः समध्यमेवाग्नेः परिधिं परिदधाति गंधर्वस्त्वेति अथ दक्षिणं परिदधातींद्रस्येति अथोत्तरं परि
दधाति मित्रावरुणौ त्वेति श्रुतत्वात्। पालाशादीनां पूर्वालाभे पूर्वालाभे उत्तरोत्तराणामयं विधिः। न पुनःसा
बंतिविधिनियमः। ततो तरोत्तरोपादाने प्रायश्चित्ताभावः। प्रतिनिधित्वे तु प्रायश्चित्तं भवति। त्रयः परिध
यः पालाशकाश्मर्यखदिरौदुंबर बिल्व रौहितविकंकतानां येवा यज्ञियवृक्षा आर्द्राः शुष्का वसहत्वक्काः स्थ
विष्ठो मध्यमोणीयान् द्राघिष्ठो दक्षिणा ऽणिष्ठो ह्रसिष्ठ उत्तरो इति। उदगग्रमध्यमं प्रागग्रावितरा
बिसा पसव्यः। संस्पृष्टान्परिधीनुपदधातीति च सत्याषाढः। परिसमंततो धीयंते स्थाप्यंत इति परिधयः।
तत्र अयोगिको यं शब्दो न संस्कारनिमित्तो जातिनिमित्तो वा। तल्लक्षणमाह कात्यायनः। बाहुमात्राः प
रिधयः अजवः सत्वचो ऽव्रणाः। त्रयो भवंति सशीर्णाग्राः केषांतु चतुर्दश मिति। ननु परितो धानाच्चे

परिधय इति नाम तत्र हि चत्वारः स्युः। सत्यं। मध्यमदक्षिणोत्तराणीति तत्र त्रयाणामेवात्कलान्न भवि
ष्यंति।

एवं च सति यत्रेदृशं वचनं नास्ति तत्र च होता भवति। यथा पितृमेधे वारणान्परिधीन्परिधायेति मेधातु त्रयस्त्वाग्नेहो
मध्यमपरिधाविति सुक्तत्वात्। त्रयाणां हि मध्यमो भवति। न चतुर्णां॥ यैतु दारवेष्वपि पुनर्वदित्युक्तत्वात्। श्रुतौ म
ध्यमादिशब्दश्रवणाच्च त्रय एव। एते च परिधिपरिधानमदृष्टाग्निसंस्कारार्थं होता तस्मात्यावतां सु परिस्त्रि
स्वपि भवति। मित्रावरुणौ होतापुरस्ता[illegible]सरिध्वनिमिते वसुहः पितृयज्ञ इति काण्वायीः। नेति संप्रदायः॥
प्रथमं परिधिं संस्पृश्य वीतिहोत्रमित्यादध्याति॥ ॥प्रथमपरिधिं समिधोपस्पृश्य वीतिहोत्रमित्यादध्याति।
इध्मादग्नीतेया समित्तत्तया समिध्यमानेनरध्मकाष्ठेन प्रथमं परिधिमुपस्पृश्योपविष्ट एव स्पृष्ट्वा ततः स्था
यतां समिधं वीतिहोत्रमित्यनेन मंत्रेणाहवनीयेभ्याददधाति प्रक्षिपति। अथ समिधमभ्याददधाति समध्यम
मेवाग्नेः परिधिमुपस्पृश्य तितेनैतामग्ने समिधं धेथाग्नावभ्याददधाति तेनो अग्निं प्रसथ्यं समिधे सोभ्याददधा
ति वीतिहोत्रमिति श्रुतत्वात्। उपस्पर्शनं च परिधेः संस्कारः। परिधिमिति द्वितीयाश्रवणात्। अतश्चाश्वत
त्राद्वियेपि भवति। आहवनीये भ्याध्यानं तु दृष्टार्थं। तेनो अग्निं [illegible] प्रसश्वं समिधे इति बाध्यते षात्। अत
श्चाश्वतरुद्विये समिधनरूपस्य दृष्टार्थस्याभावाद भ्याध्यानाभावः। परिध्युपस्पर्शनमात्रं कृतासमि

दे॰ भा॰ २

७८

ग्निरसनीयेति॥ ॥अनुपस्पृश्य द्वितीयां२ समिदसीति॥ ॥परिधिमुपस्पृश्यैवरध्यादेवादाय द्वितीयां
समिधमाहवनीयेभ्यादध्याति सैदसीसने नमंत्रेण। द्वितीयाग्रहणे प्रासमु■ पस्पर्शनं निषिध्यते। अनु
पस्पृश्येति। अथयां द्वितीयां समिधमभ्यादध्याति समिदसीति श्रुतेः॥ ॥सुर्यस्त्वेजपसाहवनीय
मीक्षमाणस्तद्वचनत्वात्॥ ॥अध्वर्युरुपविश्याहवनीयमीक्षमाण आहवनीयं विलोकयन्सु
यस्त्वे समुं मंत्रं जपति संहितास्वरेण। अथाभ्यादाय जपति सुर्यस्त्वेति श्रुतत्वात्। कुतः एतत्। आ
हवनीयमीक्षमाण इति मंत्रस्य तद्वचनत्वादाहवनीयवाच्यत्वात्। सुर्यस्त्वेति मंत्रस्य हे अग्ने सुर्यस्त्वा
त्वां पुरस्तात्प्राच्यां पाह्विति। अत्र पुरस्ताच्छब्दस्य दिग्वाचकत्वात्प्रतिमपक्षे सुर्यस्त्वा दक्षिणतः पातिसु
हः। संप्रदायकारमतेऽनुहः। तदभिप्रायस्तु पुरस्ताच्छब्दोऽग्रवचनो न दिग्वचन इति। परिधाय
परिधानात्प्राहवनीयेक्षणजपांतमिदमेकं कर्म। एककार्यत्वात्। एकं हि कार्यमग्निसंस्कार परि
धयश्चाग्निसंर[illegible]क्षणार्थाः। सुर्येक्षणजपोपि तदर्थमेव। तत्कुतः। श्रुतेः। प्राक्षेव अभितः प
रिधयो भवंत्यथैतत्सुर्यमेव गोप्तारं करोतीति। अप्रयोजनं नैमित्तिकमंते [illegible]भवतीति॥ ५५

७८

५+यत तथा अरत्निमात्रे विष्टरीकरोतीति श्रूयते। काण्वीयायां तु तस्या दक्षिणे आदाये ५+

आपस्तम्बवेदिं बर्हिषस्तरणे तिरश्चीनं निदध्यातीति सवितुरिति॥ ॥अध्वर्युर्वेदिं प्रसार्य वृत्ताहवनीयसमीपा
द्वेदिसमीपे प्रसार्य स्तृतस्ये वतस्ये बर्हिर्बोधस्तणे आदाय सवितुर्बाहुभ्यामिति मंत्रेण वेदिमध्ये स्तृतस्य
बर्हिषउपरि आनीय पश्चात्प्रदेशे तिरश्चीं उदगग्रं निदध्याति स्थापयति। अथ स्त्रीणां वेदिमुपावर्तते
स दक्षिणे आदाय तिरश्चीं निदध्याति सवितु[...]रित्यादिश्रवणात्। आपस्तंबः। समावनंतगर्भौ
विष्टरीकुरुते इति। तथाप्ये नवे ध्युदगग्रे निधाये लिंपद्यते तेन बर्हिषस्तरणे इति सुत्रितं। तिरश्ची
इत्युदगग्रे। अत एव वेदिस्तरणं प्रागग्रैर्बर्हिभिः कर्तव्यं॥ आपस्तंबेदिमिसवाच्यं। सामर्थ्याद्देवत
स्तापेः। वाच्यं स्यात्। स्तरणनिधानस्यवेध्यधिकरणलाभार्थत्वात्। अन्यथाहि न - यते। कैतेस
पेनिनिधीयेतेइति॥ ॥अन्येवायुक्तत्वात्॥ ॥अन्य एव वा स्तृणे आदाय तिरश्चीं निधीयेत। नस्तृतस्य
बर्हिषस्तरणे। कुतः। अन्येवायुक्तत्वादन्ययोर विनियुक्तत्वात्। अन्ये हि विनियुक्ते बर्हिषस्तरणे वेदिस्तरणे
विनियुक्ते। न च विनियुक्तयोर्वचनं विना अन्यत्र विनियोगो युक्तः। अ■■थ स्त्रीणीये वेदेर्दक्षिणे अ
ध्वर्युरादत्ते इति। तस्मादन्यैरेव तृणेर्ग्राह्ये। नन्वत्रापि वचनमस्ति काण्वीयायां। अथ स्त्रीणीं

वेदिमुपावर्त्तते। तस्माद्दक्षिणे आसादयेति। नन्वेवं अपि भवतु वेदिलक्षणयोरेवोपादानं अधिकरणं तु वचनाभिमंता।
वचने सति न्यायस्य दुर्बलत्वात्। नहि न्यायो वचनं बाधितुमीष्टे। तस्मादत्र प्रकृते बर्हिषस्तरणेऽत्र वाद
मनेवोपनिधाय। तथा च हरिस्वामिनः। अथस्तीर्णां वेदिमुपावर्तत इति उपावर्तनस्य दृष्टार्थत्वात्काष्ठा
चे तस्माद्दक्षिणे आसादयेति वचनात्स्तीर्णाया एव वेदेर्बर्हिषस्तरणे ग्राह्य इति। उक्तन्यायमन्यत्रादि
शति॥ ॥अन्यत्रापि आर्थे॥ ॥असत्यन्यत्रापि पवित्रपशूपाकरणग्रहोपस्पर्शनश्रवणाग्निमंथना
दौ लक्षणार्थे लक्षणकार्ये प्रस्तुताद्बर्हिषोऽन्यान्येव तृणानि ग्राह्याणि। कुतः। युक्तत्वादेव। यतः श्रुतिरेव
विनियुक्तं विनियोगे यत्नं करोति। तस्माद्दक्षिणे आसादयेति। अथस्तीर्णायै वेदेरिति। अतो वचना
भावेऽप्येवं ग्राह्यं। ननु विषये लौकिकमिति वक्ष्यमाणत्वादन्याय्यमेतत्। लिङ्गसामर्थ्येन सर्वा
र्थतया प्राप्तानामग्नीनां वाचकं विनियोगं विनान्यस्मिन्कार्ये तेषां निराकरणपरं। इदं तु सर्वकार्यस्य
कार्यविशेषस्य संनिधानाभावात्स्य निराकरणविषयमित्यपौनरुक्त्यं। अत्र प्रसंगादिदं चिंत्यते। युपां
जने च सर्पिः प्राकृतं स्थाल्यां गृहीतान्यमुत अप्रकृतं लौकिकमिति। किं तावत्प्राप्तं। आज्यस्थाल्यां।

कुतः। प्रवृत्तायां वसाज्यकार्ये तत्सर्वं तेन वृते न वृत्ते। अतः पशावपि सर्वमाज्यकार्यं तैनैव कर्तव्यमिति
प्राप्तेऽआह॥ ॥युपांजने च सर्पिः॥ ॥युपांजने सर्पिर्वचनमन्यदेवग्राह्यं। ननु प्रावृत्तं स्थाल्याज्यं। यद्यपि
तत्प्रवृत्तायं संयुक्तमासन्नं तथापि यानि प्रवृत्ताज्यकार्याणि तदर्थमेव। अतः प्रवृत्ति वसश्रावपि तेनैव न त
दर्थे नैव भवितव्यं प्रवृत्तौ युपांजनमस्ति तस्मान्न तदा ▮▮ज्यस्य स्थाल्याज्यस्य प्रयोजकं। अतो लौकि
कं ▮मेवोपादाय युपांजनं कर्तव्यं। ननु तर्हि विषये लौकिकमिति सनेनैव सिद्धत्वात् पुनरुक्तमिदं। नैतदे मेवं=
वं। तद्विवाक्यावगतकार्यविशेषसंबन्धानामग्नीनां तद्भूतिरिक्तेषु संबंध निराकरणार्थं। इदं
तु प्रकरणावगतकार्यविशेषावगतस्य पृषदाज्यस्य प्रकृतकार्यसंबंधनिराकरणार्थं सर्वोनरु
क्तम्॥ ॥पुरोडाशपयस्याध्यानासु चेध्मन्॥ ॥ज्योतिष्टोमे श्रूयते। पुरोडाशमात्रामैंद्रवायवे प्रा
श्यत्ति पयस्यां मैत्रावरुण आश्विने ध्याना इति। तत्र पुरोडाशपदं पुरदश्मन् प्रवृत्तानि गृह्णीयात्। इध्म
न् प्रवृत्तानि लौकिकानीति विकल्प इति केचित्। पित्रमुक्ता ध्यायीस्त्वेवं व्याचक्षते। चशब्दस्तु श
ब्दार्थे। पुरोडाशपयस्याध्यानासु योप्रवृत्तान्युपा दध्या▮ हिरण्यन्स्वेध्म यैवोपादध्यान्नशास्त्रतः।

अशास्त्रार्थत्वाद्यं तदप्रकृतस्योपादानं। कुतः। पुरोडाशनिबुद्धिनिर्यादर्शनात् पुरोडाशादीनामेवायं प्रति रो
पत्तिरूपः संस्कारो न ग्रहणं। प्रतिपत्तिश्च विध्यमानानां क्वचिदुपयुक्तानां च भवति। न प्रतिपद्ये
र्थ सम्पाध्यंते। अपि चावयवश्रवणान्येतानि। विध्यमानानां च गृह्यते। नावयवार्थं सम्पाध्यंते त
स्माद्धिदेवतापात्रेषु प्रतिपादितशेषं यजमानेन भक्षयितव्यमिति। जैमिनेर■प्ययमेवासिद्धां
तः। अपनयस्त्वेकदेशस्य विध्यमानसंयोगादिति। अन्तरर्दं व्याख्याने युक्तं॥ ॥ तयो प्रस्तरं संस्तृ
णा सुवर्णमन्नदसमिति॥ ॥ तयो रूद्रं ग्रस्तीणर्थो विघ्नसोरूपरि प्रागग्रप्रस्तरं स्तृणाति क्रूपामन्नदसमि
ति मंत्रेण। तस्माद्बर्हिषि घृतीनामेतत्प्रस्तरं संस्तृणा सुवर्णरमन्नदसमिति श्रवणात्। अत्र प्रस्तर
स्यांगप्रधानार्थं जुहूधारणार्थं वा। अतस्तरणमंत्रे पिपिति यज्ञे स्वासस्थं देवपितत्म्य इस्तुः।
अभि निध्याहाहावसबाइति॥ ॥ आहावसनद्रसयनेन मंत्रेणार्थं सुधाभ्यामपि हस्ताभ्यां प्र
स्तरमभिनिदध्यात्। आक्रामति प्रस्तराभिमुखो पाणी निदध्यात्। तमभिनिदध्या साहेति श्रु
तेः। नात्रोदकस्पर्शः सुवर्णमन्नदसमासा प्रस्तरे इस्तु कृत्वात् मंत्रस्य प्रस्तरो देवतायतः। आपस्तंबः

तयोः प्रस्तरमभ्याद्ध्यात् अभिघृतत राजि प्रस्तरमुल्लानि बर्हिमुखेभ्यो जुहुरसि घृताची सेतैमं
त्रैरनुचीर संसख च्छास्तुल्यः सादयतीति॥ ॥ सव्याङ्गुल्ये जुहुं प्रतिगृह्यनिदधाति घृताचीति॥ ॥
अध्वर्युर्जुहुं प्रतिगृह्य प्रतिशाखाद ग्नीध्रासमर्पितां आदाय सव्याङ्गुल्ये सव्येन हस्तेनाङ्गुल्ये अ
विसृज्ते प्रस्तनिद धाति घृताच्यसि जुहुरिसनेन मंत्रेण प्रस्तरस्योपरि प्रागग्रमासादयति। अपि
निष्कृत एव सव्येन पाणिना भवत्यथ दक्षिणेन जुहुं प्रतिगृह्णा■ति सनाडपरि जुहुं सादयत्युधः
इतराशु चरति श्रुतत्वात्। अपि वा जुहुमेव प्रस्तरे समं मुले जुष्कां दंडं करोतीत्यापस्तंबः। मनुश्च।
जुहुं प्रस्तरे सादयति न रिक्तामवसृजेति समं मुलैर्दंडं करोतीति। प्रतिग्रहणं च समर्पणपूर्वकं।
यतोथास्मै बर्हिः प्रयच्छतीति। श्रुतौ समर्पणे विहिते। बर्हिः प्रतिगृह्येतिसुत्रितं। अतोत्रापि प्रति
गृह्येति सुत्रणात् समर्पणपुर्वकमेवोपादानं। घृताचीरिति मंत्रस्य यथार्थहाद्धृहमेधीय यस्या
दावाज्यहरणत्वेवलखुगासादने घृताचीसस्येकस्य पदस्या प्रयोगः। असि जुहुर्नाम्ने सेवंयो
ग्यं। एवं पयस्यायामस्युपभृन्नाम्नेतीति। प्रकृतावपि प्रागाभ्यग्रहणादोहविनाशे पंचशरावादो
क्रियमाणे जुहुपभृतोर घृतवहोरासादने चैवं ज्ञेयं॥ ॥ एवमितरेडभाभ्यां प्रतिमंत्रं बर्हिष्युपभृतं

ध्रुवां चानुवक्ष्येत्नुर्वं। इतरे जुह्वा अन्ये द्वे स्रुचौ बर्हिष्यासादयति। एवमिति प्रतिगृह्य इतरे केऽपभृतं ध्रु
वां च क्रमासादयति। अनुपूर्वं अनुक्रमेणावक्षे अपवक्षे जुह्वपेक्षयाऽपभृतं उपभृतपेक्षया
ध्रुवामववक्ष्यामिति। उत्तराभ्यां मंत्राभ्यां प्रतिमंत्रमेकैकामादेसायति। उपभृन्नाम्नेत्युपभृतं।
ध्रुवा नाम्नेति ध्रुवामिति। एवमेव सूत्रितत्वात्। आपस्तंबः। उत्तरेण जुहूमुपभृतं प्रतिवक्ष्यतरामिवाधस्ताद्धि
ष्य सो रूत्तरेणोपभृतं ध्रुवां प्रति वक्ष्यतरामिवोपरिष्टाद्धि ध्म सोरिति। दक्षिणाद्दक्षिणेन जुहूं स्रुचं सा
ध्यदयसुत्तरेण ध्रुवामिति मानवे च। ओस्तरद्धि च्यसोरूपभृत्। उपरिष्टाद्धि च सो ध्रुवा संसक्ता स्रुचो
नीचाः सादयतीति। मंत्रोत्तरविधानाद्धि हि पीस नेन न च प्रस्तरणादेवं शब्देन प्रतिगृह्य से तावदेव ल
भ्यते। तेनान्यसमर्पिते आदायासादयति। ननूपभृतं ध्रुवां चेति न वक्तव्यं। इतरे इस्युक्तत्वात्। स
से। स्रुचामेवेदमासादनं न तस्य स्याज्यस्येति ज्ञापनार्थं पुनरुक्तमिति न दोषः। तत्कुतः। श्रुतौ स्रुचामे
वासादनविधानात्। जुहूनाम्नेति जुहूं उपभृन्नाम्नेत्युपभृतं। ध्रुवा नाम्नेति ध्रुवामिति। तथा सवा उ
परि जुहूं सादयस ध्यरितरा स्रुचरति। जुहूनाम्ना सादिमंत्रलिंगाच्च। प्रयोजनं चिंतायाः। विवक्षा
वाज्यग्रहणाभावेपि जुह्वादीनामासादनप्राप्तिः। जुहूस्थानापन्नानां च सुपीर्क पर्णरोहनौदुंबरस्रुवा

दीनां प्रतिग्रहपूर्वकं प्रस्तरे सादनं भवतीति ॥ ॥ पुरोडाशमभिघार्योद्वास्योपस्तीर्णे निधायनक्ति यस्ते प्राण इ
ति ॥ ॥ ध्रुवासादनानंतरं गार्हपत्यसमीपे गत्वा पुरोडाशमभिघार्योत्तरतउद्वास्य पूर्वोत्तरमुपस्तीर्णे
निधाय यस्ते प्राण इति मंत्रेणानक्ति । उपस्तीर्णे इति भिन्नं तेन भूतपूर्व निर्देशात् पूर्वोत्तरमुपस्तरणं । यत
उद्वास्योपस्तरणं कर्तुमशक्यं पुरोडाशेन रुद्धहस्तत्वात् । एतदभिघारणं हविर्मीत्रस्य भवति पुरो
डाशग्रहणमुपलक्षणार्थं । अत्राहापस्तंबः । कपालवत्पुरोडाशमंगारानपोह्वेति । स्रुच्यास्याग्नेयपु
रोडाशमभिघारयति । जुह्वामुत्तरं । यस्त इति प्रातर्दोहं स्योनं त इति । पात्र्यामुपस्तीर्यापर्याव र्त
र्त्य पुरोडाशमुद्वास्य वेदेन प्रमृज्य तस्मिन् सीदेति पात्र्यां प्रतिष्ठापयति । स्रुवेण कपालानि प्रमृज्य
पुरोडाशमनक्ति स्वक्त्यमिति । उपरिष्टादभ्यज्याधस्तादुपानक्तीति च । कपालवदिति वेदेनेत्य
र्थं । अनेतिरीयेपि । अथादत्ते रम्येणाज्यस्थालीं स्रुवं सव्येन पात्रीं वेदमित्येतत्समादाय प्रदक्षिणमावृ
त्य प्रसव्यग्रस्रजचनेन गार्हपत्यमुपविश्य पात्र्यां ह्युपापस्तरणीते स्योनं त इति । अथ दक्षिमादाय दक्षि
णस्य पुरोडाशस्यांगारानपोह्य तीरमहमिति वेदेन विरजसं कृत्वाभिघारयति ॥ अथैनमुद्वासयति ॥

दे॰ भा॰ २
नभ्य

८०

परिशार्द्ध्या॥ धस्तादुपानक्तीति च। अत्रैकस्यामेव पात्र्यां द्वयोपस्तीर्णविधानात्सर्वसूत्रेष्वेकवचनस्यैव दर्श
नादेकैव पुरोडाशपात्री भवति। तस्यां दक्षिणोत्तरमदेशेनिम्नस्थानद्वयं कल्पात्तत्रोपस्तीर्णपुरोडाशौ स्थापनीयौ। प्र
कृतिलाभानुकृतेनैव प्रियेण धाम्नेति मंत्रेण सादनीयौ। प्रकृतावसमवेतत्वात्। असमंत्रस्य विकृतौ कृत्रा
प्युहो न भवति। मानवे च। वेदेन पुरोडाशयोर्भस्मापोहति। वेदोपयाम आज्यस्थाल्याः स्रुवेणाभिघारय
ति। पात्र्यामुपस्तीर्णा तिड दडद्वासयति वेदेनापभस्मानं करोति सनभिघ्न स्त्राणि नी वेदशिरसा वेतित नडप
स्तीर्णे सादयति ततोय स्तद्रसर्पि अपर्यावर्तयन्न धस्तादुपानक्तीति। दोहावलंकरोति अभ्युदाहरति हवींषि दक्षि
णतो जुह्वा स्रुवं सादयत्यग्रेण ध्रुवां वेदमुत्तरेण ध्रुवामाज्यस्थालीमपरेण स्रुचं इडासात्रीं दक्षिणस्यां वेदि
श्रोणौ सायं दोहमुत्तरस्यां प्रातर्दोहमिति। कात्यके च। स्टतौ पुरोडाशौ वेदेन संभ्यालंकृत्य पात्र्यां सादयति या
नो॰ नि घर्मेदृति कपालानि विमुञ्चति विमुञ्चनेत्येतहे। ध्रुवीभ्य द्वा वेधां सादयति श्रोण्या दोहं दक्षिणस्यां सायं दोहम
ष्भरति प्रस्तरे स्रुचं दक्षिणा स्रुगभ्यरति। ततोत्रायं क्रमः। प्रथमं वेदेन पुरोडाशविभस्मीकरणं। ततः पात्र्योः ८०
दगु॰ ८० स्थापनं। ततः पुरोडाशयोरभिघारः। ततउद्वासनं। वेदेन पुनर्विरजस्करणं। ततः स्थापनं पात्र्योरुपरि॥

ततः प्राणदानमिति। अस्मिन्मंत्रे यजमानाभ्यां विंदेति द्वियजमानके ऊहः। स्वधिजमानेभ्यो विंदेति बहुयजमानके। महापितृ
यज्ञे च पशुषु प्रविष्टः पितृभ्यो विशामनुयज्ञस्तु ऊहः॥ ॥यथादेवतमन्यत्॥ ॥अंजनमंत्रे ग्निं गच्छ इत्यस्य स्थाने यथादे
वतं प्रयोज्यं। यस्य यस्य हविषो या या देवता तस्मिन्हविषि तद्देवतावाचिपदं द्वितीयांतं प्रयोज्यमित्यर्थः। तद्य
था। अग्नीषोमीये पुरोडाशे अग्नीषोमं गच्छेति। दोहयोरिंद्रं गच्छेति। एवं सर्वत्र॥ ॥प्रसनक्ति कपालानि याभि
पर्म इति॥ ॥या निपर्म इति मंत्रेण स्रुवेण कपालान्यनक्ति। अंजनं च प्रसेकमुपधानक्रमेण कार्यं। युगपत्क
र्तुमशक्यत्वात्। प्रतिकपालं च मंत्रप्रयोगः। बहुवचनं तु पूजार्थं॥ अत एव विकृतौ एककपालद्विकपा
लेष्वनूहः। प्रकृतावसमर्थत्वात्॥ ॥तूष्णीं वा॥ ॥अथवा तूष्णीं मंत्रं विनैव शाखांतरात् स्रुवेणैव प्रसे
कमुपधानक्रमेणैव कपालानि। तथा चाहापस्तंबः। स्रुवेण कपालानि प्रसज्येति॥ ॥संख्ययोद्वासयति॥
संख्यया संख्यावाचिना पूरणप्रत्ययांतेन शब्देन करण मंत्र भूतेन प्रथमं द्वितीयं तृतीयमित्येवंगण
यन्नुपधानक्रमेणैव कपालान्युद्वासयति। प्रथममुद्वासयामि द्वितीयमुद्वासयामीत्येवं यावत्कपालं
प्रयोगः। विकृतौ खर्परस्यापि कपालस्थानीयस्यांजने भवतः॥ ॥प्रियेण धाम्नेति हवींषि वेद्यां त्वा
ध्रुवा असदन्निति सर्वाण्यालभते॥ ॥प्रियेण धाम्नेत्यनेन मंत्रेणाज्यस्थाली पुरोडाशादीनि हवींषि क्रमे

णवेद्यां कृत्वोदक्संस्थानि स्रुवाद्युत्तरतो वेद्या मासाद्य स्रुवा॰ असदन्निति मंत्रेण तानि सर्वाणि हवींष्याल
भते। ऽपयोगक्रमेण। तेन प्रथमं माज्यस्थाल्या ज्यस्य ततो जुह्वुपभृत् ध्रुवास्थस्याज्यस्य। ततः पुरोडा
शादेरिति। पाहि यज्ञपतीरिति द्वियजमानके। पाहि यज्ञपतीनिति बहुयजमानके चोहः। आपस्तंबः। अप
रेण स्रुचः पुरोडाशावासादयत्युत्तरौ दोहावपि वा मध्ये वेद्याः सांनाय्यकुंभ्यौ संदधातीति पूर्वं स्रुतपरं
दध्यथैनेध्मकुद्रुहति दक्षिणश्रोण्यां स्रुतमासादयत्युत्तरस्यां दधीतेति। तथा। अग्रेणोत्तरेण वा ध्रुवां वेदं
निधाय वेध्यं तामपरिस्तीर्य होतृसदनं कल्पयित्वा सामिधेनीभ्यः प्रतिपद्यत इति। विकृताव स्रुपयो
गक्रमेणैव हविषामालंभनं। तेन ध्रौवालंभनादुत्तरं पृषदाज्यालंभनं पशौ कार्यं॥ ॥पाहि मामित्या
त्मानं॥ ॥हविषामालंभनानंतरं पाहि मां यज्ञन्यमिति अनेन मंत्रेणाध्वर्युरात्मानमालभते हृदयदेशं हृ
स्तेन स्पृशति। ऽपनिशाम्युपहि अंतर्हृदये आत्मानं पश्येदिति कथ्यते। अतो हृदयस्योपस्पर्शः। आत्मा वै म
नो हृदयमित्यर्थवत्। क्षेत्रस्य आत्मनो विभोरमूर्तस्य स्पर्शासंभवाच्च। तत्रोपऽपस्पृशतिरि च। आत्मानमाल
भ्यऽपस्पृशेदिति परिभाषितत्वात्। स चायमालंभ आत्मसंस्कारः। करिष्यमाणकर्मार्थमारादुपकारकः।
तत्र प्रपशौ सुह्याद्यायामपुनः पुनर्हविरासादने कृतेन भवति। प्रथमतंत्र एव सेवकृते आत्मनः कर्मसमाप्ति

पर्यंतं संस्कृतत्वादिति। अथ मध्ये चाग्रयणे मेहनि संस्थिते सर्वयाज्ञमध्वर्योरन्नहोमो विहृतः। संस्थितेग्निष्टोमे प
रिहृतासु वसतीवरीष्वध्वर्युरन्नहोमं जुहोति ततश्च विरोधात् मध्यमाहः संबध्यापररात्रिकं कार्यं सर्वं प्रति
प्रस्थाता करोति। ततश्च प्रतिप्रस्थाताऽथ पररात्रे सवनीयपशुतंत्रस्याज्यासादनालंभनांते कृते ध्वर्युर
न्नहोमं कुर्वन्नेवालंभनं करोति। तस्य करिष्यमाणकर्मार्थत्वादिति॥ ॥अत्र वाव्रतोपायनमत्र वाव्रतोपाय
नं॥ ॥अत्रास्मिन्नवसरे वाव्रतोपायनं व्रतग्रहणं भवति शाखांतरात्। षडुरभ्यासोऽध्यायपरिसमाप्तिसूच
नार्थः॥ ॥इति श्रीमहायाज्ञिकदेवदत्तकृते कात्यायनश्रौतसूत्र■■भाष्ये द्वितीयोऽध्यायः समाप्तिम
गमत्॥ ॥शके १७८० कालयुक्तनामाब्दे नभस्यमासे अबहुले शिवतिथौ गुरुजवारे विष्णुनक्षत्रे
निशिधितीयपथामेदरशासहस्रेयुपनामकरामचंद्रतनुजेन नारायणगुरुकृपया लिखितं॥ भग्नपृष्ठिकटि
ग्रीवो बद्धमुष्टिरधोमुखः। कष्टेन लिखितं ग्रंथं यत्नेन परिपालयेत्॥ अर्जितं गुरुकष्टेन पुस्तकं यश्च तन्म
या। हर्तुमिच्छति यः पापी तस्य वंशक्षयो भवेत्। अस्मिन् ग्रंथसंख्या २८००

दे·भा·२

८२

६२



दे॰भा॰ स्र॰

॥श्रीगणेशायनमः॥ अथतृतीयाध्यायोलिख्यते॥ ॐ होतृषदनं दक्षिणापरेणवेदिं श्रोणिंवोत्तरेणाससामि णे॰ १
धेनाद्याग्नयेसमिध्यमानायानुब्रूहीत्याह॥ ॥अध्वर्युर्दक्षिणपरेणवेदेः पश्चाद्गार्हपत्याहवनीय
योरन्तरे सो होतृषदनं दक्षिणापुरुपवेषनार्थं वारणादिवृक्षजं शुष्ककुशैरास्तीर्णमासनं स्थापयि
त्वा। अथवावेदिश्रोणिमुत्तरेणहोतृषदनंस्थापयित्वा। तत्र एहि होतरित्येवं होतारमामंत्र्य होतरित्त
गतेसतिरध्वर्युः समिधमादायतस्तेनग्ने हीत्वा अग्नये समिध्यमानायानुब्रूहीत्येवं प्रसाह।
अग्नीत्। सआहाग्नयेसमिध्यमानायै सादि श्रुतेः। होतासीदतिअस्मिन्निति होतृसदनं। तस्य
करणंअत्रस्थापनं। ततस्सतः उपसादनं। आमंत्रितोहोतोत्तरेणोत्करमित्यादिसांख्यायनसूत्राद्धोत
रेहि होतरित्यामंत्रणंकर्तव्यं। वरुणप्रघासेषु अग्निभ्यांसमिध्यमानाभ्यामित्यूहः। अनेकयजमान नुब्रूहीति
केषुदर्शनीयावकुलपक्षेअग्निभ्यः समिध्यमानेभ्योनुब्रूहीत्यूहः॥ ॥होतरीतिचेके॥ ॥एकेशाखि
नोऽग्नयेसमिध्यमानायहोतरनुब्रूहीत्येवंप्रैषंकुर्वन्ति। तदुहैक आहुरग्नयऽइत्सादि श्रुतेः॥ ॥प्रथ विघं १
मस्थानेनप्राकृ स्विष्टकृतः॥ ॥स्विष्टकृतः प्राक्सर्वे मंत्राः प्रथमस्थानेन प्रयोक्तव्याः। स्विष्टकृत्प्रैषा

णामयंन्नियमः। प्रथमस्थाने चोपांश्वपेक्षयाकिंचिदुच्चैर्भवति॥ ॥मध्यमेनेडयाः॥ ॥स्विष्टकृत आरभ्य आइडायाः मध्यमेन स्वरेण सर्वमंत्रजातं प्रयोक्तव्यं॥ ॥शेषमुत्तरेण॥ ।शेषमुत्तमेन।
इडात आरभ्य कर्मापवर्गांतं सर्वमंत्राउत्तमेन स्वरेण प्रयोक्तव्याः। अत्रोपांशुप्रयोगः श्रुतेरिसस्य
दर्शपौर्णमासयोरस्यैप्रवृत्तिः। स्वरांतरविधानात्॥ ॥संतन्वन्निवमेनं ब्रुतीत्याहयजमानः॥
यजमानो अनेन मंत्रेण होतारं संबोधयेत् संतन्वन्नित्यादिना। अमुकमेवास्य सामिध्येन्यस्तस्मा
तां ब्रुयात् संतन्वन्निवमेनं ब्रुहीति श्रुतत्वात्। अयं च होतुः संबोधनार्थः। अतश्च प्रेषितेन न वक्तव्यः।
तत्र स्थैनेहस्संबोधनासंभवात्। होतुस्तु संबोधनमंत्राध्वर्युणा कर्तव्यं। विशेषकर्तुरसंभवे सा
मान्यस्य समाख्या प्राप्तस्यातिक्रमे कारणाभावादिति। तदुक्तं। गुणेषु प्रतिसिद्धिः परार्थत्वादिति।
अनेकयजमानके प्येक एव होतारं संबोधयन्निवक्तत्वात्। संतन्वन्निवमेनं ब्रुहि। संतन्वन्निवनो नाव॰
नु ब्रुहीत्यूहश्च भवति॥ ॥अंगुष्ठाभ्यावबाधतेपाष्ण्याभ्यांवेदमहममुमवबाधइतिद्वेष्यं॥ ॥यजमा
ध्यजमानः वेदमहमिति मंत्रेण हस्तागृह्याभ्यां द्वेष्यं द्वेषार्हं वैरिणमवबाधते। आक्रामयति। अंगु

द्र·भा·नः

भुमिमाक्रा २

भाभ्यां भुमिं क्रामति। द्रव्य मननास्य इदमहमिति मंत्रेण हस्तांगुष्ठाभ्यां भूमौ पीड्यती सर्थः। द्रव्य
स्यसन्निध्यावभावात्॥ ॥पार्ष्णिभ्यां वा॥ पादयोर्मध्यैपार्ष्णी। ताभ्यां पार्ष्णिभ्यां अंगुष्ठाभ्यामे
न द्रव्यमवबाधेत। न हस्तांगुष्ठाभ्यामिति। वाशब्दोवधारणे कुतः। कात्यायनापार्ष्णिभ्यामं
गुष्ठाभ्यामिति विशेषश्रवणात्। अवबाधनं च प्रनोवाजाइ साधासुसामिध्येन्यत्तुपद्य
मानासु कर्तव्यं। कुतः। तस्मादेतास्वनुच्यमानासु यदि स्यात्तमंगुष्ठाभ्यामवबाधते इति भु
तेः। यद्यप्यस्यां श्रुतावंगुष्ठाभ्यामित्यविशेषश्रवणं। तथापि कात्यायनापार्ष्णिभ्यामिति विशे

परना ७

षश्रवणात्सामान्यस्य विशेषपर्यवसानात्तायान्न्याय्यव्यवस्थितविकल्पः। तस्मात्पार्ष्णिभ्यामेवांगु
ष्ठाभ्यां भुमिराक्रमणीया। अत्रामुमिति सस्य स्थाने द्रव्यस्य नामप्रयोज्यं। तच्चाक्रमणार्थं न पुरुषा
र्थं। अभावेद्विषंतमिति भ्रातृव्यमिति निवृत्तिपदान्तरप्रयोगविधानात्। यदीदं द्वेष्यस्य ना
मोच्चारणं पुरुषार्थं स्यात्तदा द्वेष्याभावे द्विषदादिपदोच्चारणं न विदधीत। विहितं च। अ
तो नेदं पुरुषार्थमिति। अत्र चाप्रेषिते यजमाने अध्वर्युणात्रैव कर्तव्यं। अंगानां प्रधान

इदमहममु मवबाधे ५

देशकालकर्तृत्वाद्युचितत्वात्। तत्र हेत्वर्थादेव यानेकेष्वेक एव करोति। ऽन्योपि न भवति पुरुषार्थत्वाभावादेव॥ ॥अभावे द्विषंतं भ्रातृव्यमिति वा॥ ॥द्वेष्यस्याभावे इदमहं द्विषंतमवबाध इति। अथवा इदमहं भ्रातृव्यमवबाध इति प्रयोगं कुर्यात्। शाखांतरीयाद्विकल्पः॥ ॥यावत्सामिधेनीर्वेद दमहं तावतिथेन वज्रेणेति॥ ॥इदमहममुमवबाध इति पूर्वोक्ते अवबाधनमंत्रे ऽयमधिको विशेषः। इदमहमित्यस्यानंतरं यावत्संख्याः सामिधेन्यो ऽस्मिन्कर्मणि तत्संख्यावत्सामिधेनीप्रस्तुते कर्मणि यावत्सामिधेनीर्वेद यावत्संख्याः सामिधेनीर्जानीयात् तावतिथेन वज्रेण द्विषंतमवबाध इत्येवंविधमंत्रप्रयोगेणावबाधेत्। तावत्पूरणः तावतिथः तेन तावतिथेन। अयं भावः। यत्र पंचदश सामिधेनीकं कर्म तत्रेदमहं पंचदशेन वज्रेणेति ब्रूयात्। यत्र सप्तदश सामिधेनीकं तत्रेदमहं सप्तदशेनेति। ननु प्रकृतौ पंचदशैव सामिधेन्यः तस्मात्पंचदशेनवज्रेणेत्येवं कुतो नोक्तं किं लक्षणवाक्येन। सत्यं। प्रकृत्यंतरसंभवज्ञापनार्थं। अस्ति हि प्रकृत्यंतरमेकविंशतिः सामिधेनीरपि दर्शपूर्णमासयोरनुब्रूयादित्याद्युक्तेरिति। तत्र तदा एकविंशेनेन वज्रेणेति सिद्ध्यर्थं लक्षणवाक्यमित्यदोषः। इदमहममुष्य

८१

पुनरुपादानं तावत्तिथेनेत्यस्यायमस्य विधानार्थं। तावत्तिथेनेति पूरणप्रत्ययांतनिर्देशात्पंचदशेन
सप्तदशेन वा एकविंशतितमेन वेत्येवं पूरणप्रत्ययांतस्य संख्याशब्दस्य प्रयोगः सिध्यती
ति। ततश्चापि व्याख्यायां सामिधेनी त्रिवृद्वेदिस्तियस्त्रेः संप्रसारणं चेति त्रिशब्दस्य तियप्रत्ययां
तस्य प्रयोगः। इदमहं तृतीयेन वज्रेणेति। उपसंहृत्य चनवसु सामिधेनीष्विदमहं नवमेने
ति प्रयोगः। नोत्तरादिसंख्यादेर्मडिति स्मरणात्। इष्टकापशौ चत्तेषां चतुर्विंशतिः सामिधे
न्यस्तस्मिन्पक्षे इदमहं चतुर्विंशेन वज्रेण चतुर्विंशतितमेनेति यथेष्टं प्रयोगः। प्राजा
पत्यपशुपक्षे तस्यैकविंशतिः सामिधेन्य इति श्रुतत्वात्। इदमहमेकविंशेन एकविंशति
तमेनवेति। विंशत्यादिभ्यस्तमडन्यतरस्यामिति स्मरणात्॥ ॥प्रतिप्रणवमाधानं॥ ॥सामि
धेन्यनुवचनं कुर्वन्होता पंचदशानामपि सामिधेनीनामं तेषु प्रत्येकं प्रणवं पठति। तत्राध्व
र्युः प्रतिप्रणवं प्रणवे प्रणवे एकैकस्येध्मस्याहवनीये आधानं प्रक्षेपं करोति। सचायं काम्या
र्थः संयोगोनांगांगीभावः। उभयोरप्यभ्यर्हितार्थत्वात्। इध्मो ह्यग्नीध्वनार्थः। सामिधेन्यो

पिपठ्यमानाग्न्यनुवादिन्यः प्रयोजनं सामिधेन्या मन्त्रार्था मिध्मकाष्ठप्रक्षिप्ते सामिधेनी अनुच्य
तएव। सामिधेन्यभावे पि पयस्या याइध्मकाष्ठप्रक्षेपो भवति। अग्नेरिन्धनार्थहात्। उपवाजनं सं
म्मार्गी दिवदग्निसंस्कारकत्वात्। सो ग्रामण्यां च प्रतिप्रस्थातुरपि दक्षिणाग्नौ ॥ ॥ समिध्यइति
प्रागतः सर्वमिध्ममेकवर्जमनुयाजार्थेत् ॥ ॥ समिद्धो अग्न आहुते सतः प्रतीका त्वाग्यः प्रण
वस्तस्मिन्प्रणवे एकवर्जं एकां सामिधेनीं वर्ज्यं शेषमवशिष्टं सर्वमिध्मं प्रक्षिपेत्। अनुया
जार्थोदिति। यद्यनुयाजा भवंति तदैकवर्ज्यं एकां वर्जयेद्वा। इहानुयाजानामवश्यंभावादत
द्विरुक्तिविषयं। आतिथ्यादावनुयाजाभावे समिसशिशेषणन्न भवति। समिद्धो अग्न आहु
ते सतः प्राचीनप्रं सर्वमिध्ममभ्यादध्यादित्यदन्यसमिध्य इति। समिध्य इति प्रागमत्त इसतः श्ला
घोपादानात् सामिधेनी विवृद्धा यागं तु नामं साया: प्रणवे सर्वेध्मस्य प्रक्षेपः। ऋग्व द्वौ हि ला
छबक्रिर्भवति। तथा चाह आपस्तंबः। प्रणवे प्रणवे समिधमादध्याति सामिधेनीवद्धे काष्ठानि
विवर्जिते प्रतिहृदस्मा नास्तु प्रवृत्तिवहसमिद्धो अग्न आहुते समिधायै का मनुयाजसमि

४ भमबशिष्यसर्वंमिद्धशेषमभ्यादधातिपरिधानीयायां चेति॥ ॥अनुवाचनांते वेदे आह
वनीयं त्रिरूपवाज्यस्रुवेणपूर्वमाघारमाघार्याहाग्निमग्नी सम्मृड्ढीति॥ ॥त्रिरेवप्रथमांत्रि
दि ३ रूत्तमामन्वाहमन्वब्रुयाँति।प्रक्षैत्तदनुवाचनमिति श्रुतेः।अतोनुवाचनांतः सामिधेन्यं
तः।तस्मिन्ननुवचनांते सामिधेनीनामंते ध्वर्युर्वेदेनकरणमु [illegible] आहवनीयमग्निं त्रिरूपतेः
५आज्यस्थाल्या सकाशादाज्यं गृहीत्वा ५ वाज्यवीजायहोस्रुवेणाहवनीयेउत्तरभागेऽ [illegible] तंप्रांचंस्रु [illegible] मेवपूर्वमाघा
रमाघार्यततोग्नीध्रंप्रति अग्निमग्नीसंमड्ढीतिप्रैषमाह स्रुवेणपूर्वमाघारमाघार्याग्नि
मग्नीत्संमृड्ढीतिश्रुतत्वात्।तथा स्रुवेणतमाघारयतितूष्णीतमाघारयतिनस्वाहेतिवचनेति
श्रुतत्वात्।अत्रप्रजापतिर्देवता।अनिरुक्तोवैप्रजापतिरिति श्रुतेः।अनिरुक्तत्वात्।पूर्वेदेवता
सामान्यादितिसूत्राच्च।तथाचाहापस्तंबः।प्रजापतिंमनसाध्यायन्निति।अत्रस्वाहाकारो
ऽपिनभवति।नस्वाहेतिनेतिप्रतिषेधात्।यत्राक्षेपार्थे।स्वाहेत्यपिनभवतीत्यर्थः।उपवाजनं ४
हस्वार्थं।नपृवेदेनविहितविशेषोपवाजनेनाग्नेर्दीपनं [illegible] स्वार्थः संभवति।तस्मादहस्वार्थमेव।

भवति

प्रयोजनं परिश्रितं चापि कर्तव्यं। स्रुवेणेति जुह्वा नियमार्थं। यतो जुह्वाव चन इति होमे जुहूः प्राप्नोति।।
आघारमिति संज्ञा संव्यवहारार्था। आघार्य सेत्त ऋज्वादिगुणप्राप्त्यर्थं। यतो जुह्वाव चन इति होमे
जुहूः प्राप्नोति ऋजुमाघारयति दीर्घमाघारयति संततमाघारयति प्राञ्चमाघारयतीति। वरुणप्र
घासेषु सौत्रामण्यां चाग्नी अग्नी हमं ट्टी जुहूः। क्रमेणोभयोः संमार्गः। दशाङ्गुलिप भेव मथेष्वाग्न
योग्नी हमं ट्टी जुहूः। षडङ्गुलिपथे तु संमार्ग एवं न भवति। पूर्वाघारस्तु अदृष्टार्थ आराडुपकार
कः। अत्त श्च यावदके गृहमेधीयपयस्यादौ तु न भवति। उपवाजनं तु प्रवर्त्तते एवाग्नेरदृष्टसंस्कार
त्वात्। मानवे। ओवासुदेवता स्वप उपस्य श्यवेदेनाग्निं त्रिरूपवाजयस गं वेध्यासंमृज्य पूर्णस्रुवेध्रु
वायामवनीय तस्योपसवे देपयामउत्तरं परिध्धि संधिं स्पर्शयित्वा होत्तरार्धे न्याघृत्तस्य प्राचीनं म
नसा प्रजापतये स्वाहेति ज्वलति जुहोतीति संपाथेन ध्रुवामाप्याय्य यथास्थानं स्रुवं वेदं च निदधाति।
काठके च। इध्मा समिधं [illegible] प्रणवे प्रणवे समिध्मा [illegible] द ध्वासनु कासु स्रुवेणाघारं प्रजापतये स्वा मनसा
हे [illegible] सुत्तरार्धे अग्नेः संततं दीर्घं प्राञ्चं ज्योतिष्मन्ता साघारमाघा [illegible] ग्नी प्परिधी श्ये सादि।। ।।इध्मस

५ त्रिः

महनैरनुपरिधि संमार्ष्ट्यग्ने वाजजिदिति त्रिः परिक्रामन्॥ ॥इध्मसंनहनानि इध्मसंनहना-

नि तैरिध्मसंनहनैरिध्मबंधनार्थैस्तृणैरनुपरिधि संमिबद्धेषु त्रिष्वग्निप्रदेशेषु प्रदक्षिण-

क्रमेणैकैक(स्मि)न्प्रदेशे। आहवनीयमग्निं त्रिस्त्रिः संमार्ष्टि। संमार्जनेनाग्निं विरजस्कं ज्वलं

करोतीत्यर्थः। अग्ने वाजजिदिति मंत्रेण। किंकृत्वा परिक्रामं। परिक्रम्य परिक्रम्य तत्तत्परिधिदेशं

गत्वा तद्यामानुसारेण पार्श्वतोग्निं संमार्ष्टीत्यर्थः। अथ संमार्ष्टीति प्रकृत्य परिक्रामं संमा-

र्ष्टि परिक्रामं प्रयोगं युंजंति त्रिस्त्रिः संमार्ष्टि त्रिवृद्धि यज्ञः स संमार्ष्ट्यग्ने वाजजिदिति श्रुतेः॥

अत्र हरिस्वामिनः। परिक्रामं परिक्रम्य परिक्रम्य प्रकृतत्वात्तमेवाहवनीयं पूर्वेण परिक्रम्य यजति

स्थाने स्थितो दक्षिणपार्श्वे संमार्ष्टि ततस्तत्रैवस्थितः पश्चिमपार्श्वे लग्नं समार्ष्टि। ततः पूर्वेण परी-

त्योत्तरतः समार्ष्टि परिस्थ। एवं क्रामं। अन्ये त्वाहुः। अग्निसंस्कारे पश्चिमपार्श्वे प्रथमपरि-

धिः परिहितस्ततो दक्षिणस्ततउत्तरश्च। अग्निप्रकरणे प्येवमेव योगोद्देशेन चेह कश्चित्स्वपक्ष-

मस्यावरोधस्तथापि दृष्टसंस्थै भवतीति। पश्चिमपार्श्व एव प्रथमं संमार्जनीयस्ततो दक्षिण

स्य १

परिधि २

५

स्तत उत्तरतश्चेति। त्रिस्त्रिरिति दिशि दिशि त्रिस्त्रिरिति वीप्सा। तत्र च प्रतिदिशं सकृत्सकृन्मंत्रेणाग्निं
संमार्ष्टि। ततो प्रदक्षिणं परिक्रम्योत्तरतः स्थितः पश्चात्पार्श्वेऽग्निं संमार्ष्टि। पुनः प्रदक्षिणं परीत्य यजति
स्थानस्थ उत्तरपार्श्वे दक्षिणस्तु तूष्णीं। अपरे तु। परिक्रामन् संमार्ष्टीति वचनात् प्रतिदिशं संमार्गार्थं परि
क्रमणं कुर्वंति। तद्यथा। पूर्वेण परिक्रम्य यजतिस्थानस्थो दक्षिणपार्श्वेऽग्निं संमार्ष्टि। पूर्वेण प्रदक्षि
णं परीत्योत्तरस्थो मध्ये संमार्ष्टि। पुनः पूर्वेण परिक्रम्य यजतिस्थाने स्थित उत्तरपार्श्वे संमार्ष्टि। पुन
रप्रदक्षिणेनोत्तरतो गत्वाऽपर्यग्निं तूष्णीं संमार्ष्टि। केचित्प्रतिसंमार्गं प्रदक्षिणमेव परिक्रम्योपविश्य
संमार्गं कुर्वंति। अंते च सकृदितरथावृत्तिः॥ ॥तूष्णीमुपरि॥ ॥परिक्रामन्निसत्राप्यनुवर्तते। परि
क्रम्याहवनीयस्योपरि मध्यदेशे तूष्णीं त्रिः संमार्ष्टि त्रिस्त्रिरिति वीप्सा यात्रापि त्रिः प्राप्तेः। अथोप
रिष्टात्तूष्णीं त्रिरिति श्रुतेः। अत्र सूत्रे तूष्णीमिति वचनाद्व्यासुतिसु चतुर्दिक्षु प्रतिदिशं मंत्रावृत्तिर्भवति
पु१ इति ज्ञायते। उपरिष्टात्तूष्णीमिति [illegible] त्र च पार्श्वेषु सकृत्सकृदावर्तते संमार्गमंत्र इति दर्शयति। इत
रथा ह्येककर्मापवर्गौ सकृन्मंत्रवचनमिति संमार्गादौ सकृदेव मंत्रः स्यात्। कर्काचार्यास्त्वेवमाहुः॥

५

नपरिध्युपधानक्रमेण संमार्गः। नह्ययं परिधिसंस्कारो येनाभिप्रवृत्तस्तत्क्रम आश्रीयते॥
अग्निसंस्कारस्त्वयं। तेन प्रदक्षिणोपचारादग्नेः संस्थितासंपादनाय प्रथमं दक्षिणतः संमार्गः। सव्या
यं संमार्गो यावदुक्तोऽपि भवति। कुतः। होमसाधनभूताहवनीयसंस्कारकत्वात्। अदृष्टार्थश्चायं।
तेनाहवनीयमस्थानापन्नासु परिधिष्वपि भवति। दर्शाकृतिपक्षे चावभृथेष्ट्यामप्स्वपि भवति।
तत्रापो वाजजितो वाजं वः सरिष्यंतीर्वाज[illegible]जितः संमार्ज्मीत्यूहः॥ ॥ अपरमाहवनीयादंजलिंक
रोति नमो देवेभ्यः स्वधा पितृभ्य इति दक्षिणतउत्तानं॥ ॥ आहवनीदपरं भागं हवनीयस्य पश्चा
ग्न्युपभृतोः पुरस्तान्नमो देवेभ्य इति मंत्रेणाध्वर्युरंजलिं करोति। नमस्कारार्थत्वात् अपुटांजलिः। त
तः स्वधा पितृभ्य इत्यनेन मंत्रेण तस्मादंजलेर्दक्षिणतो द्वितीयमंजलिमुत्तानं करोति पूर्वाभिमु
खो यज्ञोपवीत्येव। मनुः। उत्तानौ पाणी कृत्वा जुहूपभृतोरन्तरति। तदेतदंजलिकर[illegible]णंउत्तरस्या
रा[illegible]र्थं। कुतः। श्रुतेः। सत्यचोत्तरमाघारमाघारयिष्यन्स्तु[illegible]र्वेण स्त्रुचावंजलिं निदध्यान्नमो देवे ति
भ्यः स्वधा पितृभ्य इति। अतश्चोत्तराघाराभावेंजलिकरणाभावः॥ ॥ अपडपस्पश्यस्युपमे ५

इति मंत्रेणोपभृतामादायोत्तरां जुहूं वृत्सादक्षिणाभिक्रामसंध्रिणायिन्मयिति॥ ॥ अंजलिकरणानंतरं
अपउपस्वस्योदकं स्पृष्ट्वा प्रथमं पाणिभ्यां जुहूमादायोत्तरां वृत्साउपभृत्तउपरि निधायतत्तः
सुयममइतिमंत्रांते दे अपि स्त्रुचौ सहैयादाया यांध्रिणाभिष्मवितिमंत्रेणदक्षिणाति क्रामति।
दक्षिणस्यांदिशिगच्छतीत्यर्थः। सुयमेमेभुयास्तमितिस्त्रुचावादत्तइतिश्रुतेः। आपस्तंबः।
उपभृत्ति जुहूमसादध्याति मुखतोभिहृत्य मुखउपावहृइति सर्वत्रैव मत्साध्यानोपावदनं रवे
नभवतो नवशिजयति नाभिदेशे स्त्रुचौ राघारय सग्नाविष्णुमायामव क्रमियमि
स्त्रुचोरपरेण, सर्पेणमध्यमंपरिध्धिमनय क्राम प्रस्तरमभि त्रिर्महाप्पिस्ट यशे च स्त्रुचो रादानमंत्रे अस्तु
॥१॥ मत्तापित्यन्नमध्यवेदेपिल भ्य आन्यपूं संभिस्तमिसुहूकार्यः। नच पउपस्यस्येसिनवस्तव्यं। पित्र्य
शेच स्त्रुचोरपरे मंत्रमुख्याउपस्यशेदितिपरिभाषायामुक्तत्वादितिचेन्न। प्राचीनावीतिनिदक्षिणामु
णमध्यमंपरि
ध्धिमनवक्रा से खवयो व्युदासार्थं पुनरुक्तमिंदोषः। अनुत्तरां जुहूं वृत्से सेनत्त व्यर्थमुक्तं। पाणिभ्यां जुहूं
मप्रस्तरामिति पारिगृह्णीयाउपभृत्साध्यानमादानकालइतिपरिभाषायामुक्तत्वात्। सर्वोक्वर्थं। व्यर्थसंदेत
॥२॥

८

दे·भा·९८· १ ऽधादानेभवति। नप्रयाजार्थमादानइति। यत्तु पुनस्तुत्र करणेनैवं ज्ञायते। अन्यस्मादप्युपादानादिदं स्तुगादानम
१ ·पत्ततोविशिष्टमिति। अभिणाभिसंध यजतिस्थानप्रतिगमनेमंत्रः। सोप्युत्तराघारार्थ

१ स्यार्थस्य ज्ञापकं भवति। मंत्रमप्युपभृतोरादानमुत्तराघारार्थं गमनेएवाऽवांतरप्रक
रणात्॥ ॥परिधीन्परेण संचरो होष्यतः॥ ॥अपरेणेत्यनेन एनप्रसयांततहं योगेए
नयाद्वितीयेतिपरिधीनितिद्वितीया। परिधीन्परेण परिधीनांपश्चाद्भुत्वापूर्वेणप्रोष्ठ
तो होमं करिष्यतोऽध्वर्योर्गमनागमनायायं संचरो मार्गइत्यर्थः। संचरद्यसनेनैवस्मिन्वे
ति संचरः। गोचरसंचरेत्यधः। सर्वार्थोयं संचरो नोत्तराघारमात्रे होष्यतः संचरइत्युक्तात्।
अन्यथापरिधीन्परेणदक्षिणातिक्रामतीत्येतावदेव ब्रूयात्॥ ॥सव्येनेतोदक्षिणेनामु
तः॥ ॥गच्छतीतिसूत्रशेषः। इतोस्मात्स्थानात् यजतिदेशं गच्छन्सव्येनपादेनगच्छति।
अमुतोयजतिदेशात्प्रत्यागच्छन्दक्षिणेनपादेनप्रत्यागच्छति। एकैकेनपादेनगंतुमशक्य
त्वात्तस्यप्रथमंप्रवृत्तिर्विवक्षिता। तेनेतोगच्छतः सव्यपादः प्रथमंप्रथममुतः प्रत्
णीयः। आगच्छतश्च दक्षिणइति। अथातोतिक्रमणैष्यतिप्रवक्ष्यामः आश्रावयिष्यन्सव्ये
नातिक्रामति दक्षिणेना श्राव्येतिश्रुतेः। एतदपि सर्वार्थमेव। अथातोतिक्रमणस्येयत्ति

प्रतिक्रमणं९
१ण१

क्रमणमात्रं प्रकृतस्य श्रवणात्। न चाश्रावयिष्यन्निति श्रवणादाश्रावणविशिष्टे एवातिक्रमणे
ऽयं नियम इति वाच्यं। तथा सति विशिष्टानुवादलक्षणवाक्यभेदापत्तेः। तस्मात्सर्वार्थमेव
। अत एव सूत्रकारेणोत्तराघारे सूत्रितं । ...च। आश्रावणविशिष्टे तु नियमो यद्यपि भवेत्॥
विशिष्टस्यानुवादत्वाद्वाक्यभेदः प्रसज्यत इति॥ ॥ वसुमतीमिमं स्वस्थाय इत्तरं द्र इति जु
पति होत्युत्तराघारार्थं॥ ॥ वसुमतीमग्न इति मंत्रेण यजमानदेशे ऽदङ् प्राङ् अवस्थाय ईनाभिमुखः
स्थित्वा जुहूमवनार्य तद्द्र इति मंत्रेणाहवनीयस्य दक्षिणभागे ऋजुं दीर्घं संततं पा...चौहुवेनान्येनो
त्तराघारं जुहोति। तस्माद्दक्षिणतस्तिष्ठन्नाघारयति। स यदुभयत आघारयतीति च श्रवणा
त्। उभयत इति पूर्वाघारादुत्तरतः उत्तराघारश्च दक्षिणतः। उत्तराघार इत्यस्य संव्यवहारार्था। जुहो
तिशब्दोपवेशने प्राप्ते अवस्थाय इत्यनेन तद्बाध्यते। कुतः। सिद्धं तं यथैवा...तस्माद्दक्षिणतस्तिष्ठन्ना
घारयतीति वचनात्। अत उत्तराघारे तिष्ठति क्रिया बाधनिर्दी। तेन ... जुहोतिषु पि
सवदु हीनेनान्येन तिष्ठतैवं ... उत्तराघारो होतव्यः। मंत्रवर्णी आग्नेंद्रो देवता। ...र्थं॥

इत्थं। इत्तरं हृदत्ति जुहोतीति होमोऽभिहितः। होमश्च देवतोद्देशेन परित्यक्तस्य द्रव्यस्य प्रक्षेपः। तत्रावश्यं
भाविन्यां देवतायां तद्धितचतुर्थ्योः श्रवणान्मंत्रस्य च क्रियासाधनाभिधायित्वसामर्थ्यात्ततो मं
त्रवर्णाद्देवतापरिकल्प्यते। अत आग्नेयो देवता। तत्र चेदमग्नये इति होमासु वस्त्यागः कर्तव्यः।
यागे होमे च प्रक्षेपात्पूर्वं अवश्यं सर्वत्र त्यागः कर्तव्यः। तथा च कारिकायां। आदौ द्रव्यपरित्यागः
पश्चाद्धोमो विधीयते॥ प्रयोग इदमग्नये न ममेति यथार्थतः॥१॥ अवत्तं तु सृजेदन्नं मनसा
वाचयापि च॥ ततश्च प्रक्षिपेदग्नावित्येष धर्मः सनातनः। असृष्ट्वा जुहुयाद्यस्तु मोहेनान्वित
मानसः॥ देवा हव्यं न गृह्णन्ति कव्यं च पितरस्तथा॥२॥ यत्किंचिज्जुहुयादग्नौ तत्सर्वं त्यागपूर्वकं॥
अन्यथा जुहुयाद्यस्तु नरकं स तु गच्छति॥३॥ तथा च त्रिकांडमंडनः। तुल्य एवाधिकारस्या
द्दंपत्योरुभयोर्मिथः॥ कृत्स्नं हि चलयोस्तुल्यं द्रव्यत्यागे प्रचक्षते॥१॥ यद्यसावेकं पतिः कुर्यात्सहीतद
नुमन्यते॥ अधिकारेऽपि वैषम्यं प्रोक्तं शाखानुसारिणा॥२॥ तथा॥ सन्निधौ यजमानस्याद्युद्देश
त्यागपूर्वकः। असन्निधौ तु पत्नी स्यादुद्देश त्यागकारिका॥१॥ असन्निधौ तु पत्न्याः स्यादध्व

२ साग वा भ्यस्याघारस्य कर्तव्यः धागहोमादि द्विति सर्वानुक्रमण्यामुक्तत्वात् ॥३॥

श्रुति २ ध्रुवस्तदनुज्ञया ॥ उन्मादे प्रसवे चर्तौ कुर्वीतानुज्ञया विना ॥२॥ सर्वदा यजमानो वा यजेत्तद्दिग्म

धार २ खः शुचिरिति ॥ मंडनः ॥ साग्नं तु सर्वदा कुर्यात्तत्राप्यन्यतरस्तयोः ॥ अभावेप्यसमर्थोपि वा त्रियु

क्तः कृश्चन सजेदिति ॥ स चायमुत्तराघारः । आरादुपकारकोऽदृष्टार्थः । तत्त्र्य गृहमेधीयोप

सद्मयस्याद्यौ यावदुक्ते निवर्तते । वचनात्प्रयाजार्थेन जौहवेन क्रियते । तत्र तु गृहीतं वा लत्तदनु

भूतस्याघारमाघार्य त्रिरितः प्रयाजान्यजतीति । प्रयाजार्थेतान्यजौहवस्यैव वचनात् । स च श्रुतु

हि ६ र्गृह्णंग त्वा ति प्रयाजेभ्यो सिलगत्वा तीति ॥ अत एव दर्विहोमेषु प्रयाजाभावेन तदर्थं जौहवाभावे

प्याघारस्यावश्यकर्तव्यत्वात् स्याल्याः सकृद्गृहीते [illegible] नें द्रायस्वाहेति मंत्रेण स्रुवेणैव होतव्यः । मान

वे । दक्षिणार्द्धं भ्याहि तस्यार्द्धे अध्वर इति संततं प्राचं दीर्घमृजुमूर्द्ध्वमवधिरूमा प्याघारमाघा

रयतीति । लौगाक्षिरपि । विष्णोः स्थान इत्यवस्थायोर्द्धे अध्वर इति दक्षिणार्द्धेऽग्नेः संततं दी

र्घं प्राचमिति । महादाविस्यादिहे चाग्निविष्टकृद्वदपि स्यादयं इन्द्र आज्येन जुहुः कार्यः ॥ ॥ आप्यायी

सऽस्पर्शयन्स्रु चावेदा उल्मुकाभुवाऽ समनक्ति संयोतिषेति ॥ ॥ आप्यायीतेत्युत्तरस्यादिगु

न्प्राप्त्यर्थं। होमसंस्थापूर्वेषु त्रयष्वेव जुहोतीति शब्देन विहितत्वात्। श्रूयते चाघाराद्यो शेषमुपभृतः स्रुक्षु माघा-
रयति सन्ततं दीर्घं चेति। आघारानन्तरं स्रुचौ परस्परमसंस्पर्शयन्नत्यासजति स्थाने ध्रु-
वेः पश्चादग्रतः सोपविश्य जुह्वा औहवेनाज्येन ध्रौवमाज्यं समनक्ति। औ हवं ध्रौवमध्ये जु-
ह्वैवधारयतीत्यर्थः। सं ज्योतिषेत्यनेन मन्त्रेण। अत्र गद्यतामित्यध्याहारः। ननु जुह्वा ध्रु-
वायां वाभिघारस्तु त्रितं। किमिति औहवेन ध्रौवमिति व्याख्येयं। अञ्जनक्रियोपदेशस्य सामर्थ्या-
त्। ज्योतिर्भिः इतरस्यामाज्यं भवति ज्योतिरितरस्यां तेष्येतेऽभिज्योतिषी संगच्छेतेत-
ति श्रुतेः। ननु तर्हि औहवेने संसर्गं बिभ्रमिति नोक्तं। कथं जुह्वेति। स्रुवस्यकरणत्वावारणार्थं जु-
ह्वेत्युक्तमिति न दोषः। स चायं ध्रुवासंस्कारो ध्रुवतराघारसंसेव प्रवर्तते। यत एवं श्रूयते॥
अथासंस्पर्शयन् स्रुचौ पर्येत्य ध्रुवायाः समनक्ति शिरो वै यज्ञमानस्योत्तर आघार आ-
त्मा वै ध्रुवां तरा यैवैतच्छिरः प्रतिदधातीति॥ ॥निधायेध्मसंनहनान्यादायो श्रावयेत्सा-
ह॥ ॥ध्रुवासमञ्जनानन्तरं स्रुचौ निधाय स्वस्थाने सादयित्वा होतारमुत्तरेण गत्वोत्करस्य

पश्चात्प्राङ्मुखोवस्थायइध्मसंनहनान्यादायहस्तेनगृहीत्वाआवयेद्वाह। सर्वेप्रवरावाश्रा
वयन्तिसइध्मसंनहनान्येवाभिपद्याश्रावयतीतिश्रुतेः॥ ॥अस्तुश्रौषडितिअग्नीत्॥ ॥अध्वर्योरुत्तरतो
दक्षिणामुखोवस्थितोअस्तुश्रौषडेवंअग्नीत्प्रत्याश्रावयति॥ ॥वेदंबर्हिरिध्मशकलमपाधिविषै
के॥ ॥एकेशाखिनोवेदंबर्हिर्वेदोस्तंबर्हिरादायेध्मशकलंवाऽपधिध्यापाया आश्रावयति।तथै
वेवेदस्तीर्णायेबर्हिरपभिध्याआवयंतीध्मस्यवाशकलमपाधिध्याआवयंतीतिश्रुतेः।अभिप
द्येसस्याद्यपगृहीतेसर्थः सर्वत्र।कुतः।स्रुवंवानासइध्मसंनहनान्येवाभिपद्येतिश्रुतेः।आश्राय
तिस्रुत्रितवान्।अथपरिधीनभिपद्याआवयतीतिश्रुतेः।प्रथमंपरिधिंगृहीतेतिसूत्रितवांश्च॥
॥एवंसर्वत्राश्रुतप्रत्याश्रुतेषु॥ ॥सर्वत्राश्रुतप्रत्याश्रुतेष्वेवं भवति।एवमित्याश्रावणेध्वर्यु
प्रत्याश्रावणेग्नीदिति।तथाचश्रूयते।आश्रावयसध्वर्युस्त्वग्नीधंयशऽपावर्ततेसोग्नीन्नापव्यादर्
हरेदाप्रत्याश्रावणात्स्त्राआवयत्यग्नीदिति।अत्रचाध्वर्योग्नीध्र्यावीआश्रुतप्रत्याश्रुतेषुसर्वत्रदर्शय
ति।पितृभुत्सायार्यस्तुएवंव्याचष्टते।सर्वत्राश्रुतप्रत्याश्रुतेष्विध्मसंनहनान्यादायाध्वर्युराश्रा

वयेदाग्नीध्र श्रुप्रसा श्रावयेति दि। तदयुक्तमिति कर्काचार्याः। नह्या श्रावणमात्रे विधानमेषामिति। त
स्मादस्मदुक्त एवार्थः। तथाहापस्तंबः। इध्मसंनहनानि उपसंगृह्य वेद्या श्रुतणेन व्यंतमादायोत्तरतः
प्रवरायावतिष्ठते पुर्वो ध्वर्युरपरः अग्नीध्र इध्मसंनहनान्याग्नीध्रो न्वारभ्यो श्रावयेत्सा श्रावयतिअ
स्तु श्रौषडित्साग्नीध्रोपरेणोत्करं दक्षिणामुखस्तिष्ठन्स्य चसंमार्गं श्र्यन्वारयन्प्रसा श्रावय साग्नी
ध्रे सोमे सर्वत्रैव माश्रुतप्रसाश्रुते भवतः। मानवे च। स्फ्यसंमार्गपाणिराग्नीध्रः प आदुत्करस्योर्ध्वं
स्तिष्ठन्नस्तु श्रौषडितिप्रसा श्रावयतीति। काठके। स्फ्यसंमार्गि ■ मन्वारभ्याहेति। अथर्वणे च। आग्नी
ध्रस्योत्तरतउपचारः स्फ्यसंमार्गपाणेस्तिष्ठतो दक्षिणामुखस्य यथास्वरमस्तु श्रौषडितिप्रसा श्राव
णमिति॥ ॥ अथ प्रवणीते अग्निर्देवो दैव्यो होता तारे वान्यधिष्ठि श्चिकिता न्मनुष्वद्भरतवदमुवदमु
वदिति यजमानार्षेयाण्याह परस्तादर्वांचि त्रीणीति॥ ॥ क्रमस्य प्रातादेव प्राप्तत्वादथशब्द उपक्रमस्य
इस्यस्योत्तरत्रानुकर्षणार्थः। अथग्रहीत्वेध्मसंनहनादिनाहोतारं प्रवणीते। अग्निर्देवो दैव्य इत्या
दिना मंत्रेण। अथवा श्रुतप्रसाश्रुतयोः प्रपवार्थस्य ज्ञापनाय थशब्दः। सर्वैः प्रवरायाश्रावयतीति

१०

श्रुतेः। अमुवदमुवदिति यत्र सर्वनामस्थाने यजमानस्य संबंधीनि पूर्वजभूतानि परस्तात्प्रस्थानीया
दर्शयि[hole]पितातत्पुत्रततत्पौत्ररूपाणि त्रेण्यार्षेयाणि ऋषेरपत्यानि वृणीते। साम्नाकर्मणि प्रवर्तयति य
जमानं चावहमुंचेति। त्रेणीतिकृतः। त्रीन्वृणीतइति शाखांतरात्। परस्ताद्वाक्प्रवृणीतइति प्रवृत्तेरुं
क्तिपितेनाग्रे अथपुत्रोऽथपौत्रइति श्रुतेश्च॥ यजमानग्रहणं ऋत्विगार्षेयव्युदासार्थं। अथार्षेयंप्रव
णीतइति यजमानस्य यऋषिस्तत्पुर्वजो मंत्रदृक्तस्यापत्यं स्मैर्षेयं वृणीतइति हरिस्वामिनः॥ या
वंतो वा मंत्रकृतः॥ ॥ अथवा यजमानस्य वंशे संबंधी नामर्षीणां मध्ये यावंत ऋषयो मंत्रकृ
तो मंत्राणां द्रष्टारो भवेयुस्तावंतो वृणीते। त्रीनप्येवेति नियमः। ते च प्रवराध्याये गोत्रविशेषेण स
र्वेषां कथिताः संति। केषांचिदेकः केषांचिद्द्वौ केषांचित्त्रयः केषांचित्पंच चेति। तेन यत्गोत्रस्य
यावंतस्तत्र दृष्टास्तस्य तावंतो वरीतव्या इत्यर्थः। तथा चाह आपस्तंबः। ऊर्ध्वज्ञुमासीनं होतारं वृणीते
ऽग्निर्देवो दैव्यो होता देवान्यक्षद्विद्वांश्चिकित्वा[hole]न्मनुष्वद्भरतवदमुवदमुवदिति यथार्षेयो
यजमानस्त्रीन्यथ ऋषिमंत्रतो वृणीतेऽपि यैः कं द्वौ त्रीन्पंच च चतुरो वृणीते न पंच्यातिवृणीतइति॥

दे॰भा॰त॰

९९

मानवोपि। अमुष्वन्मुष्यपुत्र्या-यजमानस्यार्षान्प्रवृणीत एकं द्वौ त्रीन्पंच चेति। पुरोहितार्षेयेण वा॥
राज्ञो यजमानस्य पुरोहितार्षेयेण वा पुरोहितस्य गुरोरार्षेयाणि वा वृणीते। स्वकीयानि वेति वा विक-
ल्पः॥ ॥क्षत्रियवैश्ययोरनियमं॥ ॥अभिषेकादिरहितस्य क्षत्रियस्य वैश्यस्य च नियमं पुरोहितार्षे-
यो धारणे नार्षेयं वृणीते। राज्ञस्तु विकल्पः॥ ॥मनुवदिति वा सर्वेषां॥ ॥अथवा सर्वेषां ब्राह्मणक्षत्रियवि-
शां मनुवदिति एतत्पदं सर्वदेवार्षेयस्थाने प्रयोज्यं। अभ्यासकरणाकरणाभावात्। आपस्तंबः। पुरोहितस्य
प्रवरेण राजा वृणीत इति। अपि वा नार्षेयं वृणीते मनुवदित्येव ब्रूयादिति मनुरपि। यश्च ब्राह्मणो यजेत पुरो-
हितस्य प्रवरेण प्रवृणीदिति॥ ॥ब्रह्मण्वदन्यत्र ब्राह्मणा अस्य यज्ञस्य प्राविता रोसौ मानुष इति हो-
तुर्नाम ग्रहणं॥ ॥आर्षेयो धारणानंतरं ब्रह्मण्वदित्यादिकं मंत्रशेषं ब्रूयात्। तदंते मानुषस्य
त्रासाविसस्य पदस्य स्थाने अमुकशर्मेति होतुर्नामग्रहणं कुर्यात्। असौ मानुष इत्यत्र दिमंमा-
नुषं होतारं प्रवृणीत इति श्रुतत्वात्॥ ॥उपांशु वा॥ ॥अथवा होतुर्नाम ग्रहणमुपांशु कु-
र्यादुच्चैर्वेति विकल्पः। अग्निरयं देवः न मानुषः। न श्रुतमात्रम चेतनं। दैव्यो देवैः पितुरस्तुतः।

या॰७

९९

९९ सीदंति हता होतुरुपांशुनामग्रहणाति मानुषस्य उच्चैरिसापस्तंबः अग्निर्देवस्सादेरयमर्थः। ९९

संभावितशक्तिः। होता साधुकृत्तमः। यईदृशो होता स देवान्यक्षत् यजतु आवक्षत् चेमं होतारं वृणत इत्यर्थः। ऋ१

य२ विद्वान् जानानः। यथा यत्र चर्पूर्वेभ्यो नादौ संभारेभ्य स्तत्कर्मे इत्यर्थः। कथं। चिकित्वान्। चेतनवान्
अपि स्मरणशीलः। साधुना अर्थमतः सन् मनुष्वत् मनोरिव यथा स्वायंभुवादेर्मनोर्यज्ञे ऽग्निना
देवाइष्टास्तथा ऽस्यापि यजमानस्य यज्ञे यजति इत्यर्थः। भरतवत् भरतो मानवो वर्षाधिपतिस्त
स्येव। वशिष्ठवद्यजमानस्य पुर्वे सोमं त्वदत्तस्येव। ब्रह्मा सर्वे बांपुर्व नस्तस्येव। अन्यवत् आ
वहतु च। यद्यपि चैवमग्निरेवात्र होता। तथापि ब्राह्मणा अस्य यज्ञस्य प्रकर्षेण विस्तारो रक्षितारः
ते ह्येनं तत्स्थानः प्रत्यक्षमुपलभ्यंते। अग्निस्तु आगमात्। सोपि च सत्ति ब्राह्मणशरीरे तद्देवाधि

त८ ष्ठायकत्वं करोति ■ नर्स्याधिना। ततश्चैवमंतव्यं। यदि तावदग्निर्होतातः किं मानुषैर्न॥ अथमा
नुषस्ततः किमग्निनेति तयोः संहत्य कारितारख्यापना याह ब्राह्मणा इति। संहत्य कारित्वेपि विशेषमा

मा१० ह। असौ देववदसोयत्रद्द सो वा अनुषो होता देवान्यजदा चव श्रादितिवर्तते। तमग्निं यज्ञंस्मयम

रूपे ११ पियथास्त क्ति आरंभमात्रेण यजति इत्यर्थः। एषतावत्तकाशे मंत्रार्थः॥ ॥संमृष्टाडपविशतः॥

चरणानंतरं होतादक्षायाध्वर्युमग्नीधं चांसयोः संमृशति। तौ चाध्वर्यमग्नीधौ होत्रा संमृष्टौ संतौ उप
विशतः। अथाध्वर्युं चाग्नीध्रं च संमृशतीति होतृकर्तृकं संमर्शनं श्रुतं॥ ॥अग्निर्होतेति स्रुगादाप
नं प्रयाजेषु सन्निधेः॥ ॥अग्निर्होतेत्येतत्स्रुगादापनं प्रयाजेषु भवति। स्रु[illegible] चाध्वर्युणादाप्ये
ते अनेन पठितेनेति स्रुगादापनं। प्रयाजेष्वेव भवति। कुतः। सन्निधेः। प्रयाजसन्निधौ स्रुगादापन
पाठात्। अत एवैकादशप्रयाजोत्कर्षे पुनरप्युच्चारणं। अन्वर्थसंज्ञा नाहत्वं प्राप्नोति तेन प्र
याजेष्वेति नियम्यते। समाख्यातः सन्निधेर्बलवत्वादिति॥ ॥घृतवतीमित्युक्ते स्रुचावादाया
तिक्रम्याश्राव्याथ समिधो यजेति॥ ॥तत्राघृतवतीमित्यस्मिन् पदे उक्ते ध्वर्युः स्रुचौ जुहूपभृतावा
दायातिक्रम्य वेदेरपरस्मादुत्तराद्धरि श्रोणि परेण [illegible] व्येन पादेन यत्र प्रतिदेशं गत्वाश्राव्य समिधो यजे
त्याह। एतस्यातिक्रमणमनुवाक्यापरिसंख्यानार्थमुच्यते। तत्कुतः। अथ यदपुरोनुवाक्याः प्रया
जा भवंतीति श्रुतेः। घृतवतीमध्वर्यो स्रुचमास्यस्वेत्युक्ते अध्वर्युप्रसौतीति श्रुतत्वात्। घृतवती
मित्युक्त इति सूत्रितं। आपस्तंबः। घृतवती शब्दे जुहूपभृतावादाय दक्षिणा स[illegible]तिक्रांतो परे

आघारसंभेदपंचप्रयाजान्यं चो यजति प्रतिदिशं वा समिधः पुरस्तात्तनूनपातं दक्षिणतः इडः पश्चा
मि२ द्बर्हिरुत्तरतः स्वाहाकारं मध्ये। सर्वान्वैकदेशमा आश्रावमाश्रावं प्रत्याश्राविते समिधो यजेति प्रथमं सं
प्रेष्यति यज यजेतीतरानिति। मानवे च। प्रवृत्ती अध्वर्युरित्युच्यमाने स्रुचावादाय दक्षिणाति
क्रमतीति। अत एवास्माभिर्द्विवतीमिसेतस्मिन्पदे ऽक्तेइति व्याख्यातं॥ ॥पंचप्रयाजान्॥
सकृदतिक्रांत एव पंचप्रयाजान्यजति। प्रयाजानिति संज्ञा आप्रयाजेभ्य इत्यादौ संव्यवहारा
र्था। स्व जवो ह्वै प्रयाजास्तस्मास्तस्मात्समं च भवंतीति श्रुतेः पंचेत्युक्तं। पंचग्रहणादेचैतानि कर्मा
णीति ज्ञायते॥ ॥समिद्धतमे॥ ॥एतान्पंचप्रयाजान् समिद्धतमे अतिशयेन समिद्धे वह्निप्र
देशे जुहुयात्। यत्रैव समिद्धतमं मन्येत तत■ दाजुहूर्जुहुयात्। समिद्धहोमेन ■■ होव संम नीत
द्धा आहुतय इति श्रुतेः। अत एवोक्तमापस्तंबेन। सर्वान्वैकमिध्मे इति। सर्वानपि प्रयाजानेकस्मि
न्नेवस्थाने जुहुयादित्यर्थः॥ ॥यजयजेति शेषं॥ ॥समिधो यजेति प्रथमे प्रयाजे ऽक्तं। शेषप्र
याजचतुष्कं प्रति यजयजेत्येव प्रैषो भवति। अयय यजयजेत्येवोत्तरानाहेति श्रुतत्वात्॥ ■■

९३ २ ध्रुवमित्यत्र॥ ॥ध्रुवः निश्चलः स्थिरः एकस्मिन्नेव स्थाने स्तंभ इव तिष्ठन्पंचप्रयाजान्यजति। तदा च ए
कस्मिन्समिद्धतमे एवाग्नेः प्रदेशे पंचापि जुहोति। तथा च श्रुतिः यत्रैव तिष्ठन्प्रयाजेभ्य आश्रावये स्था२
त्तत्रैव नापक्रामेदिति श्रुतेः। तापश्चिपक्रमणकारणे सत्यपि नापक्रामेदित्यर्थः। पक्षांतरमाह॥
पूर्वंपूर्वमभिक्रामं॥ ॥वा विकल्पे। अथवाभिक्रमम् अभिक्रम्याभिक्रम्याहवनीयसम्मुखंगम
नं वा पूर्वंपूर्वं ■■■■ प्राक्संस्थं पंचापि प्रयाजान्पृथक्पृथक्स्थाने जुहोति। तस्मा
दभितरमभितरामेदभितरामभितरामाहुतीर्जुहुयादिति श्रुतेः। तस्मात्प्रयाजाः पंचोत्कर्षादिति श्रु
तेश्च। तेन ■ ध्रुवपक्षे समिद्धतम एव पंचानामपि होमः। अभिक्रमणपक्षे च पूर्वंपूर्वमिति प्राक्सं
स्थं पंचानामित्यर्थः। सर्वयज्ञेषु होमः ईशानदिङ्मुखेन वेदेर्दक्षिणभागे अवस्थितेन च कर्तव्यः वषट्कारे होमः ४
ण सह वा वषट्कृते वेति। तदुक्तं। दक्षिणतः उदङ् जुह्वा वषट्कृते सह वेति। मनुः। जुहूपभृतोग्रेणाध्याऽऽज्ये
दक्षिणेन दक्षिणाऽतिक्रामति सव्येनोदङ् परिधीनां च व्यवहारं आसीनउत्तरतो जुहोति स्वाहाकारेण वतीर्वषट्कारः
तीर्दक्षिणतः प्राङ्मुखमध्वर्युस्तिष्ठन् आश्राव्य नचियष्टे दातो याहमं प्रतिवषट्कारं वषट्कृते जु

होत्तिमंद्रेणस्वरेणाज्यभागाभ्यांप्रचरंतिमध्यमेनानुयाजेष्वुत्तमेनाशंयोरित्ति॥ ॥उपभृतोजु

ह्वामानयसनवभृश्श्चतुर्थे॥ ॥उपभृतिगृहीतस्यमध्येर्धंाज्यस्यप्रयाजार्थत्वाच्चतुर्थप्रयाजे जं२

प्रसूपभृतःसकाशादर्धमाज्यंजुह्वामानयतिआसिंचति।ध्रुवंकुर्वन्।अनवभृश्शन्उपभृतोजुह्वा

स्पर्शमकुर्वन्।अथचतुर्थेप्रयाजेसमानयतिबर्हिषीति प्रवृत्तस्यवाअनवभृश्शन्समानयती

तिश्रुतेः।अत्राहापस्तंबः।त्रीणीष्टार्धमौपभृतस्यजुह्वामनीयप्रवृत्तसाकृम्यशेषेणध्रुवाम

भिघार्यानुपूर्वंहवींष्यभिघारयंत्युपभृतमंत्ततइति।कात्ये।त्रीणीष्टोपभृतस्यार्धंजुह्वामा

सिच्यतेनोत्तरानिष्ठाप्रयाजान्त्याभिघारयतिध्रुवाहवींष्युपभृतिशेषमिति॥ ॥एवंप्रवृत्तौ॥

प्रयाजप्रवृत्तावेवमेवसमानयनंकार्यं।एवमितिचतुर्थेचतुर्थेइत्यर्थः।तस्यैवश्रुतत्वात्।तथा

हि।वरुणप्रघासेषुचतुर्थेचतुर्थेप्रयाजेसमानयंतोनवभिःप्रयाजैश्चरंतइति॥ ॥पश्चादपि॥ मा

प्रयाजे चतुर्थेचतुर्थेसमानयमानोदशभिःप्रयाजैश्चरंतइति।तत्रश्चैवं।चतुर्थेसमानीय।च

तुर्थमारभ्यपुनश्चतुर्थेसप्तमेइत्यर्थः।पुनश्चसप्तममारभ्यचतुर्थेदशमेइत्यर्थः।एवमे

९४ वयाशिकावदंति। चतुर्थसप्तमदशमेषु समानयनमिति॥ ॥अनुयाजेषु च॥ ॥अनुयाजे
ष्वपि प्रयक्षौ एवं ज्ञेयं। चतुर्थे चतुर्थे समानयनं कार्यमित्यर्थः। तत्रापि श्रूयते। वरुणप्र■घासे
षु तावत्। चतुर्थे चतुर्थेनुयाजे समानयमानो नवभिरनुयाजैश्चरतइति। पश्वनुयाजेष्वपि च
तुर्थसप्तमदशमेषु समामानयनं शाखांतरात्॥ ॥उत्तरां स्रुचमध्युह्य प्राचीमवहृत्य जुहोति।
■■■■■■ स्रुचमुत्तरामेवोपरिमार्गेणे वप्राचीमवहृत्य उपभृदग्रेणावतार्य जुहोति
प्रथमं प्रयाजं। पुनरप्यध्युह्य तेनैव मार्गेणोपभृत्तउपरि निधाय पुनस्तथैवावहृत्य जुहोति
॥एवं प्रतिप्रयाजं॥ ॥नस्वद्देवतारितयासर्वामिति। अथातो होमस्यानुक्रं तदेवं क्रुशाला मन्य
मानाः प्राचीं स्रुचमुपावहृत्य जुहोप र्याहृत्य उपभृत्सु ध्यानिदध्यतीति प्रतिज्ञाय पार्श्वतउहैव
स्रुचमुपावहृत्य जुहोप र्याहृत्योपभृत्सु निदध्यतीति एकीयं पक्षमुपन्यस्य तत्तथा कुर्यादिति
निंदत्याह स्थमेव कुर्यात् प्राचीमेव स्रुचमुपावहृत्य जुहोत्यासनेनाधिहृत्योपभृत्सु निदध्यादि ९४
ति स्वपक्षस्थापनात्। तेनोपभृदग्रप्रदेशेनैव जुह्वा अवहरणाध्युहने कार्ये न पार्श्व मार्गेणेत्यासद्धं॥

अतएवोक्तं मनुना। स्रुचमुपभृतोग्रेणादध्यादुध्वरे चेदिति। आपस्तंबोपि। स्रुवतोभिहृतस्रुचमुपभृतउ
पावहरतीतिसर्वत्रैवम सामान्योपावहरणेभवतो च यसंज्ञिजयतीति॥ ॥एवं सर्वत्र॥ ॥
नकेवलंप्रयाजेषु। सर्वत्रसर्वहोमेष्वेवं ज्ञेयं। यतोहोममात्रंप्रक्रम्य श्रूयते। अथातोहोमस्येति। न
प्रयाजान्प्रक्रम्य। तस्मात्सर्वत्र जुह्वा अवधारणाध्युहूनेप्रतिहोमंभवत्येव। प्रयाजेष्वन्यत्र चेति
सिद्धं॥२॥नाभिदेशेधारणं॥ ॥अध्वर्युणा भिदेशे स्वनाभिसमीपे स्रुचोर्जुहूपभृतोर्धारणं
कुर्यात्। अथातोधारणस्येतिप्रक्रम्याथ हैष मध्यमः प्राणस्तस्माद्गतमुपन्यस्यैवैवधारये
दितिश्रुतत्वात्। वषट्कारांतहोमविधानादावषट्कारात्प्रतीक्षणीयं तत्रायं नियमेन स्रुचोर्धारणेप्रा
प्तेनियमोयंनाभिदेशेधारणमिति। प्रगृह्य बाहू स्रुचोर्धारणे त्वर्थवादत्वा[illegible]च्चसूत्रितं। एवं
मंत्र ब्राह्मणे तदुक्तस्थानकुर्यादित्येवं निषिद्धाः पक्षाः। सर्वेऽर्थवादा ज्ञेयाः॥ ॥प्रयाजानुमंत्रणे॥ ॥अ
भिधास्यतइतिशेषः। प्रयाजानांप्रत्येकमनुमंत्रणं अभिधास्यते। तदेवाह॥ ॥एकोममएकात
स्य योस्मान्द्वेष्टि यं च वयं द्विष्म इत्येवं मिथुनैर्यथासंख्यं॥ ॥[illegible]एको ममैकातस्य योस्मानि

सैवं मिथुनैः एवंप्रकारैर्यथासंख्यं मिथुनैः स्त्रीलिंगपुल्लिंगशब्दवद्भिर्मंत्रैः क्रमेण प्रयाजाना
नामनुमंत्रणं करोति। द्विमुखं भवति। यथा एकः एकैति मिथुनं प्रथममुक्तं। यथासंख्यं मि
थुनैरित्युक्तत्वादेवं शब्दाध्याहारो। द्वौ द्वि त्रयस्तिस्र श्चत्वार श्चतस्र इत्येतदुक्तं भवति। तथैव श्रूय
ते। तस्मात्प्रथमे प्रयाजे इदं इन्द्रियादेको ममैका तस्य यमंत्रं ध्वीत्ति यद्युनद्वि ब्वाध्यो स्मान्द्वेष्टि यं
च वयं द्विष्मः [illegible] स्म इति ब्रूयात् द्वौ मम इति द्वितीये प्रयाजे द्वे तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्मः [illegible] स्म
इति त्रयो मम इति तृतीये प्रयाजे तिस्रस्तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति चत्वारो मम इति
चतुर्थे प्रयाजे चतस्रस्तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति॥ ॥न तस्य किंचनेति पंचमे॥
पंचमे प्रयाजे पंचम मे तस्य नान्तरं न तस्य किंचन योऽस्मान्द्वेष्टि इति मंत्रेणानुमंत्रणं कुर्यात्।
पंच मम इति पंचमे प्रयाजे न तस्य किंचन योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति श्रुतत्वात्। एतच्चानु
त्र मंत्रणं यागानंतरं हविःप्रक्षेपे च कृते कर्तव्यं। याग्याश्च मंत्रवाणी कीभ्यः समिदादिदेवताभ्यः १५
कार्याः। प्रथमे इदं समिभ्यो न मम एको मम स्वाहा द्वितीये [illegible] इदं तनूनपात्तेन मम नराशंसा

यनममद्यौममद्यन्नमेति। तृतीयेइदमिभ्योनममत्रयोममेति। चतुर्थेइदंबर्हिर्भ्योनममचत्वारोममेस्वादि
। पंचमेइदमग्नयेसोमायाग्नयेग्नीषोमाभ्यामग्नीषोभ्यांदेवेभ्यआज्यपेभ्योनममपंचममेस्वादि। अमा
वास्यांतु। इदमग्नयेग्नीषोमाभ्यांमिंद्रायदेवेभ्यइतिसन्नयतः। अग्नयेप्रि प्सवरंद्राग्निभ्यांदेवेभ्य
इत्यसन्नयतइति॥ ॥त्रिषिमानपधितिमान्यशस्वीब्रह्मवर्चसीब्रह्मवर्चस्यन्नादइतिच।
चत्वारःपूर्वोक्तानुमंत्रणैःसहसमुच्चारणार्थः। यथासंख्यमिनुवर्त्तते। त्रिषिमाभिस्वादिभिः
पंचभिर्मंत्रैर्यथासंख्यंपंचप्रयाजानुनुमंत्रयते। प्रथमेनप्रथमंद्वितीयेनद्वितीयमेवंपंच मा
मादित्तियथासंख्यार्थः। संप्रथमंप्रयाजानुमंत्रयेत्। त्रिषिमान्भुयासमिस्वपाचितिमान्भुया
समित्तिद्वितीयंयशस्वीभुयासमित्तितृतीयंब्रह्मवर्चभुयासमिति चतुर्थमन्नादोभुयासमितिपं सीत
चमभिति श्रुसत्वात्। अत्रसाक्षंथवाभ्दुयासमित्तिपदमध्याहारः। त्रिषिमान्भुयासमित्येवं। सच
मंत्राणा श्रुतोपदिष्टतएव। सकलानोमाम्नानान्मंत्राणामादिमंत्रेणनिर्द्देशोघटतएव। यवर्द्धितना
मपिचमंत्राणांपायदेवक्रमः समुच्चयश्चाकरणात्। पुर्वस्मादनुमंत्रणादिदंभिद्यत्ते॥

पथग्विधानात्। प्रयोजनं सावकाशानं द्वयोः प्रयोगः। अनेकयजमानकेतु कर्तृत्वस्यादनुमंत्रमेकएवकरोति। ण॰
तत्र एकोममेसाधुत्वाभावः। आशीर्योगाभावात्। हविषिमामिसादोतु होभवति। आशीर्योगात्।
हविषमंतोभुयास्मेतिद्विर्यजमानके। हविषिमंतोभुयास्मेतिबहुयजमानके। एवंसर्वत्र। केचित्तुएको
ममेसादिष्वपिएक आनयोरेकोस्मा कामसेव मनेकयजमानकेयथार्थमुत्तमिच्छंति। एकएवचा
व नुमंत्रणंकरोति। अपरेत्वाहुः। अनुहैनैःसर्वैःप्रत्येकमनुमंत्रणं कार्यं तस्मिन्पक्षेहविषिमाभुयास्मि
त्यत्राप्युत्तभावः॥ ॥आगंतुनांचतुर्थपंचमाभ्यांस्थानात्॥ ॥चातुर्मास्येषुपशौचप्रयाजवद्वै
ग चतुर्थपंचमयोरंतरालेऔर्सवोद्धारादयोइज्यंते। तत्रानुमंत्रणंहोमस्थानाद्धर्मजातंप्रतिसंदे
हः। आगंतुनांकिमस्यकस्यचित्प्रयाजधर्मा?युत्तनियमइति। किंतावत्प्राप्तं। प्रयाजत्वस्यसामान्यस्या
विशेषाद्यस्यकस्यचिदितिप्राप्तआह। आगंतुनामिति। आगंतुनांप्रयाजानांचतुर्थपंचमाभ्यांप्रया
जाभ्यांस्थानाद्धर्माभवंति। यतएतत्स्थानात्क्रमादित्यर्थः। यतश्चतुर्थपंचमयोर्मध्येआगंत
वःपठ्यंते। अतश्चसन्निधानाच्चतुर्थपंचमयोरेवधर्माआगंतुषुभवंतीति। यतोधर्मापेक्षायांस

ग॰ र्वैत्तव्यत्तिक्रमेकारणंनास्ति॥ ॥प्रथमचतुर्थाभ्यांवायथालिंगं॥ ॥अथवायथालिंगंप्रथमच
तुर्थाभ्यांप्रथमाश्चतुर्थाश्चागंतुनांधर्मा भवंति।यथालिंगमिति योनेकदेवत्यस्तस्यप्रथमधर्माः
यश्चैकदेवत्यस्त[illegible]स्यचतुर्थधर्मा इति।तेनपंचमषष्ठाष्टमानांप्रथमस्यधर्माः।अनेकदेवत्यत्वा ध
त्।सप्तमनवमदशमानांचतुर्थस्यधर्माः।तेषामेकदेवतत्वात्।लिंगमेव।अत्रधर्माणांपर्युप
स्थापकं।ननुद्वितीयस्यैकदेवतत्वेनतृतीयस्यबहुदेवतत्वेनलिंगस्याविशिष्टत्वात्।द्वितीयतृती
याभ्यांसकाशाद्धर्मा आगंतुषुकुतोनभवंति।सत्यं।लिंगमविशिष्टं।परंतुप्रथमचतुर्थयोरन्य
दपिकारणमस्ति।एकत्रप्राथम्यमितरत्रानंतर्यं।अथसिद्धांतमाह॥ ॥सर्वांश्चोत्तमेनोपायित्वा
ना त्॥ ॥अथवासर्वागंतूनुत्तमेनोत्तमप्रयाजधर्मेणसंबध्नीयात् योजयेत्।कुतः।उपायित्वा[illegible]
दागंतुनां।यतस्तेपंचममुहूच्यागंतवउपयंतिउपगच्छंति।चतुर्थस्तुस्वस्थानएवभवति।पं
चमेपुनरननुष्ठितेआगच्छंतआगंतवस्तस्यस्थानेभवंति।तस्थानाअनंतर्मितातेषां।अतएत
स्यैवोत्तमस्याभ्यासेनविकृतिषुनवसंख्यैकादशसंख्याचश्रूयमाणा[illegible]प्रयाआनांपूरणीया।

स्या

१७

यतः पंचप्रयाजान्यजतीतियंपंचसंख्यां प्रयाजानामुक्तं तिः शिष्टा। नवप्रयाजान्यजेदेकादशप्रयाजा
न्यजतीतिइयंवैकृतीसंख्यापोसन्नशिष्टा। ऽस्तुतिशिष्टयाश्चपंचसंख्यायाऽसन्नशिष्टायावैका
दशासंख्ययाबाध्यायैगाद्वैकृतीसंख्याभ्यासेनैवपूरणीया। तत्राभ्यासेवश्यंकर्तव्येन्यायाहेच
मस्यैवाभ्यासः प्राप्नोति। यतः पूर्वेषामभ्यासेनयुज्यसेनस्थानेआगंतुनां योगाभावात्। तस्मात्

म

चैस्यैवाभ्यासस्तेनातदूर्मीत्वागंतुषु भवंतीतिसिद्धांतः। अतश्चद्वाःप्रभृतीनां पंचमस्थानेहोमः
पंचममंनस्यैद्यावधनुमंत्रपंअन्नादोभूयासमितिपंचसर्वेषांभवति। अभ्यासधर्मांश्चसाभ्यासः

आध्वर्यवंकु सेति

शो

पंचमआवर्तते। आध्वर्यंकुर्वंतिगदाधरकर्काचार्याः। विनिष्टस्येकेकस्यावृत्तिरित्तियाज्ञि
काः। अनुयजेषुसामर्थ्यमुषुअनुवंध्यासु चैवमेवद्रष्टव्यं। द्रव्याभावेचद्रव्यमप्युत्पादनीयं।
अन्नयेप्यपिशातपथेअविशेषेणश्रुतं अथतनूनपातंयजतीति। परंतुशाखांतरेविशेषेणश्रूय
ते। राजन्यात्रिबाध्येश्चवसि वशिष्ठशुनका [illegible] नांकण्वकश्यपसंकृतीनांनराशंसोद्वितीयः
प्रयाजस्तनूनपादन्येषामिति। एवंमानवेप्पि। तत्राविशेषस्याविशेषविषयत्वमेवन्याय्यं॥ ॥७॥

१७

तेनैवं व्यवस्था। राजन्यवसिष्ठादीनां नराशंसो द्वितीयः प्रयाजः। अन्येषां तनूनपादेव। वसिष्ठेष्वपि
गोत्रं येषां ते वसिष्ठाद्यवः शुलिके प्यदाहुः। अन्ये तु वसिष्ठादि प्रवरवन्तो वासिष्ठा इति। यत्तु काश्यप काश्यपस्य गोत्रं
स्य यप्रवरवन्तश्च तेषां नाथ्येतिः संदिग्धं नराशंस एव भवति॥ ॥ एवमुक्ताभिघारणं ध्रुवायाह
विषश्चोपभृतश्च॥ ॥ पंचप्रयाजहोमानंतरं यजमानस्थानादध्यवेदेः पश्चादागत्योपविश्य जुहूव
ष्टा, रणमुक्तवात्र्यैवमेव प्रयाजशेषेण ध्रुवाइति ध्रौवाज्यस्याह विषश्याज्यस्थाल्याज्यस्य पुरोडा
शयोश्च। उपभृतश्चेत्युपभृतः स्थस्याज्यस्याध्वर्युरभिघारणं करोति उपयोगक्रमेण। स यजु
ष्कामाज्यं परिशिष्टमासाध्येनयज्ञे समस्थापयंस्तेनैव यथापूर्वं हवींषि [illegible] ष्यभ्य
व. घारयन्निति प्रैष तस्मादुत्तमं प्रयाजमिष्ट्वा यथापूर्वं हवींष्यभिघारयति पुनरेवैतानि तर्प
प्याययत्यातयामानि करोतीति श्रुतेः। अयं चाहविः संस्कारो न प्रयाजशेषप्रतिपत्तिः। कुतः।
श्रुतिगानयहवीं प्रीतिद्वितीयया हविषः संस्कार्यत्वावगमात्। शेषे च तृतीया श्रूयते। तेनैव य वाक्ये
थापूर्वमिति। सांख्यायनेऽपि। प्रयाजशेषेण हवींष्यभिघारयतीत्येवमेव श्रूयते अतो हविःसंस्कार एव।

दे॰ भा॰ तः

१८

पुनरेवैतानि तदा प्याय स्रया तया मा निक्रमेती ति वाक्यशेषा च्च। अंभा सन्निधिताः निस
र्गाणि हवींषि विशेषेणाभिघारणीयानि। शेषविनाशे चाध्वर्युमात्रमुत्साध्येनाभिघारणीया
नि। प्रयाजशेषप्रतिपत्तिरेवेयमिति कर्काचार्याः। मीमांसकाश्च॥ ॥ आज्यभागाभ्यां चर
स्याग्नेयेन सौम्येन॥ ॥ आज्यभागाविति समयोः संज्ञा संव्यवहारार्था। ताभ्यामाज्यभागा
भ्यां चरतीति तावदुक्तोऽर्थः। किं देवतौ ताव्याज्यभागाविति आकांक्षायामाह। एकेनाग्नेयेन
अपरेण सौम्येन। अग्निर्देवता यस्य स आग्नेयः। अग्नेर्ढक्। सोमो देवता यस्य सौ सोम्यः। सो
माट्ट्यण्। आग्नेयं द्रव्यं यस्मिन्नाज्यभागे स आग्नेयः। एवं सौम्येऽपि॥ ॥ चतुरवत्तं स
वषट्कारासु॥ ॥ सवषट्कारास्वाहुतिषु चतुरवत्तं होतव्यं। तद्धि चतुरवत्तं भवति दक्षिणाऽ
नुवाक्या याज्यायाथ वषट्कारोऽर्थ सा देवता चतुर्थोनिस्येदेवतायै हविर्भवति। तादिना सवष
ट्काराहुतिषु चतुरवत्तश्रवणात्॥ ॥ अभिघार्यावदायावदाय ध्रुवामभिघारयत्याप्याय १८
तामिति॥ ॥ स्रुचावभिघार्य पहस्त ध्रुवयोरेवतयोर्जुह्वां ध्रुवातआज्यमवदायावदाय आ

प्यायतामित्ति मंत्रेणस्थालीतो ध्रुवामाप्यायत्तियदवत्तंतत्पुरयत्ति। आज्यभागा विति अन्वर्थ संज्ञयैवा
ज्यद्रव्यकत्वमवगतं। तच्चाज्यंध्रुवायाएवावदेयं। आहवनीयेयजत्तयोध्रुवायाइत्तिपरिभाषायामुक्त
त्वात्। तेनप्रसवदानमनेनसु त्रेणध्रुवायाआप्या यनंविधीयत्ते। तत्रावदायावदायेत्तिवी
प्साप्रत्तिस्रुवमाप्यायनविधानार्था। अन्यथा चतुरवदायैतेसव दाप्या यनंप्राप्नोत्ति। तच्चनो
पपद्यतेमुलक्षयात्। तत्पुरस्तादाज्यभागावग्नीषोमाभ्यांयजत्ती साज्यभागयोर्यजत्तिचोत्ति
ष्ठऔमावषट्कारप्रदानाया प्यापुरोनुवाक्यर्वेतोयज त्तयइत्युक्तत्वात्पा ज्योनुवाक्यावत्ते। तांचानु
वाक्यांयाज्यांचप्रेषितत्पयहोतापठत्ति। संप्रेषितोन्वाहत्तथायजत्तीत्तिशांखायनोक्तेः। अत्तश्चानु
वाक्यापठनार्थमग्नयेनुब्रुहीत्येवंप्रैषः कर्तव्यः। अनुवाच्यप्रैषोयथादेवत्तममुष्माअनुब्रुहीत्ति
परिभाषितत्वात्। आश्रावणानंतरंच्याग्निंयजेति। एवंप्रैषकार्यः। देते युक्तमाश्राव्यप्रैषेच्या
ग्निंयजेत्ति। अनुवाक्याप्रैष श्रावदौलादियः। वरुणप्रघासेऽनवदानात्पुर्वमेवदर्शनात्। अथा
ध्वर्युरेवाग्नयेनुब्रुहीत्येयमाज्यभागंताऽभावेवचतुराज्यस्यावदायात्तिक्रमयत्ति क्रम्या

ततोवषानं

आश्राव्याहाग्निंयजेतिसाऽभावेववषट्कृतेऽनुकृतइति। एवंसर्वयागेष्वपिज्ञेयं। अतश्चसर्वयागेष्वयं
क्रमः। पूर्वमनुवाचनं। ततोतिक्रम्याश्राव्ययाज्यार्थःप्रैषइति। यत्तुवाजिनपशुयागेच अवदा
नोत्तरकालमनुवाचनंतद्वचनात्। पशुपुरोडाशयागेवपायागेश्वावभृथेवारुणयागेच
सवनीययागेचवचनाद्धविर्हानुवाचनं। अवभृथस्विष्टकृद्यागेचयज्ञांपुरोडाशसोषम
वदधत्तोनुवाचनंतदपिवचनादेव। अन्यत्रयजतिमात्रेपूर्वमेवानुवचनमिति। अत्राह
परस्तवः। आग्नेयसौम्यआज्यहविषाचाज्यभागौचतुर्गृहीताभ्यां। जमदग्नीनांतुपंचा
वत्तं। अथजामदग्न्योजामदग्नयमामंत्र्यपंचावत्तंब्रुवीतसर्वत्रावधन्नमुष्माअनुब्रू
हीतिपुरोनुवाक्यांसंप्रेष्यसेवदायाबदायस्त्रुवेणप्रस्तरबर्हिःसमज्यजुहूपभृतावादायदं
क्षिणातिक्रम्याश्राव्यप्रत्याश्राविताममुंयजेतियाज्यामितिसार्वत्रिकमिति। मानवेच॥
अत्राक्रम्याभिघारयतिध्रुवांदक्षिणंपुरोडाशंपुनर्ध्रुवामुपांशुयागोत्तरंपुरोडाशंसा
यंदोहंप्रातर्दोहमुपभृतमेततःस्त्रुवेणावद्यतिचतुःपंचकृत्वोजामदग्न्यस्यैषः ■ न्यं

-यावत्तं जामदग्न्य मार्ष्टं र्यकुर्वीता ज्यभागो यजतीति॥ ॥अनुब्रुहीत्युक्तो नाप[illegible] हरेद्धोताऽऽ-
याश्रावणात्॥ ॥अनुब्रुहीत्युक्तोऽध्वर्युरा-श्रावणादाश्रावणं यावत् तावन्नापव्याहरेत्। ए
तस्मात्प्रैषादपेतं अतिरिक्तं किमपि नापव्याहरेन्नो श्चारयेत् न केवलमध्वर्युः। होता च
होताऽप्याश्रावणं याव-न्नापव्याहरेत्। अनुवाक्या अतिरिक्तं किमपि न ब्रुयात्। सोऽनु
ब्रुहीत्येवोक्तोऽध्वर्युर्नापव्याहरन्नोपवत्ता होताव्याहरेदिति श्रुतत्वात्॥ ॥ आश्राविते
ग्नीदाप्रत्याश्रावणात्॥ ॥आश्रावितेत्सस्यग्नी नापव्याहरेदाप्रत्याश्रावणात्प्रत्याश्राव
णं यावत्। अस्तु श्रौषडित्येतस्मादन्यान्किमपि न वदेदित्यर्थः। सोग्नी नापव्याहरेदाप्र
त्याश्रावणादिति श्रुतेः। अस्तु श्रौषडित्यस्य प्रत्याश्रावण संज्ञा। प्रत्याश्रावयत्यग्नीदिति
वचनात्॥ ॥प्रत्याश्राविते ध्वर्युराहोतुः प्रैषात्॥ ॥अग्नीधा अस्तु श्रौषडित्येवं प्रत्याश्रा
वितेऽसत्यध्वर्युराहोतुः प्रैषान्नापव्याहरेत्। यजेत्ययं होतुः प्रैषः। तेभ्योऽतिरिक्तं किमपि न व्याह
रेदित्यर्थः। सोऽध्वर्युर्नापव्याहरेदा यजतिवक्तोरिति श्रुतेः। वक्तोर्वदनादित्यर्थः॥ ॥ तावत

वषट्कारात्॥ ॥यजेति प्रैषश्रवणानंतरं होता आवषट्कारान्नापव्याहरेत्। याज्यावषट्कारव्यति
रिक्तं किमपि न वदेदित्यर्थः। स होता नापव्याहरेदावषट्कारादिति श्रुतत्वात्। अत्रापस्तंबः। अनप
व्याहरंतः प्रचरंत्या आवषट्कारान्यदा श्रावणं ब्रूयादाश्रावितेनान्यदाग्नीध्रः प्रत्याश्रावणात् प्रत्या
श्रावितेनान्यदध्वर्युर्यजेति वचनाद्यजेसुक्ते होतान्यद्वषट्काराद्यन्यन्न ब्रूयात्पुनरेवा आवषट्का
हुतिर्वा यजेदिति। प्रसंगादाह॥ ॥सोमे चमसहोमे गृहीते पाकरणात्॥ ॥सामे सोमयागे ज्योतिष्टो
■ मे ग्रहं गृहीत्वा आत्तस्य स्तवनाभ्यां सहैव स्तुत्यस्तोत्रोपाकरणान्नापव्याहरेत्। उपावर्तध्वमि
त्ययं स्तोत्रप्रैष उपाकरणशब्देनोच्यते। तद्व्यतिरिक्तं किमपि न व्याहरेदित्यर्थः। नहि निर्दिष्टेऽथ सौम्ये
ऽध्वरे सर्वे ग्रहं गृहीत्वाध्वर्यु नापव्याहरेदोपाकरणादुपावर्तध्वमित्येवाध्वर्युलक्षणात् ■■ ज्योत्र
गृहं संप्रपद्यतीति॥ ॥उपाकृते उद्गातार आहोतुः प्रैषात्॥ ॥उपाकृतेऽध्वर्युणा उपावर्तध्वमित्ये
वं स्तोत्रोपाकरणे कृते उद्गातारो नापव्याहरेयुः। स्तोत्रव्यतिरिक्तं किमपि नोच्चारयेयुः। आहोतुः प्रैषात्।
◦ष प्रत्ययं प्रस्तोतः प्रस्तोतः होतुः प्रैषः तत्पर्यंतमित्यर्थः। प्रस्तोतापि सर्वेषु स्तोत्रेषु उत्तमायाः ऋचः प्रस्ता

ता॰१ वादनंतरं शस्त्रकर्तारं प्रेष्यति। एषोत्तमेति। ततऊर्ध्वं नापव्याहरेयुरोत्तमायाएषोत्तमेयवो होतारो है
त्रैयक्षं संप्रयच्छतीति॥ ॥होतावषट्कारात्। होता आवषट्कारा आपव्याहरेत्। शास्त्रव्यतिरिक्तं ब्रू
मपि न व्याहरेदित्यर्थः। सहोता नापव्याहरेदावषट्कारादिति श्रुतेः। होतृग्रहणमन्येषामपि शास्त्रकर्तॄणा
मुपलक्षणार्थं। तेन प्रशास्त्रादयोपि एषोत्तमेति प्रैषश्रुत्वा नापव्याहरेयुरावषट्कारात्॥ ॥आयेयमुत्तर
पुर्वार्द्धे॥ ॥आग्नेयमाज्यभागमाहवनीयस्योत्तरपुर्वार्द्धे ईशानभागे जुहोति। उत्तरार्द्धे पुर्वार्द्धे हैक आग्ने
यमाज्यभागं जुह्वतीति श्रुतेः॥ ॥दक्षिणपुर्वार्द्धे सौम्यं॥ ॥सौम्यं सोमदेवसमाज्यभागं दक्षिणपुर्वा
र्द्धे आहवनीयस्याग्नेयभागे जुहोति। दक्षिणार्द्धे पुर्वार्द्धे सौम्यमाज्यभागमिति श्रुतेः॥ ॥समिद्धतमे
वा॥ ॥अथवोभावप्याज्यभागौ समिद्धतमेऽग्निप्रदेशे येन समिद्धे प्रदीप्ते ज्वालावत्याहवनीयप्रदेशे
जुहुयात्। यत्रैव समिद्धतमं मन्येत तदाहुती जुहुयादिति श्रुतेः। सम्यगिद्धो दीप्तः समिद्धः अतिशये
न समिद्धः समिद्धतम इति॥ ॥हविर्भ्यां च॥ चरतीति शेषः। चकारेण समिद्धतमे देशे सदनुवर्त्य
ते। हविर्भ्यां च समिद्धतम एव प्रदेशे प्रचरति। यत्रैव समिद्धतमं मन्येत तदाहुती जुहुयात् समिद्ध र॰

होमलेबसमृद्धा आहुतयस्ति भुते:॥ ॥पुरोडाशवंतरेणाग्नीषोमाउपांशुयाज्यस्य॥ ॥पुरोडाशवंतरेण
पुरोडाशसाध्ययोर्यागयोरंतराले मध्ये आज्यस्य द्रव्यस्योपांशु अग्नीषोमीययजति। अंतरेणेत्ययं निपातो मध्या
र्थः। तथोगोग्य। अंतरांतरेण युक्तइस्तेनेनपुरोडाशाविपपदवि भक्तिर्द्वितीया। तत्र आयं क्रमः पूर्व
माग्नेय आज्यभागो ध्रुवात श्चतुर्गृहीतेन। तत एव सौम्य आज्यभागोपि। तत आग्नेयेपुरोडाशे
नयागः। तत्राग्नये नुब्रुहीत्यनुवाचनं। ततो जुह्वां यां ध्रुवायाः स्रुवेण ज्यं गृहीत्वोपस्तारः। आज्य
आज्यस्थाल्याः सकाशपदु नाया अभिघारणं। ततः पुरोडाशमध्यादंगुष्ठपर्वमात्रं तिरश्चीनमवदानं गृह्णीयात्। द्विती
यं पूर्वार्धात्। पंचावत्तिनस्तृतीयं पश्चार्धात्। ततो ध्रौवेणोपर्यभिघारः। पुनर्ध्रुवाया आप्यायनं। आज्यस्थाल्ये
नावत्तस्य हविषो वदानयोः प्रत्यभिघारः। अग्नि क्रम्या श्राव्याग्नियजेत्युक्त्वा वषट्कृते सकृद्वा स्रुक्स्था सर्वेन होमः।
■ तत आज्यभागवद्धुतानः यतः पंचवत्तो वा वदायोपांशुयागः। तत आग्नेययागवद्वितीयेन पुरोडाशे
नाग्नीषोमीययागस्ततः स्विष्टकृदिति। तदाहापस्तंबः। स्रुचा वा दत्तेनानिदध्यात् स्विष्टकृत आज्यभागा
नंतरेणेतरा आहुतीर्जुहोति प्रसा क्रम्य जुह्वामुपस्तीर्य ■ मपरेरिसाग्नेयस्य पुरोडाशस्य मध्यादंगुष्ठप

वैमव ▪ दानं सिर्व्यीनमवद्यति पूर्वार्धाद्द्वितीयमनूचीनं चतुरवत्तिनः पञ्चावत्तं तृतीयं पञ्चावत्तिनोऽसं

मंगुलिभ्यां बा २ भिंदन्मांसहृक्ताभ्यामंगुष्ठाभ्यामंगुष्ठेन च पुरोडाशस्यावद्यति स्रुवेणाज्यसांनाय्ययोरिति। तथावदाना

न्यभिघार्य हविः प्रत्यभिघार्याग्नयेनुब्रूह्यग्निं यजेति संप्रेषाविति। तथायदानीतार्धिले ▪ लायतीवाग्नि

रथाकुत्तीर्ल्हेति आज्यहविरुपांशुयागः पौर्णमास्यमेव भवतीवैष्णवोग्नीषोमीयप्राजापत्यो वा प्रधान

मेवोपांशुधि ध्रुवाभुष न्यजत्यग्नीषोमौ आज्यस्य वा नाग्नेयडत्तरैर्हविर्भिर्यथादेवतं प्रचरति समव

दोहाभ्यां दधो वदाय ६ दार्यै स्तस्यावद्यसेसं दाधिपरीतं सर्वाणि द्व्याभिडदग्स्रुखेन जुहोतीति। मानवे ऽपस्तीर्य दक्षिण

स्यामध्यात्संहृताभ्यामंगुलिभ्यामंगुष्ठेन चांगुष्ठपर्वमात्रा ▪ ण्यवदानान्यवद्यति मध्यात्पूर्वार्धा

द्द्वितीयं पश्चार्धात्तृतीयं यदि पंचावदानः स्यादवत्तमभिघार्य पुरोडाशं प्रत्यभिघारयति अग्नये

नुब्रूहीत्यनुवाचयत्याश्राव्याहाग्निं यजेति प्रेष्यति अंतराज्यभागावाहुती प्रागुदीचीरपायात्त

पतिः श्रौवस्यावद्योपांशुयागात्वग्नीषोमीयोपौर्णमास्यां वैष्णवममावास्यायामुपांशुदेवतेति

द्विरुत्सेव मुत्तरस्यावदाय यथादेवतं प्रचरति सन्नयत्तऽपस्तीर्य यथावदानं समवद्यति पुरोडाश२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२ वा स्पष्टोयं ▪ यो श्रद्धयानुब्रुवीत तमनुवाचयन्ति महेन्द्रायेति यौ सान्नाय्य चरुपुरोडाशानां पार्श्वेन जुहुयादप्ता
णां प्रस्रवणे व्याख्यातप्रवरणमिति ॥ ८ ॥ विष्णुर्वामावास्यायां द्वे आम्नानात् ॥ ॥ अमावास्यायां
विष्णुर्वा उपांशुयागस्य । आज्ययागस्य देवता भवति । अग्नीषोमावेति । कुतः । द्वे आम्नानात् । एवं द्वौ हि
▪ त्रे आम्नायते । वैष्णवं अग्नीषोमीयं विष्णुर्वषट्कृते विष्णवाश्यदृति याज्यापुरोनुवाक्ये इति । व्यवस्थितोयं
प्रपञ्चः । सन्नयतो अग्नीषोमौ असन्नयतोपि विष्णुरिति । द्वौ स्वल्पादेव । तथा च शाङ्खायनः । ऽपभ
यत्राग्नेयः पुरोडाशोग्नीषोमीय उपांशुयागो वैष्णवो वाग्नीषोमीयश्च पुरोडाशः पौर्णमासे
हविषि रैन्द्राग्नो सन्नयतो द्वितीयोमावास्यायामैन्द्रं सान्नाय्यं सन्नयतो माहेन्द्रं वा वैष्णवं वा सन्न
यन्नुपांशुयागमिति । अमावास्यायामसन्नुवर्तति । तु अत्र द्वौ व्यवस्थितविकल्पार्थः । तेनामावा
स्यायां सान्नाय्ययाजिनो अग्नीषोमौ विज्यते । असान्नाय्ययाजिनो विष्णुरिति । आश्वलायनो
पि । आवाहने । अग्न आवह इति तु प्रथमं देवतामग्निं सोममग्नि ▪ साज्यभागावग्नीमग्नीषोमा
विति पौर्णमास्यामग्नीषोमयोः स्थाने इन्द्राग्नी अमावास्यायामसंनयत इन्द्रं महेन्द्रं वा सन्नयतोत २२

रेणहविषी विष्णुमुपांशु चैतरत्र वित्याग्नीषोमीयं पौर्णमास्यां वै अवयमावास्यायामैंद्रं चैवेति। तथा ऽपांशु कै। नैश

स्तुयागधर्माः शांखायनेनोक्ताः। प्रणवो ये यजामहे वषट्कारः संप्रैषाश्चोच्चैरुपांशु हविः श्रुदेवतानामधे

यं चोपांश्विति। तत्र ऽपांशुयागं कुर्वीत। के नैक इति श्रुतेरुपांशुयागस्य विकल्पः। अतएवाश्वला

थ२ यनेनोक्तं। नैके कुर्वन्ति। शांखायनब्राह्मणे च विशेषः। अयं यदमावास्यायामिंद्राग्नी यजति प्रतिष्ठि

तैव। इन्द्राग्नी प्रतिष्ठितादैवाथ सन्नयन्नमावास्यायामिंद्रं यजति तद्वज्योतिर्वा अमावास्या न ह्यत्र

चंद्रो न दृश्यते। अथ यदसन्नयत्पुरोडाशावंतरेणोपांश्वाज्यस्य यजत्यजामिताया अथ यत्सन्नयंत्सा

न्नायस्यांतरेणोपांश्वाज्यस्य यजति तिलस्योक्तं ब्राह्मणमिति। मानवे। ध्रौवाज्यस्याज्यस्यावद्योपांशुयाग

मग्नीषोमीयं पौर्णमास्यां वै अवममावास्यायामिति। अतोमावास्यामप्युपांशुयागो भवति॥ ॥याव

द्धविरुत्तरार्धात् स्विष्टकृतः॥ ॥यावद्धविरितियावंति हवींषि भवंति तेषां सर्वेषां उत्तरार्धादुत्तरस्मात्प्रदेशात्

स्विष्टकृतः स्विष्टकृद्यागार्थमवद्यति। तस्माद्यस्यैकस्यै देवतायै हविर्गृह्णाति सर्वत्रैव स्विष्टकृद्भागमु

नृइति श्रुतेः। स सर्वेषामेव हविषामध्वर्युः सकृत् सकृदवद्यतीति विकल्पतावन्नुवादाच्च। तत्र जमदग्नी

नांढ्यवदाने। इतरेषां तेषां एकमेव। एकप्रसवायएं स्विष्टकृत्तः उपरिभावितत्वात्। स्विष्टकृतोवदानमेकप्र
सवायं प्रधानयागावदानसंख्यातएकैवन्तुनं भवति। तेन यस्य प्रधानयागे त्रीण्यवदाना। नितस्य
स्विष्टकृति द्वे। यस्य प्रधानयागे द्वे अवदाने तस्यैकमिति। अभिघारणं चोपरिष्टाद्विर्भवति। द्विरभ्या
भिघारणमित्युक्तत्वात्। अत्र सर्वेषां हविषामुत्तरार्द्धादवदाय सकृदेवैकं प्रदानं कर्तव्यं। न द्रव्यभेदे
गुणयोगादिति वाच्यम् इति सूत्रात्। द्रव्यस्य पुरोडाशसान्नाय्यादिभेदेपि देवतायां समानायाम
वदानं प्रदानं तं भवति। किंतु सर्वेषां सकृदेवैकत्रावदाय सकृदेव यागोनुष्ठेय इत्यस्य सूत्रस्यार्थः॥
प्रतिपसर्थकर्मचेतत्। हविषामुत्तरार्द्धात् प्रतिपाद्यते यागश्च क्रियत इति। अतएव यावदुक्तेपि स्विष्ट
कृद्भागो भवति ■■■■■■■■ ॥ ॥ नत एव होमः॥ ॥ तत इदमस्मेरुत्तरार्द्धात् स्विष्टकृदवदाना
नां होमो भवति। सकृदुत्तरार्द्धादवद्यति सकृदेव जुहोतीति श्रुतेः। शेषाः हविष्टकृते समवद्यति इत्युक्तत्वाच्च
वद्धविरिति उक्तत्वाच्चोपांशु यागशेषाद्ध्रौवाद्यपि स्विष्टकृदवदानेप्रसंगः॥ ॥ नाज्याद् शेषात्॥ ॥
आज्यात् ध्रौवाज्यात् स्विष्टकृतो नावद्यति। कुतः। अशेषात्। न ह्याज्यं शेषरूपमस्ति। शेषस्य कृतार्थस्य प्रति

१ नह्येतदुपांशुयागस्य शेषः। सर्वार्थत्वात्। तथाहि। स्तणमभिघारयन्नाज्यस्य यजनं ध्रुवायां गृह्णातीति। अपराव्याख्या॥
११ आज्यात् स्विष्टकृतो नावद्येत्। कुतः। अशेषात्। ११

चा१ प्रसपेक्षस्यास्थितस्यप्रतिपत्त्यर्था निशेषकार्याणि। न्यैयाज्यमेवविधिविधिमस्ति। नह्युपांशुयागार्थं पूर्वं

पू२ पथक् प्रकल्पितमस्ति। यस्य शेषो भवति। अतः साधारणादेव ध्रौवाद्धयनेनोपांशु [illegible] यागार्थं गृह्यते

।यत्तावद्ध्रुवायामुपांशुयागार्थं गृहीतेयस्मिष्टमाज्यंतत्प्रभ्यादान्युपस्तरणाभिर [illegible] णाद्युपयोगी सकृ

तार्थं न प्रतिपत्त्यर्हं ।। सर्वेतिचतेनाभिः शेषेण सम्मिष्टय [illegible] जुहुयादिति। अतः शेषः कार्यं। यज्जुह्वां चतु

र्गृहीतं तन्निःशेषं हुतमितिमिति। शेषाभावादेवतत्संबंधिकार्यस्याभावः।। ।। असंसृष्टमाहुति

भिः।। ।।स्विष्टकृदाहुतिं जुहुयादिति शेषः। स्विष्टकृदाहुतिमितराभिराज्यभागप्रधानाहुतिभिः सहासं

सृष्टां जुहुयात्। सर्वा अभ्यर्द्धस्वेतराभ्य आहुतिभ्यो जुहोतीति श्रुतेः। अर्द्धः पृथगस्य दृष्टस्सर्थः। अत्रा भ्य०

पस्ती० हापस्तंबः। जुह्वामुपस्तीर्य सर्वेषां हविषामुत्तरार्द्धात्सकृत्सकृत् स्विष्टकृते वद्यति द्विः पंचावत्तिनोदेव

तस्मौ स्विष्टकृतो ऽन्यत्त [illegible] द्धानुरणिभामुत्तरमुत्तरं अभ्यवोद्धिरभिघार्यनहविः प्रत्यभिघारयत्यग्न

ये स्विष्टकृतेनुब्रूह्यग्निं स्विष्टकृतं यजेति संप्रैषादुत्तरार्द्धपूर्वार्द्धे जुहोति असंसक्ताभिराहुति

भिरिति। एवमेव मानवेपि।। ।। निधाय [illegible] संरंचे मभ्युदध्यप्राशित्रमवद्यति यवमात्रं पिप्पल

दृसुतायां च तृतीयसवनसंबंधिसवनीयपुरोडाशस्विष्टकृदनंतरं संचराभ्युक्षणं। दे

२८७ मात्रं वा॥ ॥स्विष्टकृद्धोमानंतरमपस्य श्यस्त्रुचौ निधाय स्वस्थाने सादयित्वा ततः संचरहोमार्थं गमनागमनमार्गमद्भिरभ्युक्ष्य प्राशित्रहरणे प्राशित्रमध्वर्युर्द्धिरवद्यति। तच्च पुरोडाशस्य मध्यादेव मात्रं यवप्रमाणं पिप्पलमात्रं वा पिप्पलफलप्रमाणं वावद्यति। परिधीनपरेण संचरोहोष्यतः स यं संचरः। तस्याभ्युक्षणमनुयाजार्थं यतः स्विष्टकृतः परमग्नेन संचरेणानुयाजार्थमेव। अ

ज तः करिष्यमाणप्रयोजनत्वादनुयाजार्थत्वेनयुक्तं। अतोनुयाजाभावे आत्तथ्योपसदय स्याग्न्हमेधीयादौ संचराभ्युक्षणं न भवति। पञ्चौ अंगस्विष्टकृदनंतरं संचराभ्युक्षणं प्राशित्रं ब्रह्मणो भागस्तत् द्विरवद्यति। स आज्यस्योपस्तीर्य द्विर्हविषो वदायाथोपरिष्टादाज्यस्याभिघारयतीति श्रुतेः॥ ॥अन्यतरत आज्यं॥ ॥तस्य पुर्वोक्तप्राशित्रस्यान्यतरत आज्यं भवति। उपस्तरणाभिघारयत्विवेति। स यत्प्राशित्रमवद्यतीति प्राशित्रं प्रकृत्यान्यतरत आज्यं कुर्यादधस्ताद्वोपरिष्टाद्वेति श्रुतेः॥ ॥उभयतो वा॥ ॥अथवा प्राशित्रावदाने उभयत आज्यं अवद्यति। उभयत उपस्ता २४ रेभिघारे च। एवमपि श्रुतत्वात्। स आज्यस्योपस्तीर्य द्विर्हविषोपरिष्टादाज्यस्याभिघारयतीति॥ २८

वदायाथो १

अ ३ ग्नेयादेवावद्येत्। न्यायत्वात्। निःशेषेण प्राशित्रभागानां ३

॥ ॥आग्नेयात्॥ ॥आग्नेयात्पुरोडाशात्प्राशित्रमवद्यति। आग्नेयात्सकलं विभज्य द्विधाकृते
अवद्येत्तिलयवमात्रं पिप्पलमात्रं वेति श्रुतत्वात्॥ ॥भागांश्च॥ ॥भागांश्चषड्वत्तं ब्रह्मभागयजमा
नभागानांमवदानश्रवणान्मुख्यत्वादाग्नेयाद्भागांश्चेत्युक्तं। प्राशित्रेण समानं पूर्वपक्षत्वाद्भागा
नामत्र कीर्तनमात्रं। भागानामवदानक्रममुपरिष्टाद्वक्ष्यति। अयं च पूर्वपक्षः। प्राशित्रभागानां
यदाग्नेयादवदानविधानं। सिद्धांतस्त्वग्रे भविष्यत्सु भौवाविशेषादिति सिद्धं ता[illegible]वदस्य समास स्पृष्टे ५
मेवाधिकरणं। अंतरा अन्यत्कर्मोच्यते। [illegible] एवं कृतः। तत्पूर्वपक्षस्य चतुर्द्धाकरणसिद्धांतस्य च स
मानन्यायत्वादिति॥ ॥अध्वर्युः संचरेण ब्रह्मणे प्रदाय पूर्वेणैके पडुपस्पृश्येडां पंचावत्तां दक्षि
णतो मध्याद्यथावद्धविः स्विष्टकृदादाज्यं॥ ॥प्राशित्रं पूर्वमवत्तं तदध्वर्युः संचरेण परि
धीन परेण ब्रह्मणे प्रदाय समर्प्य एके शाखिनः आहवनीयं पूर्वेणापि प्राशित्रं ब्रह्मणे समर्पयंति
ततः प्राशित्रसमर्पणानंतरं अध्वर्युरपउपस्पृश्य पंचावत्तामिडा[illegible]म[illegible] वद्यति। कथं। यावद्धवि
दक्षिणतो यथाध्याच्च। यावंति हवींषि भवंति तेषां सर्वेषां प्रथमं दक्षिणतो दक्षिणस्यामेदेशात्। मध्या

असर्वकृपिषांमध्यप्रदेशाच्छेडामव [illegible] ध्यति तत्रास्यं स्विष्टकृद्वद्भवति। सकृदुपस्तरणात्ति द्वि
रभिघारयतीति ऽत्तं कृ स्विष्टकृद द्विति। द्विर्ध्याभिघारणमिति इडावदानस्य हविः शेषप्रतिपत्तित्वाद्याव
ऽभिविरिसुक्तं। मानवे। निष्टस्येडापात्रीं तस्यामुपस्तीर्य द्विरवद्यति स्थवीयो दैवतेभ्यो दक्षिणस्य भक्षान
वद्यति दक्षिणस्य दक्षिणा [illegible]ऽदवदाय पुर्वार्धा यजमानभागमिति। दक्षिणतो मध्याद्यावद्यति ▪
▪▪▪▪ स्विष्टकृद्वदाभ्यमिडैत्तावेतं वपं चावत्तहे सिद्धे यसं चावत्तगृहणं तस्मीसयाज्ञेगयाम
पिपं चावत्त तायथास्याद्विसेवमर्थं अन्यथा तत्राज्यस्यापुरोडाशस्थानीयत्वेन तद्वदाज्यस्य द्वि
रवदानमेव प्राप्नोति। अपऽपस्तस्येत्ति प्राप्ति त्रस्यरुद्धियत ह्युक्तं। यदेवा त्राविङ्क यज्ञस्य यदुद्धियं
तदैवेतं निर्भिमीतेति तथाऽपस्तश्यतीति श्रुतेः। आघिरूंडशाल्यं। इडेति पससामाद्ध्यासीसाद्दै
संव्यवहारार्था॥ ॥यजमानभागंपुर्वार्धादी र्घं प्रशीर्य पुरस्ताद्ध्रुवायाः करोति॥ ॥इडावदाना
नंतरं भागावदानावसरः तत्तश्चपुर्वमग्नीध्रः षडवत्तभागमवद्यति। तत्र एकस्मिन्वारणे पात्रेऽ
भयत्रस्थान्तवतिऽभयतोपस्तीर्यैवैकमवदानमवदायोपरिष्टादभिघार्य षडवत्तं संपादनीयं॥ध्रा॥

ततः पुरोडाशस्यानियतप्रदेशाद्यजमानभागमवद्यति। ततः पुरोडाशस्य पूर्वार्धमुत्तरस्मात्देशा
दणुदीर्घं च यजमानभागं प्रशीर्य पुरोडाशात्पृथक् कृत्वा ध्रुवायाः पुरस्ताद्बर्हिषि करोति निदधा
ति। स स यदवदायेडां पूर्वार्धं पुरोडाशस्य प्रशीर्य पुरस्ताद्ध्रौवायै नि[illegible]दधातीति श्रुतेः। आपस्तं
बः। आग्नीध्रे षड्वत्तं संपादयति सकृदुपस्तीर्य द्विरादधात्युपस्तीर्य द्विरभिघारयत्सर्पिर्वा द्वि
रुपस्तरणाति द्विरादधाति द्विरभिघारयतीति। मानवे। पथ्यकृपाण्योराग्नीध्रायावद्यतीति पा
ण्योरेवावदानमुक्तं। कात्यायने च। अग्नीधः पाण्योरुपस्तीर्य स्थले आधायेति। आपस्तंबः। पूर्वार्धा
द्यजमानभागमणुमिव दीर्घं तमाग्नेयेन संसर्प्य ध्रुवायाउपोहति। तैत्तिरीयसूत्रे। अथ दक्षिणस्यै
व पुरोडाशस्य पूर्वार्धाद्द्व्यंगुलं चतुरंगुलं वाग्नेयेन सुसंस्पृ[illegible] संलप्याग्रेण ध्रुवां यजमानभागं
निदधातीति।। ।।इडां होत्रे प्रदायाग्निस्तर्जं दक्षिणाग्निं क्रामति।। ।।यजमान[illegible]भागस्य पुरस्तान्नि
धानानंतरं तामवलाभि डां होत्रे प्रदाय समर्प्याध्वर्युरग्निं सजन्नतामिडां हस्तेनापि संयन् दक्षिणाति
क्रामति। होतारं दक्षिणेनातिक्रम्य प्रदक्षिणमुत्तरपार्श्वेन होतुः पुरस्तादागत्योपविशतीति प्राङ्मुखः।

आपस्तंबः। अभिघार्येडां होत्रे प्रदाय दक्षिणेन होतारमतिक्रम्य न्वङ्जन होतेडयाध्वर्युं परिग
ह्णासपि वा प्राचीमिडामपोह्य दक्षिण आसीनः स्रुवेण होतुरंगुलिपर्वणी अनक्तीति। मान
वः। इडामभिघार्य प्रसज्जसीनो होत्रे प्रयच्छंस्तेरण होतारमिडांन्याध्वर्युर्दक्षिणातिरिप क्रामति। २
रिप्रगृह्णातिहोतानन्नु ह जन्म होतुरंगुलिपर्वणी अनत्यंतरमग्रेनथबाह्यमिति।। ।। इडां
प्रतिगृह्णहोतुरंगुलिपर्वणी अनक्ति।। ।। ततोऽध्वर्युर्होतुः पुरस्तात्प्रत्यङ्मुख उपविश्य
हो[illegible]त्रा समर्पितामिडां प्रतिगृह्णाद्दायेऽग स्थेनैवाज्येन होतुरंगुलिपर्वणी अनक्ति। उत्त
ममध्यमं च। पर्वशब्दः संधिवाची। कांडवाची वा। तैत्तिरीये। अथ यत् चमसं वेडोपह्व
नं याचति तमंतर्वेदि निधाय तस्मिन्नुपस्तीर्य दक्षिणस्य पुरोडाशस्य दक्षिणार्धं हि
यां स्रुवेरडां रुण्यावद्यातीति। प्रस्तुतायामेवेडोपप्राप्ति गृह्णे सिपुनरिडाग्रहणं इडाया एव सकाशा
त्सर्वांजनं यथास्यादित्येवमर्थं। तत्कुतः। श्रुतौ तथादर्शनात्। सहोतुरिह निर्लिंपति

तद्योतौ ष्वयोर्निर्लिंपत इतिप्रः कुस एतद्धवै मनुरिसस्यां तेऽतदेवैनां प्रापयते यदोष्ठयो

र्त्रि लिंपतइति। शांखायनोपि। मध्यमस्मादेशिन्याभिडायाङ्गुष्ठेनानामिकाउत्तमेपर्वणिमध्यमेति॥ ॥अवांतरेड
मादध्यातिपुर्ववत्॥ ॥ततोहोतुःपाणौपुर्ववदवांतरेडामादध्याति अवद्यतिं तोपेहायाएव। उत्त। अथहोतुः
पाणौसमवद्यतिसमवत्तामेवसतीतदेवांप्रसक्षएं होतरिश्रावयंतीति श्रुतत्वात्। पुर्ववदिति ■ पंचाव [त्रिःश्रयती३]
त्तं। पुरोडाशादवदानादेवपंचावत्तता। नह्यान्यसंसृष्टरूपत्वादिनैके नगृहीतुंशक्यतेइति कर्कः। अत्रा
पस्तंबः। उपस्पृष्टेध्दकायपुरस्तात्प्रस ■। आसीनइडायाहोतुर्हस्तेवांतरेडामवद्यत्यध्वर्युःप्रथममम
वदानमादध्यातिस्वयंहोतोत्तरमेतद्धाविपरीतंलेपादुपस्तरणाभिघारणेभवतोद्विरभिघारयेसंचाव
त्तिनउपकृयमाणामन्वारभतेध्वर्युश्चयजमानश्चेति। तैत्तिरीये। चतुरवांतरेडामवद्युपस्तरणानिद्विरा
दध्यादभिघारयतीति। काठके च। द्विर्द्विरिडामवदायद्विरभिघार्य। होतुःस्त्रवेणांगुलिपर्वणीअन
क्तिपुर्वमग्नेथापरंतस्यपाणाइति डालेपाद्विरुपस्तीर्य तेनप्र ■ तमन्यस्ववदवदायद्विरभिघार्यहो
त्रेइडामादध्यादुपकृतामिडामादध्यादुपकृतामिडामन्वारभ्येति। लेपादुपस्तीर्यलेपादभिघारयतीति
मानवे॥ ॥इडां च॥ ॥होतुःपाणावांतरेडावदानामंतरइडांन्यहोतुर्हस्ते आदध्याति अपियति॥ ध्या॥

सर्वेऽन्वारभंते॥ ॥उपहूय मा ह्वाँ इडां शाद्ध्वान्वं पुरोडाशादि द्रव्यं यैर्हस्तैश्चावत्तं ते सर्वे ऋत्विग्यजमाना अन्वा यथाव्याख्यामवत्तं
रभंते। आपस्तंबादि सूत्रेषु इडायाः एवान्वारंभस्य दर्शनादिडायाश्चान्वारंभः तस्या एवप्रवक्षालनादिति।
॥ ॥इडोपहूतेषुच्यमानमाग्नेयं बर्हिषदं करोतीति बध्नपिन्वस्वायुर्मे धुक्ष्व प्रजामे धुक्ष्व पशुन्मे धुक्ष्वेति ब्रह्मसमेधुक्ष्व २
त्रमे ■ धुक्ष्व विशो मे धुक्ष्व यो स्मान्द्वेष्टि यं च वयं द्विष्मस्तस्य प्रजया पशुभिराप्यायस्वेतितं चतुर्धावकृ
त्ता॥ ॥तमाग्नेयं पुरोडाशं चतुर्धा कृत्वा ब्रह्मपिन्वस्वेति मंत्रेण बर्हिषदं करोति। चतुर्धीतं संतं मंत्रांते कृ
बर्हिषि प्रास्यतीत्यर्थः। अथ यत्र प्राप्तिपद्यते तत्र चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति। तदत्रापि तृणामा
जनेन चत्तस्रो वा अवांतरदिशो वांतरदिशो वै पितरस्तस्माच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोती
ति श्रुतेः। बर्हिषि सीदतीति बर्हिषत्। यथा बर्हिषमवसित्तथा रोति वर्हिषि सादयतीत्यर्थः। तदत्र दर्श
पौर्णमास्योः पितॄणां भाजनेन हेतुना क्रियत इति शेषः। पितॄणां संविभागार्थमि. स ■■ र्थः। किं
तत्पितृभ्यो दीयते तदाह। किंतर्हि चतुः संख्यासामान्याद्बर्हिः संबंधाद्वा चाभक्तिमात्रमेतत्। तदाह चत्त
स्रो वा इति। आवांतरदिशो वै पितर इति ता सु हि पितृयज्ञे तेभ्यो दीयते अतो त्रापि चतुर्धाकृतस्य चत्वा

षि० रो भागा आवांतरदिक्षु बर्हिर्निधीयंत इति इदानीं गम्यते। आग्नेयं चतुर्धा करोतीति शाखांतरे श्रवणादाग्ने
यस्यैव चतुर्धाकरणं। नाग्नीषोमीयस्य।। ।।बर्हिषदं हविर्भ्य आदिशन्ति।। ।।तांश्चतुरः पुरोडाशखंडान्
बर्हिषि व्यवस्थितानेव यजमानः कृतहविर्भ्य आदिशति। इदं ब्रह्मण इदं होतुरिदमध्वर्योरिदमग्नीध्र इति
वं कृत्विक्संबंधेन प्रकाशयतीत्यर्थः। एतच्चाग्नेयकोणादारभ्य प्रदक्षिणं कुतः। अथो अपि
समीप एव परिलिखेदेतद्वै बोत्तमं परिलिखेद्ध एष पुर्वयो [illegible] रुत्त [illegible] रो भवतीति सुपलेखष्वांत
रदिक्ष्वेव वर्तमानेषु दक्षिणंपरिलेखपक्षे अस्य क्रमस्य दर्शनात्। उत्तरपूर्वं हंसमित्ति सु [illegible] त्रा

बर्हिषदं करोति

र्थ। आपस्तंबः। आग्नेयं पुरोडाशं चतुर्धा कृत्वा बर्हिषदं वा कृत्वा चतुर्धा करोतीति तं यजमानो व्या
दिशतीदं ब्रह्मण इदं होतुरिदमध्वर्योरिदमग्नीध इति। सत्रेषु व्यादेशाभावाच्चतुर्धाकरणाभा
व इति फलं। अत्र प्राशित्रं भागा आग्नेयादवद्यतीत्येवं पूर्वपक्षे स्थितादुत्त [illegible] रमुच्यते।। ।।उभौ वा
विशेषात्।। ।।वा शब्दः पूर्वपक्षनिरासार्थः। उभावपि पुरोडाशौ प्राशित्रावदानेनोपप्रतिपाद्यौ। कुतः। भागावदानेन
अविशेषात्। अविशेषेण हविर्मात्रात्प्राशित्रं भागांश्च श्रूयंते यतः। तथापि सक्रियत्प्राशित्रमवद्यती

 तिप्राशित्रं प्रक्षस्ये आज्यस्योपस्तीर्य द्विर्हविषोवदायेति हविर्मात्रात्प्राशित्रावदानं श्रुतं। अतः पुरोडाश पयस्या सान्नाय्यादहविर्मात्रादवदेयं। ननु प्राशित्रे अस्ति हि विशेषः। आग्नेयान्मस्तकं विरुज्येति। नैवं प्रदेशनविधिपरत्वाद्वाक्यस्य। मस्तकं चेति। तेनाग्नेयग्रहण मात्रोपलक्षणार्थं भागानामपि पुर्वोर्द्धं पुरोडाशस्य प्रथपियेत्येवं पुरोडाश मात्रसंयोगः। अतः षडवत्तबह्मभाग यजमानभागा अप्यिद्धयोः पुरोडाशयोर्ग्राह्याः। परं ह्ययं विशेषः। पुरोडाशसंयोगाद्भागाः सान्नाय्यस्य न भवंति। चतुर्द्धीकरणमपि सान्नाय्यस्य न भवति। न ह्यचतुर्द्धा पुरोडाशं कुर्वेतीति तस्यापि पुरोडाससंयोगात्। अत एव न सिद्धं।। प्राशित्रं हविर्मात्रात्। भागाश्च पुरोडाश मात्रात्। न चतुर्द्धाकरणमाग्नेयस्यैवेति। विकृतिष्वपि आग्नेयविकारस्यैव। एकदेवस्य चतुर्द्धाकरणं। नानेकदेवतस्य। गोभोस्तु सान्नाय्यव्यतिरिक्तसर्वहविषां भवंति। प्राशित्रं हविर्मात्रादिति। हरिस्वामिनामप्ययमेवाभिप्रायो यदनेकदेवतानामपि चतुर्द्धाकरणमिति। कः सर्वभागा भवंतीति। यत्तो गृहमेधीयायामनेकदेवसग्व्या[..] गृहमेधीय चरौ। अथेडामेवावद्यतिन प्राशित्रमिसत्रैवं स्यात्तदंतः इडामवद्यतीसयमनुवादः।। २८

अप्रासंगत्वाच्छिन्नस्याः। नप्राशित्रमिति प्राशप्रतिषेधः। तत्तश्च ब्रह्मभागादयो प्रतिषिद्धत्वादिहावदवेदया
इति। आग्नेयादिव भागाहरन्ति मानवे। तैत्तिरीयसूत्रे चास्ति तानि चसूत्राणि प्राग्दर्शितानि। अनेकयजमा
नके पेयकत्वयज्ञमानभागो भवति। नप्रतियजमानं भिन्नः। हविषः प्रधानत्वात् तं व विभज्य सर्वे भक्षयं
ति॥ ॥ अत्र पितर इति यजमानो जपति॥ ॥ अग्निमसूत्रे विसृज्येति विसर्गस्य वक्ष्यमाणत्वात्तस्य
चात्वारंभपूर्वकत्वाद् चारंभस्य च यजमानत्वात् चतुर्धाकृतं पुरोडाशमालभ्य यजमानोत्र पितरो मा
दयध्वमिति समग्रं मंत्रं संहितास्वरेण जपति। पितृत्वान्मंत्रस्य प्राचीनावीतं कृत्वा॥ ॥ विसृज्यामीम
दंतेति॥ ॥ ततो विसृज्य चतुर्धाकृतं पुरोडाशं विसृज्य मुक्त्वा प्राचीनावीत्येवामीमदंतेति समग्रं मं
त्रं स्वरेण जपति। अत्रामीमदंतपि त्र्येइति कासाय नवचनादनयोर्मंत्रयोः पित्र्यत्वं। तेनानयोरुच्चा
रणानंतरं सव्यं कृत्वा पाप उपस्पर्शनं कार्यं। पित्र्यमासानं चालभ्योपस्पृशेदप इति परिभाषायामु
भाक्तत्वात्॥ ॥ एवैकमाहरन्ति॥ ॥ एकैकं भागिने आहरन्ति आदेशकरणक्रमेण समर्पयतीत्य
र्थः। इदं ब्रह्मणे। इदं होत्रे। इदमध्वर्यवे। इदमग्नीध इत्येवं। एतच्च समर्पणं भक्षणार्थं। नपरिग्रहार्थं।

पक्षान्नोपहूतस्य भक्षणार्थत्वप्रसिद्धेः। प्रतिपत्तिश्चैषा सा च पवकस्य भक्षणेनैव लोकतः प्राप्ता। तत्र कर्तृवि
शेषमात्रापेक्षायां ब्रह्मादयो नियम्यन्ते। सोपि नियमो दृष्टार्थः। भक्षणाद्धि करिष्यमाणकर्मणि सामर्थ्यं
भवतीति भक्षणार्थता॥ ॥ द्यावापृथिव्योरुपहूतेऽग्नीध्रे षडवत्तं। होत्राऽऽहूते द्यावापृथिवी इत्ये
वं द्यावापृथिव्योरुपहूते क्रियमाणे यजमानोऽग्नीध्रे षडवत्तमाहरतीत्यर्थः। अथ यत्रा होपहू
ते द्यावापृथिवी इति तमग्नीध्र आदधाती श्रुतेः। आङ्पूर्वो दधातिरन्यत्रस्थापने प्रयुक्तः। अत्र तर्प
णेन द्रष्टव्यः। न चैष इडाभागः। किं तर्हि न्य एवायमग्नीध्रभागः। प्राशित्रं चेडा च यच्चाग्नीध्र आदधा
ती तीडाया भेदेन व्यपदेशात्। एतेनैव ब्रह्मभा गयजमानभागयोरपीडाभेदः प्रसिद्धः। य
तोऽनयोर पीडातो भेदेन व्यपदेशोऽस्ति। प्राशित्रं चेडा च यच्चाग्नीध्र आदधाति ब्रह्मभागो यजमानभा
गो न्वाहार्यश्चेति। अग्निमिंधे दीपयति संमार्गेणेत्यग्नीत्। षडवत्तश ब्दार्थः पूर्वमुक्तः॥ ॥ प्राश्नात्युप
हूता पृथिवीति॥ ॥ तत्षडवत्तमग्नीत्प्राश्नाति उपहूता पृथिवीत्यनेन मंत्रेण। अथ द्वितीयस्त्वपहूते
द्यौरित्येवं शाखांतरे श्रुतमपि सूत्रकृता नोपनिबद्धं। सूत्र तः। वाक्यभेदादस्यार्थस्य सिद्धत्वात्।

तत्रहिसांखायनेनउपहूतेयंयजमानीतिवाचिकारइतिपत्न्युपहूतोविहितोस्ति

तेनैवमनुष्ठेयं॥ ॥आशासानेमयीदमितियजमानोजपति॥ ॥भूयासिहविःकरणमुपहूतइत्येवमा
शीःप्रार्थनमाशासानं। एषा वा आशीरित्युक्तत्वात्। आशासाने होतरि सति यजमानो मयीदमिन्द्र इत्य
मुं मन्त्रं स्वरेण जपति। ननु पुरुषयोगि मंत्रसंस्कारयोरिसनेन यजमानस्यात्र सिद्धत्वात् किमर्थं यज
मानग्रहणमिति चेन्न। पत्नीसंयाजेडायामपि यजमानस्यैव जपप्राप्त्यर्थं। तदाशीर्वचनेनैकवाक्य
तासत्त्वात् एव जपो माभूदिति यजमानग्रहणं। अनेक यजमानके सर्वेषां जपः। आशीःप्रार्थनहान्न
चोहः। प्रत्येकं जपे मयीत्येकवचनस्याविरुद्धत्वात्॥ ॥उपहूतां प्राश्नंति सत्राः॥ ॥उपहूतामिडां
युक्ताइति सर्वे ऋत्विजः प्राश्नंतीत्यर्थः। तां वै प्राश्नंत्येव नाग्नौ जुहोतीति श्रुतेः॥ ॥यजमानश्च॥
यजमानोपि चकारात्तामिडां प्राश्नंति। एतत्प्राशित्रं इडाभागाश्च यावदुक्तं तावध्रियंते भवति।
द्रव्यसंस्कारत्वात्॥ ॥पवित्रयोर्मार्जयंते परेण वेदिं सुमित्रिया न इति॥ ॥वेदिमपरेणोपविष्टाः
सुमित्रिया न आप ओषधयः संत्वित्येतावता मंत्रेण पवित्रयोरब[illegible] स्थितं द्भिर्मार्जयंते। मन्त्रशेषेणाभिः अभि[illegible]
शंसारयोः। आसानं शेषेणाध्यायंतीत्यर्थः। अथ पवित्रयोर्मार्जयंतीति श्रुतेः। श्रुतौ सुत्रे च पवित्रयो

दे॰भा॰त॰ मंत्रभिगणत्। शासांतराश्वा। यद्विपवित्रवतिमार्जयंतेशांतिर्वै भेषजमापइति ॥

३॰ रिति सप्तमीनिर्देशाद्दाधारभूते पवित्रे तत्राधेयाश्वा सापइति गम्यते। सुमित्रियान आपइति
शाखायनब्राह्मणे। वैतानसूत्रे च। मातल्याश्चिन्मीआंच्य होत। अपरे होवमाहुः। पवित्रयोर्विभ
क्तिव्यत्ययः। तृतीयार्थे सप्तमी। पवित्राभ्यां मार्जयंत इत्यर्थः। कुतएतत्। पवित्रपूता स्तनवाम
हा इति वाक्यशेषात्। पवित्राभ्यां पूताः पवित्रपूता इति कर्मण्यार्थे हरिस्वामिभिश्चैवं व्या
ख्यातमस्ति। अतः संप्रदायेवमेत एव मंत्रः। वाक्यस्य परिसमाप्तत्वात् ॥ ॥यजमानस्य प्राणा
पानौ पालभितप्रस्तरे लेकरोति ॥ ॥यजमानस्येत्यनेन मंत्रेण मार्जनानंतरं तेपवित्रे प्रस्तरे करो
ति। पवित्राभ्यां मार्जनं कृतं तेन प्रस्तरमध्ये प्रवेशयतीत्यर्थः। अथ ते पवित्रे प्रस्तरे विसृज
तीति श्रुतेः। अप्विस्पृशति संसृजतीति। समस्य मार्जनविधानेन शाखापवित्रस्य प्रस्तरे कर
णं प्राप्नोति तद्ध्वासार्थं पुनरुक्तं। अन्यथा पवित्रयोः प्रस्तुतत्वात्। अवाच्यमेव स्यात्। यज
सू॰१॰ मानयोः प्राणापानावित्यादि यजमानस्येत्यर्थं। यजमानाभ्यां ■■ प्राणापानावित्यादि यजमानवे।
॥ ॥तूष्णीं वा ॥ ॥अथवा तूष्णीं मंत्रवर्जमेव पवित्रयोः प्रस्तरे करणं ॥ ॥अत्र वा ब्रह्मा प्राश्नाति ॥ ३॰
अथवा ब्रह्मा अत्रास्मिन्काले प्राशित्रं प्राश्नाति। आगमस्यैव परिहरति ॥

अस्मै ब्रह्मणे अध्वर्युर्ब्रह्मभागं परिहरति। यथास्मै ब्रह्मभागं पर्याहरतीति श्रवणात्। परिहरणं चाह
वनीयं पूर्वेण प्रदक्षिणं नयनं परिशब्दप्रयोगात्। अयं च चतु[illegible]र्धीकरणभागव्यतिरिक्तः। तेषां दा
नस्य पूर्वमेवाविहितत्वात्। एकैकमाहरतीति अन्वायं यद्व्यतिरिक्त एव॥ ॥यजमानभागं चाप्रोषि
ते॥ ॥अप्रोषिते अकृतप्रवासे यजमाने यजमानभागं च यजमानाय परिहरति अध्वर्युरेव
तं च गार्हपत्यमपरेण नीत्वा व्यवायपरिहाराय। ब्रह्मा चाध्वर्युसमर्पितं भागं प्रतिगृह्य प्राशि
नि त्रैदध्याति। लाट्यायनेदर्शनात्। आहृतं ब्रह्मभागं प्राशित्रे निदधातीति तस्मिन्ष्टौ संस्थियां प्राग्नी
याद्विति। आश्वलायनसूत्रेपि। मार्जयित्वास्मिन्ब्रह्मभागं निदध्यात् ध्या कुशेषु यजमानभाग
मिति। अस्मिन्निति प्राशित्रे। अप्रोषितस्त्वृत्ति ब्रह्मणा प्रोषिते यजमाने तद्भागो वेदिमध्ये एव ता
वत्तिष्ठति यावत्समस्तहोमानं तत्संकृयते॥ ॥अन्वाहार्यमभिघार्योद्वास्यांतरा ब्रह्मयजमानौ हृत्वावे
ध्यान्निधायालभेत प्रजापतेर्भागोसीति॥ ॥भागपरिहरणानंतरमध्वर्युमन्वाहार्यमभिघार्यस्था
लीस्थे नाज्येनोपसिच्योत्तरत उद्वास्य[illegible]दक्षिणाग्नेरुपरिष्टाद्धृतीयं गार्हपत्यदक्षिणाग्न्योरंतरा

३९

लेनप्रसङ्गीस्याद्दक्षिणाग्नेर्दक्षिणेनब्रह्मयजमानावंतराद्दस्या ब्रह्मयजमानयोरंतरालेन नीयात्तत्रापियज
मानंदक्षिणेन ब्रह्माणमुत्तरेणपूर्वेणाहवनीयंप्रणीतोत्करावंतरेणाहस्त वेद्यांविदमध्येनिध्यायासा
ध्येप्रजापतेर्भागोसी सन्नेनमंत्रेणालभतेध्वर्युः। अत्रनिवृत्तौऽर्गसीत्यस्यस्थानेदक्षिणाद्रव्यवा
चिपदप्रयोगःकर्तव्यः। तद्यथा। आग्रयणे। प्रथमजोगौरसीति। दाक्षायणेच हिरण्यमसीति। बहु
ष्वपिद्रव्येषुद्वंद्वैकवद्भावेनैकवचनांतस्यैवप्रयोगः कार्यः। यथौ काफिचातुर्मास्येषुप्रथमजग
वध्वेन्वषभौष्ठाराश्वमसीति। केचिद्द्विगुसमासैकवद्भावे। तद्यथा। तनुहविंषुत्रिगवमसीति
षड्गवमसिद्वादशगवसीतिवा। भूयसीनां दानपक्षेचपंचविंशतिगवमसि षड्विंशतिगवमसि
शतगवमसीत्यादिज्ञेयं। सौत्रामण्यांतुत्रयस्त्रिंशद्धवानुध्वि सुवडवधेन्वसीतिप्रयोगः। अभिघा
रणंतुचाहार्यस्यैव। अन्येषामनुप्रयोगात्। स्वाहादिम्नो ह्योदनोभिघार्यंते। नचान्येषां स्वाहादिम्ना
प्रयोजनं। अत्रस्त्रेषां नाभिघारः। आलंभस्तु [illegible] गवादेरपिभवति। नाभिघारः। गोस्तुब्रह्मयजमानयो
रंतराहरणंनभवति। विध्योरोत्र। वा सस्तुप्रवर्तते। विरोधाभावादितिकर्काचार्याः। अत्राहापस्तंबः।

३९

३ज्ञेया। दर्शपूर्णमासयोर्हविर्विषाद् दक्षिणा यदन्वाहार्यमिति। ततो देवा एतां दर्शपूर्णमासयोर्दक्षिणा २

मित १ दक्षिणान्वाहार्यं महान्तमपरिमितमोदनं पचन्ति ओरम्भवती हेव। तेभिः धार्यो द्वा स्वाः तवै ध्या मासा ध्यते भ्योऽन्वा
यं हार्यं ददाति ब्राह्मणा अयं व ओदन इति प्रतिगृह्णीतेति॥ ॥ सा दक्षिणा॥ ॥ एषोऽन्वाहार्य इत्युक्तः स एव द
र्शपूर्णमासयोर्दक्षिणो मनुष्यस्य यस्य दन्वाहार्याः इति श्रुतेः। अतोऽत्रान्वाहार्यस्य दक्षिणात्वं ■ नऋत्विग्भ्यो
दानं कार्यं। तत्र विषमभागानुपदेशात् समविभागेन। ब्राह्मणा अयं व ओदनः प्रतिगृह्णीतेति दानमन्त्रः। अस्याद्
हेः स ■ ध्यर्थमन्वाहार्यं दक्षिणां ब्रह्मणे होत्रे अध्वर्यवे ग्नीध्रे तं संप्रददे। ब्रह्मन्य ■ स्त भागः स निगद्यत
मित्यादि। एतद्यथाश्रुतं। दानमात्रं कार्यं। न दम्भक्षितोदकपूर्वं। तथा चापस्तम्बः। सर्वाण्युदकपूर्वाणि दा
नानि यथाश्रुति विहारे। विहारे यज्ञे आन्वाहार्यदानादौ यथाश्रुति यावदेव श्रुतं तावदेव कुर्यात्। नोदकपूर्व
कृतानि यमस्सर्थः। प्रतिग्रहस्तु तूष्णीमेव कार्यः। ओंकारमात्रेण वा। यो स्वाददाति तिगह्णो केनवा। तथा
च छन्दोगसूत्रं। तूष्णीमयक्षियेदक्षिणां प्रतिगृह्णीयादोमिति वा॥ ॥ उदगुद्वासयन्ति॥ ॥ दक्षिणादानानं
तरमन्वाहार्यं वेदिमध्यादुदगुदीच्यां दिशि उद्वासयन्ति बर्हिर्निष्ठासयन्ति शाखान्तरात्॥ ॥ हविश्च॥ ॥
हविरपि यदग्नीषोमीयस्याप्याद्यादिकं शे ■ ष भुक्तं पत्तु क्षीकरणं यस्य न भवति तद्विष्टमिदानीमुद गुद्वा

सयन्ति वेदिं बर्हिर्निधायासयति। तथा चाहापस्तंबः। हविःशेषानुद्वास्यापि सन्न्योभ्युक्षेदिति। मानवे च। अपरेण
श्रीं
स्रुग्दंडानुदंचमुद्वासयति दोहपात्रे चेति। तैत्तिरीयेपि। उद्वासयंस्तत्कृत्व विरुद्धमिष्टमिति। काठके च। अन्वाहार्यपचो
दनं दक्षिणाग्नौ श्रुतं महान्तमपरिमितमन्वतोभिघ्यारितं वेद्यामभिमंत्र्य ऋत्विग्भ्यो दक्षिणां दद्यात् सह विरुद्धमि
ष्टमुद्वास्यानुयाजिकीं समिधमादायाहेति॥ ॥ समस्योऽन्युक्ते समिधमादायाह ब्रह्मन्प्रस्थास्यामि समिध
माधायाग्निमग्नीत्संमृड्ढीति॥ ॥ ततोध्वर्युरुक्तमुक्ते समस्याहवनीये मध्य एव प्रक्षिप्याहवनीयेतेमि
ध्यपि हितततः प्राक् परिशेषितां समिधमादाय ब्र[illegible]ह्मन्प्रस्थास्यामीति ब्रह्माणं प्रसाह ब्रवीति। ततः स
मिधमाधायेत्यादिकमग्नीध्रं प्रत्याह। अत एव प्रैषभेदाद् ब्रह्मन्प्रस्थास्यामीत्यत्रावसानं। ततः समिधमा
धायेत्यादिकं। एवं चैतौ द्वौ प्रैषौ। तत्र एकोनुयाजार्थः। ततश्चानुयाजाभावे आतिथ्यापयस्यागृहमेधीयो
पसदादौ न भवति। अग्निसंमार्गस्तु अनुयाजाभावेप्य[illegible]ग्निसंस्कारकत्वादातिथ्यादौ प्रवर्तत एव। तदर्थ
श्च प्रैषोपि। गृहमेधीये तु न प्रवर्तते। सांतपनीयातंत्र[illegible]मध्यपातात्। समिदाधानार्थं न तु प्रैषार्थो यमु
पग्रहः। ततश्चानुयाजाभावे तस्या अभावादेवाधानाभावः। ऽन्युक्त समासस्यानुयाजार्थ आहवनीयसं

स्कारः। अतश्चसमासविस्मरणे अनुयाजसमासंनंतरंपुनरसमासः। वरूणप्रघासेषुब्रह्मन्प्रस्थास्यावः
। समिध्याचाध्यायाग्नी अग्नी सम्मृड्ढीसेव मुहुःकार्यः। दशाहुतिपक्षेवम्थेष्टवापोग्नी सम्मृड्ढी सुहुः। षडा
हुतिपक्षेचसंमार्गएवनभवति। एषानइतिहोतानुमंत्रयते॥ ॥होता एषात्नइसनेनमंत्रेण तांसमिध्यमभि
मंत्रयते। प्रैषश्रवणानंतरंचाग्नीनांसमिध्यमिध्मकाष्टरूपामाहवनीयेभ्यादध्याति। ततस्तस्या अ
नुमंत्रणं। अथसमिध्यमभ्यादध्यातीतिपदिहोताऽंहोतानुमंत्रयतइति अभ्याधानानंतरमनुमं
त्रणंश्रुतेः॥ ॥अजानत्तियजमानः॥ ॥अनुमंत्रणंकर्तुमजानत्तिहोतरिं एषातइतिसमिध्यमनुमंत्र यजमान
यते। तांहोतानुमंत्रयतएषातइतिसयदिमन्येतइसुष्ठानहोतावेदेसपिस्वयमेवयजमानोनुमंत्रय
तेतिश्रुतेः। वरूणप्रघासेषुचएतेवाग्नीसामिध्यौबर्ह्यैर्थांवाचप्यायेथांइस्सुहुः। अनेकयजमानकेषु
दयनीयावाहुतेब्रह्मन्प्रस्थास्यामः। समिध्यमाध्यायाग्नीनग्नीत्सम्मृड्ढीति। ओंप्रतिष्ठतेतिप्रतिप्रसवः
सभ्भदनुमंत्रणे। एतावोग्नयःसमिध्यस्ताभिर्वर्धध्वंचाचप्यायध्वमिसुहुः। द्विलेचवरूणप्रघा
सवत्। कर्मभेलेत्वभिपदस्यकुत्राप्युहोनभवति॥ ॥संमार्ष्टिपुर्ववदपरिक्राऽंसकृत्सकृत्सकृत्त्वाऽंस

मिति॥ ॥अग्नीत्पूर्ववत्स्रुचाग्रं समिन्निमंत्रेण सकृत्सकृदग्निं संमार्ष्टि। संमार्जनेनाग्निं विरजस्कमुज्ज्व
लं करोति। अपरिक्रामं। परिक्रमणमकृत्वा एकत्रोतस्त्रतः स्थित एव। दक्षिणपश्चिमोत्तरमध्येषु चतु
र्ष्वपि अग्निप्रदेशेषु संमार्ष्टि। पूर्ववदिति इध्मसन्नहनैरनुपरिध्यग्नेवाजजिदिति चेत्येतावदनूद्यते। त्रि
स्त्रिरित्येतन्निवसथं सकृत्सकृदित्युक्तं। परिक्राममित्येतस्य निवसथमपरिक्राममिति। स्रुचा
ग्रं समिति अयं अग्ने वाजजिद ■ स्मिन्मंत्रे विशेषः। पूर्वं संमार्गेपि परिक्रामं संमार्ष्टि परि
क्रामं द्वे योग्यं युनक्तीति अर्थवादात्। परिक्रम्य परिक्रम्य परिक्राम्यति तिष्ठन्नेव योग्ययो जनवत्सं
मार्गोपि योजनस्थानीय स्त्रिष्टत्वावृत्तिर्भवतीति गम्यते। संमार्गश्चाग्निसंस्कारः। नेन शतरुद्रियेन स्था
नाप ■■ न्नासु परिश्रितस्वपि भवति। दशाहुतिपक्षेवभृतेष्टावपि। तत्रापो वाजजितो नाजं वः सस्रुषी
र्वाजजितः समाजृमीसुह॥ ॥ब्रह्मानुज्ञातोनुयाजैः त्रिभिश्चरत्युपभृतः समानीय॥ ॥ब्रह्म
णाभ्यं प्रतितिष्ठेसेवमनुज्ञातोध्वर्युरौपभृतमाज्यं स्रुचोर्षु जुह्वां समानीय त्रिभिरनुयाजैश्चरति। ब्रह्मा
नुज्ञात इति ग्रहणं सर्वप्रैषोत्तरकालमेतन्नद्रस्याच्च सरविधानार्थं। अन्यथा ब्रह्मन्प्रस्थास्यामीत्ये

तस्यैष समनंतरमेव प्राप्नोति। न सर्वप्रैषानंतरं। त्रिभिरिति चानुयाजैरिहप्रज्ञापनार्थं मुक्तं। अथानुयाजान्यज
तिसर्वैरव नुवर्हिः प्रथमं यजन्ति अथ नराशंसं द्वितीयं य ... जेत्तथाग्निरुत्तमं इति च श्रुतत्वात्॥ ॥अ
तिक्रम्याश्राव्याहदेवान्यजेति॥ ॥समानयनानंतरं जुहूमध्वर्युस्त्वतिक्रम्य यजतिदेशं गत्वाश्राव्ये देवा
न्यजेत्येवमाहब्रवीति। अतिक्रम्याश्राव्येत्यनेन यज्ञातिहोनप्राप्तपुरोनुवाक्या निरासः। कुतः। अथ
यदपुरोनुवाक्या अनुयाजा भवंतीति श्रुतेः॥ ॥यजयजेत्युत्तरौ॥ ॥उत्तरौ द्वावनुयाजौ यजयजेत्येवं
प्रैष्यति। प्रथमे एव देवान्यजेति उत्तरयोस्तु यजेयजेत्येवायश्चोवरुणप्रघासेष्वेवमनुवादो दृश्यते
देवान्यजेतिवजयजेनीति॥ ॥देवान्देवा ... नितिवा सर्वत्र नियमशास्त्रात्॥ ॥अथवा देवान्यज
देवान्यजेत्येवमेव सर्वत्र त्रिष्वप्यनुयाजेषु ब्रूयात्। कुतः। नियमशास्त्रात्। देवान्यजेत्येवाध्वर्युराह
देवान्देवयमिति सर्वेषु होतेति। अत्र नियमप्रतिपादकस्यैवकारश्रवणात्। अतस्त्रिष्वपि देवान्यजे
त्येवं। वक्तव्यं। ननु द्वयोरुत्तरयोर्यजयजेत्येतावन्मात्रमिति। किंच॥ ॥विकृतिदर्शनाच्च॥
विकृतावुत्तरयोरप्यनुयाजयोर्देवान्यजेत्यस्य प्रैषस्य दर्शनाच्च। प्रकृतावपि सर्वेष्वेवं प्रैषो भ

वतीसुवसीयते। तथाच। महापितृयज्ञेप्रथमानुयाजाभावेपि श्रूयते। देवान्यजेतिसोपबर्हिषौद्वा
वनुयाजौयजतीति। अतोनियमेनसर्वेष्वपि अनुयाजेषुदेवान्यजेसेवप्रैषः। यत्तुवरुणप्रघासेषुय
जयजेतिश्रवणंतद्गुणविध्यार्थमेकदेशानुवादइत्यपिश्रुतिः। प्रकृतौश्रस्तांतराद्धिकल्पः।
वरुणप्रघासेषुपुनर्यजयजेतिवचनंतस्यैवप्रयोगार्थमितिवक्ष्यः।। ।।प्रतीचोजुहोति।। ।।ए
तांस्त्रीननुयाजानध्वर्युः प्रतीचः प्रसवसंस्थाञ्जुहोति। प्रतीचानुयाजाइतितस्मात्तदुपसद्रूपेण
प्रसंचोत्कृष्यंतइतिश्रवणात्। अनुबन्धिलोभेनप्रसंगादाह।। ।।उपसत्सुच।। ।।ज्योतिष्टोमे
उपसत्संज्ञास्विष्टिषुचाग्निसोमविष्णुदेवतायागेषुप्रतीचोजुहोतिप्रसवसंस्थान्होमान्करो
ति। तस्मात्तदुपसद्रूपेणप्रसंचोत्कृष्यंतइति। उपसद्धोमानांप्रसवसंस्थत्वंप्रसिद्धमेवदर्श
यति। प्रयाजवदनुरप्यपसरणेप्राप्तेआह।। ।।ध्रुवः।। ।।अनुयाजेष्वध्वर्युर्ध्रुवः स्थिरोनिश्च
लःएकत्रस्थितएवत्रीनप्यनुयाजान्प्रसवसंस्थान्जुहोति। नप्रतिहोमंप्रयागपसरणं।।ध
।।चतुर्थंसमानीयप्राचीं।। ।।तृतीयानुयाजहोमानंतरंउपविश्यौपभृतंसवैजुह्वांसमा

प्रयोगनियमार्थमितिवा

नीय चतुर्थं होमं करोति। अथोत्तममनुयाजमिष्ट्वा समानीय जुहोतीति श्रुतेः। तत्र च प्राचीं प्रसव्यं सं-
स्थाभाद्दुतिं होमं जुहोति। तत्र यजति स्थानादेशो तरतडुपधिस्य। तद्धि जुहोतीनां स्थानं यतः। स चतुर्थम्
पम स्वहोमस्यानुयाजागहप्रश्नस्यार्थं। अन्यथा पूर्वां व्याख्यावदपूर्वो होमादकं स्वतंत्रं होमानंतरं स्या
त्। अंगहेतु सह अनुयाजसद्भावे भवति। अनुयाजाभावे च न भवतीति। अनुयाजांते स्वरु जुहोतीति। स्वरु
होमोऽपि सांगानुयाजोत्तरकालं भवति। अथवा देवतानामेव देवताहोम [illegible] स्मिन् होमे यथास्यादिसेवमर्थं च
तुर्थग्रहणं। मंत्राभावेपि स्वाहाकारेण होमः कार्यः। पूर्णाहुतौ एवं सर्वत्रेति वक्ष्यमाणत्वात्। अत्र होम कर्तव्यः।
नुः। संमार्गे विस्रंस्याभ्युक्ष्याग्नीव ध्यस्य सौपभृतं जुह्वामानीयाश्रावयं त्रीननुयाजान्यजति देवान्य
जेति प्रथमं यजयजेसुत्तरौ समिधि प्रतीचः। पश्चार्द्धादुत्तमेन प्राचावन्तं समि[illegible] नस्सा क्रम्य यथा
स्थानं स्रुचौ सादयतीति। कारदके। उपभृतं जुह्वामान्यतेनानुयाजान्यजति देवान्यजेति प्रथमं यजयजे
सुत्तराविति। आपस्तंबः। इध्मसंनहनान्यद्भिः संस्पर्श्य धोभुतानाभिसंग्मो प्रहरतु क्रूरेवान्यस्येति।
उपभृतं जुह्वामानीय जुहूपभृतावादाय दक्षिणा सव्य दतिक्रांतो ग्रेणाघारसंभेदं प्रतीचस्तीन

दे·भा·९

यं द्विष्मा नादुन्यमं जहीति ७।

३५

नुयाजान्यजमाना श्रावणमाश्रावं प्रत्याश्राविते देवान्यजेति प्रथमं संप्रेष्यति यज यजेतीतरौ पूर्वार्द्धे प्रथ
मं समिधि जुहोति मध्ये द्वितीयं प्राचमुत्तमं संस्थापयन्नितरावनु संभिद्य प्रस्तरं न्यायतने स्रुचौ
सादयितेति। तैत्तिरीयेपि। इध्मसंनहनान्यद्भिः संस्पृश्याहवनीयेनुप्रहरन्ति यो भूतानामधिपतिरुद्र
पश्नामाधाया इति क्रम्याश्राव्याह देवान्यजेति वषट्कृते जुहोति त्रीन्प्रतीचोनुयाजान्यजति प्राचीन
तः संभिन्नस्तथोपदुरति क्रम्य यथायतनं स्रुचौ सादयतीति॥ ॥ अभिचरन्ननुयाजानुमंत्रणमश
न्यमंजहि हादुन्यमं [illegible] जहुलहुष्यमुंजहीति॥ ॥ अभिचरन्नध्वर्युरशन्यमुंजहीत्यादिभिस्त्रिभि
र्मंत्रैः क्रमेणानुयाजानामनुमंत्रणं करोति। सप्रथममनुयाजमनुमंत्रयेताशन्यमंजहीति
द्वितीयमुल्कुष्यमुंजहीति तृतीयमिति सूत्रेः। एतच्चानुमंत्रणमध्वर्युरेव करोति। समाख्यानात्पुरु
षयोगाभावाच्च॥ ॥ एवं प्रवृत्तौ समं विभजेत्॥ ॥ विकृतौ वरुणप्रघासेषु पशौ चानुयाजप्रवृ
त्तावे तानि त्रीण्यनुमंत्रणानि समं विभजेत। कुतः। समं स्याद ■ ■ श्रुतत्वादिति जैमिनिनोक्त
त्वा। यद्यपि पुरुषार्थानामनुमंत्रणानां विकृतौ प्रवृत्तिर्नेष्यते। तथाप्यनुयाजप्रवृत्तौ प्रवृत्तिरिष्टैवावानस्य

३५

१व स्ये-यमसे प्रवर्त्तमाने तदाश्रितत्वन्नाव-र्चं सौंदिसमिप्रायः। सिद्धां तमाह॥ ॥स्वस्थानासे नवोपायिता

स्वस्थानासः २

त॥ ॥वासद्ध-पूर्वपक्षनिरासार्थः। स्वस्थाने योऽसौ तेन स्वस्थाना सेनागंतुनामनुमंत्रणं कर्त्तव्यं। कुतः।
उपायितादागंतुनां। तस्य स्वस्थानासस्य स्थानं। तस्मिं द्वितीयस्थाने देवीर्द्वार इत्यादयः षडागंतवः पति
ताः। ततः सप्तमो होमो नराशंसः। तेनैव नराशंसो द्वाः प्रभृतीनां सप्तानामसः अतएव तेषां नराशंसानु
मंत्रणे नहादुनी सनेनानुमंत्रणं। द्वितीयस्थाने एव त्रसप्तानां होमश्च कार्यः। ततस्तृतीयस्य स्विष्टकृ
त्स्थाने देवो वनस्पतिर्देवं बर्हिरिति द्वौ प्रवृत्तौ पठितौ भवतो देवो अग्निः स्विष्टकृदिति प्राकृतोऽसः
। अतो वनस्पतिप्रभृतीनामसो स्व■स्थानो यः अतएव तेषां तृतीयस्यानुमंत्रणे तो त्वकुषीयनेनानुमं
त्रणं। तृतीयस्थाने होमश्चेति सिद्धं। विकृतौ प्रा■नुयाजसंख्या प्राकृतानुयाजाभ्यासेनैव पूरणी
या। तस्याऽष्टत्वशिष्टत्वेनोसत्ति शिष्टयात्रिसंख्यया सह विकल्पसमुच्चये बाध्यानुपपत्तेः। अतोऽभ्यासे
नैव पूरणीया। तस्मादत्र द्वितीयतृतीययोरभ्यासेन पूरणमुक्तं। ■तदुक्तं। अनुप्तता तु यासंख्या साभ्या
सेनैव पूर्यते। इष्टत्वेनानुयाजानामभ्यासो विकृताविति। १। तत्रां साभ्यास इष्यते तस्या■ साद्येयदंतरा॥

सन्निहितसर्पपाठे तु नास्य व्याख्यासङ्गच्छते। यतो वैकृतानां समाम्नानं पदार्थनादनन्तरं मध्ये नराशंसः पठितः। अ
नन्तरमृतुग्रहाणां नराशंसस्य धर्मसंबंधस्तत्स्थानापन्नत्वात्। ततः परेषां तु तत्[illegible]मस्येति। प्रयाजेषु तु वैकृ
तमध्ये पाकृतस्य पाठो नास्ति। किंतु चतुर्थानंतरं सर्वे वैकृताः पठिताः। ततोऽन्ते स्वाहाकारः पंचमः पठि
तः। तेन तत्रास[illegible]स्यैवाभ्यासो युक्तः। सर्वेषां तत्स्थानापन्नत्वादिति सर्वमनवद्यं। अत्रेयं वक्त
चिंता। अनुमंत्रणं हि विकृतौ न प्राप्नोत्येव। त[illegible]स्याकृतार्थत्वे न विकृतावनपेक्षितत्वात्। न च
वानस्पत्यचमसन्यायः। तत्र हि वानस्पत्यचमसाः। कृत्स्नापेक्षयैव प्रवृत्तः। इह त्वनुमंत्रणे न नि
बंधनोऽभिचारो नान्यासन्निबंधनः। अनुमंत्रणं च पुरुषार्थत्वान्न कृत्स्नार्थापेक्षया गम्यते। अतो
न्यायप्रदर्शनार्थं कृत्वा चिंतैवेयं। अथवाऽभ्यस्यमानानां होमस्थानादिसंबंधनिर्णयार्थमि
दमधिकरणं। तेन द्वितीयप्रभृतीनां नराशंसानां द्वितीयस्थाने होमः। ततो वनस्पतिप्रभृती
नां स्वस्य स्थान इति सिद्धं॥ अत्राहुः पितृभूत्याचार्याः। अनुमंत्रणस्य पुरुषार्थत्वात् विकृतावप्र
वृत्तेर्वचनात्प्रवृत्तिः कृत्वा चिंतावेति॥ ॥ऋत्वक्रतुपभृतौ जुहोति॥ ॥यजतिस्थानादागत

स्रुचौ स्व स्वस्थाने सादयत्यध्वर्युः। ततो यजमान एव स्वस्थानादुद्वेदेः पश्चादागत्य स्रुचावुपभृतौ व्यूहति। जुहूं वित
र्के। अत्र प्रेरणे द्वहत्यर्थः। विविध्यमन्योन्यविपरीतं ऊहति। प्रेरयति। जुहूमन्यस्यां दिशि उपभृतीमन्यस्यामिति
विशब्दस्यार्थः। कथं व्यूहतीति विशेषापेक्षायामाह॥ ॥अग्नीषोमयोरित्ति जुहूं प्राचीं दक्षिणेनोत्तानेन॥
अग्नीषोमयोरुज्जितिमित्यनेन मंत्रेणोत्तानेन दक्षिणेन पाणिना हस्तेन जुहूं प्रसरात्प्राचीं व्यूहति प्रेरयति।
सर्वे स्रुचौ व्यूहत्यग्नीषोमयोरुज्जितिमनुज्जेषं वाजस्य मा प्रसवेन प्रोहामीति जुहूं प्राचीं दक्षिणेन पाणिनेति श्रु
तेः। अत्राग्नीषोमग्रहणं मंत्रे न्यायप्राप्तप्रधानदेवतामात्रोपलक्षणार्थं॥ ॥अग्नीषोमौ तमितीतरेणेत
रोनीचाप्रतीचीं॥ ॥अग्नीषोमौ तमपनुदतामिति मंत्रेणेतरेण सव्येन पाणिना न्युब्जेन प्रतीचीमुपभृ
तं व्यूहति प्रतीच्यां दिशि बहिर्वेदि प्रेरयति प्रागग्रामेव सतीमित्यर्थः। अग्नीषोमौ तमपनुदतां योऽस्मान्द्वे
ष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामीत्युपभृतं प्रतीचीं सव्येन पाणिना यदि स्वयं यजमान इति श्रु
तेः। अत्रापि मंत्रेऽग्नीषोमग्रहणं प्रधानदेवतामात्रोपलक्षणार्थं। ततश्चैवं मंत्रप्रयोगः। अग्नेरग्नीषोमयो
रग्नीषोमयोरुज्जितिमिति। अग्निरग्नीषोमावग्नीषोमौ तमपनुदंत्विति। अत्र मतभेदः। प्रैषव्यतिरिक्तस्य

५ स्यस भ्युक्ष्य प्रस्तासादयति न जुहूं प्रस्तर इति जुहूं श्च प्रस्तर ५

दे·भा·त·
३७

सर्वस्योपांशुत्वप्रसंगेऽपांशुयाजपुरोडाशदेवतान्युक्तयोर्द्वयोरग्नी [illegible] षोमयोस्तंत्रेणोच्चारणं गुणभे
दाभावात्। शेषमुत्तमेनस्वरेणानुयाजप्रभृति मंत्रमात्रस्योत्तमस्वरविधानात्। पक्षेन्यगुणभेदाभ्देदेनो
च्चारणं। तदा चोपांशुयाजाग्नीषोमयोरुपांशूच्चारणं। पुरोडाशदेवतयोस्तु उच्चैरिति। एवं सर्वत्रोपांशुदे
वतेषु अन्यदेवतासहितेषु ज्ञेयं। आपस्तंबसूत्रे विशेषः। प्राचीं जुहूं प्रोहतीति सव्येनोपभृतं प्रतीचीं बर्हि
र्वेदि निरस्य प्रोक्ष्य नामभ्युदाहरसेति। मानवे च। विषूचीं व्यूहति प्राचीं जुहूं प्रस्तरात् प्रतीचीमुपभृतं ब
र्हिर्वेदिनिरस्योत्तरतो बर्हिषि सादनीया। प्रस्तरस्यादानविधानादित्यभिप्रायः। कात्ये पि। प्राचीं जुहूं प्र
तीचीं बर्हिर्वेद्युपभृतमभ्युक्ष्याहरवेध्यान्तिध्यायेति॥ ॥यथादेवतमन्यत्॥ ॥अग्नीषोमयोरित्ये
वं व्यूहनप्रकारदर्शनार्थमुक्तं। अन्यदपि यथादेवता अन्याभवति तस्या अपि षष्ठ्यंतं ना[illegible]मकीर्तयित्वा जु
हूं व्यूहति। प्रथमांतं कीर्तयित्वा चोपभृतमिति। एवं यथादेवतं व्यूहतीति श्रुतत्वात्। तेनाग्नेयपुरोडाशदेव
तायां अग्नेः त्वा पांशुयाजदेवतयोः अग्नीषोमीयस्य विष्णोश्च सान्नाय्यदेवतायां इंद्रस्य महेंद्रस्य च यमंत्रम ३७
न्येकीर्तनं सिद्धं। तत्र श्वामावास्यायां सान्नाय्ययाजिनो ग्नेरग्नीषोमयोरिंद्रस्याजितिं। अग्निरग्नीषोमा

२ गिरोविंद्र इति व्यूहनमंत्रौ। असान्नाय्ययाजिनस्तु। अग्ने [illegible] रिंद्राग्न्योरुज्जितिं। अग्निर्विधृषिं द्राग्नीतम
पेसेवं विधौ मंत्रौ। पौर्णमास्यां तु प्रदर्शितौ। ननु एवं यथादेवतं व्यूहनी सामान्येनोक्त्वादा भागप्रयाजा
दिदेवतासंकीर्तनमपि सुकरं आवाहनादिवत् कस्मान्न भवति। उच्यते। मंत्रपाठे प्रधानदेवतयोरेवा
ग्नीषोमेन्द्राग्नयोः पाठादेवं यथादेवतभिमत्रैवं शब्दे • न प्रधानदेवतानामेव व्यूहनप्रकारस्योपदेशु
श्च यस्तात् प्रधानदेवतानामेव कीर्तने न व्यूहति। गांगदेवतासंकीर्तनेनेत्यवसीयते। अत्र हरिस्वामि
भिरेवं प्रयोगो दर्शितः। अग्नेरग्नीषोमयोरिति पौर्णमास्यां। अग्नेर्विंन्द्रोरिंद्रस्येति सान्नाय्ययाजि
न इति। तदभिप्रायस्तु पौर्णमास्यामग्नीषोमयोस्तंत्रेणोच्चारणं। अमावास्यां तु सान्नाय्ययाजि
नोपि विष्णुरूपां श्रुयाज इति।। ।। अध्वर्युर्वा ।। ।। अथवाध्वर्युः स्तुचौ व्यूहति। न स्वयं यजमानः।
एवमपि श्रुतत्वात्। अत्र अध्वर्युपक्षेमुक्ता व्यूहनमंत्रे विशेषमाह।। ।। अनु मा यत्वयं यजमानो वा
वाजस्येन नमिति पूर्वं।। ।।पूर्वे जुहू व्यूहनमंत्रे उज्जितिमनु मा यत्वयं यजमानो वाजस्येनं प्रसवेन न प्रो
हामीति विशेषः। कुतः। य • ध्वध्वर्युरग्नीषोमयोरुज्जितिमनु मा यत्वयं यजमानो वाजस्येनं प्रसवेन प्रो
हामीति श्रुतेः।।

मयोपमध्युहनमंत्रे विशेषमाह ॥ ॥यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टीत्युत्तरे ॥ ॥अध्वर्योर्व्यूह
नपक्षेऽउत्तरे त्वयमध्युहनमंत्रे तमपनुदं तुयमयं यजमानो द्वेष्टि वाजस्यैनं प्रसवेनापोहामीत्येवं वि द्वेष्टि यश्चैनं
श्चै द्वेषो भवति। अग्नीत् तमपनुद तां यमयं यजमानो द्वेष्टि [illegible]ज[illegible]नं द्वेष्टि वाजस्यैनं प्रसवेनापोहा
मीति पौर्णमास्यामिति श्रुतेः। अथामावास्यायामिति प्रकृत्य पौर्णमासवद्देवयजमानाध्वर्यु
कर्तृकोभयविधानस्यापि व्युहनस्य श्रवणाच्च। सोमे च सोमस्त्वतं रूपेमेदं क्षितिबहुवचनि
र्देशाद्भावकर्तावपि व्युहने बहुवचनं प्रयुज्यत इति गम्यते। मंत्रपाठे द्विवचनं यथाप्राप्तस्यो
पलक्षणार्थं। अग्नीषोमग्रहणवत्। अनेकयजमानके तु व्युहनस्य यजमानकर्तृकत्वपक्षे
इतराश्चारध्वएककर्तृव्यूहति। अनु ज्ञीयास्त्व वाजस्यावां प्रसवेनेति द्वयोः अनु ज्ञीयास्म वाज
स्यास्मात्प्रसवेनेति बहु[illegible]षु॥ अध्वर्युकर्तृकपक्षेपि। ऽजिलिमनु जयतामिमौ यजमानौ
वाजस्यैनौ प्रसवेन प्रोहामि। तमपनुद तां यमिमौ यजमानौ द्वेष्टि यश्चैनौ द्वेष्टि वाजस्यैनं प्रसवे ३८
नापोहामीति द्वियजमाने। बहुयजमानके ऽजिलिमनु जयंतिमे यजमाना वाजस्यैनान्प्रसवेन

प्रोक्षामि। सुदतांयमिमे यजमानाद्विषंतियश्चैनांद्वेष्टि वाजस्येनंइत्यादि। स्रुहनं च यदिष्टदेवतासं
कीर्तनेनष्टार्थं। कृतप्रयोजनस्य स्रुक्संस्कारार्थं च। अत एवाग्निष्वोपसमाययस्यादौ यावदुक्तोत्ता
पध्वि जेष्वपि भवति। तत्रापि स्रुचो देवतायाश्च संस्कारस्येष्टत्वात्। अत एवाह स्रुच्यकारः। स्रुह
नपरिध्यंजने रूहैकइति। जुहूस्थानापन्नानां च [illegible] शूर्पार्कपर्णदोहनोदुंबरस्रुवादीनामपि स्रुह
नं भवति। वसाहोमहवन्याश्च। षडवत्ता [illegible] पन्नत्वेस्थानापन्नत्वात्॥ ॥अभ्युध्य जुह्वाप श्चोपभृ ५
रिध्यानक्ति यथापूर्वं वसुभ्य इति प्रतिमंत्रं। स्रुहनानंतरं स्रुचावभ्युध्य स्वस्थाने प्रसानीय
जुह्वाकरणभूतयायथापूर्वमिसुपध्यानक्रमेण परिध्यानक्ति वसुभ्यइतिप्रतिमंत्रेकैकं। अथ मे ७
जुह्वापरिधीन् समनक्तीति प्रकृत सर्वस्य भूतत्वात्। परिध्यंजनं च वेदोपग्रहेण कार्यं। नन्वस्त्रेश्य
स्ते सत्रापामुपस्पर्शनं मंत्रस्यारोद्रत्वात्। वसुभ्यस्त्वयाणांपरिध्ययइति कात्यायनेन परिध्यंकत्व
स्योक्तत्वाच्च। अंतौभयोः [illegible] स्रुचोरभ्युक्षणप्रसासादनरूपः शम्यंतरीयो विशेषो ग्नीषोमीभिस मौ १
स्मिंसुत्रेइति नेह पुनरुच्यते॥ ॥प्रथमं परिधिं गृहीत्वा आ व्याहृषिसादइत्यादि ब्रूहीत्यंतं॥ ॥परि

ध्मंजनानंतरमध्वर्युः प्रथमं परिधिं गृहीत्वा आश्राव्याहेषितादैव्याइत्यादिकं प्रैषं होतारं प्र॰ साह ब्रवीति
अथ परिधिमभिपद्या आश्रावयति स आश्राव्याहेषितादैव्या होतार इत्यादेः श्रुतत्वात्। अभिपद्याभिगं
म्य हस्तेनालभ्येत्यर्थः। इषिताः संशिताः इत्यर्थः। आश्रावणार्थमेतत्परिधिग्रहणं। तत आश्रावणा
भावे दर्विहोमेषु न भवति॥ ॥पशौ प्रेष्येति॥ ॥पशौ सूक्तानुब्रूहीत्यस्य स्थाने सूक्ता प्रेष्येत्येवं मै
त्रावरुणं प्रसाह। न तु सूक्ता ब्रूहीत्येवं होतारं ब्रवीति॥ ॥ संज्ञानाथामिति प्रस्तरादानं॥ ॥प्रैषानं
तरमध्वर्युः संज्ञानाथामिति मंत्रेण प्रस्तरादानं कुर्यात्। हस्तेन प्रैह॰ णं कुर्यात्। एतेनैवाददीत संस्तरं न प्र
ज्ञानाथामित्यादि श्रवणात्॥ ॥विधृती स्थाने ब्रह्मा न तिष्ठेन्नं व्यंतु वय इति॥ ॥ततो स्तैणौ विधृते सौस्था
ने कृत्वा बर्हिषोयस्मान्हस्थानाद्गृहीते तत्रैव निधाय ततः एनं प्रस्तरं व्यंतु वय इत्युदिति मंत्रेणाग्र
मध्यमुलेष्वनक्ति। तदुक्तं मानवे। प्रस्तरमपादत्ते बर्हिषि विधृती प्रसवस्य जतीति। आपस्तंबो
पि। सा॰ ध्ये नाम मुदावहसजुह्वापरिधीननक्ति वसुभ्यस्त्वेति प्रथमं रुद्रेभ्यस्त्वेति दक्षिण
मादित्येभ्यस्त्वेत्युत्तरं न प्रस्तरे जुह्वं सादयेति संज्ञानाथामिति विधृतीभ्यां प्रस्तरमपादा॰ य

विधसत्पिसः स्वस्नुभुप्रस्तरमनक्तीति। कथं प्रस्तरमनक्तीत्यपेक्षायामाह॥ ॥अग्रं जुह्वां॥ ॥जुह्वां प्रस्तर
स्याग्रमनक्ति॥ ॥उपभृति मध्यं॥ ॥उपभृति प्रस्तरस्य मध्यमनक्ति॥ ॥मुलमितरस्यां॥ ॥प्रस्तरस्य
मुलं ध्रुवायामनक्ति। अत्र त्रिष्वपि स्थानेषु व्यंतु वय इत्ययमेवांजनमंत्रः। स वा अग्रं जुह्वामनक्ति मध्यमुपभृ
ति मुलं ध्रुवायामिति सो नक्ति व्यंतु वय श्रुतेः॥ ॥मरुतामिति नीचैर्हस्तान्तमादायानुप्रहरति॥ ॥म
रुतामिति सनेन मंत्रेण तमक्तं प्रस्तरं स्रुचो दक्षिणेन चापरेण चाहवनीयं प्रति नीचैर्भूमिसंलग्नमि
व हस्तादाहवनीयसमीपमानीय [illegible]ततः प्रस्तरादेकं तृणमादाय पृथक् कृत्वा जुह्वा प्रस्तरमनुप्रहर
ति प्रागग्रमुदगग्रं वा आहवनीय एव प्रक्षिपति। तं नीचैरिव हरति स हरति मरुतामिति। अथैकं तृ
णमपगृह्णाति तन्मुहूर्तं धारयित्वानुप्रहरति तं प्राच अनुसमस्यति अथोदंचमिति श्रुतत्वात्। आप[illegible]
स्तंबः। अनूच्यमाने सूक्तवाके सहशाखया प्रस्तरमाहवनीये प्रहरति न स्वाहा करोति न विधुनोति [illegible] ना वधुनोति वि
मार्ष्टि मानुमार्ष्टि। तथा तिर्यं चहस्तं धारयन्कर्षन्निवाहवनीये प्रहरतीति। अंजनानंतरं प्र[illegible]स्तरः
स्रुचां दक्षिणतः पश्चादनेयः स्रुक्षु वर्तमानस्याज्यस्य हविर्वि[illegible]ल प्रस्तरस्य पात्रत्वात् हविष्पात्रस्था

(margin) क्षिपति न प्रमा र्ष्टि न प्रति मृ ष्टा

२सामथ्यात्का छाक्षिनादिनाप्रासेवचना श्चा२

मग्रसिजामिसनेनपात्रस्यहविषोबर्हिभागोपदेशनात्॥ ॥हस्तेनाचरति॥ ॥आचरणंचोपसमूहनं।अ
ग्निमध्येप्रेरणं।तच्चात्रहस्तेनविधीयते।अग्नौकृतंप्रस्तरंहस्तेनाचरतिप्रेरयति।हस्तेनाप्यंगुलिभिरेव
नपार्ष्णिनेति।तमंगुलिभिरनयोयुप्यैरकृष्टैरितिश्रुतेः।युपच्छिमोहने।पुनःपुनःसंमुखंयेयुःहस्तेनैवप्रेर
येयुरित्यर्थः॥ ॥यजमानभागंचप्रोषिते॥ ॥यजमानभागंचहस्तेनैवजुहोति।प्रोषितेकृतप्रवासे
यजमानेचकारोहस्तेनतस्यानुकर्षणार्थः॥ ॥क्षत्रियवैश्ययोश्चनित्यं॥ ॥क्षत्रियवैश्ययोर्यज
मानयोर्नित्यंप्रोषितेअप्रोषितेचयजमानेयजमानभागंहस्तेनैवजुहोति।अहंत्वदस्मीति।अयंसर्वेषां
ब्राह्मणादीनांभागहोममंत्रः।स्वाहाकारांतत्वात्।सन्निधानाच्च।अत्रयमंत्रवर्णाज्जातवेदसोदेवता
त्वं।ततश्चेदंजातवेदसइतियागः॥ ॥सूक्तवाकांते॥ ॥प्रस्तरानुप्रहरणंयजमानभागहवनंचैतदुभ
यंसूक्तवाकांतेभवति।कुतः।सूक्तवाकेनप्रस्तरंप्रहरतीतिशाखांतरात्।अत्रसूक्तवाकप्रस्तरहरण
योरंगांगी—लक्षणःसंयोगः।कुतः।एतत्सूक्तवाकेनेतिकरणविभक्त्यानिर्दिष्टत्वात्।प्रस्तरमितिच
कर्माधिभक्त्या।सूक्तवाकएवयाज्या।प्रस्तरआहुतिरितिशाखांतरेश्रवणाच्च।तत्रायंयागप्र

तले२
२ हस्ताचरणा
च्छिकारस्युपञी
वभाह २

स्तरद्रव्यकोदेवताकश्च। अग्न्यादयो ह्यत्र संकीर्त्यंते। मंत्रश्च क्रियासाधनप्रकाशकत्वं घटत एव। तेनात्र प्र
स्तरद्रव्यस्याग्न्यादयो देवता इति गम्यते। अयमेवं नेमिभिर्भिरपि सिद्धांतः। तेन सूक्तवाकांते जुह्वा प्रस्तर
माहवनीये जुहोति। इदमग्नये सोमायेग्नीषोमाभ्यां देवेभ्य आज्यपेभ्योग्नये होत्रायेत्येवं त्यागश्च कर्तव्यः
।आतिथ्योपसत्सु इत्यादौ च प्रस्तरप्रहरणाभावेपि वचनात् सूक्तवाकस्य प्रयोगः। तथापि चेच्यायां श्रूय
ते। परिधिमभिपद्याश्राव्याहेषितारसादि। कर्कमते विपरीतं। कालार्थोयं संयोगः। प्रस्तरस्य हस्तेनै
वाहवनीये प्रक्षेपमात्रं। त्यागाभावश्चेति। प्रस्तरहोमानंतरमेव हस्तेन यजमानभागो होतव्यः। के
चित्तु यजमानभागस्य भक्षणकाल एव तद्भागस्य होममिच्छंति॥ ॥अग्नीदाहानुप्रहरेति॥ ॥प्रस्त
रग्रहणानंतरं अग्नीदनुप्रहरेत्येवमाहाध्वर्युं प्रति। अथाग्नीदाहानुप्रहरेति श्रुतेः। वरुणप्रघासेष्वनुप्रहरत
मिति। बहुषु दर्वसानीयास्वनुप्रहरतेति। सर्वत्र प्रैषोध्वर्योः कर्तृकस्य स्थापितत्वाद् अग्नीदिति वचनं॥
प्रास्तरणैः स्वात्मानमालभते॥ ॥ततोध्वर्युः प्रस्तराद्गृहीतं तृणमाहवनीये प्राश्य प्रक्षिप्य चक्षुष्पा
इत्यनेन मंत्रेणात्मानमालभते। हृदयदेशे स्पृशति च। तूष्णीमेवानुप्रहृत्य चक्षुष्पा अग्नेसि चक्षुर्मे पाहि

पूर्वत्रवा ९
चक्षुष्पा १

८१ श्री सासानमुपस्पृशतीति श्रुतेः॥ ॥ संवस्वागानग्नीदगंध्वर्यो वह स्वगादैव्या होतृभ्यः स्वस्तिर्मा
नुषेभ्यः शंयोर्ब्रूहीत्येतेषां ० संवदस्वागं श्रौषडित्यग्नीध्रे षमित्तरो व्यस्तासंब्रुतः॥ ॥ संवदस्वेत्या
दीनां यथाक्रमपठितानां० तेषां मध्ये संवदस्वागं श्रौषडित्येतान्यग्नील्ब्रूयात्। शेषमवशि
ष्टमगानग्नी श्रावय स्वगादैव्ये [illegible] नदित्तरोध्वर्युर्ब्रूयात्। उभावपि न निरंतरं। किंतु। व्यस्तासंब्रुतः।
पूर्वं संवदस्वेत्यग्नीदाह। ततोध्वर्युरगानग्नीदिति। ततोग्नीदगन्निति। ततोध्वर्युः श्रावयेति। ततो
ग्नी श्रौषडिति। ततोध्वर्युः स्वगादैव्या होतृभ्य इत्यादि। मंत्रार्थस्तु। अग्नीदध्वर्युं प्रेष्यति। संवदस्वेति।
मयासह शंयुवाकप्रैषार्थमिति। तमध्वर्युः पृच्छति। किमगमत्प्रस्तर शरीरो यजमानः स्वर्गलो
कं किंरग्धः प्रस्तरइत्यर्थः। अग्नीत् [illegible]गन्निति प्रतिवचनं ददाति। गतो यजमानः दग्धः प्रस्तरइत्यर्थः।
अध्वर्युः स्वाह। यध्येवं ततः शंयुवाकपरिधिप्रहरणयोः कालेवर्तते। ततश्च श्रावयहोतारमाव
र्जयेत्यर्थः। अग्नी त्वाह श्रौषट्। ८८णोसेवायमवहितो ब्रूहित्यं यद्धि वक्षितमिति। स्वगादैव्याहोतृ ८१
भ्य इति शंयुवाकप्रैषः। हे होतः [illegible] शंयो र्बार्हस्पत्यस्येत्येरुषैरार्षं ब्रूहि स्वगा स्वस्थानगामिनं देवेभ्यो।

होतृभ्यः परिधिशरीरेभ्योऽप्ययं तां परिधयद्दसर्थः। मानुषेभ्यस्तु होतृभ्यः स्वस्तिरविनाशो रूपीसेवंरू
पंवाभ्यं ब्रूहि। अयं तावद्ब्राह्मणोऽर्थः। श्रुतिस्तु गुह्यमर्थांतरमाह॥ ॥परिधीननुप्रहरतु यं परिधिमि
ति प्रथममितरौ च युगपदग्नेः प्रियमिति॥ ॥ततोऽध्वर्युर्हस्तेनैव परिधीनाहवनीये प्रहरति प्रक्षि
पति। तत्र प्रथमं परिधिं यं परिधिमिति मंत्रेण प्रक्षिपति। इतरौ द्वे दक्षिणोत्तरौ परिधी युगपत्सहैव ह
स्तेनानुप्रहरति अग्नेः प्रियमिति मंत्रेण। अथ परिधीननुप्रहरति समध्यमेवाग्नेपरिधीननुप्रहरति
यं परिधिमिति अग्नेः प्रियं पाथो नमितीतरावनु समस्यतीति श्रुतत्वात्॥ ॥स्रुचौ प्रतिगृह्णाति सं स्र
वभागा इति संस्रवां जुहोति॥ ॥ततोऽध्वर्युः स्रुचौ जुहूपभृतौ प्रतिगृह्णाति उभाभ्यां हस्ताभ्यां गृह्णा
ति गृहीत्वा च सं स्रवभागा इति मंत्रेण ताभ्यां स्रुग्भ्यां संस्रवां जुहोति। अथ जुहूं चोपभृतं प्रतिगृह्णा
ति सर्वे विश्वेभ्यो देवेभ्यः संप्रगृह्णातीति श्रुतत्वात्। मंत्रलिंगादत्र विश्वेषां देवानां देवतात्वं। सर्वे वि
श्वेभ्यो देवेभ्य इति वाक्यशेषाच्च। ततश्च जुहोतिषु विश्वेभ्यो देवेभ्यः स्वाहेति प्रयोगः। उभयोः
स्रुचोः प्रग्रहण वचनादुभाभ्यामपि होमः। अन्यथोपभृतो जुह्वाः समानीय होमः स्यादिति। मंत्र

स्रुसंस्रवहोमेवमग्निहूहवण्यां। स्वाहाकरोति। न वषट्। वषट्कृतं संहिमेवमस्यैतद्भवतीति श्रुतेः। प्रतिपत्त्य
र्थं कर्मचैतत्। तत्रांतापरिधिं नैयावदुत्तरे पप्रवर्तते। सं■स्रवाणामविशेषितत्वात्स्यसाधनक्रिया
गां■गता। तत्रस्य सर्वत्र प्रवृत्तिः॥ ॥घृताचीइति धुरि निदध्या■सनसि चेद्ग्रहणं॥ ॥घृताचीस्थ
इत्यनेन मंत्रेणाध्वर्युरनसो धुरि स्रुचौ निदधाति। स्थापयति। चेद्यदि अनसि हविर्ग्रहणं प्राकृतं
भवति। स यस्यानसि हविर्गृह्णाति नसस्तस्य धुरि विमुंचतीति श्रुतेः। चरितार्थत्वात्। स्रुवसंस्कारो
यं। तेनांतापरिधि यावदुत्तरयोरपि भवति। पत्नौ स्रुग्बहुत्वे सर्वासां धुरि निधानं। घृताच्यस्थ धुर्याः
पातं सुम्ने स्थः सुम्ने ■ मा धत्तेति चोहः। गृह्णमेधीयायामेकस्यां जुह्वां घृताच्यसि धुर्यौ पाहि सु
म्नासि सुम्ने मा धेहीति विशेषः। स्फ्ये पात्र्यां चेत्॥ ॥चेद्य■दि पात्र्यां हविर्ग्रहणं कृतं तदा स्फ्य
वग्रेऽनंतरां सदेशे ऽग्निहिते स्रुचौ सादयति। प्रागग्र एव। यस्यो पात्र्यै तस्येति श्रुतेः। अत एव
वरुणप्रघासेऽध्वौ स्रुचः संप्रगृह्य स्फ्ये सादयतीति नियमात्पात्र्या एव हविर्ग्रहणं नियमेनावसी
यते। हविर्ग्रहणाभावे चोपसद्यस्यादौ भूमावेव निधानं न स्फ्ये न चानसि॥ ॥यज्ञनमध्वनदिति

वेदिमालभते ॥ ॥ मंत्रलिंगाद्यजमानो वेदिमालभते यश्शंनमश्च्यवदिति मंत्रेण। स यत्र शंयोराह
तदभिमृशतीति यच्छंनमश्च्यवदिति श्रुतेः। स चायं वेदिसंस्कारो वेदिमित्तिद्वितीया विभक्त्या
वेदेः संस्कार्यत्वावगमात्। स च समिष्टयजुर्होमार्थः। ध्रुवप्रयु[illegible]त्वात् तच्च समिष्टयजुषोभा
वेन भवतीति कर्कः। अन्ये तु स यत्र शंयोराहेत्यभिमृशतीति। शंयोर्वाक्सहभावश्रवणा
च्छंयोर्वाकाभावेन भवतीत्याह। अपरे त्वाहुः। स यदतिरेचयति तन्नमस्कारेण शमयतीत्यर्थवा
दाद्दभिमर्शनस्य च्युतातिरिक्तशमनार्थत्वावगमात् समिष्टयजुरभावेपि शंयोर्वाकाभावेपि
सर्वत्राभिमर्शनं भवतीति। युक्ततरमिव चैतत्प्रतिभाति। आपस्तंबसूत्रेयं पदार्थो याजमानकांडे
पठितोस्ति। अनेन यजमानके चैन एवेतरे रन्वारब्धे वेदिमाहमालभते। स्वस्विनेष्टे संस्तिष्ठस्वे नः
त्रियथार्थकृतौ। कर्कमते त्वध्वर्युकर्तृकत्वाद्दुहाभावः॥ ॥ वेदं होतास्त्रुवस्त्रुवमध्वर्युराज्यस्था
लीमग्नीदादाय॥ २॥ पत्नीसंयाजेभ्यो गार्हपत्यं गच्छंतीति॥ ॥ततो होता स्वयमेव वेदमादाय
अध्वर्युः स्त्रुवस्त्रुवमादाय अग्नीदाज्यस्थालीमादाय पत्नीसंयाजेभ्यः पत्नीसंयाजान्कर्तुंगा

९३

हि पत्यं प्राप्य एतेन पथा । तेनैव पत्नीसंयाजा इति श्रुतेः। तत्र पत्नीसंयाजयिष्यंतः प्रतिपरायंति जुहूं स्रुवमध्वर्युरादत्ते वेदं होता न्य
बिलाप्पिनीमग्नीदिति श्रुतेः। तत्राध्वर्योर्गमनाय मार्गमाह ॥ ॥ अध्वर्युः पूर्वं गार्हपत्यसमेत्य ॥ ॥ अ वेदक्षिणेन

अंतरालेन ॥ ३

ध्वर्युः गार्हपत्यं पूर्वं दक्षिणेनेत्य गार्हपत्यदक्षिणाग्न्योरंतरेणागत्य पत्नीसंयाजैश्चरति। तस्मात्पूर्वे
णैव गार्हपत्यमंतरेणाहवनीयं वैतीत्यादि श्रुतत्वात् ॥ ॥ पूर्वेण ॥ ॥ अथवाध्वर्युराहवनीयं
पूर्वेण परीत्य दक्षिणतो वितानेन गार्हपत्यं गच्छति। तदु केषामध्वर्युः पूर्वेणाहवनीयं पर्येतीति श्रुतेः। अ
परेणांतरेण पत्नीमेकेषां ॥ ॥ अथवाध्वर्युरपरेण गार्हपत्यं यजतीदेशं प्रतिगच्छति। तत्रापि मार्ग

ग्नीध्रांतरेण ॥ ७

द्वयं। एकेषां मते पत्नीमंतरेण नैऋत्यादिगुणविशिष्टां पत्नीमग्नीध्रंचांतरेण दक्षिणतो यजतिस्था
नेन गच्छति। अपरे त्वेषां मते पत्न्या बाह्यत इति स[illegible]च्यते। अचनेनो हैव पत्नीमेकेषामध्वर्युरे
तीति। अथ अंतरेणो हैव पत्नीमेकेषामेकेषामध्वर्युरेतीति वचनात्। पत्नी तु गार्हपत्यान्नै
ऋत्यामुपविष्टा। अध्वर्यु[illegible]णा च गार्हपत्यस्य दक्षिणतो गंतव्यं। गार्हपत्यमपरेण च। अतो विकल्पो

ण ९ ।
९३

लरेण बाह्येन वा पत्नीमिति। स्रुवस्रुवग्रहणमुपलक्षणार्थं प्रासायादंभतो निरासार्थं। अग्नीध्रापि ग्रहणार्थं ॥ ११

सेबः। आज्यलेपान्प्रक्षाल्य सस्रुवे जु[illegible]हुपभृतौ वध्वर्युरादत्तेवेदं होता स्फ्यमाज्यस्थालीनु
दकमंडलुं चाग्नीध्रआग्नीध्रः प्रथमाः पत्नीसंयाजयिष्यंतः प्रसं चोयं सग्रहणं गार्हपत्यं दक्षिणेनाध्व
र्युः प्रतिपद्यतेउत्तरेणान्निति। स्रुग्भ्यां स्रुवेण चपत्नीः संयाजयं तिवेदमुपभृतेवक्ता जुहूंस्रुवेणचे
तेके। अपरेणगार्हपत्यमूर्ध्वज्ञान्तुरासीनाध्वाने नवोपांशुवापत्नीसंयाजयंतिदक्षिणतोध्वर्युरुत्त
रआग्नीध्रोमध्येहोतेति। एवं सर्वसत्रेषु॥ ॥उपविश्यदक्षिणंजान्वा[illegible]च्य॥ ॥अध्वर्युर्गार्हप
त्यस्यदक्षिणतईशान। भिमुखउपविश्यदक्षिणंजान्वाच्य जुहुमो। पात्नयिता सोमाक्षीन्यजति। यत्रति
ष्ठन्तिष्ठन्होमे ह्यासेवचनादुपविश्यदक्षिणंजान्वाच्येति॥ ॥एवं सर्वत्रोपविश्यहोमेषु॥ ॥नने
नलमन्त्रैव। सर्वत्र सर्वेषूपविश्यहोमेषु पूर्वाध्यारदक्षिणाग्निहोमकर्मापवर्गहोमयुपाहुतिसावि
त्रहोमादिष्वेवं भवति। एवं मिसुपविश्यदक्षिणं जान्वाच्येति गह्यते॥ ॥उपांशु चरंति॥ ॥पत्नी
संयाजैरुपांशु चरंति। तथा महापितृयज्ञे। तेनोपांशुश्चरंतीति प्रागग्नीषोमीयादिष्टि॥ ॥देवता
न्यत्र॥ ॥अन्यत्रेति चरणशब्दादन्यत्र। यत्र चरणशब्दो न भवति। यथोपांशुप्रकरणे ऐंद्रः सौत्राम
१ तेवाआज्यहविषोभवंतितेनोपांशु[illegible]चरंतीतिश्रुतेः॥ ॥चरणशब्दे सर्वं॥ ॥यत्र चरणशब्दो विधित्वाश्रूयेत तत्र सर्वमुपां
१।२। पितृयज्ञउपांशुचरणमिति। पुनराग्नेयेपि चकपाले च। तेनोपांशुचरतीति। उपांशु चरंति १।२।
शुर्वेति।१।१।

दे·व·भा·त·

२ चतस्रोदेवताय जतीति प्रकृस्यता आज्यसहविषो भवंति। अथसोमंयजति। अथत्वष्टारंयजति ३

ष्यां प्रथमो वामोध्वस श्चेत्तिदेवसुदेषि काहवीए छिन ■ न्दुहवीए वीति च। तत्रदेवतोपांशुभवत्तिनान्यत्।
॥ यजति सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमिति॥ ॥ स्थाल्यानयनस्य दृष्टार्थत्वात्। स्थालीस्थे
नाज्येन चतस्रोदेवतायजति। सोमं प्रथमं। त्वष्टारं द्वितीयं। देवानां पत्नीस्तृतीयं। अग्निं गृहपतिं च
तुर्थीमिति। अथ देवानां पत्नीर्यजति। अथाग्निं गृहपतिं यजतीति श्रवणात्॥ ॥ तृतीये तर्द्धानं पुरस्ता
त्॥ ॥ तृतीये पत्नीसंयाजे पुरस्तात् घादिना अंतर्द्धानं करोति। स यत्र देवानां पत्नीर्यजति तत्पुरस्तात्ति
रः करोतीति श्रुतेः॥ ॥ पत्न्यन्वारभतेध्वर्युं॥ ॥ अधिकारात्तृतीये एव पत्नीसंयाजे पत्न्यध्वर्युम
न्वारभते। स चायमध्वर्युसंस्कारो द्वितीयानिर्द्देशात्। अतः पत्न्यभावेपि येन केन चित्कर्तव्यः॥ ॥
॥ शंय्वंतं भवतीडांतं वा॥ ॥ वा शब्दस्य शंय्वंतेन संबंधः। तेनायमर्थः। तदिदं पत्नीसंयाजकर्म स्वयं
शंय्वंतं भवत्येव। शंय्वंतं वा भवति। शंसुर्भवितीन वेसर्थः। अत एतदिडांतं भवतीति नियमेनेडांतं
श्रूयते। तथा ऽत्तो प्रकृस्यैव रूपं ह्रीयते स यदि प्रकृरस्य रूपं कुर्याद्दस्यैकं त्वण माध्विष्येत्तेवमा
दिकं कर्मेयदि शब्दा द्धिकल्पेन विधीयते। ततश्च गृहपतियागानंतरं पूर्ववदिडां पंचावत्ता ■

माध्येनावदायेडएं होत्रे प्रदाय विसर्जेद्दक्षिणातिक्रामतीडां प्रतिगृह्य होतुरंगुलिपर्वणी अनक्त्यवां
तरेडमादधाति पुर्ववद्दिडां च सर्वे प्राश्नंति मयीदमिति यजमानो जपसुपहूतां प्राश्नंति यु न्यायज
मानस्य पात्रयोरभावाद्दर्भैर्मार्जयंते परेण वेदिं सुमित्रियानइत्येतावदिडांतं भवतीत्यनेन गृ
ह्यत इति कर्काचार्याः। चतुर्गृहीतामिडामवदाय होतुः स्रुवेणांगुलिपर्वणी अनक्ति अपरमग्रे यपु
र्वंतस्य पाणौ पंचाविंदुमिडामवदाय होत्रे इडामवदधाति उपहूयमानां इडाम प्राश्नासीतेति। आ
पस्तंबमानवतैत्तिरीयसूत्रेषु चतुर्हस्त एवावदानमुक्तं न हिडायां। तथा चापस्तंबः। पुर्ववद्होतुरंगुलि
पर्वणी अक्तोपस्थ छेदकाय होतुर्हस्ते च चतुर आज्यबिंदुमिडामवधाति षड्गृहीध्य उपहूयमानाम
प्राश्नंतइति॥ ॥शंयुवंते वेदस्तरणमादायानक्ति प्रस्तरं स्रुचि स्रुवे स्थाल्यां च॥ ॥शंयुवंते कर्म
णि क्रियमाणे एष विशेषः। वेदस्य तृणमादाय स्रुचि जुह्वां स्रुवे स्थाल्यां च प्रस्तरवदनक्ति। प्रस्त
रवदिति समग्रमध्यमूलानि क्रमेण व्यंजनयोरभिसंजनमंत्रश्च। स यदि प्रस्तरस्य रूपं कुर्यात् वेदस्ये
मुणं कं तृणमादिध्या मूंतं जुह्वामनक्ति मध्यं स्रुवे बुंध्नं स्थाल्यामिति श्रुतेः। अपरे त्वाहुः। प्रस्तर

दे·भा·त· ८३ भयं गच्छामि होमार्थं। अग्नेर्दध्नाय विसर्जनेन संस्रवभागं जुहोति। अथ जुहूं उपस्रुतं च संप्रगच्छामि॥८॥

७५ बर्हि[illegible] निवपति ना अयं मध्यं मुखं चेत्तावदेव गच्छते। एतावतएव श्रुतत्वा
त्। न मंत्रो श्रुतत्वातिति। युक्तं चैतत्॥ ॥अग्नीधामनुप्रहरेत्॥ ॥ततोग्नीदध्वर्युमनुप्रहरेत्साह। अथाग्नी
धानुप्रहरेति श्रुतेः॥ ॥प्राशित्रणादिपूर्ववत्॥ ॥प्राशित्रणं चक्षुष्पा इत्यादिशंयोर्ब्रूहीत्यंतं पूर्ववद्भवति। अ
त्रापि तथैव श्रुतत्वात्। तूष्णीमेवानुप्रहृत्य चक्षुष्पा अग्नेसि चक्षुर्मे पाहीत्यासानमुपस्पृशति। अथाह संवदस्व
अगानग्नीदगंश्रावय श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहीति॥ ॥शंय्वंते स्रुचं स्रुवं प्रति
गच्छाम्यग्नेर्दध्नायविति॥ ॥शंय्वंते कर्मणि क्रियमाणे सति अध्वर्युः स्रुक्स्रुवं प्रतिगच्छामि संस्रवाग्नये संप्रद
गच्छाम्यग्नेर्दध्नाय विति श्रुतेः। एतत्स्रणं जनादिहोमांतं गार्हपत्यस्योत्तरतउपविश्य कर्तव्यं। अत्र मंत्रवर्णाद्ग्नि
र्दध्नायुरस्मीति तमो देवता। तत्र श्वेदमग्नये ऽदध्नायवे श्मीतम्याय न ममेति त्यागः। एतदपि गार्हपत्ये एव जुहोति
तस्यैव प्रस्तुतत्वात्। प्रतिपत्त्यर्थं कर्म चैतत्। पत्नीसंयाज शेषसाध्यत्वात् तदभावे न भवति। पशावपि न भ
वति। संस्रवाभावेनार्थलोपात्। अदध्नायुरसभावेपि पशौ शंयोर्भवतीति युक्तमिति याज्ञिकाः। पत्नीसंया ७५
जानामर्थकर्मत्वात् यावदुक्तेनापच्छिन्नेषु निवर्तिः॥ ॥सव्येनावसदक्षिणाग्नौ जुहोत्यग्नयइति सरस्वत्याइति च॥

तं प्राक् तं गार्हपत्यसमभिं सव्येनाग्रसाप्रदक्षिणं परीत्य दक्षिणाग्नेः पश्चादुपविश्य दक्षिणाग्नौ सव्यं जुहीन
मा व्यंजुह्वा जुहोति समिदाधानपूर्वकं अग्नये संवेशपतये इति प्रथमाहुतिं सरस्वत्या इति द्वितीयां। एतदप्यर्थ
कर्म। तत्र च यावदुक्तं तावदपि च नेषु न भवति। सव्येनेत्युक्तो गपत्नी संयाजांते अन्वीत्य निभ्रमणं। तेन यदा
गार्हपत्यदक्षिणाग्न्योरंतराले नागतस्तदैव भवति। नान्येन मार्गेण गमने॥ ॥उलूखलमुसलेयच्चाप्यूर्ध्वमा
शि होषदृषदि यत्कपाले। उलूखलो विपुषः संस्कृहीमिस ताः संतु यजमानस्य कामाः स्वाहेति पिष्टलेपं जुहो
ति॥ ॥उलूखले मुसले दृषदनेन मंत्रेणाध्वर्युः पिष्टलेपाहुतिं जुहोति। अधिकाराद्दक्षिणाग्नावेव। अ
त्र विप्रतिपत्तिः। केचिदाज्यं जुह्वति। केचित्तु पिष्टसंबंधिनो लेपानिति। येनु आज्यं जुह्वति तेषामयमभि
प्रायः। पिष्टलेपामिति द्वितीयैकवचनमाहुतिविशेषणं। पिष्टलेपसंबंधेनहूयमानत्वात् पिष्टलेपपदेन सा विशे
[illegible]ष्यते। ननु तर्हि पिष्टलेपा एव कुतो न हूयंते। तेषां अभावात्। नहि पिष्टानां लेपाः सं[illegible] तिपश्च प्रतिपत्त्यर्थ
मियमाहुतिः स्यात्। पात्र्यलिप्ता अपि नैते संभाव्यंते। तेषां तु वचनात् प्रक्षालनपूर्वकमानयनरूपा प्रति
पत्तिरुक्ता नामपि तेषां करणं न ह्यापनमुपदिष्टं। तत्र मध्ये च पात्र्यंगुलिस्थानां लिंगमपि नास्ति। अ

७२६

नो॰ चरुं विना पात्र्यं गुप्ति संसर्गो हीतुं न शक्यते। प्राग्गृह्य प्रतिपत्ति विरोधात्। उलूखलादिषु तु पिष्ट
लेप संभावनैव नास्ति। तदानीं हविषः पिष्टताभावात्। दृषदुपलयोश्च संश्लिष्टानां ग्रहीतुमशक्यत्वा
च्च। अतो विप्रुड्ढोमे देवतार्थं गृहीतस्य हविषो यदुलूखलादिषु श्लिष्टं ग्रहीतुमशक्यं च। तेन विनावै
गुण्यं माभूदिति तत्प्रायश्चित्तत्वेन तत्प्रतिनिधिभूतमाज्यं होतव्यं। तथापि विप्रुड्ढोमे भिन्नकाले ग्रहण विप्र
काले वै तस्मात्तः स्कन्नानां सोमबिन्दूनां स्कंदनप्रसंगाय परिहारार्थं तत्प्रतिनिधित्वेनाज्यं कुर्यात्तेन च
नात्। २ नमस्त्राप्ति। विप्रुड् ग्रहणं चांगप्रधानहविर्मात्रोपलक्षणं। उलूखलो विप्रुष इति लिंगात्। तेनांग
प्रधानहविषां आज्यपयश्च पुरोडाशानामवयवस्यावृत्त श्लिष्टस्य ग्रहीतुमशक्यस्य प्रतिनिधि

पयस्या॰

भूतोयमाज्यहोमः। अतस्य चरू सान्नाय्यादिहविष्कृ पीयमाहुतिर्भवति। अवदानाभावे विप्रुट् लेपे
पाभिप्रेषा संज्ञा। स्तनन्नस्कंतमिं जुहोमि स्थानन्तानां जुहोमि सप्रस्तरोहं जुहोमीत्यादिवत्। तस्मादंगप्रधा
नहविषां स्वावयवहीनता निमित्तनैगुण्यनिरासार्थोयं प्रायश्चित्तहोमः। तेन परशोरप्ययमिष्यत एव। ७२८
अतः पात्रुक्तात्कर्मीयोमीयसवनपशावादौ दधिनाग्निहोमो लक्षः स्यात् पुरोडाशस्य चपशवर्थस्येन सतः

सव[illegible]नीयपुरोडाशप्रभृतिसर्वतंत्रोपकारकत्वात्। पश्वंगक्रमत्वात्तु ष्ठानां नप्रासंगिकत्वायामिति कृत्वाप्रतिसवनपृ
थग्दक्षिणाग्निहोमसहचरितत्वाच्चैवं[illegible]रूपस्यापि दक्षिणाग्निहोमभा[illegible]वे प्रायणीयातिथ्यादावस्याभावः। वैध्यालं
भवत्। यथान्युनातिरिक्तदोषोपशमनार्थेपि वैध्यालंभः संयोर्वाकसहचरितत्वात्तदभावे आतिथ्यादौ नाक्रम
ते। एवमयमपि। अस्य होमस्य प्रायश्चित्तार्थत्वं आज्यसाधनत्वं चोक्तं तैत्तिरीये। अथस्रुचि चतुर्गृहीतं गृहीत्वा
पसलविपर्यासवदन्वाहार्यपचने प्रायश्चित्तं जुहोत्युलूखले मुसले दृषदि कृष्णाजिने [illegible] सक्तपाले विप्रुषः सय
जामि विश्वेदेवा हविरिदं जुषंतां यज्ञे या विप्रुषः संति बह्वीरग्नौ ताः स्विष्टाः सुहुता जुहोमि स्वाहेति। यागश्चात्रेदं वि
श्वेभ्योदेवेभ्य इत्येवं कर्तव्यः। मंत्रलिंगात्। येतु पिष्टलेपानां होममिच्छंति। तेषां पिष्टलेपानितिद्वितीया बहुवचनं।
पिष्टसंबंधिनो लेपाः पिष्टलेपाइति तान् जुहुं जुहो[illegible]तीति होमविधानादेव च पात्र्यंगुली संलग्नान् पिष्टलेपा
नुपादाय होमार्थं स्थापयित्वा पात्र्यंगुलिप्रक्षालनं कर्तव्यं। तन्मते च प्रतिपत्त्यर्थकर्मैव पुरोडाशसाधनके
एव कर्मणि भवति। नाज्यादिसाधनके। पिष्टलेपहोमप्रकारस्तु शाखांतरे। आपस्तंबः। फलीकरणहोमं पूर्वमे
नद्वाविपरीतं च [illegible] स्रुचि गृहीत्त आज्ये फलीकरणान्नाप्याम्नेदध्यायो शीतनोदिति जुहोति। एवं पिष्टलेपानुलूखले मुस

न्तरितैस्तिरीय ‥ मंत्रपाठोस्ति। मानवे च। तस्याः पुनर्ग्रही होमविष्टलेपं चरिष्यत्तमभिघार्य। उ‥खले मुसले यत्
पात्रेषु पलाशांहुत द्विधारयिष्यामि। अवप्रुषो विप्रुषः संस्नामि विश्वे देवा हविरिदं जुषंतां स्वाहेति। केव
लाज्यहोमपक्षे आज्यमिश्रपिष्टलेपहोमपक्षेऽपि सर्वसूत्रेषु विश्वेदेवमंत्रस्य लिंगहोममंत्रेर्णनात्तदुद्देशेऽद
नैव सागः कार्यः। सर्वसूत्रेष्वपि आज्यहोमपक्षे पक्षांतरस्थे होमस्य अंगप्रधानभूतप्रस्तुतसर्वदेवताहवि
षां च चित्तं श्लिष्टानां स्वावयवन्यूनता निमित्त प्रसवायपरिहारार्थं ‥ नत्तु तन्निधिभूतेनान्येन क्रियमाण
त्वाद्देवतांतरस्यानुपदेशात् अप्रस्तुतसर्वदेवतानां तत्संबंधि द्रव्यस्य ताभ्य एव होतुमुचितत्वात्। अत एव
वि‥घेमोदेवेभ्य उद्देशाः। विश्वेदेवाः सर्वे देवा इति यास्कोक्तेः। किंच। अनादिष्टदेवतानां मंत्राणां प्रस्तुतदेवता
कत्वमेव युक्तं। कुतः। तथैवाऽनादिष्टदेवतामंत्रास्तेषु देवतापरीपेक्षायत्तद्देवतः स यज्ञो वा यज्ञांगं वात्तद्देवता
भवंतीति यास्कोक्तेः। अत्र यज्ञांगस्य हूयमानस्याज्यादिद्रव्यस्य मंत्रलिंगेन प्रस्तुतबहुदेवतासंबंधित्वं ग
म्यते। बहूनां चात्राग्निदेवताः प्रस्तुताः अतश्च बहुदेवतात्वात् विश्वेषां ‥ देवानां देवतात्वं युज्यत एव। यत्किं
चिद्बहुदेवतं तद्वैश्वदेवानां स्थाने युज्यत इति यास्कोक्तेः। याज्ञिकास्तु पिमनोन्याः कृत्तप्रस्तुतसर्वप्रधानदेव

चिर३ अहोताति

श्रुचः। तान्समादः। कर्काचार्यास्त्वेवमाहुः। एकस्यैव देवस्य सिद्धत्वाल्लिङ्गमर्थमनेकदेवताहं कल्प्यते ये इति प्राथम्याद्दै
वात्राग्निर्देवतेति। अतस्तन्मन्त्रेण कृत्तिविकृतिरूपसर्वकर्मसु इदमग्नय इत्येवास्य त्यागः। वैतानसूत्रेऽपि इ
त्येपरहोमानन्तरं प[illegible]हियते। अग्नीध्रः संमार्गमग्नौ प्रहरतीति। संमार्गनिध्मसन्नहनं। अग्निरात्रव[illegible]नी
यः॥ ॥पत्नी वेदं प्रमुञ्चति वेदोसीति॥ ॥वेदोसीत्यनेन मन्त्रेण पत्नी वेदं प्रमुञ्चतीत्यर्थः। अथ वेदं पत्नी विस्र
ꣳसयतीति श्रुतेः। पित्र्यायां चास्य मन्त्रस्य वेदबंधनेविमोके त्योहः। येन त्वं देवपर वेद देवपितृभ्यो वेदो भ
वेति। अनेकयजमानके च तेनास्मभ्यं वेदो भूया इति बहुषु। तेनावाभ्यां वेदो भूया इति द्वयोः। अनेकपत्नी
के एकैव विमुञ्चति परार्थत्वात्। अत एव बंधनवद्बहुत्वं न भवतीति कैश्चित्। भवतीत्यपरे॥ ॥योक्त्रं च प्र
मामुञ्चामीति॥ ॥चकारात्पत्नी योक्त्रं प्रमुञ्चति प्रमामुञ्चामीति मन्त्रेण। योक्त्रविमोको यावदुक्तं तावद्धिन्ने
यं भवति वेदविमोकश्च। स्तुतप्रयोजनकत्वेन प्रतिपत्तिरूपत्वात्॥ ॥स्तृणात्यावेदेः॥ ॥वेदं तेनाऽऽवे
देः स्तृणाति। गार्हपत्यस्योत्तरप्रदेशमारभ्य वेदिपर्यन्तं। आङ्त्र मर्यादायां। द्रव्यविषयत्वात्। तम्मा वेदेः स
ꣳस्तृणाति इति श्रुतेः। आङ्त्राभिविधौ वेदिं व्याप्येति। योषा वै वेदि वृषा वेदः परिगृह्णत्वै योषा वृषणꣳ

दे·भा·ऋ

७८

शोन इति वचनादिति हरिस्वामिनः। शांखायने तूत्तरेण गार्हपत्यमा बर्हिषस्त्री होतीति। आपस्तंबः। तंतुं तन्वन्निति
वेदं स्त॰णाति गार्हपत्यात्संतत्य संततमाहवनीयात्स्तृणात्या वेदेरिति। मानवे। होतावेदं स्तृणाति गार्ह-
पत्यादध्यासंततमाहवनीयादिति। अतः शाखांतरवचनादा वेदेरियमभिविधौ व्याख्येयाः॥ ॥ध्रौ-
वं समिष्टयजुर्जुहोति देवा गातुविद इति॥ ॥ ध्रौवमाज्यं जुह्वां कृत्वा देवा गातुविद इति मंत्रेण समिष्टय-
जुर्जुहोति। अथ समिष्टयजुर्जुहोतीति श्रुतेः। समिष्टयजुरिति कर्मणः संज्ञा संव्यवहारार्था। समिष्टयजु-
रंतं भवतीत्येवमादौ। वेदस्य विस्रंसनात्तु शेषग्रहणम्। ततश्चात्र स्वाहा वातेधा इति मंत्रलिंगात्। तत-
श्च जुहोतौ वा तायस्वाहेति होमः। ■ अर्थकर्मेति दिति निवर्तनः। ततश्चांतापदिष्टे यावदुक्तेषु निवृत्तिः।
प्रवृत्तिरिति तत्रटीकायां। तानि वा एतानि नव समिष्टयजूंषि जुहोतीति सत्र हरिस्वामिभाष्येपि पति-
पत्तिर्हि समिष्टयजुरित्युक्तं। ततश्चांतापदिष्टत्वादिष्टिष्वपि भवति॥ अत्राहापस्तंबः। पूर्ववद्ध्रुवामाप्या-
यदेवा गातुविद इति संततं वेदिं धुर्वं स्तिर्णन् ध्रुवाया समिष्टयजुर्जुहोति। मानवे। स्रुवं ध्रुवामाप्याय्य
बर्हिषोदरभिस्थि मपाकृत्य अंतर्वेदि धुर्वं स्तिर्णन् देवा गातुविद इति ध्रुवया संततं समिष्टयजुर्जुहोत्यामंत्रस्य

७८

समापनात्स्रुक्स्वाहाकाराद्दर्भमुष्टिमनुप्रहरतीति। काष्ठे च ध्रुवया सं स्थितयजुर्जुहोति देवाग। वेधा मुध्वास्ति
विद इति संततं यजमानभागं च प्रवसतः समिष्टयजुषा सह प्रवसेति जुहोतीति शांखायनः। आप इन्
स्तंबोपि। यदि यजमानः प्रवसत्प्रजापतेर्विभागस्समो लोक इति ध्रुवायां यजमानभागमवदध्यायस
मिष्टयजुषा सह यजुषा दितिः॥ ॥ बर्हिः संबर्हिरिति॥ ॥ सं बर्हिरितिमंत्रेण जुह्वा बर्हिर्जुहोति। अथब
र्हिर्जुहोतीति वचनात्। प्रतिपत्तिरियं। चरितार्थत्वात्। तत्तस्यां तापच्छिन्ने यावदुक्तं च प्रवर्तते। नाश्रा
दोशादौ सर्वहुतत्वेनान्यहोमः॥ ॥ वेद्यां प्रणीता निनयति परीस कस्वेति॥ ॥ अध्वर्युः स्वयमेवा
हवनीयं परीसर्वे वेदेर्दक्षिणभागे उदङ्मुख उपविश्य प्रणीता आदाय वेदिमध्ये आसाद्य तत्रैव नि
नयति कस्वेति मंत्रेण। अथ प्रणीताद्दक्षिणतः परीसनिनयतीति प्रवक्ष्यस निनयति कस्वा विमुंच
श्र तीति [illegible] स। आपस्तंबः। अंतर्वेदि प्रणीता आसाद्य विमुंचतीति। अत एव पूर्वं वेदिमध्ये अनासा
दने गम्यते। प्रतिपत्तिरियं चरितार्थत्वात्। तत्तस्यां तापच्छिन्नेपि भवति। नाशदो [illegible] शादौ च प्रा
यश्चित्तमात्रं॥ ॥ पुरोडाशकपालेन तुषानुपवपति [illegible] स्य रक्षसः कक्षा जिनं सथसामिति॥ ५

दे॰ भा॰ ८०।। पुरोडाशकपालेन तुषानुपवपति अधः कृष्णाजिनं कृष्णाजिनस्याधस्तात्समीप एव कृष्णाजिनस्य तिष्ठन्करेण क्षिपति रक्षसां भागो
सीत्यनेन मन्त्रेण। अथ फलीकरणान् १।२।२ रक्षसां राक्षसामिति कात्यायनोक्तेश्च। ततश्चेदं रक्षोभ्य इति त्यागः। अपां स्पर्शश्च २।

८० [illegible] कपालेनाधोधः कृष्णाजिनमुपास्यति रक्षसां भा[illegible]गोसीति श्रुतत्वात्। तथा अनग्नावेवैभ्यः
एतदंशेन तमसि प्रवेशयतीति वाक्यशेषाद्देवेभ्य इति। चतुर्थ्या रक्षसामंत्रदेवतात्वं शाखांतरगतो वि
शेषवस्तु षनिरसनेप्रागुक्त एव। इयमपि प्रतिपत्तिः। ततश्चांतापश्चिन्नादौ भवति।। ।।पूर्णपात्रंनि
नयति परीत्य संततं।। ।।ततोऽध्वर्युराहवनीयं परीत्य दक्षिणतः उदङ्मुखोवस्थितः संततं पूर्णपात्रं नि
नयति। सव्यस्थितो यज्ञो दक्षिणतः परीत्य पूर्णपात्रं निनये[illegible]त्तिं श्रुतेः। पूर्णपात्रं निनयति संततं अव तथा प्रसृदग्भ्यसि
च्छिन्नं निनयतीति श्रुतेः। पूर्णं च तत्पात्रं च पूर्णपात्रं। तत्र शांतिरापइति वाक्यशेषादद्भिः पूर्णमिति गम्य बती ५
ते।। ।।यजमानोंजलिना प्रतिगृह्णाति संवर्चसेति।। ।।तदध्वर्युणा संततं निनीयमानं पूर्णपात्रं यज
मानः संवर्चसेति मंत्रेणांजलिना प्रतिगृह्णाति। एतदुक्तं हस्ताभ्यां मेदोंजलिना प्रतिगृह्णीतीति श्रुतेः धारयति ८
अत्र ग्रहणं प्रधानं निनयनं तदर्थं। तेन प्राप्ति यजमाने यजमानस्तत्रैव पूर्णपात्रस्य निनयनं [illegible]केनापि
कारणीयं। यजमानेनांजलिना प्रतिग्रहश्च कार्यः।। ।।मुखं विमृष्टे।। ।।ग्रहणानंतरं यजमानस्तु च्छी ८०
मेन मुखं विमृष्टे। तेन गृहीतोदकेन मुखं एव संमृशति शोधयतीत्यर्थः। अथ मुखस्य शन्व इति श्रुतेः।

न० एतच्चार्थं कर्म तत्त्वांतापधि-नादौ भवति। अनेकयजमानत्वे ऽपर्युपर्यली-त्वत्सा सर्वैः पूर्णपात्र
जलं ग्राह्यं। विष्णुक्रमणं च सर्वैः कर्तव्यं॥ ॥विष्णुक्रमान्क्रमते दिवि विष्णुरिति प्रतिमंत्रं॥ ॥ततो य
जमानः स्वासनादुत्थाय दक्षि[illegible]णाद्वेदिश्रोणिदेशादारभ्याहवनीयं यावद्विष्णुक्रमान्क्रमते विष्णु
२१८ क्रमसं[illegible]र्ज्ञ क्रमणान्करोति दिवि विष्णुरिति प्रतिमंत्रं एकैकेन मंत्रेणैकैकं। [illegible] क्रमणं करोतीत्यर्थः।
अथ विष्णुक्रमान्क्रमत इति प्रत्यक्षस्य सर्वस्य श्रुतत्वात्। एतदप्यर्थकर्म तेनांतापधि-नादौ भवति। अ
त्राहापस्तंबः। विष्णोः क्रमोऽसीति दक्षिणवेद्यंतेन दक्षिणपदा चतुरो विष्णुक्रमान्प्राचः प्रक्रामत्युत्त
रं उत्तरं वा प्रत्यां समनंतिहरत्सव्यं नाहवनीयमतिक्रामतीति। मानवे। दक्षिणवेदेः प्राचीनं दक्षिणेन पा
देन विष्णुक्रमान्क्रामतीति। कात्यायने च। पदरः प्राचः प्रक्रमान्प्रक्रामति नाहवनीयमतिक्रामेदिति। शांखा
यनोऽपि। दक्षि[illegible]णाद्वेदिश्रोणिदेशादाहवनीयं यावदिति॥ ॥पृथिव्यामिनीत ऊर्ध्वो वा॥ ॥अथ वा पृ
थिव्यां विष्णुरिति प्रथमं क्रामति अंतरिक्षे विष्णुरिति द्वितीयं दिवि विष्णुरिति तृतीय मिश्रेत्वं। इतः पृ
थिवी लोकात् [illegible]तुर्ध्वे आरोहणक्रमेण वा विष्णुक्रमान्क्रामति। तदुक्तमृष्टे श्रुयो विष्णुर्वी क्रमं स्तेति श्रुतेः।

 ९ इति च। इतास्मा ल्लोकामुरा चीनमुर्ध्वं॥ अंति भादिवंरसेवं भुधिष्टा बहुतमाः क्रमंते॥

तद्धारतएव परीचीनं भुयिष्ठा इव क्रमंतेंइत्यर्थः। परस्ता हेव वीङ्ग क्रमंतेति अतऽन्यथा श्रवणाद्धि न्ययेः
॥ परस्ताद वाग्वा। अवरोहणं। [illegible] क्रमेण दि[illegible] व्यं नरिक्षेप थिव्यामिति। इत ऊर्ध्वौ वा आरो[illegible]हण
क्रमेण व। थिव्या मंतरिक्षेद्दिवीति॥ ॥ अस्माद भादितिमागमवेक्षते॥ ॥ यु तोयजमानो स्माद भादि
सनेन मंत्रेण स्वं भागमवेक्षते स्व [illegible] स्थानेऽपविष्ट एव। अस्माद भादि हन्ननिर्भत्तिइत्याध्यनुषंगः।
साकांक्षत्वात्। अयं च भागसंस्कारः। तेनांतापधिर्वादौ भवति। अनेक यजमानके प्रत्येक एव करोति तएवा
शोक्षो वेक्षणम् [illegible] सन्ये। एक कर्तृ का वेक्षण पक्षे सर्वे वारं भं कुर्युः॥ ॥ अस्यैप्रतिष्ठायाद
तिमुभिं॥ ॥ अस्यैप्रतिष्ठायाइत्यनेन मंत्रेण यजमानो वेदिभुमिमवेक्षते। ऽपविष्ट एव। अत्रापि निर्भ
क्तइत्यनुषंगः। साकांक्षत्वात्। एतदपवर्थ कर्म तत आंतापधिर्नेन भवति॥ ॥ अगन्मस्वरितिप्राक्॥
प्रेक्षतइतिशेषः। अगन्मस्वरिति मंत्रेण प्राङ्वीक्षते। प्राचीं दिशं प्रेक्षत इत्यर्थः। कुतः। अथ प्राङ्वीक्षते
प्राचीं हि देवानां दिगिति वाक्यशेषात्॥ एतदपवर्थ क[illegible]र्म॥ ॥ संज्योतिषेत्याहवनीयं॥ ॥ अवेक्षतइति
शेषः। संज्योतिषेत्यनेनाहवनीयमवेक्षते। एतदपवर्थ कर्म। अ[illegible] प्रतिपत्तिरूपत्वात्। ज्योतिषा हि सं भ

त्रे१ वनम[illegible] प्रार्थ्यते। तेनाहवनीयसंस्कारकल्पनं न कार्यं। तत्तः श्रौत[illegible] गृह्ये निबन्धिरिति कर्कः। वरुणप्रघासेषु
स्रुवेदिद्वयस्याप्यवेक्षणमन्त्यो ऽप्येतिसंप्रदायः॥ ॥स्वयंभुरिति स्रुचं॥ ॥स्वयंभुरसीत्यनेन यजमा
नः स्रुचमुदीक्षते। अथ स्रुचमुदीक्षते सोऽपि स्वयंभुरिति श्रुतेः॥ ॥वर्चोदा इति यथाकामं कामय
रं४ ते॥ ॥स्रुचोदीक्षणानंतरं वर्चोदा इत्यनेन मंत्रेण स्रुचं प्रार्थयेत्। अथवा यजमानो यं काममभि
लाषं पुत्रपश्वादिकं कामयेत तं ध्यात्वा तं ब्रूयात्। गोदा असि गा मे देहि धनदा असि धनं मे देहि पुत्रदा
असि पुत्रं मे देहि इत्येवं। वर्चोदा असि वर्चो मे देहीति ह्येवाहं ब्रवीमि निहस्माह याज्ञवल्क्यस्तद्ध्येव ब्राह्म
णेनैष्टव्यं यद्ब्रह्मवर्चसी स्यादिति उतो हस्माहौपोदितेयः [illegible] गवामहं गोदास्यति गो मे देहीत्येवं का गो७
मयते सो ऽस्मै कामः समृध्यत इति श्रुतत्वात्॥ ॥स्रुचस्येत्यावर्तते प्रदक्षिणं॥ ॥ततः स्रुचस्येत[illegible]
[illegible] नेन मंत्रेण यजमानः प्रदक्षिणमावर्तते। आवर्तिं भ्रमणं करो[illegible]ति। परिभाषयैवासि
८१ ॐ प्र[illegible]क्षिणग्रहणं इतरथा वर्ति न्युदासार्थं। श्रौता हक्षाप न्यार्थौ। तेनास्याप्यपवादे श्रौतं प्रायश्चित्तं।
आधिकारमुपनीवन्नाह॥ ॥ग्रहग्रहणप्रतिगरहोमेषु च स्रुचौ॥ ॥सर्वस्य ग्रहग्रहणानंतरं प्रा

आधिकारमु
पनी वन्नाह॥
प्रसंगा न्नाह॥

५९ मं १ मा साद्नात् प्रदक्षिणावर्तनं कार्यं। प्रतिगरदानानंतरं च सस्वरमाहो। होतारमानंतरं च। एतद्ग्रह ग्रहणप्रतिग
रहो येषु तु चाप्र[illegible]दक्षिणमावर्तते कर्ता। ग्रहं गृहीत्वैतस्यै वायत्तमध्यावर्तेत। प्रतिगीर्यैतस्यै वायत्तम
ध्यावर्ततेति श्रुतेः। अत्रापि प्रदक्षिणग्रहणस्य पूर्वसूत्रवद्योजनं व्या। ख्येयं। सशस्त्रे मात्रे प्रतिगीर्य
मग्रह ग्रहणमात्रे। नहोम[मा]त्रइति प्रदक्षिणक्रिया शेषतामं ओपि प्राप्तस्तु धी मित्यनेन व्यावर्तते।। ५
।। गार्हपत्यमुपतिष्ठतेग्नेगृहपत इति।। ।। ततो यजमानो गार्हपत्यमुपतिष्ठते स्थिताग्नेगृहपत इतिमं
त्रेण तं प्रकाशयतीत्यर्थः। अथ गार्हपत्यमुपतिष्ठते सोऽपतिष्ठतेग्नेगृहपत इति श्रुतत्वात्। ऐंदप्यर्थकर्मै न
व। तत स्थांतजुसादौ न भवति।। ।। शतं हिमा इति ब्रूयात्।। ।। गार्हपत्यमुपस्थाय शतं हिमा इतीमं मंत्राव
यवं यजमानो ब्रूयादिति विकल्पः। शतं हिमा इति प्रवसद्यत्तत्र ध्रुवत्वाद्धीयेतेति श्रुतेः।। ।। सूर्यस्य साव
र्तते प्रदक्षिणं।। ।। गार्हपत्यस्योपस्थानानंतरं पुनरपि सूर्यस्येत्यनेन मंत्रेण प्रदक्षिणमावर्तते। पुनर
पि मंत्रपाठात्। भुक्तावपि पुनर्पाठस्तथा। अथ आवर्तते सूर्यस्येति।। ।। गच्छति प्राङु रूविष्यमिति।। ५
८२ चिष्यविष्यमंत्रेण यजमानः प्राङ् च्छति। प्राच्यां दिशि याति। ऐंद[न]प्यर्थकर्म।। ।। ततोसीत्सादिर्सततोहि

गृहीत्वैवायं ध मं।। न शास्त्र

६ अनेकयजमानकेषु सर्वैः पुत्राणां नामग्रहणं कार्यं ।। पुत्रस्याशीः प्रार्थनार्थत्वात् ६

ति पुत्रस्य नामगृह्णाति सेवमं[illegible]र्थं तं सुतं ।। ।। ततो सी सेवं मं[illegible]त्रं पठित्वा इदं मे कर्मेदं वीर्यं पुत्रस्तत्र पुत्रस्य
नाम प्रथमैकवचनांतं गृह्णाति । इदं मे कर्मेदं वीर्यं पुत्रो मुकशर्माऽनुसंतनोत्विति सेवं । अथ पुत्रस्य नामगृ
ह्णातीदं मे यद्वीर्यं पुत्रोऽनुसंतनवदिति श्रुतेः । ततोऽसि नं कुरु सिद्धसेतस्मिन्मंत्रे तत्सदेवेरक चानय[illegible]भुक्तं गृ
ह्णाति । कुतः । काण्वस माम्नानादिदं मे कर्मेदं वीर्यं पुत्रो देवदत्तो त्विति हरिस्वामिनः । अनेकेषु पुत्रेषु
सर्वेषां नामग्रहणं प्रति पुत्रं च ततो सीसेय मावर्तनीयः । पुत्रनामग्रहणपार्थत्वात् । ज्येष्ठपुत्रस्य ना
माभिव्याहृत्य यावंतो वा भवंतीति शांखायनः । प्रियस्य पुत्रस्य नामगृह्णातीत्यापस्तंबः ।। ।। आत्म
नो [illegible] विद्यमाने ।। ।। अविद्यमाने पुत्रे अजाते वा यजमान आत्मनो नामगृह्णीयात् । यदि पुत्रो न स्या

मजाते वा ७

द् आत्मन एव नामगृह्णीयादिति श्रुतेः । कथंचित्पुत्ररहित[illegible]ध्ये जातपुत्रो वा तदा आत्मनो नामगृह्णी
त । तथा च इदं मे कर्मेदं देवदत्तोऽनुसंतनवानीति नाम ग्रहणमिति हरिस्वामिनः ।। ।। तं तवेताज्योति

वीर्यं ८

रेवेत्यतिना ।। ।। अथवा अविद्यमाने पुत्रे इदं मे कर्मेदं वीर्यं तं नवेताज्योतिषेत्यानुसंतनोत्विति प्र
योगो भवति । एतदप्यर्थकर्म । अनेक यजमानके विद्युत्क्रम[illegible]भाग भूमि प्राक् सुर्यावेक्षणप्रदक्षि

णावर्त्तनप्रागगमनेषु-प्रारंभः। आहवनीयावेक्षणगार्हपत्यस्योपस्थानपुत्रनामग्रहणतूष्णीमाहवनी
योपस्थानव्रतविसर्गभागप्रा[illegible]ख्यानानि भेदेनेति संप्रदायः॥ ॥आहवनीयमुपतिष्ठते तूष्णीं॥ ॥पु
त्रनामग्रहणानंतरं यजमानस्तूष्णीमाहवनीयमुपतिष्ठते समीपे स्थित्वा तं विलोकयति। तूष्णीमि
ति लौकिकवागुच्चारण[illegible] प्रतिषेधः क्रियते मंत्राभावात्। अथाहवनीयमुपतिष्ठते प्राङ्मेध्यजोनुसं
तिष्ठतइति [illegible] तूष्णीमुपतिष्ठत इति श्रुतेः। दिविविष्णुरिति क्रमणप्रभृत्याहवनीयोपस्थानांतं कर्म विष्णु
क्रमसंज्ञं भवति। कुतः। आहवनीयं चोपस्थाय व्रतादीनि चेदिति शा[illegible]पकात्। प्रयोजनं च तत्र विष्णुक्र
मान क्रियंते सर्वविधौ तत्राहवनीयो[illegible]स्थानां[illegible]क्रमणमात्रं। यत्र च विधीयते विष्णुक्रमान्कुर्याद
भिर्यज्ञविध्यइति तत्राहवनीयोपस्थानांतं विधीयते॥ ॥व्रतं विसृजते येनोपेयात्॥ ॥ततो यजमा
नो व्रतं विसृजते। शास्त्रितं सत्यवदनादिनियमं मुंचति। येनोपेयादिति येन मंत्रेण पूर्वमुपेयादुपेतं भ
वेत्तेन मंत्रेण विसृजेदित्यर्थः। पूर्वं हि व्रतग्रहणे द्वौ मंत्रौ उक्तौ। अग्ने व्रतपत इदमहमिति वेति। [illegible]मं
त्रेण विसृजते। एवमेव। अथ संस्थिते विसृजत इत्युभयत्र पृथक् श्रूयते॥ ॥संयज्ञपतिराशिषेति
१· तेनैव मुच्यते। यदा पूर्वमग्ने व्रतपते व्रतं चरिष्यामि इत्यनेनोपेतं तदेदानीमिदमहं य एवास्मि सो

Marginal notes (left): तत्कर्म निव र्त्तते। न १

भागंप्राश्नाति॥ ॥ संयज्ञपतिरिसनेनमंत्रेणयजमानः स्वभागं प्राश्नाति। अनेकयजमानके सर्वे विभ
ज्यप्राशनंकुर्युः। ब्रह्माप्यस्मिन्नेनकाले ब्रह्मभागंप्राश्नाति। तमिष्टौसंस्थितायांप्राश्नीयादितिछंदो
गसूत्रात्। ब्रह्मभागमाहरंतिनासंस्थितेतंभक्षयतीत्यापस्तंबः। मानवे। प्राशित्रहरणे ब्रह्मभागं दध्या भा २
त्। तंशंय्वंतेप्राश्नीयाद्धुर्व्वेवासमिष्टयजुष इति। प्रत्नविसर्गभागप्राशनयोरंतापधिन्नेपिप्रवृत्तिः प्रतिप
त्तिरूपत्वात्॥ ॥ब्राह्मणंतर्पयितवै ब्रूयाद्यज्ञमेवैनत्तर्पयतीतिश्रुतेस्तर्प्पयतीतिश्रुतेः॥ ॥भागप्राश
नानंतरमध्वर्युर्ब्राह्मणंतर्प्पयितवाइतीमंप्रैषंयजमानंप्रति ब्रूयादुपविश्यैव। प्रैषानंतरमेतात्रब्रा
ह्मणस्तृप्तिपर्यंतं भोजयितव्यः। कुतः। यज्ञमेवैनत्तर्प्पयतीतिश्रुतेः। इतिश्रवणात्। सहैष यज्ञोऽन्ना
चेतिप्रवक्तस्तस्मा यावै बिभेमीति कातेत्रस्तिरिति ब्राह्मणस्यैवत्तप्तिमनुतृप्येयमिति तस्मात्संस्थि
तेयज्ञे ब्राह्मणंतर्प्पयितवै ब्रूयाद्यज्ञमेवैतत्तर्पयतीति ब्राह्मणतर्पणेनैवयज्ञस्तृप्तो भवतिनान्यथा।
अतःप्रैषार्थो नुष्ठानं ब्राह्मणभोजनरूपमत्रपदार्थो नप्रैषमात्रमितिसेवशापयितुमत्र श्रुतुपादानं। अ
यंचप्रयाजादिसदृश आरादुपदुपकारको ऽदृष्टोत्पादकः पदार्थः। कुतोंगं। तेनप्रयाजाद्यधिकरणइवास्या र

करणे कृतौ वैगुण्यं भवति। अकृते च तस्मिन्निष्टेरसमाप्तत्वादिष्ट्यंतरारंभो न कार्यः। ब्राह्मणभोजनानंतरं
च नमः कलायेसनेन मंत्रेण समिदाधानोपस्थानहोमानामभ्यसनम कुलाकरोति। द्विरभ्यासोऽध्याय
परिसमाप्तिसूचनार्थः। अत्र श्रुतौ वयव्रतं विसर्जनं तद्द महं य एवास्मि सोऽस्मीति। अयमेव व्रतविस
र्गमंत्रोऽभिहितो न पश्चात्तरं। तेनैवं ज्ञायते। इदमहमिति सयमेवमंत्रः श्रुतिसम्मितत्वादिति हरिहरस्वामिनः। स
माप्तोऽयं पौर्णमासः। सर्वास्विष्टिषु पशुबंधेषु यागेषु सौत्रामण्यादिषु प्रकृतिभूतः। यद्यप्ययं कृताधा
नस्य भवति। तथाप्याधानेष्टीनां तन्तुहविः संज्ञकानां पौर्णमासयागः प्रकृतिस्तस्मात्पूर्वमुपदे[illegible]
शः। ननु तर्हि तन्तुहविषामेव सर्वेष्टिप्रकृतित्वं कुतो न्येन पूर्वं कस्मान्नोपदिष्टानि। सत्यं। किंतु तेष्विति
कर्तव्यतावैकस्सर्वेंदेना सर्वप्रकृतित्वं न संभवति। तस्मात्पौर्णमासयाग एव पूर्वमुपदिष्टः। दर्शपौर्ण
मासयोर्महिमानमाह सत्यव्रतः। वायुपुराणे॥ दर्शं च पौर्णमासं च ये यजंति द्विजातयः। न तेषां पुनरा
वृत्तिर्ब्रह्मलोकात्कदाचनेति। हारीतः। नास्य पुत्रस्य लोकोऽवै भायज्ञो विंदते शुभं। अनिष्टयज्ञोपुत्रा
त्मा न[illegible]श्यति छिन्नपर्णवत्॥१॥ यज्ञेन लोका विमला विभांति यज्ञेन देवा अमृतत्वमीयुः। यज्ञेन पा
पैर्जीवितोऽपि शिलोंछाभ्यां महन्यइति यत्फलं। तद्दर्शपौर्णमासाभ्यां सम्यगाप्नोति मानवः।२॥

५ तथा कृते बुधश्रेष्ठ देवानां तोषणं भवेत्। तुष्टेषु देवसंघेषु यज्ञाध्वरफलं लभेत्।७।।

पैर्बिल्भिर्वियुक्तः प्राप्नोति लोकान्परमस्य विष्णोः।२। गर्गः। यो वैदिकमनादृत्य कर्म स्मार्तैरिहासि

न्ये कं। मोहात्समाचरेद्विप्रो न स पुण्येन युज्यते।३। प्रधानं वैदिकं कर्म गुणभूतं तथेतरत्। गुणनिष्ठः प्रधा

नं हि सद्य आगधर्मात्प्रयोगति।४। व्यासः। श्रौतं कर्म न चेच्छक्तः कर्तुं स्मार्तं समाचरेत्। तत्राप्यशक्त

करणे सदाचारे गतो बुध इति।५। आनुशासनिकेपि। संशुद्धैर्यजमानैश्च ऋत्विग्भिश्च तथा वि

धैः। शुद्धैर्द्रव्योपकरणैर्यष्टव्यमिति निश्चयः।६। देवाः संतोषिता यज्ञैर्लोकान्संवर्द्धयंत्युत। उभ

योर्लोकयोर्देव भूतिर्यज्ञैः प्रदृश्यते।७। तस्माद्यज्ञाद्दिवं याति चापरैः सह मोदते। नास्ति यज्ञसमं दा

नं नास्ति यज्ञसमो विधिः।८। सर्वधर्मसमुद्दे■श्यो देवो यज्ञे समाहितः इति।। नित्यकर्मलोपे प्राय

श्चित्तमाह प्रजापतिः। दर्शं च पौर्णमासं च लुप्त्वा ओभयमेव च। एकस्मिन्वत्सपादेन द्वयोरर्द्धेन ■

शोधनं। हविर्यज्ञेषु शस्त्राया लुप्तमप्येकमादितः। प्राजापत्येन शुद्ध्येत पाकसं■स्था सु चैव हि। सं

ध्योपासनहानौ च नित्यस्नानं विलोप्य च। होमं चैव सकं शुध्येत् गायत्र्यष्टसहस्रकम्। समाहिसो

मयज्ञानां हानौ चांद्रायणं चरेत्। अवस्थान्यमं यज्ञं पंचानामधिकारतः। उपवासेन शुध्येत पाद

सस्थास्तु यैर्न हीनांति। वासमा मनोपि। पित्र्यशाला चैव वैश्वदेवं द्वयस्य च॥ अग्नि[illegible]न वयज्ञेन स्वान्न प्राश्ना
नेतया। भोजनेपत्तिना च स्य यस्त्वैः श्वानरो भवेद्दति। विज्ञानं द्व्याधिना भेपि नित्य लोपो न कार्यः। तदाह
बौधायनः। यस्य नित्यानि लुप्तानि तथैवागंतुकानि च। वियोग[illegible] स्थोपि न स्वर्गं गच्छंतु पतितो हिसः
तस्मात्कंदैः फलैर्मूलैर्मधुनाथ रसेन वा। नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेत्॥ इति श्रीत्रिर
ग्निचित्सम्राट् स्थपति महायाज्ञिक श्रीप्रजापतिसुजेनयाज्ञिक श्रीदेवेन कृते कासायन स्तुत्र व्या
ख्याने त्रसीयोध्यायः॥ शके १७७२ पिंगलनाम संवत्सरे दक्षिणायने हेमंतर्तौ पौषमासे
कृष्णपक्षे सप्तम्यां तृतीयप्रहरे समाप्तिं पुस्तकं महादेव दाठासहस्त्रेण गुरुकृपया॥ रामरामराम
ग्रंथसंख्या २५··

॥श्रीगणेशाय नमः॥ पौर्णमासेष्टिरुक्ता॥ अथ दर्शेष्टिरुच्यते॥ तत्र चतुर्दश्यां शेषे सायंप्रास दध्वा॥ग्निहोत्रं
हुत्वा स्थालीस्थस्य प्रातर्हुतशेषस्य सायंहुतशेषस्य॥ शातंच नार्थं स्थापनं॥ संगव्यवति दर्शयागे क
र्तव्यमा॥णे चतुर्दश्यां दध्वा होमो नान्यथा॥ अमावास्यायां पंच भूसंस्कारपूर्वकं पूर्वाह्णे एवाग्न्याहरणं॥ त
तोग्न्यन्वाधानं॥ ततो मांस मैथुनवर्जनसंकल्पः॥ वपनं वा॥ ततो वैश्वदेवः॥ ततोपराह्णे पिंडपितृयज्ञः॥ ततो द
र्शस्याह्नुतत्वात्॥ पक्षांतं कर्मनिर्वर्त्य वैश्वदेवं च साग्निकः॥ पिंडयज्ञं प्रकुर्वीत ततोन्वाहार्यकं बुधः इति॥ प
क्षांतं कर्माग्न्यन्वाधानं॥ अथ पिंडपितृयज्ञ उच्यते॥ अस्य चाध्वर्युः कर्ता॥ स चात्रिधा विभक्तादिन तृतीयां
शे भवतीति केचित्॥ द्विधा विभक्तस्यैव द्वितीय भागे इत्यपरे॥ तत्र पूर्वेनिर्विकरणं॥ तत्रैव तु शान्तिल संयुक्तानां
केरत्रदशानां सव्य भागे परिच्छिन्न वस्त्रेण संवेष्ट्याव गूहनं॥ ततः सव्येनैव दक्षिणाग्नेः परिस्तरणं इध्मवत्तू॥ हो
मस्य दैववत्वात्॥ परिस्तरणस्य नदंगवात्॥ येषामपसव्येनाग्नेनौकरणहोमः तेषां परिस्तरणमप्यपसव्येन

१

ग्राणां २
ह्या ३

पित्र्यावत्॥ अत्र होमवर्जं सर्वकर्माऽपसव्येन दक्षिणाभिमुखेन च कर्तव्यं॥ ततोऽपसव्यं कृत्वा दक्षिणाग्नेरु
त्तरतो दक्षिणसंस्थं दक्षिणाग्रं पात्राणामेकैकेना सादनासादनं॥ नद्विपः। स्फ्यः शूर्पं। अग्निहोत्रहव
णी वा॥ स्थाली वा॥ व्रीहयः॥ कृष्णाजिनं। उलूखलं॥ मुसलं। स्त्री विग्रहणपक्षे अत्रैव चरुस्थाली॥ अप
ण्णार्थमुदकं॥ आज्यं। मेक्षणं। तिस्रः समिधः। उदपात्रं। सकृदाच्छिन्नानि सूत्राणि च ऊर्णा वा वस्त्र ३५
दशा वा॥ ततो गार्हपत्यस्य पश्चात् दक्षिणाग्रेषु कुशेषु स्फ्यं निधाय तस्योपरि [illegible] त्यां व्रीहीन्निदध्या श्रा ९
त्॥ ततः स्रुवं विग्रहणपक्षे शूर्पेऽग्निहोत्रहवण्यां निधाय च स्रुवं स्थाल्यां ग्रहणपक्षे शूर्पे च स्रुवं स्थाल्यां निधाय गा
र्हपत्यमपरेण दक्षिणामुख उपविश्य मन्त्रेणाऽऽदिश्य तूष्णीमपूर्णं स्रुचं व्रीहीन् यजति [illegible] यात्॥ अपूर्णं स्था
लीं वा तूष्णीं गृह्णीयात्॥ अत्र स्थाल्यै ग्रहणं॥ सकृदेवं स्रुवपक्षे स्रुचैव मुष्टिनावा। नीचा मुष्टि
ना व्रीहीन् गृह्णाति इतीशांखायनः॥ आपस्तंबः॥ पितृभ्यो जुष्टं निर्वपामीति वा तूष्णीं वेति। मुष्टि

नाग्रहणपक्षे पितादेवसन्नूत्रास्तं । यावता स्त्रुक्स्थाली वान पूर्यत इति । ततउत्थाय दक्षिणाग्नेरुत्तरत उदग्ग्री
वमुत्तरलोम कृष्णाजिनमास्तीर्य तस्मिन्नुलूखलं निधाय व्रीहीनोप्य मुसलमादायावधाव दक्षिणाभिमुखस्ति
ष्ठन्नवहन्ति । ततो वितुषीभूतेषूलूखलान्निःकास्य शूर्पे न्युप्यानिष्पूय तुषान्पृथक्कृत्वा सकृत्फलीकृत्य निष्प्
वनेन कृणन्पृथ कुर्यात् ॥ ततः स्थाल्यां भोज्यसन्त्रप्रक्षाल्य दक्षिणाग्नावधिश्रीत्य श्रपण्यभिधार्य दक्षि
णत उद्वास्य दक्षिणाग्निं पूर्वेण प्रदक्षिणमानीय सर्व्वं कृत्वा तिस्त्रः समिधोभ्याधायोत्तरतः प्राङ्मुखो पवि
श्य दक्षिणं जान्वाच्य मेक्षणेन द्वे आहुती देवेभ्यो जुहोति ॥ उं अग्नये कव्यवाहनाय स्वाहा ॥ इदमग्नये कव्यवाह
नाय ॥ उं सोमाय पितृमते स्वाहा ॥ इदं सोमाय पितृमते ॥ ततः सव्येनैव मेक्षणप्रक्षेपः ॥ होमांगत्वात् ॥ ततो
पसव्यं कृत्वा दक्षिणामुखो भूत्वा दक्षिणाग्नेर्दक्षिणतः पश्चाद्वा अपहता इति स्फ्येन दक्षिणसंस्थं लेखामुल्लि
खेत् ॥ ततो लेखायाः पुरस्तादग्नौ ये रूपाणीत्युल्मुकं निदधाति ॥ तत उदपात्रमादाय लेखायां यजमान

वौ
२

स्य पित्त्प्रभृतीन्त्रीन्पुरुषानवनेजयामि॥ अमुकसगोत्रयजमानपितः अमुकशर्मन्नवनेनिक्ष्वेतिलेखा
मूले॥ अमुकसगोत्रयजमानपितामह अमुकशर्मन्नवनेनिक्ष्वेतिलेखामध्ये॥ अमुकसगोत्रयजमान
प्रपितामहामुकशर्मन्नवनेनिक्ष्वेति लेखांते॥ इति दक्षिणसंस्थं त्रयाणामवनेजनं कृत्वा मूलसमीपे
एकप्रयत्ने नैवाच्छिन्नानि दर्भतृणानि लेखायां दक्षिणाग्राण्यास्तीर्यावनेजनस्थाने पिंडदानं कुर्या
त्॥ अमुकसगोत्रयजमानपितः अमुकशर्मन्नेतत्त इति मंत्रेणा येष्वत्रा मन्त्रीतीमंमंत्रशेषं चके चि
कुर्वीति॥ एवं रेखामूले पितुः पिंडं निधाय ततः अमुकसगोत्रयजमानपितामह अमुकशर्मन्नेतत्त
इति रेखामध्ये॥ ततोमुकसगोत्रयजमानप्रपितामह अमुकशर्मन्नेतत्त इति रेखांते आर्द्रामलकमात्रः
प्रथमः पिंडः॥ तदपेक्षया द्वितीयः स्थूलः॥ तृतीयः स्थूलतरः॥ एवं स्तीर्णेषु सदर्भदारच्छिन्नेषु मूलमध्या
ग्रदेशेषु दक्षिणसंस्थान्त्रीन्पिंडान्दत्वा अत्र पितर इत्यमुं मंत्रं पित्राभिमुखः स्वरेण जपेत्॥ ततोद

स्तं प्रक्षाल्याप्रदक्षिणमुदङ्पर्यावृत्याऽतमनादास्ते ॥ पुनः प्रदक्षिणं पर्यावृत्य पिंडाभिमुखोऽमीमदंतेति स्वरे
ण जपति [illegible] ॥ ततः पूर्ववत्पिंडानामुपर्यवनेज्य नीविं विस्रस्य नमो वइति षडंजलीन्करोति ॥ न
मस्कारार्थं वाद्युपुटांज [illegible] नमस्कारार्थं वाद्युपुटांज
लयः ॥ तत्र नमो वः पितरो रसाय १ शोषाय २ जीवाय ३ स्वधायै ४ [illegible] घोराय ५ ॥ नमो वः पितरो म
न्यवे नमो वः पितरः पितरो नमो वइत्येतावता मंत्रेण षष्ठमंजलिं कुर्यात् ॥ ततो गृहान्नः पितरो दत्तेति ज
पति एतद्वः पितरइति प्रतिपिंडं पृथक् २ त्रीणि २ सूत्राण्युपास्यति पिंडानामुपरि निदधाति [illegible] ॥ वादशा ऊर्णा ८
ऊर्ध्वं ७ वा प्रतिपिंडमुपास्यति ॥ पंचाशद्वर्षादूर्ध्वं यजमानस्य [illegible] वा युक्तमपुत्रा न लोमानि वा प्रतिपिंडमुपास्यति तुदवा ३
॥ आपस्तंबः ॥ वाससो दशा छित्वा निदधाति ॥ [illegible] ॥ ऊर्णास्तुकां वा पूर्वे वयस्युत्तरे आयुषि स्वं लोमैवे न्यं ६ वे
ति ॥ ततर्जं वहंतीरिति मंत्रेण उदपात्रस्पृष्टमवनेजनावशिष्टमुदकं पिंडानामुपर्येवानिषिंचति ॥ ततः पि

गृह्यात्स्यां प्रत्यवदधात्यध्वर्युः॥ ततो यजमानः स्थालीस्थान्पिंडानवतीर्य्य प्रतीतस्ततोध्वर्युः सव्यदा
दिन्नान्यग्नौ प्रक्षिप्य सव्यं कृत्वोल्मुकं दक्षिणाग्नौ प्रतिप्राशयस्यति॥ ततउदकोपस्पर्शनं॥ पुत्रकामा
गर्भग्रहणयोग्या चेत् ऋतुमती पत्नी आधत्त पितरो गर्भमिति मंत्रेण मध्यमं प्राश्नाति॥ तस्मिन्पक्षे तस्यावघ्राणं पिंड २
न कार्यं॥ ततः पार्वणश्राद्धं॥ जीवपितृकस्यापि पिंडपितृयज्ञाभावः पिंडपितृयज्ञो दर्शांगमिति कर्कादयः
सर्वे भाष्यकाराः॥ नेति संप्रदायः॥ पितृयज्ञः स्वकालत्वादनंगं स्यादिति जैमिनिः॥ अनाहिताग्नेरप्ययं
पिंडपितृयज्ञो भवति आवसथ्येग्नौ॥ प्रथमा कंडिका॥ जीवपितृकस्य चतुर्दश्यां वाउद्धरणाद्यनुपक्र
मः॥ अमावास्यायां यागः॥ पिंडपितृयज्ञस्यानंगत्वपक्षे मृतपितृकस्यापि विकल्पः॥ अंगत्वपक्षे तु मृत
पितृकस्यामावास्यायामेवोपवासनियमः॥ श्राद्धानंतरं पत्नीयजमानो अत्यमत्सीतः॥ ततोध्वर्युः पला
शशाखयाछिन्नेति दर्भवेदिशामीशाखयां वा शाखया वाहत्य प्राग्ग्रां प्रसतां उदीग्ग्रां वा वेद्यां वास्ता छेत्स्या॥

दे॰प॰च॰

इषेत्वाछिन्नमीति मंत्रेण ऋजुर्जेवा संनमयामीति मंत्रेण तस्याः शाखायाः पर्णाग्दि पातयति। ततो व्र

सं तग्रहणं वा। ततः षड्भिर्गोभिः सदृश्यट् वत्सान्‌ज्य तान्वत्सान्प्रत्येकं शाखयोपस्पृशति वायवस्थे

ति मंत्रेण शाखोपस्पर्शनेन गोभ्यो वियोजयतीत्यर्थः। प्रतिवत्सं मंत्रावृत्तिः। सानाय्येस्त्रीवत्सा अपि

गावो भवंति। केचिद्वायवस्थोपायवस्थेत्येवं मंत्रं पठंति॥ ततो मातृभ्यो वत्सान्वियोज्य पशूनां

गवां मध्ये एकां गां देवो वः सविता प्रार्पयत्विति शाखयोपस्पृशति श्राव्या याध्वम घ्न्या इंद्राय भागं। महेंद्राय भा

गमिति वा मंत्रे विशेषः। सानाय्यस्य दध्नो दुग्धस्य च इंद्रो देवतेत्यादि विकल्पः। प्रथमे प्रयोगे यां गीकृत्वा महेंद्रो वेद

इंद्रो वा महेंद्रो वा से वया वज्री वं भवति। तत्रापि शाखांतरे व्यवस्थोक्ता। नागतश्रीर्महेंद्रं यजेत् त्रयो ह

वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यस्तेषां संसो मे ज्यायां महेंद्रं यजेरन्यो वा कश्चिदित्यापस्तंबः

॥ मानवे च॥ सोमयाजिनां गतश्रीर्वो वौर्गोतमो भारद्वाजस्ते महेंद्रं यजेरन्निति तरे संवत्सरमिंद्रमिष्ट्वा ४

ग्नयेव्रतपतयेऽष्टाकपालं निरुप्य तेमहद्द्र[?]ति॥ ततोयजमानस्यपश्मू निति मंत्रेण गार्हपत्यागारस्यपुरस्ता

दाहवनीयागारस्यपुरस्ताद्वाशाखामुपगृह्णाति ततः प्रादेशमात्रं अधिकं वाशाखा अग्रं परिछिद्य नूह्लीद्विवा

मूलंपृथक्कुर्यात्॥ ततस्तस्मान्मूलादरत्निमात्रं वेषमीस्यूपवेषंकरोति प्रादेशमात्रंवा॥ ततोवसोःपवित्रमसीति

मंत्रेण प्रादेशमात्रीयाशाखापरिछेदिता॥ तस्यांसाग्रेद्वौ कुशेपवित्रंबध्नाति॥ त्रीन्वाकुशान्॥ तस्यांशाखोंसा

यंप्रातश्चनियमेनयवाग्वास्ययमग्निहोत्रहोमः सान्नाय्यंकुर्वतोयजमानस्यभवति तंदुलैःशिथिलपक्क

यवागूरितिकर्कः॥ यवागूर्विरलद्रव्यं इत्यपरे॥ यवागूः स्यात्तंदूल र्त्तमित्यमरं द्रवस्तूपमन्न॥ इति स्मृति

हुते चंद्रिकाकारः॥ पेयायवागूरित्यभिधानस्याभिन॥ ततोग्निहोत्रेऽध्वर्युरुपसृष्टांप्रब्रूयाद्दिति दोग्धारं प्रतिप्रे

ष्यति॥ दोग्धा उपसृष्टेति प्रत्युक्तेऽध्वर्युर्द्यौरसीतिस्थालीमादत्ते मातरिश्वनइति गार्हपत्ये स्थालीमधिश्र

यति वसोःपवित्रमसीति स्थाल्या उपर्युदगग्रं प्रागग्रं वापवित्रं निदधाति॥ वाग्यतोऽध्वर्युस्तिस्त्रो गाः अनू

द्रेण दोहयति। गां धुक्ष्वेति प्रेषेण। ततः प्रेषितो दोग्धा कांस्यमये दोहने प्रथमो पावृत्तां गां दोहयित्वा आनीय दोहने
नैव स्पृष्टा त्यां यजमानेनान्वारब्धायां पवित्रस्योपरि दुग्धमासिंचति। अध्वर्युरासिच्यमाने पयसि देवस्त्वास
वितेति जपति। ततोध्वर्युः कामधुक्षइति दोग्धारं पृच्छति। दोग्धा अमूमिति। ततो नाम्नि द्वितीये कवचनांते प्रत्यु
क्ते सा विश्वायुरित्याह। पुनर्गां धुक्ष्वेति दोग्धारं प्रेष्यति। ततः प्रेषितो दोग्धा द्वितीयां गां दुग्ध्वा पुनः स्पृष्टा त्यां
यजमानेनान्वारब्धायां पवित्रे निनयति। अध्वर्युरपि निनीयमाने पयसि देवस्त्वेति जपति। ततः कामधु
क्षइति दोग्धारं पृच्छति। अमूमिति दोग्धा प्रत्युक्ते सा विश्वकर्मेत्यध्वर्युराह। पुनर्गां धुक्ष्वेति दोग्धारं प्रेष्य
ति। ततः प्रेषितो दोग्धा तृतीयां गां दुग्ध्वा तथैव स्पृष्टा त्यां पूर्ववदासिंचति। ततः कामधुक्षइति दोग्धारं पृ
च्छति। स प्रत्याह अमुकीमिति ततोध्वर्युः सा विश्वधाया इत्याह। अध्वर्युः वाचं विसृ[illegible]ज्यात ऊर्ध्वं तिस्रो
दो गां दोहयति अत ऊर्ध्वं यजमानस्य स्पृष्टा त्यन्वारंभो न भवति। ततो गां धुक्ष्वेति अध्वर्युर्दोग्धारं प्रेष्यति। दो ५

ध्वा त्रस्योप ५

ग्धानुदुग्धाद्दुग्ध्वा आनीय स्थाल्यामासिंच्यति। आसिंच्यमाने ऽध्वर्युः पूर्ववदुपपति। यज्ञी दोहयित्वा येन पात्रे

ण दोहयति तस्मिन्पात्रे स्तोकमुदकमासिंच्य तस्यात्रं प्रक्षाल्य तत् प्रक्षालनजलं स्थाल्यां दुग्धमध्ये आसिंच्य

ति संपृच्यध्वमिति। ततः स्थालीमुद्वास्य स्थापितेन प्रागग्निहोत्रे ऽग्निहोत्रेण दध्ना स्थालीस्थेन आतनक्ति

। इंद्रस्य वेति। महेंद्रपक्षे महेंद्रस्य वा भागमिति। पुषयः पूतीकाः कलाः स्तादुल्लाः पर्णवल्का इत्यातंच्यनविकल्पा नु

क्षेपणाभावे तंदुलैरातंच्यात् तंदुलाभावे तुषधीभिरित्यापस्तंबः। ततो मृन्मयेन पात्रेण सोदकेनोत्ता

नेन दोहस्थालीमपिदधाति विष्णो हव्यं रक्षेति। ततस्तां सुगुप्ते देशे निधाय प्रात[illegible] दोर्थमाच्छभिवश्यां सह[illegible] मा

सृज्य तेषां पूर्ववदपाकरणं शाखोपगूहनोतं कुर्यात्। रात्रौ आहवनीयागारे गार्हपत्यागारे वा यजमानः सप

त्नीकः शयीत॥ ॥प्रातः स्वयमेवयवाग्नाग्निहोत्रं हुत्वा अनुदित एव सूर्ये तंत्रोप[illegible]क्रमं कुर्यात्। पौर्णमासवत्

बर्हिर्लवनादि कर्मापवर्गांतं कुर्यात्। तत्र विशेषो [illegible]लिख्यते। गोत्रशर्मन्दर्शेष्ट्या वयं यक्ष्यामहे इति ब्रह्म

वरणं॥ व्रतग्रहणमत्र वा प्रणीताप्रणयनं॥ पात्रासादने अष्टौ कपालानि शाखापवेषः। वेदः स्थाली दोहनं च

चतुष्टयं तत्र दोहनं नियोजनं । शाखा पवित्रं स्थाली चेति । पुरोडाशपात्र्येका । शेषं पूर्ववत् । हविर्ग्रहणे एकस्याग्नेयपुरो
डाशस्यैव ग्रहणं । वेदबंध नैसर्गं प्रोक्षणांते उपसृष्टादि परिक्षालनांतो दोहः पूर्ववत् कर्तव्यः । ततश्चासुखेत्वेति कृष्णा
जिनस्य दृषदः प्रेक्षणादि पयसः पर्यग्निकरणाभावः देवस्त्वेति मंत्रेणाधःश्रपणं भक्त्येवानौ परिश्रापण प्रक्षेपः
। श्रुवामासाद्य सायं दोहाहरणं । ततः पुरोडाशादि भस्मीकरणं । पुरोडाशपात्रीस्थापनं । तस्यामुपस्तारः । पुरोडाशोपयस्वे
षतत्र स्थाभिघारः । नदधति उद्वास्य पुरोडाशं तस्योत्तरतो दध्नः स्थापनं तस्योत्तरतः पयसः । ततः
दं १ पुरोडाशादधिपयसां प्राणदानं । दधनि पयसि च इति [illegible] प्रणदान मंत्रे विशेषः । महेंद्रपक्षे महेंद्रं गच्छेति
भ्य ७ । ततः कपालान्युंथ्योद्वास्याज्यस्थाली पुरोडाशदधिपयसां प्रियेण धाम्नेति क्रमेणासादनं । आज्यस्थाल्या
दीनामालंभः । आत्मालंभः । उदकालंभः । होतुरामंत्रणादि । उत्तरमथयाजत्यागे इदमग्नये सोमायाग्नये
ग्नीषोमाभ्यामिंद्राय देवेभ्य आज्यपेभ्यो न मम पंचममेत्यादि । आग्नेय[या] ... नंतरमग्नीषोमीयउपां

ण९ श्रुयागः॥ ततो दधिपयोभ्यां तेन्द्रैंयागः॥ तत्र इन्द्रायानुब्रूहि इति होतारं संप्रेष्य जुह्वामुपस्तीर्य प्रथमं पयसो हि
वर्दानं मध्यात्पूर्वार्द्धाच्चावत्तो दध्नः॥ ततः उपरि सकृदभिघारः॥ दधिपयसोः प्रत्यभिघारः॥ उत्त्वायातिक्रम्या
श्राव्यैन्द्रं यजेति प्रैषः॥ इदमिन्द्रायेति त्यागः॥ महेन्द्रपक्षे च महेन्द्रायानुब्रूहि महेन्द्रं यज॥ इदं महेन्द्रायेति विशेषः
॥ शेषं पूर्ववत्॥ ततः सर्वहविर्भ्यः स्विष्टकृद्या॥ हि॥ दधिपयसोः प्राशित्रहरणे इडायां चावदेयं॥ नान्यत्र॥ त
त्रापि पूर्वं पयसः पश्चाद्दध्नः॥ ऐष्टिकं पवित्रं शाखापवित्रं चोभे समस्य मार्जनं॥ पुनः शाखायामेव तस्य पवित्रस्य
करणं॥ यजमानस्येति प्रस्तरे करणं॥ शाखापवित्रयोर्नभवति॥ ०यूहने अग्नेः अग्नीमयोः इंद्रस्य॥ जूति॥
॥ अग्निः॥ अग्नीषोमौ॥ उपांशु॥ इंद्रस्त्वमपनुदंत्विति॥ प्रस्तरहोमकाले प्रस्तरेण सह शाखाया होमः कर्त्तव्यः
॥ इदमग्नये होत्रा येति त्यागः॥ विशेषात् अग्नीषू ततः शाखोपवेषं जुह्वां प्राग्ग्रं निधाय जुहोमि त्वेति मं
पजेषं॥ त्रेणोर्वरिष्टिभिः सह जुहुयात्॥ इदं सुभगायेत्यागः॥ शेषं सर्वं पौर्णमासवत्कर्मापवर्गांतं॥ इति सान्नाय्य
०सोमायाग्नेः अग्नीषोमाभ्यामभिहायदेवेभ्य आज्यपेभ्याग्नये

दे॰ प॰ ज॰   नचप्रयाजात्मनियमः॥२ २ प्रैषादिवर्हिरपाकरणं॥तस्याभावः। प्रातस्तुदितेकुशवरणादि२

याजिनां अमावास्यायिरुक्तो॥ प्रयाजाः सान्नाय्ययाजिनः उच्यंते॥ उद्धरणादि पूर्ववत्॥ प्राग्वर्हिरादिवत्सा
पाकरणं तस्याभावः॥ प्रातस्तुदिते कुशवरणानुदितेवत्सा [illegible] नियमः॥ होमानंतरमुपसर्ग [illegible] पात्रा
सादने विंशतिकपालानी॥ द्वयोः पुरोडाशयोः साधारण्ये कैव पुरोडाशपात्री॥ दोहनं च तु स्य यस्याभावः॥ उपवे
षोवारणः॥ प्रैषादेरभावः अन्यत्पौर्णमासवत्॥ हविर्ग्रहणे॥ आग्नेयपुरोडाशग्रहणानंतरमैंद्राग्नस्यग्र
हणं॥ तत्र इंद्राग्निभ्यां जुष्टं गृह्णामीति। विभज्यालंभने॥ इदमग्नेः इदमिंद्राग्न्योरिति॥ कपालोपधाने आ
ग्नेयस्याष्टौ कपालान्युपधायोत्तरत ऐंद्राग्नस्य द्वादशकपालोपधानं अग्नीषोमीयवत्॥ उत्तरतः स्थलता
वारीति विशेषः॥ प्राणदाने अग्निं गच्छ इंद्राग्नी गच्छेति॥ उत्तमे प्रयाजे त्यागे॥ इदमग्नये सोमाग्नयेवि
ष्णवे इंद्राग्निभ्यां देवेभ्य इत्यादि॥ आग्नेय यागानंतरं विष्णोः उपांशुयाजः॥ तत्र विष्णवे उपांशु अनु
ब्रूहीत्युच्चैः॥ ध्रुवातस्रुवेण त्रिराज्यमवदायोत्तरार्धात् आज्यं विष्णुं उपांशुयजेति प्रथमस्वरेण प्रेष्यति
॥ इदं विष्णव इति त्यागः॥ ततः ततः इंद्राग्निभ्यामनुब्रूहि जुहुमुपस्तारः॥ ऐंद्राग्नस्य हविषो मध्या

७

पूर्वार्द्धं चावदायाभिघार्य विदानेत्यभिघार्यावद्यायातिक्रम्याश्राव्येंद्राग्नीयजेतिसंप्रेष्यमध्ये जु

होतीयद्दक्षिणं द्राग्निभ्यामिति त्यागः । ततः स्विष्टकृदादि । ऐंद्राग्नस्य प्राशित्रेऽग्न्यादि रिक्तं किमपि न

भवति । व्यूढे नैन्द्रमग्नेर्विष्णोरिंद्राग्न्योः कार्जितोऽभ्राग्निर्विस्मुरिंद्राग्नी तमपनुदं द्विति । अत्राप्यपां

विघ्नो ४ क्षुधा जस्य देवतो यांशूचारणं । प्रस्तरहोमे ऽग्न्ये मग्नये सोमा [illegible] यागन ये विप्लवद्दं द्राग्निभ्यां देवे

भ्य इति विशेषः । अन्यत्सर्वं समानं आश्यमावास्येष्टिवत् । सोमयाजिन्नो नियमेन सांनाय्यं

सो भवति । अ[illegible]मयाजिनस्तु इच्छया सान्नाय्यं भवति । त्रिंशत्तं वर्षाण्येव दर्शपूर्णमासाभ्यां

यागो भवति । यावज्जीवं वा । दाक्षायणयागपक्षेऽपि पंचदशवर्षाण्येव वा यावज्जीवं वा । उ[illegible]

र्ग पक्षेऽपि यावज्जीवमग्निहोत्रं हूयत एव । अन्यान्यपि सर्वाणि कर्माणि भवंत्येव ॥ २ ॥ द्वि

तीयाकंडिका । ऐंद्राग्नं द्वादशकपालं निर्वपेत् । सौर्यं चरुं निर्वपेत् । अग्नीषोमीयं पशु

मालभेत्येवमादिर्यत्र द्रव्यदेवतायुक्तः कर्मशब्दः आरभ्यातस्य यागः शब्दो वेदवाक्ये दृश्यते स सर्वोपि यज्ञातीयागो ज्ञेयः॥ सर्वास्विष्टिषु अग्नीषोमीये पशौ न्यदर्शपूर्णमासयोर्द्धर्मा भवंति॥ चातुर्मास्येषु वैश्वदेवपर्वणि धर्मा वरुणप्रघासमहामहविः सुनासीरीयेष्टे व भवंति॥ तत्रैवाप्येतान्येव पंचदशकीष्विभवंतीति वचनात् अतोमारु सांपस्याया अनीकवत्यादिषु न भवंति॥ सौम्मिकादन्यथा द्वारुणप्रघासिका व भथेध मा भवंति॥

भी ५ उल्कु मे वादा यो पपरै स्यादि त्यादौ यत्र संदेहो जायते किमत्र लौकोग्निर्ग्राह्य उत वैदिक आहवनीयादिरिति॥ तत्र सर्वत्र लौकिक एवाग्नि रविनियुक्तवा ह्यः॥ एवमन्यत्राप्युक्तं॥ वैदूले कर्मण्येकदेवत्ये सर्वत्राग्नेयाद्धर्मा भवंति अनेकदेवत्ये त्वग्नीषोमीये द्राग्न्यादेः॥ तत्रप्याग्नावैष्णवादौ अग्नीषोमीयादे द्राग्नावेति संदेहे

४स्य आग्नेये आग्नेयस्येति देवतागणस्यापां पृष्ठादेः। साम्येऽपि धर्मप्रवृत्तिर्भवति २

१६ उभयोः पंचाक्षरत्व लक्षणस्य शौ[illegible]परिमाणस्य [illegible] साम्यादग्नीषोमीयस्यैवैन्द्राग्नस्य
रु स्येति निर्द्धार्यते। तथा मारु[illegible]तैष्येव संदेशे[illegible]परिमाणादैन्द्राग्नस्योत्तीनि र्द्धार्यतोः द्र
भवति ३ व्यसामान्येन [illegible]पि धर्मप्रवृत्तिः। यथा पुरोडाशाच्यरुजा नासत्का[illegible]दौ पुरोडाशे पुरोडाश
स्या सांनाय्यैयथोपांशुयाजेन्द्र उपांशुयाजस्य। ऐंद्र पुरोडाशादौ देवता सामान्यादाग्ने
यस्य विध्यंतः प्राप्नोति द्रव्यसामान्यात्पुरोडाशस्येति। एवं द्रव्यदेवताविशेषे द्रव्य
सामान्यादेव धर्मा भवंति न देवता सामान्यादिति। पयस्यायां च पयस[illegible] एव धर्मा
भवंति न द[illegible]ः। अतश्चातुर्मास्यादौ परिवासित या[illegible]रवायाप वित्रबंधनानंतरं वत्सा
पाकरणादौ [illegible]दहनचतुष्टयात्मादनं न्यभवति। पा[illegible]वपि पयसएव धर्मा भवंति न द

द.प.च.

(एकस्मिन्नाग्नीषोमाभ्यां छागस्येत्यस्मिन्मंत्रप्रयोगे छागस्य स्थाने [illegible]। एवं सर्वत्र ज्ञेयं)

धः। प्रकृत एव सांनाय्ययोरेवा स्थानापन्नानां [illegible] श्रयणी [illegible] शरावाणामासादनप्रोक्षणे
भवतः। द्रव्येषु स्थानापन्नेषु धर्मा भवंति। यथा नैयारमाषचरौ श्यामाकानां व्रीहि
यवस्थानापन्नेस्तद्धर्माणां ग्रहणासादनप्रोक्षणकंडनादीनां प्रवृत्तिः। [illegible] चैंद्राग्न
[illegible] नीसत्र वृक्षे मेषस्य छागस्थानापन्नत्वात्तद्धर्माणामुपाकरणादीनां प्र
वृत्तिर्भवति। प्राकृतद्रव्यस्थानापन्नस्यापि ये स्थाननिमित्ता धर्मा विरुध्यंते स्थाना
पन्नद्रव्ये ते न भवंति। यथा परिव्याणोपस्थुनियोजनमित्यत्र परिधेर्यूपस्थाना
पन्नस्यापि तल्लक्षणाप्राप्त्यधिकरणाद्ययोयूपधर्मा न भवंति विकृ [illegible] वात्। विकृतौ
यत्र प्राकृतद्रव्यदेवतादेः स्थानेऽन्यद्रव्यदेवतादि विधीयते तत्र प्राकृतमंत्राणां
ऊहो भवति। यथा यथा विकृतिविहितमर्थं प्रकाशयेतिति यथा यथा तन्नि भवति

निरूढपशौ [illegible] पत्रस्य षष्ठम पं.के.ससंस वं.प.५

म्बयपवित्र
सौत्रामण्यपत्तेः
अर्थसंबंधः २

यथार्थमूहो भवति यथा यथा तं विकृति विहितमर्थं प्रकाशयंति तथा तथोहः कर्तव्यः ॥ यथा ऐंद्राग्नादौ
पत्नये जुष्टमित्यस्य प्राकृतस्य मंत्रस्यैंद्राग्निभ्यां जुष्टमित्यूहः ॥ यथा ऐंद्रो दृष्टिरित्यग्नीषोमाभ्यां घा
गस्येत्यस्य मंत्रस्य इंद्रोयमेवस्येत्यूहः एवं सर्वत्र ज्ञेयं ॥ मन्त्रसौमभाणामूहो न भवति प्रकृतेरपूर्वत्वात् ॥
यथा एकपत्नीके प्रयोगे पत्नीं सन्नह्येत्येकवचनांतो मंत्रो यथार्थः ॥ अनेकपत्नीकप्रयोगेप्येकवचनांत एव
प्रयुज्यते नोह्यते । तथा पवित्रे स्थ इत्यस्य विकृतएव पवित्रत्रय पक्षेपि प्रयुज्यते न पवित्राणि स्थेत्येवमू
ह्यते । विकृतौ वचनात्प्राकृत धर्मा न भवंति ॥ यथा चित्तपशौ नार्षेयं वृणीते न होतारं । यथा शुनासी
रीयेन मंथस्याग्निमिति ॥ ॥ अर्थलोपात्प्रयोजनलोपादपि प्राकृता धर्मा न भवंति ॥ यथा सौत्रे चरौ
कंडनस्य प्रकृतितः प्राप्तस्यापि प्रयोजनाभावाद भावः । यथा चरौ प्रथनाद्धिमर्शनसंप्लवनादेः ॥ यथा
चपपयस्यादौ कृष्णाजिनोलूखलमुसलादेरास नादेः ॥ ॥ तथा विशेषादपि प्राकृतधर्माणां विकृ

तावप्रवृत्तिर्भवति। यथाग्नेयेषेवणस्याभिवासनस्य वा दर्भपसर्जनीनामधिश्रयणस्य च॥ यद्दृप्राप्तृ
तो परार्थमुत्पन्नं भवति विहितो परस्य प्रतिपादनस्यापरस्याभावतस्याप्यभावो भवति। यथाप्रकृतौ प्रतिप
त्तिकर्मणा परार्थप्रतिपाद्य द्रव्यार्थ उत्प[illegible] त्तिरस्ति श्रसौ विहितो परस्य प्रतिपाद्य द्रव्यस्याभावे द्र
व्यस्य च कर्मणामप्यभावो भवति। तत्र तु परार्थोत्पन्नं द्रव्यं क्वापि कार्यान्तरसाधनत्वेन विहितं भवति
तत्र परस्याभावेपि परार्थोत्पन्नस्याभावो भवति परार्थोत्पन्नेन द्रव्येण च कार्यं तदन्येनापि येन केन चित्के
र्तव्यमित्यर्थः॥ तद्यथा यूपशकलेन स्रुक्संमार्ष्टीति यूपार्थं यूपेयस्य माणउत्पन्नं शकलं यूपाभावेतस्सं
बंधिशकलाभावेपि ग्रहसंमार्गसाधनत्वेन विहितत्वाद्येन केनचिच्छकलेन स्रुक्संमार्जनं कर्तव्यं। तत्रेदं
रहस्यं यत्र परार्थोत्पन्नं द्रव्यं क्रियार्थं तत्र क्रियाप्रधानभूतास्यास्सिध्यर्थं द्रव्यांतरमाक्षिपति। यत्र तु
क्रियाद्रव्यार्था तत्र द्रव्याभावे क्रियायाश्चाभाव एव भवति। यत्र ध्यापन्मूनाथपणेन सोमेन वा यक्ष्य

माणः सोमावास्यायां पौर्णमास्यां यजेतेत्यनेन वाक्येन सर्वेषां विकृतीनां सांगानां मुख्यायां पौर्णमास्या
ममावास्यायां च सद्योनुष्ठानं विधीयते । तेन सर्वविकृतयः सद्यस्कालाएव भवंति । न प्रकृतिवच्चिरका
लाः ।। प्राकृतकालस्यैवायं यद्दृष्टेत्यनुवाद इति वा संवादरिमतं निराकरणार्थं न विपक्षे क्रियाः स्युरिति
सूत्रं । विपक्षे प्रतिपद्विकृत्यः क्रिया न स्युः कस्मात् समभिव्याहारात् । यदृष्टेत्यादिवाक्यात् । ननु प्राकृत
कालस्यैवायमनुवाद इत्युक्तं । नानुवादः । अनुवादे हि वाक्यमनर्थकमेव भवेत् ।। प्रकृतौ विशेषकत्वा
भावात् ।। पौर्णमास्यमावास्याशब्दयोः लक्षणाप्रसंगाच्च । अन्यमुख्यार्थे संभवति सा न्याय्या । किं च सोमस्य
दमेव कालविधानं । न ह्यन्येन वाक्येन सोमस्य कालविधिरस्ति । तस्मादपि अपूर्वविधिरेवायं नानुवादः
।। अत्रेष्टिग्रहणे वाग्रयणास्यापि सिद्धेः नेष्टिरूपस्यापि तदाशिलायावापयस्येत्यादिरूपस्याग्रयणा
स्येतत्कालविशिष्यर्थं पृथगाग्रयणाग्रहणं ।। ३ ।। तृतीयकंडिका ।। ।। अथ यदा दाक्षायणयज्ञ उच्यते । सच

नै

प्रजाकामपशुकामान्नाद्यकामयशस्कामानां भवतीति। अत्र पर्यायेण सर्वफलसिद्धिः। न समुह्य दर्शपूर्णमासयो या
ग एवायं गुणविकृतौ न कर्मान्तरं। तत्र प्रथमपौर्णमास्यां पूर्वाह्णे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा रं
भणीयां च स्थालीं तदानीमेव पुनरुद्धृत्याग्नीषोमीयः पुरोडाशोऽन्वाधानादिकर्मापवर्गान्तः पौर्णमासाग्नी
षोमीयवद्भवति। हिरण्यं दक्षिणेति विशेषः। तत्र प्रजापतेर्भागोसीति मंत्रे ऊर्ग स्वीत्यस्य स्थाने हिरण्य
मसीति प्रयोगः। अथवान्वाहार्य एव दक्षिणा। ततः पुनरुद्धरणं। अन्वाधानं। मांसमैथुनवर्जनसं
कल्पः। वपनं वा। अपराह्णे पत्नीयजमानयोर्व्रत्याशनं शाखाच्छेदः। ऊर्जेत्वेत्यनुमार्जनं। व्रतग्रह
णमंत्रं वा। वत्सापाकरणं इंद्राय भागमिति देवतानियमः। ऐंद्रं सान्नाय्यमिति श्रुतेः। न पालिकोत्र मा
हेंद्रः। उद्धृहनं। शाखापरिवासनं। मूलादुपवेषकरणं। पवित्रबंधनं। शतैषोस्य यमेव पवाग्वा [illegible]ग्निहो
त्रहोमः। दुग्धे उपसृष्टादि निधाय वत्सापाकरणं। ~~पवित्रबंधनं। महो स्य यमे~~ व पूर्ववदित्यंतं। आरण्या ११

नाय३

पौर्णमासीमारभ्य

सूतं का॥ अन्यत्तशाग्गारे शयनं॥ अतर्थवाग्वास्यं होमः॥ ३ दिने ब्रह्मणो वरणादि दाक्षायण यज्ञेनाहं यक्ष्य इति वा॥ ससा
न्नाय्या मावास्ये ष्टिवत्सर्वं भवति॥ उपांशुयाजाभावः॥ आग्नेयः पुरोडाशः ऐंद्रं दधि ऐंद्रं पयः इति हविस्त्रयं॥ अन्वाहार्योहि
रण्यं वा दक्षिणा॥ उक्तमंत्रजे इदमग्नये सोमाय्या याग्नये देवेभ्य आज्यपेभ्य इति॥ प्रस्तरहोमेव॥ सूक्तने॥ आग्नेन्द्रिंद्र स्यो
जिति अग्निरिंद्रस्तम पनुदतामिति॥ सह शाखया प्रस्तरानुप्रहरणं परिधिभिः सहोपवेषहोमः पक्षेवें भूधे स्विन्वा
हार्यदक्षिणा॥ अमावास्या पर्यंतं मांसं स्त्रीसूतकारुयोतवाससां वर्जम्॥ ॥ अमावास्यायां पूर्वाह्णे ऐंद्राग्ना द्वादश
कपाल उद्धरणादि कर्मापवर्गांतो मावास्येष्ट्यंतर्गते द्राग्नीवत्॥ दर्शेष्ट्य र्थदर्शेष्ट्याहं यक्षे इत्येवं प्रयोगः॥ अन्वाहार्यो
दक्षिणा हिरण्यं वा॥ कर्मापवर्गांतं पुनरुद्धरणं अग्न्या धानं॥ मांसमैथुनसंकल्पः॥ वपनं वा अपराह्णे पिंडपि
तृयज्ञः॥ दर्शश्राद्धं कृत्या शानं॥ शाखाच्छेदः॥ संनमनं व्रतग्रहणं वा॥ शाखापरिवासनं॥ उपवेषानिष्पत्तिः॥ पवित्र
बंधनं॥ शाश्रोस्यपमाग्निहोत्रहोमः॥ दुग्धे पयस्यार्थ वद्गस्यापाकरणं॥ सत्र मित्रावरुणाभ्यां भागमिति विशेषः

उद्धरणं। आरण्याशनं वा। अन्यतरागारे शयनं॥ प्रातः स्वयं होमः। अनुदिते ब्रह्मवरणादि। दर्शेष्ट्याहं यक्ष्य इति। पात्रासादना
दि दर्शेष्टिवत्सर्वं। स्रुतावदानानंतरं वाजिनभांडं। दक्षिणादि हिरण्यं वा॥ पयस्यार्थं दधि चेति। तत्र स्थाल्यभिघारमद
त्वा वा वाजिनस्याऽवस्रावणं॥ तत्र स्थाल्यभिघारः। यथाक्रममुद्वायनं॥ वाजिनस्य च। यथाक्रमं ग्रहणं। अग्नि
गच्छेति पुरोडाशो मित्रावरुणौ गच्छेति पयस्यायां। वाजिनो गच्छेति वाजिनं। पुरोडाशपयस्ययोर्वेद्यामासादनं। उ
त्करे वाजिनस्यासादनं। सर्वाण्यालभ्यानि वाजिनस्यालंभः। उत्तमे प्रयाजे इदमग्नये सोमाय अग्नये मित्रावरुणा
भ्यां देवेभ्य आज्यपेभ्यो वाजिभ्यश्च इति विशेषः। आग्नेययागानंतरं मित्रावरुणाभ्यामनुब्रूहीत्युक्त्वा [illegible]को
मुपस्तीर्य स्रुतावदानेन पयस्याया मध्यात्पूर्वार्द्धाच्च। पयोविकारत्वात्स्रुवेण वा॥ द्विरवदायोपरिष्टादभिघा
र्यावदाने प्रत्यभिघार्यो [illegible]यातिक्रम्याश्राव्य मित्रावरुणौ यजेत्युक्त्वा वषट्कृते जुहोति। इदं मित्रावरुणाभ्या
मिति त्यागः। उपांशुयाजाभावः। ततः स्विष्टकृदादि पयस्यायाः प्राशित्रेड्योरेवावदेयं नान्यत्र। अवदार्यो

द्विरण्यं वा दक्षिणा ॥ स्तृते नो अग्ने मित्रावरुणयोरुराजिसी अग्निर्मित्रावरुणोत मप नुदान्त्विति प्रस्तर होमे इदमग्न
ये सोमायाग्नये मित्रावरुणाभ्यां देवेभ्य आज्यपेभ्यो अग्नये होत्राय वाजिभ्य इति विशेषः ॥ तृणं प्रास्यालमान
मालभ्याप उपस्पृश्य वाजिन यागः ॥ तत्र परिमोकानंतरं वा तत्र वार्हिषि वाजिनमवसिंचनु स्थाल्यैव जुहूं करोति नयति
॥ अरुणानंतरं वाजिभ्यो नुब्रूहीत्यनुवाचनं ॥ उपहृता यातिक्रम्याश्राव्य वाजिनो यजेत्युक्त्वा वषट्कृते अग्नेः पूर्वभागे जुहो
ति इदं वाजिभ्य इति त्यागः ॥ अनुवषट्कृते पूर्वभागे एव जुहोति ॥ सर्वे प्राग्वज्जुहोतीति केचित् ॥ ततो प उपस्पृश्याग्नेरुत्त
रत उपविश्य जुहूस्थेन वाजिनशेषेण दिशः स्वाहेति प्रतिमंत्रं दिशो व्याघारयति ॥ दिशः स्वाहेत्यग्नेः पूर्वभागे इदं
दिग्भ्यः ॥ प्रदिशः स्वाहेति दक्षिणतः इदं प्रतिदिग्भ्यः ॥ आदिशः स्वाहेति पश्चात् इदमादिग्भ्यः ॥ विदिशः स्वाहेत्युत्तर
तः ॥ इदं विदिग्भ्यः ॥ उद्दिशः स्वाहेति मध्ये इदमुद्दिग्भ्यः दिग्भ्यः स्वाहेति पूर्वार्द्धे इदं दिग्भ्यः ॥ ततः स्रुकस्थं वाजि
नशेषं उपहवपूर्वकं होत्रध्वर्युब्रह्माग्नीध्रयजमानाः क्रमेण भक्षयंति ॥ तद्यथा ॥ होता वाजिनं हस्ते गृहीत्वा अध्वर्यु

उपहूयस्व ब्रह्मन्नुपहूयस्वाग्नीदुपहूयस्व यजमानोपहूयस्वेति पृष्ट्वा भक्षयंतीति। ततो ध्वर्युर्वाजिनं भक्षार्थं हस्ते
कृत्वा होतरुप० ब्रह्मन्नुप० अग्नीदुप० यजमानोपहूयस्वेति पृष्ट्वा भक्षयति। भक्षणे विकल्पेन त्रयो मंत्राः
॥ऋतुना वित्विवा॥ वाज्यहं वाजिनस्येतिवा। वाजेवाजीतिवा। एवं ब्रह्मा होत्र उ ध्वर्युरग्नीद्यजमानान्पृष्ट्वानेन
नैव मंत्रेण भक्षयति। ततोग्नीद्धोतारमध्वर्युं ब्राह्मणं यजमानं च पृष्ट्वा भक्षयति। ततो यजमानो होतारम
ध्वर्युं ब्राह्मणमग्नीधं च पृष्ट्वैवमेव भक्षयति॥ एवं पंच भक्षयंति अथवा सर्वेभ्यः पूर्वं पश्चाद्वोभयतो यजमानो भ
क्षयति। तदा चोपहवेपि पूर्वं पश्चाद्वोभयतो यजमानोपहूयस्वेति यजमानः पृष्टव्यः परिधिभिः सहोपवेषहो
मः। ततः पुनरुद्धृत्यादित्येष्टिर्वा। दाक्षायणयज्ञेन पंचदश वर्षाण्येव यजेत। अथवा संवत्सरमेवार्वाग्दाक्षा
यणयज्ञेन यजेत न तत ऊर्ध्वं॥ तत्र यस्यां पौर्णमास्यामारंभः क्रियेत तस्यां पूर्वाह्णेग्नीषोमीयः पुरोडाशः उ
द्धरणाद्या ब्राह्मणतर्पणांतः॥ ततस्तस्मिन्नेव दिने पुनरुद्धरणादि सापंदोहां [illegible] तं वृत्वा प्रातर्दो [illegible] हार्थं वत्सापा

करणं कुर्यात्। प्रतिपदि प्रातर्ब्रह्मवरणादि आग्नेयपुरोडाशो नैंद्रेण सांनाय्येन दध्ना पयसा च यागो ब्राह्मणतर्पणां
तः। पक्षे वैमृधेष्टिः। अथ ततस्तस्मिन्नेव दिने पुनरुद्धृत्य कर्मापवर्गांते ऐंद्राग्नः कर्त्तव्यः। ततस्तस्मिन्नेव दिने उ
त्तरेष्ट्युपक्रमः। पयस्यार्थं वत्सापाकरणांतं। प्रातर्द्वितीयायां ब्रह्मवरणादि आग्नेयेन पुरोडाशेन मैत्रा
वरुण्या पयस्यया च यागः कर्मापवर्गांतः। ततः आदित्येष्टिर्वा। ततस्तस्मिन्नेव दिने पुनः श्रीसौमीयः २२
कर्मापवर्गांतः। पुनरुद्धरणाद्यनंतरेष्ट्युपक्रमश्च। एवं संवत्सरं यावत् प्रतिदिनमिष्टिद्वयं भवति। संवत्सरे
ण पंचदश वर्षसंख्या संपद्यते। पंचदशभिर्वर्षैः सप्तशतानि विंशतिश्चेष्टयो भवंति। संवत्सरं प्रतिदि
नमिष्टिद्वयानुष्ठाने चैतावत्य एवेष्टयो भवंति अथवाग्निहोत्रहोमवर्ज्यां दाक्षायणयज्ञेन यजे
त॥ चतुर्थी कंडिका॥४॥ अथ सर्वकर्मरूपांश्च देवताः कथ्यंते॥ काम्यस्य कर्मणो देवता उपांशु भव
ति। अत्राहुः कर्काचार्याः। व्यक्तं वै चोदने कवै तंत्रे कैयत्र कामग॥ तादर्थ्ये नैवत्योपतिस्तत्रैवस्या

दुपांशु तेति ॥ अग्नयणे वैश्वदेव उपांशु भवति ॥ वारुणवर्जिताः सर्वे एककपाला उपांशु भवंति ॥ प्राजापत्यः सर्वत्रो
पांशु भवति ॥ चतुर्मास्येषु चतुर्ष्वपि पर्वसु सावित्र उपांशु भवति ॥ चातुर्मास्येषु वा वैश्वदेव पर्वणि वैश्वदेवी प
यस्या पांशु भवति ॥ वैश्वदेवीति स्त्रीलिंगनिर्देशात् पाशुकेषु वैश्वदेवः पशुपुरोडाशो नोपांशु ॥ शुनासी
रीये वायव्यः पय उपांशु भवति ॥ यवागू पक्षे विशायो रुपांशुर्न भवति ॥ तेषां वैचतुर्णां हूयो स्त्रीण द्वीत्री
द्वी द्वीरुभ्यानि रुक्तानि भवंतीति स्मृत वानू ॥ अभ्याधेये तनूहविषां देवता उपांशु भवंति ॥ न सकृदिष्ट
यः ॥ चरणशब्दाभावात् ॥ यजोपांशु चरंतीत्येवं चरणशब्दस्तत्रैव सर्वमुपांशु भवति ॥ चरणशब्दे सर्वं क्षि
त्यकं वा तत्र ॥ आदित्येष्ट्यास्तनूहविषां भावे पिब द्रू चयशब्दुपांशुत्वं दीक्षणीयाप्रायणीयातिथ्येष्टी
नां देवता उपांशु भवंति ॥ अग्नौ चयने गायत्र्यः इष्टकाः पशुरुपांशु भवति ॥ चयने एवांते यामे आवरुणी
पयस्या सौपांशु भवति ॥ सोत्रमण्यां प्रथम ऐंद्रः पशुरुपांशु प्रथम ग्रहणात् त्रिपशौ ऐंद्रं ... भ इत्य ५८
अग्नाविति निशेषात् राक्षायण ग्नाषोमादौ मैत्रावरुण्या पयस्या नोपांशु ॥ १९

श्रेणो पांशुवं॥ वाचो थस: सौत्रामण्यामंते भवंति॥ सोप्फ पांसु॥ अत्रेव द्रू यानां विशेषउक्तः॥ प्रणवो येयजा
महे वषट्कारः संप्रैषांसंप्रेषास्थोद्रैरु पांसु हविः पुदेवतानामधेयंचो पांक्तीती॥ सर्वकामावाप्त्यर्थं आग्ने
योष्टाकपालः काम्यो भवति तत्रापि देवताउ पांसु भवति॥ वृष्ट्यर्थे आग्नेयेर्थ आग्नेयोष्टाकपालः काम्यो भ
वति तत्रापि देवताउ पांसु भवति॥ वृष्ट्यर्थ आग्नेये क्रियमाणे विशेषः॥ आग्नेयस्यारंभे वृष्टिकामो स्मीत्येवं क्रिया: प्रति
भाक्रमया यजमानो ब्रूयात्॥ अथ यजमान एव पुरो [illegible] वातं च विद्युतं च मनसाध्यायेत्य ध्वर्युं प्रतिब्रूयात्॥ ततो
जेष्य: ५ आणिमतसाध्यायेत्यग्नीधं प्रतिब्रूयात्॥ ततः स्तनयित्नुं वर्षं च मानमनसा ध्यायेति होतारं प्रतिब्रूया
त्॥ ततः॥ पुरोवातं च विद्युतं चाभ्राणि च स्तनयित्नुं च वर्षं च मनसा ध्यायेति ब्रह्मणं प्रतिब्रूयात्॥ एवं कृ
ते आग्नेययागा द्वृष्टिलक्षणं फलं भवति॥ अथ वा वृष्टिकामो यजमानः॥ प्रकृतो दर्शपूर्णमासे ष्टावेवो द्वारण
काले एवं ब्रूयात्॥ न पृथगाग्नेयोष्टिकार्या॥ अथा [illegible] वारंभणीयेष्टिरुच्यते॥ सा च दर्शपूर्णमासयोरारं

भेमात्स्याद्वानंतरं पौर्णमास्यां भवतीत्याहु पक्षे॥ सर्व पौर्णमासानुष्ठानं चैआसीपद्ये वान्वारंभणीयाभ
वतीतिसंप्रदायः। तस्याः श्रीणीद्वीविभवंति॥ अग्ना। वैष्णव एकादशकपालः पुरोडाशः॥ सरस्वत्यै च
रुः। सरस्वते द्वादशकपालः पुरोडाशः। उद्धरणादि कर्मापवर्गान्तता पौर्णमासेष्टिवत्॥ विशेषः। अन्वारंभणी
येष्ट्यर्थमित्युद्धरणे। अन्वारंभणीयेष्ट्या वयं यक्ष्यामह इति वरणे॥ पात्रासादने दशगणे शूर्पा
ग्नीहोत्रहवणि॥ स्फ्यः॥ कपालानि त्रयोविंशति॥२३॥ चरुस्थाल्येकाग्न्यादि। अर्थवति। अन्वाहा
र्यस्थाने पष्ठौही दक्षिणा॥ पष्ठौही बाला गर्भिणी॥ मिथुनौ वा मिथुनाद्धौ गावौ। स्त्री गवी पुंगव अ। वि
शति कार्ष्कहृ ध्मः। मृत्तावदानानंतरं मेक्षणं॥ अन्यत्पूर्ववत् आदाने। अग्नाविष्णुभ्यां जुष्टं गृह्णामि
।पुरो०। सरस्वत्यै जुष्टं। चरुः॥ सरस्वते जुष्टं पुरो०। प्रोक्षणे। अग्नाविष्णुभ्यां त्वा जुष्टं प्रोक्षामि। सर
स्वत्यै वा जुष्टं। सरस्वते वा जुष्टं। कणांतेचरौ स्तंदुला विभज्यालंभः। इदमग्नाविष्णोः सरस्वत अन्वा इदं स

रस्यस्थाः। एतच्च व्रीहिमयपुरोडाशपक्षे। यवपुरोडाशपक्षे यवमय एव। तदा नानाबीजपक्षे उरुवालायेती

क्षेपणं भेदेन। अप न्यं निरसनं मंत्रेण। अभिमर्शनं चेद्भेदेन। यच्छंतामिति भेदेन। शेषाभिमर्शनं च भेदेन

। अवघातफलीकरणानां मेकस्य कृत्वा। ततो द्वितीयस्य मंत्रेणावपनं। मुसलं चुरहीतमेकासदृद्धमिति

तु भवति। न शूर्पादानमंत्रः। प्रतिवै स्फद्वपनं। पूर्वस्य तुषैः सह तुषानिरसनं भेदेन वा॥ निष्कवनादिफली

करणानां भेदेन। चरोः पेषणसंपवनं त्र्यां संवापोपधानं भ्रगूणामिति तापनप्रथनादूरभिमर्शनं ज्वा

लयोपरिक्षिपणाभिवासनस्थात्या उद्धृत्य पात्र्यामासादनानि न भवंति। अन्यत्सर्वं भवति॥ तथा चो

प८-७ क्तं। पेषणं यवनं वापस्तापश्चोपधिरिति। तथा। भर्जनाच्युदनं ज्वालात थाग्न्युद्धृत्य सादनमिति। पे

षणं चूर्णमर्दनं। यवनं पिष्टस्योदकेन मिश्रणं। वापः उदकं मिश्रणाय पात्र्यां प्रक्षेपः। तापः कपाला

नामंगारैः प्रतापनं। उपाधिरिति। अंगारेषु कपालस्य स्थापनं। प्रथा कपाले च व स्थापितस्य पु

रोडाशस्य हस्तसंघट्टेन सर्वेषु कपालेषु प्रसारणं ॥ मार्जनं । स्वस्ती[illegible]करणं ॥ अध्यूहनं भस्मनां ॥ ॥ ॥ अप
र्यग्नानं ॥ ज्वालादर्भैरेव ज्वालनं । अध्यूह्य सादनं कपालेभ्यः पुरोडाशं पृथक्कृत्यां तत्रैव वस्थापनं
। पिष्टानामीक्षणं स्नुत्वा च शेषतंदुलानामीक्षणं । पिष्टानि पात्र्यामोप्य स[illegible]पवित्रे चरुपात्रे तंदुलावा
पः । ततः स्त्रिः प्रक्षालनं । तत उपसर्जन्या आनयनं । पिष्टेषूपसर्जनीर्निनीय च शावपि निनयति । सं
यवनानंतरं विभज्य पुरोडाशयोरालंभः । इदं भग्नाविष्णू । इदं सरस्वतः । प्रथमपुरोडाशस्यो
त्तरतः अंगारैरधिश्रयणं । चरोरुत्तरतो द्वितीयपुरोडाशस्य कपालोपधानकाल एव प्रथमस्य
कपालान्युपधाय तस्योत्तरतः अंगाराः स्थापनं परिकल्प्य तयोस्तरतो द्वितीयपुरोडाशकपाला
नामुपधानं कर्त्तव्यं । चरोरध[illegible]स्तात् रूपणदानं प्रसिद्धं नोपरि ॥ प्राणदाने अग्नावि
ष्णुगच्छ । सरस्वती गच्छ । सरस्वंतं गच्छेति । अवबाधेन सप्तदशेन वर्त्मेणेति । उन्नमप्रया

जत्यागोइदमग्नयेसोमायाग्नाविष्णुभ्यां मनु [illegible]

रस्वत्यैसरस्वते देवेभ्य इत्यादि। आज्यभागान्तं तंत्रं अथ प्रधानयागे अग्नाविष्णुभ्यामनुब्रूहि। अग्ना

विष्णू यजा। चरोर्मेक्षणेनावदानं। सरस्वत्या अनुब्रूहि। सरस्वतीं यजा। सरस्वतेनुब्रूहि। सारस्व

तं यजा। ततः स्विष्टकृदादि। आग्नावैष्णवस्य चरुत्वाद्विकिरणभागाभावः। इतरयोस्तु सर्वं भव

ति। दक्षिणा त्वं मे प्रजापतेर्भागोसीति मंत्रे ऊर्जस्वानसीत्यस्य स्थाने पष्ठौही गौरस्यमं इत्यादि

। अस्या अन्वारंभणीयेष्टेः समृध्यर्थं पष्ठौही गां दक्षिणां ब्रह्मणे होत्रे इत्यादि ब्राह्मणाः इयं

वः पृष्ठौही गौः प्रतिगृह्णीतेति। यो स्मा ददातीत्येव प्रतिग्रहमंत्रः सर्वेषां। मिथुनौ वेति

पक्षे गो मिथुनमस्यूर्जमिति। ब्राह्मणा इदं वो गोमिथुनं प्रतिगृह्णीतामिति। व्यूढे अग्नाविष्णोः

सरस्वत्याः सरस्वतउज्जितिं। अग्नाविष्णु सरस्वती सरस्वांस्तमपनुदंत्विति। प्रस्तरहोमस्यागोइ

भ्यां

दमग्नये सोमाग्नाय्याग्नाविष्णुसरस्व[तीसरस्वा]भ्यो सरस्वते देवेभ्य इत्यादि पिष्टलेपहोमे इदं विश्वेभ्यो
देवेभ्यो इति त्यागः।अन्यत्सर्वं कर्मापवर्गांतं प्रकृतिवत्।।इष्टपंचदर्शपूर्णमासत्र कृतिपुसर्गास्वि

पुनः।

ष्टिषु आरंभे भवति तथा चोक्तं नित्यानां संकृदारंभे काम्यानां च पुनः।सोम सौत्रामणीवर्जमन्वा
रंभः प्रशस्यते।।१।।व्रीह्याग्रयणयवाग्रयणयोः साधारणी एकैकस्ये वाग्रयणस्य स्याग्नि
होत्रवदभ्यस्यमानत्वात्।याज्ञिकानां मते पशोरप्यारंभे भवति।न कर्ममेलो पौर्णमासेध्वनंतरं
विकल्पेन तत्कालमेव उद्धरणादि कर्मापवर्गांतं इंद्राय विमृधे जुष्टं इंद्राय पविमृधे वा जुष्टं इंद्रं
विमृधं गच्छ।इंद्राय विमृधे नुब्रूहि।इंद्रं विमृधं यज।चतुर्द्धाकरणादि सर्वं भवति।इंद्रस्य विमृ
ध उज्जिति।इंद्रो विमृ[illegible]धस्तमपनुदतु।शेषं पौर्णमासवत्।दर्शेध्वनंतरं विकल्पेनादित्ये चरुर्भ
वति।तत्र चरुधर्माः अन्वारंभणीयायामुक्ताः[illegible]।उद्धरणादि कर्मापवर्गांत माग्नेयवत्।।अदी

२ इंद्राय विमृध एकादशकपालः पुरोडाशो भवति। अन्वाहार्यो दक्षिणा।ग्रहणादौ विशेषः।५

१७

हार्येदक्षिणा॥ अदृणे। आदित्यै जुष्टं प्रोक्षणे आदित्यै वा जुष्टं। आदितिं गच्छ। आदित्या अनु आदि। आदि

त्यं यज॥ आदित्या उर्जिति। अदितिस्तमयनुदनु॥ आज्ञि आदि सर्वे भवति। अनयोरिष्ट्योरादि विकल्पः

नु ३ तथा चोक्तं। रूपं कालो निर्वा[illegible]पः अपणं देवतास्तथा॥ आदौ येविधताः पक्षास्तैर्दासमताः [illegible] पंचै इमिसर्व

वादि विकल्प्याः। अन्ये सर्वे पीछा विकल्प्याः॥ रूपं दर्शपूर्णमासादि॥ काल उदितानुदितादि।

अनुनिर्वपः वैमृध आदित्य आ। अपणं॥ [illegible] हपत्ये आग्नेव नीये बलि देवता

इंद्रो महेंद्रो वेति आयेषां मध्ये यस्यादौ स्वीकारः कृतः स एव सर्वदा भवति न पक्षांतरं। दर्शपूर्णमा

सारंभे येकवारं यदि कृते तदा यावज्जीवं कर्त्तव्यं। यदि न कृते तदा यावज्जीवं न क्रियेत एव॥ पंच

भीकं ऋका॥ अथाग्रयणमुच्यते। शरद्वसंतयोर्भवति। नवधान्यस्य प्रथमप्राशो वा तद्[illegible] कोश

रद्वसंतयोः केचिन्नवयज्ञं प्रचक्षते॥ धान्यपाकवशादन्ये श्यामाकोवाग्निः स्मृतः। इति। एतदाग्र

द.प.प.

सध्य२

अथ य[illegible]णं पौर्णमास्याममावास्यायां वा भवति ॥ सूत्रे पक्षे वा पुण्यनक्षत्रे वा दृष्ट्वा आलंबनात् यदि
पूर्वाह्णे पर्वांतस्तदौस्कालपौर्णमासेष्टेः पूर्वमाग्रयणेष्टिः । ततः पौर्णमासेष्टिः ॥ अमावास्येष्ट्य
नंतरं चाग्रय[illegible]णेष्टिः ॥ तदा वचनात् अमावास्येष्टिरमावास्यामध्य एव समाप्तीया ॥ तदुक्तं अथो
पूर्वाह्णे पर्वक्षये दर्शेष्ट्याः परमुक्तमाग्रयणं [illegible] प्राक् पौर्णमासाच्च तत् इति । (अथो पूर्वाह्णे पर्वक्षो
ये दर्शेष्ट्याः परं मुक्तमाग्रयणं [illegible] प्राक् पौर्णमासाच्च तत् इति) इति ॥ अथो पूर्वाह्णे पर्वक्षये [illegible]
चाभ्यां इष्टिपश्वाद्या [illegible] विकृतयः उभयथा [illegible]ते इष्टेरनंतरमेव भवंति ॥ अत्रोक्ते काले नवा
नां व्रीहीणां नवानां यवानां चाग्रयणसंज्ञकेष्टिर्भवति । तत्र त्रीणि हवींषि भवंति । ऐंद्राग्नो द्वा
दशकपालः पुरोडाशः ॥ वैश्वदेवश्चरुः यवकाले यवानां व्रीहिकाले व्रीहीणां नवानां वा पुराणा
नां (एकं द्रव्येण तेन तु ॥ समाप्य कर्म तत् द्रव्यभेदात् कर्म तु भिद्यत इति नियमाश्च रवंजयाम) । १८

(स्वंऽयां वा पौर्णमास्यां पौर्णमासस्य प्राक् पूर्वमेवाग्रयणयागोऽमावास्यायाः प्रागूर्ध्वमेवाग्र)
(यणयागं वा) पुराणानां व्रीहीणां [illegible] जीर्णाः। द्यावापृथिवीय एककपालः पुरोडाशो वा। आग्रा
यणयागे वा पांशुपालनं वतू। एतानि त्रीणि हवींषि व्रीहिकाले नवानां व्रीहीणां भवंति यवकाले नवा
नां यवानां। चरु स्थाने विकल्पेन नवानां जीर्णानां वा। तत्र द्वारेणाश्रीत्याग्रयणेष्ट्यर्थं यवाग्र
यणेष्ट्यर्थं वा। आलवर्णं त्रीस्याग्रयणेष्ट्या वयं यस्याम हे। यवाग्रयणेष्ट्या वा। पात्रासा
दने ऐंद्राग्नस्य द्वादशकपालानि। एका चरुस्थाली। द्यावापृथिवीयपुरोडाशपक्षे तस्यैकं कपालं
पाणिसंमितं। द्वितीयादुग्धापसर्जनी विकल्पेन वैश्वदेवचरुश्रपणार्था। दक्षिणार्थे प्रथमजो व
त्सः। विंशतिरिध्मकाष्ठानि। द्वे पात्र्यौ एका वा। सर्वावदानानंतरं भेक्षणं। अन्यत्सर्वं प्रकृतिव
त्। ग्रहणे। इंद्राग्निभ्यां जुष्टं विश्वेभ्यो देवेभ्यो जुष्टं द्यावापृथिवीभ्यां जुष्टं प्रोक्षणे इंद्राग्निभ्यां

त्वा जुष्टं। विश्वेभ्यस्त्वा देवेभ्यो जुष्टं। द्यावापृथिवीभ्यां त्वा जुष्टं। कणान् निष्पन्नांते चरोस्तंदुलान्पृथक्कृत्यालंभः
। इदमिंद्राग्न्यो द्यावापृथिवीभ्यां। इदं विश्वेषां देवानां कपालेषु प्रथमेने ऐंद्राग्नस्य द्वादश कपालान्युपधा
यतस्योत्तरतश्चरुस्थानं कृत्वा तस्योत्तरत एककपालस्य प्रथमकपाल धर्मेणोपधानं तत्पश्चात्सव्यस्वै
स्यान्नूहनं। पयसि वोसि वैश्वदेवचरोः पयसाश्रयणं। पक्षे पयस उपसर्जनी मधिश्रित्योदस्य चरोर्वि
नयति। तत्र प्रातीश्यदहमंत्रे ऊहः। संपयस्युषधीभिः समोषधयो रसेन। संदं रेवतीर्जगतीभिः पृच्य
तां सं मधुमन्मधुमतीभिः पृच्यतामिति। उदकेनश्रयणपक्षे प्रकृतिवत्सान्चरुधर्मा अश्ववारभ
णीयाच्चायामुक्ताः। पुनरपि संयवनानंतरं समं विभज्यालंभः। इदमिंद्राग्न्योः। इदं द्यावापृथि
व्योः। पुरोडाशयोर्मध्ये चरौ दधिश्रयणं। द्यावापृथिवीयस्य प्राणदानं कृत्वा लौकिकेनाज्येन त
स्यां ताधारादनं प्राणदाने इंद्राग्नीयपूर्णं विश्वेदेवानश्रधा। द्यावापृथिव्योगच्छा प्रकृतं संवाधिकृता

१९

वितिन्यायात्॥ अव बाधने सदर्शेन वजेत्येति॥ उत्तमप्रयाजे शरद्वसन्त ये सोम मैन्द्राग्नौ अग्नो
विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां देवेभ्य आज्यपेभ्यः॥ आज्यभागौ॥ प्रधान याग॥ इ
न्द्राग्निभ्यामनुब्रूहि॥ इन्द्राग्नी यज॥ विश्वेभ्यो देवेभ्यः॥ उपांशु अनुब्रूहीति प्रथमेनाच परसै
स्मणेनावदानं॥ विश्वान् देवान्॥ उपांशु॥ यज॥ द्यावापृथिवीभ्यां॥ उपांशु अनुब्रूहि॥ द्यावापृ
थिव्यौ॥ उपांशु॥ यज॥ सकृदुपस्तीर्य सर्वमपि पुरोडाशमखंडमेव जुह्वां निधाय पश्चाद
भिघारयति॥ मानवे॥ एककपालमन्यस्यां पात्र्यामलंकुर्वन्नभिपूरयति प्रचरणवेलायां
हविषि सादपि वोपस्तीर्यैककपालं सकृत्समवद्यताग्न्यस्यावासिन्यद्धि अभिघार्योपांश्वेककपाले
न प्रचर्य पर्वषद्धृतो मध्ये पाणिना जुहोति सप्तृजं प्रातिष्ठितमाग्रये नाभिजुहोतीति॥ अथ वोपांशु
याजवदेककपालायाश्चनुरवदाय॥ द्यावापृथिवीययागः कर्तव्यः॥ ततः स्विष्टकृदादि प्राशित्रेडान्त्य

तिरिक्तं किमपि न भवति। कर्कमते। चतुर्होकरणवर्जं सर्वं भवत्येव। दक्षिणा यां न गर्भसीत्यस्य स्थाने प्रथमजो गौ इत्यूर्जमिति। अस्या इष्टेः समृध्यर्थं प्रथमजं गां दक्षिणां ब्राह्मणेभ्य इत्यादि पूर्ववत्॥ ब्राह्मणा अयं वः॥ प्रथमजो गौः प्रतिगृह्णीतेति। द्यौस्त्वा ददात्वित्यस्य मेव प्रतिग्रहणमंत्रः। ब्यूदजे॥ इंद्राग्न्यो विश्वेषां देवानां द्यावापृथिव्यो रुर्जितिं॥ इंद्राग्नी विश्वेदेवा द्यावापृथिव्यो तमपनुदंत्विति। प्रस्तरत्यागे। इदमग्नये सोमायेंद्राग्निभ्यां विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां देवेभ्य इत्यादि। कर्मापवर्गांते मन्यतत्प्रतिवत्॥ दर्शपूर्णमासेष्ट्यनंतरमाग्रयणाख्या विकृतयो भवंति। नतत पूर्वं॥ तत्र कृताधानस्य सूतकमृत्कास्त्वादि निमित्तवशेनानिष्टदर्शपूर्णमासस्य यजमानस्याग्रयणकाले आगते कालातिक्रमेण जाय मानेन आग्रयणकाल एव मात्त आकुं रत्वा दक्षिणाग्नौ नवान्नं आनुष्ठानस्यं पक्वी आलग्ना नो

भिर

जयेत्॥ तेभ्यो भुक्तवद्भ्यो यथाशक्ति किंचिद्दक्षिणां दद्यात्॥ दर्शपूर्णमासेष्ट्यनंतरं
केवलाग्निहोत्रिणोऽपि यजमानस्य नवान्नेन सायंप्रातरग्निहोत्रहोमः कर्तव्यः। अथ
वा पूर्वदिनेऽग्निहोत्री गां नवान्नं खादयित्वा तस्याः गोः पयसा सायंप्रातरग्निहोत्रं जुहुयादा
ग्रयणकाल एव। तेनैवाग्रयणसिद्धिः। नवान्नमध्ये आग्रयणकाले आयातेन नवान्न
भ्रितायाः पयसा दीक्षितव्रतं कार्यं। तेनैवाग्रयणसिद्धिः। संवत्सरोपसत्कादौ उपस[illegible] स्वा
ग्रयणकाल आगतेन नवान्नेन रोहिणौ पुरोडाशौ कार्यौ। स्मृत्यास्याग्रयणकाले नवान्नेन
सवनीयाः॥ कर्तव्याः। आपस्तंबसूत्रेबद्धेच आरम्भणे च दर्शपूर्णमासाभ्यां समानतंत्र
माग्रयणं पठितमस्ति। तत्र पूर्वं प्राकृतान्निर्वापः। पश्चादाग्रयणस्य॥ सामिधेन्यः
प्राकृतसंख्या एव। दक्षिणापि प्राकृत्येव॥ ॥ अथ स्मार्ताग्रयणमुच्यते। तच्च
वर्षासु शरदि वा यजमानीये हानि मुक्ते पक्षे पुण्ये नक्षत्रे वा भवति। तत्र प्रथमप्रयोगे

मान्त्रश्रा दूमन्वारंभणीयांच वैश्वानर्या माकेष्टिः कार्या। तत्र सोमदेवत्यः श्यामाकानां च स्थवि
ति। तत्र श्यामाकाग्रयणेष्ट्यर्थमित्थं दूरणोः श्यामाकाग्रयणेष्ट्याहुमिति करणे। पात्रासाद
ने कपालस्थाने चरुस्था ली। उपवेषाभावः। दक्षिणार्थे पुनः संस्कृतो रथः। क्षौमं वा। मधु
पर्कीयादधि मधु घृतानि। वर्षाकाले धृतं परिहितं वासो वा। एते दक्षिणाविकल्पाः। हविः श्या
माकाः। विंशतिरिध्मकाष्ठानि। अत्र तावदानस्थाने प्रोक्षणं अन्यत्प्रकृतिवत्। आग्रयणे। सो
माय जुष्टं। प्रोक्षणे सोमाय वा जुष्टं। चरुधर्मः अन्वारंभणीयाया मुक्ताः। कणानि
धानां ते अध्वर्युः स्वयमेवोपसर्जन्यधिश्रयणं। यजमानस्याऽन्यान्निर्वापो वेद
कंधस्था। तंदुलानामीक्षणं। सपवित्रे चरौ तंदुलावापः। उपसर्जन्यानयनादि पात्र्यंगुलिप्रक्षा
लनं नियमाभावः। प्राणदाने सोमं गोष्ठादूर्ध्वं महं समसदृशो नेत्यवबाधने। उत्तमप्रयाजे। इदमग्न

य सोमाय सोमाय देवेभ्य इति त्यागः। प्रधानयागे इदं सोमाय। मेक्षतणेना [illegible] वदा
नयहरणं। चतुर्धाकरणादि सर्वं भवति। दक्षिणाकाले भमंत्रे रूपमसीत्यस्य स्थाने
[illegible] सोमयज्ञानेपुनः संस्कृतारथोसीति। क्षेम मसीति वा। मधुपर्कोसीति
वातर्षा धृतवासोसीति वा। ब्राह्मणा इदं वः सोमं प्रतिगृह्णीतेति अयं वो मधुपर्कः इदं वो वर्षाच्
तवास इति। व्यूहनेसोमस्याजिति। सोमस्तमपनुदत्विति। प्रस्तरहोम इदमग्नयेसोमाय सो
माय देवेभ्य इति शेषं प्रकृतिवत्। ॥ श्रीजयकृतो वेणुयवानां सौम्यश्च रुभवति।
तत्र सर्वेष्या माकाग्रयणवत् [illegible] नि विशेषं। आपस्तंबे विशेषः वेणुयवानामिष्टि
मेके समामनंति वेणुयवेषु पक्वेषु वेणुयवानुकृत्तं वा इति संप्रेष्यति। तस्या एतदेव
तंत्रमेषा देवता आग्नेयी मैत्रावरुणी प्राजापत्या वेति। एतत्तंत्रमेषा देवतेति इष्या माके सो

दे॰प॰प॰

द्धोयदुक्तं तस्यादेशः ॥ अथ देवतांतरपक्षे आरंभे वृद्धिश्राद्धादारंभणीये भवतः ॥
देवतान्यवैकर्मान्यचातु ॥ सोमदेवतापक्षे तु न भवतीः श्यामाकेष्टिस्त्वापस्तंब
सूत्रे च व्रीह्याग्रयणेन समानतंत्रेतयाप्रकृतास्ति ॥ ॥ षष्ठीकंडिका ॥ अथा
न्वाधेयमुच्यते ॥ तदाधानममावास्यायां भवति गृह्यांतरात्पौर्णमास्यां वा ॥ तथा
कृत्तिकासु वा ॥ रोहिण्यां वा ॥ मृगशिरसि वा ॥ पूर्वोत्तरफल्गुनीषु वा ॥ लाभका
मस्य ब्राह्मणस्य हस्तनक्षत्रे वा ॥ क्षत्रियास्य लाभकामस्य चित्रानक्षत्रे
वा ॥ वसंते ब्राह्मणस्य निष्कामस्य ॥ ब्रह्मवर्चसकामस्यापि ग्रीष्मे क्षत्रियस्य
निष्कामस्य श्रीकामानां सर्वेषां ... वर्षासु प्रजाकामस्य पशुकामस्य चैत्रे वालि
कस्य वैश्यस्यानिष्कामस्यापि रथकारस्य च ॥ यदहरेवैनं श्रद्धोपनमेत

माघ

२२

दहनादधितेत्तिश्च॥ यदाश्वद्वोत्पद्यते तदैवाधानं नात्र कस्यापि कालस्य नियमः॥ आ
पस्तंबः॥ हस्तेयं कामयेत प्रमेदीयेतेति। चित्रायां राजन्यो भ्रातृव्यवान्। विशाखयोः
प्रजाकामोनुराधे वृद्धिकामः श्रवणे पुष्टिकामः उत्तरेषु प्रोष्ठपदेषु प्रतिष्ठाकामः सर्वाणि
नित्यवादके समामनंतीति॥ ज्योतिःशास्त्रे॥ अग्नेः परिग्रहं कुर्याद्विशाखा कृत्तिका मृगे॥
रेवती रोहिणी पुष्ये ज्येष्ठायामुत्तरात्रये॥ कारिकायां॥ माघादिपंच मासेषु श्रावणे चाश्विने तथा
।कुर्यान्मृगोत्तमांगे वा आधानं सु शुक्लपक्षतः। हस्तद्वये विशाखासु कृत्तिकादित्रये तथा
।पुनर्वसुद्वये तद्वद्रेवती पूर्वरासु च॥ भौमार्कि वर्जिते वारे नाधिमासे तथा क्षये
।चंद्रेनुकूले पूर्वाह्णे रिक्ता विष्टि विवर्जिते॥ मानवे॥ श्योत्रीनाधास्य मानउ
पवसे पूर्वां पौर्णमासीमुत्तरामभावास्यां नक्षत्रं वेति॥ आपस्तंबः॥ पौर्णमास्यां तु

पूर्वस्मिन्पर्वणि सेष्टिसान्वारंभणीयामपकृष्य स्थोभूते पौर्णमासेन यजतइति॥ काठके च। आधानं चे
त्पौर्णमास्यां पूर्वेत्तर्नूर्देवताभ्य उपवसेदुत्तमामन्वारंभणीयायै(या) पर्वणीति॥ लौगाक्षिः॥ पौर्णमास्या स्यैर
मादधानः पूर्वामुपोष्याधायाग्न्याधेयेष्टिभिरिष्ट्वा उद्धृत्याग्निहोत्रमुपतिष्ठमानो वसति स्वो
न्वारंभणीयापौर्णमासं चेति॥ अतस्त्वमावास्यायामाधाने अमावास्यायामुपक्रमः। प्रति
पदि मंथनादीष्ट्यंतं॥ पौर्णमास्यां चतुर्दश्यामुपक्रमः। पौर्णमास्यां मंथनादीष्ट्यंतं। द्व्यहप
नै ६ क्षे तस्मिन्नेवादिवारंभणीयापौर्णमास्यार्थमुद्धरणाग्न्यन्वाधानाद्युपक्रमस्या। प्रतिपदि पौ
र्णमासयागः॥ मध्यमे त्वौर्णमासं तदा प्रतिपद्येवान्वारंभणीयापौर्णमासं चेति। नक्षत्रा
धान पक्षेपि पूर्वेद्युरुपक्रमः। नक्षत्रदिने मंथनादि त्रिरात्र षड्रात्रादि अग्निधारणमध्ये चे
त्पौर्णमासेष्ट्यारंभस्तदा तेषु नित्यधर्मेषु वाग्निष्वन्वारंभणीयापौर्णमासेष्टिश्च कार्या २७

॥ नपृथेमृद्धरणं॥ अथात्र पदार्थक्रमः। तत्रादेहसुद्धये कृतप्रायश्चित्तो यजमानो मातृ
पूजापूर्वकं मान्दश्राद्धं कृत्वा सर्त्विजो वरणीते। तत्र रस्योपयद्दौ यवानादाय कृत्वि
जो दक्षिणं जानं वालंभ्यामुकसगोत्रामुकशर्मणनू नित्यनैमित्तिककाम्यकर्मानुष्ठानार्थं श्रौ
तानग्नीनहमाधास्ये तत्र मे त्वं ब्रह्मा भव। होता भव। अध्वर्युर्भव। अग्नीध्रो द्वेति वृत्वा ता
नभ्यर्च्य सुप्रोक्षितादि। यजमानस्यां तिलकादिमांगल्यं॥ आशीर्वादः। तत्र पूर्वमर
शाखा
ण्यादेर्लक्षणमुच्यते। शमीगर्भस्याश्वत्थस्य या प्राङ्मुखी भवति उदङ्मुखी वा।
कुर्वंगवातां छित्वोभे अपरणी कुर्यात्। अरणिस्त्वनुविंशत्यंगुला [illegible] दीर्घा। षे
डंगुष्ठा विस्तारा। चतुरंगुलोछ्राया च भवति। एवंविधा अधरारणिरुत्तरारणि
श्च कार्या। अष्टांगुलदीर्घोर्ध्वांगुलोत्सेधविस्तार उत्तरारण्या ईशानदिग्भागस्थितः प्र

मंथो गर्त्तस्तेन। द्वादशांगुलं खादिरं चात्रं वृत्तं आद्या त्रिमूले ग्रे च लोहपदिकया नद्धं तस्या
ग्रे लोहमयः कीलकं कार्यं। मूले च चतुरस्रो गर्त्तः प्रमंथाग्रप्रवयणार्थः कार्यः॥
उंदीली च खादिरी द्वादशांगुलाऽधोभागे लोहपदिकायुक्ता च कार्या। तस्यां पदिका
यां कीलकस्योपरि स्थापनार्थानि निम्नानि स्थानानि कार्याणि। गोवाले ःकृण
मिश्रे त्रिगुणं वृत्तं व्यामप्रमाणं च नेत्रं कार्यं। अत्र पूर्वं हि अग्निगृहेऽर्थपरिमाणे कर्त्त
व्ये। तत्राहवनीयगृहमध्ये वेदिराहवनीयखरसंयुक्ता। गार्हपत्यगृहमध्ये गार्ह
पत्यखरो दक्षिणाग्निखरश्च कार्यः। तत्साधनोपाय एवं। पूर्वं केनचिदुपायेन
प्राचीं निश्चित्याग्न्यगारयोर्मध्ये पूर्वापरायतां रज्जुं दंडरेखां कृत्वा गार्हपत्या
गारस्यापरभागे यथासंभवं भूमिं परित्यज्य चतुर्दशांगुले वृत्तं गार्हपत्यखर

रं कुर्यात्॥ अत्रारत्नेश्चतुर्विंशो भागो गुलं॥ नवंगुष्ठवृद्ध पर्वप्रमाणं षडपर्वप्रमाणं वा
। कुतः। परिशिष्टेषु सर्वस्वराणाभरत्निप्रमाणतोक्तेः। तथाहि। अपरान्निश्चतुरस्र
स्तु पूर्वस्याग्नेः स्वरो भवेत्॥ रथचक्राकृतिः पश्चात् चंद्रार्द्धं इव दक्षिण इति यज्ञपा
र्श्वे। निगमेपि। परिमंडलं गार्हपत्यधि ष्णगारः स्वरो भवेत्॥ रथचक्राकृतिः। पश्चा
र्धं चंद्रार्द्ध इव दक्षिण इति यज्ञपार्श्वे। निगमेपि। परिमंडलं गार्हपत्य [illegible] पस्या [illegible] रत्नि
मात्रं चतुरश्रमाहवनीयस्यार्द्धचंद्रवद्दक्षिणाग्नेः सभ्यावसथ्ययोर्गार्हपत्यवदिति। ए
वमरत्निमात्रक्षेत्रफलं गार्हपत्यस्वरं साधयित्वा तस्यामध्यादारभ्याष्ट सु
प्रक्रमेष्वेकादशसु द्वादशसु मत्या वेति उक्तप्रमाणादधिकेषु वान्युनेषु वा प्रक्र
मेष्वाहवनीयस्वरस्य मध्यं कुर्यात्॥ तत्तो यावत्प्रमाणो रज्जुः स्यात्तावानेवा

गमो भवेत्। आगमो भवेत् ऊर्द्ध्वं भवेद्धं वृत्तं दैर्घ्यं निरंध्रं भित्येनेनोपायेनारत्निमात्रं चतुरस्र

त२ माद्दवनीयखरं साधयेत् गार्हपत्याहवनीययोरंतरे षोडश सप्तधा वा गं तु समं त्रेधा

विभज्यापरवितृतीयलक्षणेन दक्षिणायमध्यतस्मिन्न ग्निरित्यनेनोपायेन दक्षिणा

ग्निखरस्य मध्यमं कल्पयित्वा विपर्यस्योत्तरतउक्तरज्जुत्यक्तेकरस्थानमध्यं कल्पयेत्। अकारां

तरमप्यन्यत्। अपि वांतरत्रिभागेनयारज्जा पूर्वार्द्धु सम तुरश्रं कृत्वा श्रोण्यामग्नि

रित्यनेनोपायेन दक्षिणाग्निस्थानमध्यमं कल्पयित्वा विपर्यस्योत्तरांसउक्तरज्जुत्यक्तेकर

स्थानं कुर्यात्। ततः सर्वैरंगुलैः षाड्डिरथर्यैर्वृत्तं मालिखेत्। चतुर्भिः सपर्वैः स्त्रिं

शाद्धुरे मंडलकं तत्रितिदक्षिणाग्निखरं समर्द्धचंद्राकारं साधयेत्। अथवा षोडशांगुलं ता २५

नरिये वृत्तं स्यात् षोडशांगुलं॥ तावदेवतासां गवाहरेद्वृत्तमथर्यक इत्युपायेन वा दक्षिणाग्नि

यागारं

खरं साधयेत्॥ अत्राध्वरत्नेश्चतुर्विंशो भागोंगुलं॥ अतो रत्निप्रमाणरज्जोस्तृतीयं भागं परित्यज्य
भागद्वयेन षोडशांगुलं वृत्तं कुर्यात्॥ वेदिसाधनोपायश्च दर्शपूर्णमासेष्ट्यावुक्तः॥ सभ्यस्य खरोपि
गार्हपत्यखरवद्वृत्तःकार्यः॥ अत्रायं पदार्थक्रमः॥ पूर्वं गार्हपत्यागारकरणं॥ तच्चार्थीसपरिमाणपूर्ववद्दक्षि
णद्वारं प्राग्वंशं वा कार्यं॥ ततः आहवनीयनियमेन प्राग्वंशं पूर्वापरद्वारं च कार्यं॥ सर्वे ऋत्विग्यजमानाः
संभूयाग्न्यगारे कुर्वंति बहुवचनात्॥ ततः पौर्णमासवद्वपनं॥ अत्राहापस्तंबः॥ केशश्मश्रु च
पतेनखानि निकृंतते स्नात्येवं पत्नी केशवर्जमिति॥ ततः क्षौमे अहते वाससी यजमानः परिधत्ते॥ पत्नी
च॥ तत्र यजमानस्य परिधास्यै यशोधा इति परिधानमंत्रः॥ यशसा मेत्युत्तरीयस्य॥ द्विराचमनं॥ पत्न्या
श्च॥ ततोध्वर्युर्गार्हपत्यागारे अर्थात्क्षिप्तकाष्ठाभ्यामग्निं निर्मथ्य गार्हपत्यागारमध्ये गार्हप
त्यखरे पंचभूसंस्कारपूर्वकं स्थापयति॥ अथवा वैश्यकुलादग्निमाहृत्यांबरीषाद्वा भ्राष्ट्राद्वा

महानसात् कंदुकादि सर्थं ॥ अथवा

आहृत्य ॥ अथवा महानसादाहृत्य मँहानसं नित्यपाकार्थं गृहं ॥ ततो यजमानो द्विवा अस्त्यात्येव राश्रोयेघ
या ॥ ततो स्तमयसमीपे आहवनीयागारात्पूर्वस्यां दिश्युपविश्यैया पञ्चहोदेवाः पितरइतिमंत्रेण दे ग्नि
रक्षामाहुयति । पत्न्या पितृसंनिधावुपविशति ॥ अग्नि उभयोः प्रवेशविधानात् ॥ ततो यजमानं पूर्वेणा
हवनीयागारद्वारेण प्रविशति ॥ गार्हपत्यस्य दक्षिणद्वारेण पत्नी प्रविशति ॥ गार्हपत्यागारम
ध्ये स्थापितस्याग्नेः पश्चात्पत्नीयजमानौ प्राङ्मुखौ उपविशतः ॥ तयोर्मध्ये पत्नी दक्षिणतउ
पविशति ॥ ततोऽध्वर्युः पूर्वोक्तलक्षणे अरणी आधारादहतवस्त्राछादिते यजमानाय सम
र्पयति । पत्नीतु यजमानहस्ताद धराणिं गृहीत्वांके निदधाति । यजमानोऽप्यंके उत्तरारणि
निदधाति ॥ उभावप्यरण्योः कुंकुमचंदनपुष्पादिभिः पूजां कुरुतः ॥ तस्तिलकादिमां
गल्यमाशीर्वादान् ॥ ततो दंपती आचम्य देवान्बालेणांश्च नमस्कृत्य पीठाद्युपर्यरणी नि

कृष्ण२

धतः ॥ ७ ॥ सप्तमीकंडिका ॥ ॥ ततोस्तमयादारभ्य संकल्पांशात्रिस्वकीयं परकीयं वा अजं गार्हपत्या
गारे बध्नाति । न बध्नाति वा । यदि बद्धो स्वकीयो भवति तदा प्रातः कर्मणि संस्थिते तलमजमग्नीधे
द्ध्यात् । स्वकीयाभावे दानाभावः ततोस्तमिते सूर्ये ध्वर्युः स्नेश्रानडुहे चर्मणि चर्वारितं डुल पात्रा
णि प्रक्षिपति । प्रसृतित्रयप्रमितं वैकैकं पात्रं एवं विधानि चत्वारि ततः स्तां स्तंदुलान्स्थाल्यामो
प्य द्धिः प्रक्षाल्य स्थापिते ग्नावधिश्रित्य तं यानुष्पात्रयसंज्ञक मोदनं पचति । ततस्तु द्रूस्य पक्वस्योद
नस्य मध्ये गर्त्ते कृत्वा तत्र गर्त्ते घृतमासिच्यते न द्रुले नाक्तोः प्राग्भ्य च्छीत्तिस्त्रः समिधः प्रादेशमात्री हस्तेन
त्वा तु गृह्णायतास्मिन्नग्नौ समिधमाग्निमित्यनेन मंत्रेण तासां समिधां मध्यादेकामादधाति । ततः उपविश्य
सुसमिद्धायेति स्वरेण जपति । ततः उच्छ्रायतं वासमिद्भिरित्यनेन द्वितीयां समिधमादधाति । ततः उप
स्थाग्नेरिति तृतीयां समिधमादधाति । ततो यजमानस्य गुर्त्तामन्त्रिजां प्रेत्नादिक्रमेण पादौ प्रक्षा

त्योपवेश्य तान् गंधमाल्यादिभिरभ्यर्च्यान्नसंकल्पभोजयेत्। तत्र छंदांसि एतद्वः पाद्यं। छंदोभ्य इदमासनं।
इदमर्चनं इदमन्नं परिविष्टं परिवेष्यमाणं चान्नं तेभ्यः छंदोभ्यः स्वाहा छंदांसि प्रियंतां छंदांस्यनेन प्रीणीम
ह इति श्रवणादेव कुर्वंति। ततस्तत्र ब्रह्मौदनमश्वार ऋत्विजस्तमोदनं प्राश्नंति। ततोऽभ्यानंतरं स्मृति
शुद्धो भूत्वाध्वर्युः स्वयं गृहीत्वा राद्धस्तं ब्रह्मौदनमित्याह। ततो यजमानो ऋत्विग्भ्यो गां वरं ददाति। अस्य
चातुष्प्राश्य पचनकर्मणः समृद्ध्यर्थं इमं वरं ब्रह्मादिभ्य ऋत्विग्भ्यो दत्तं संप्रददे। ब्रह्मन्नयो विभाग इत्या
दि वरशब्दे [illegible] नात्र यथभ्यो दीयते तत् दर्भीष्टं यद्यजमानेन दातुं शक्यते हिरण्यवस्त्रधान्यादि तदु
च्यते। अथ वेतदालु [illegible] अस्य भा धान दिनात् पूर्वं संवत्सरं प्रतिदिनं मुक्त विधिना [illegible] वासं वत्सरे पूर्णे
वर्षयावत् [illegible] मिदाधानसंकल्पात्तस्मादग्नेः सकाशात् सर्वानु गार्हपत्याहवनीयदक्षिणाग्निसभ्या
नादधीत। अथ संवत्सरं स्यां पूर्णरात्रौ अशनं अजवं धनं जागरणं काम्बं धप्रे पइत्येतानि भवंति। पूर्वेद्यु

विधानात्॥ अयं श्रोताग्नीनामरणी विनैवोत्पादनप्रकारः॥ अस्मिन्पक्षे [illegible] यदा कदाचिद्दक्षिणाग्न्य
नुगमे पुनः स्वयोने राहरणं॥ निर्मथनवैश्यकुलंबरिषादिना आधानसमये संपादितस्तेनैवात्रा
पि संपादनीय इत्यर्थः॥ होमसमये यद्ययं गार्हपत्योनुगच्छति तदा लौकिकाग्निमाहृत्य चानु
प्राइयं पक्षो चतुर्भ्यो दत्वा ततोग्निहोत्रार्थं विहरेत् पुनः स्वयोनेराहरणं इति संप्रदायः॥ ॥ अ
थ प्रकृतमुच्यते॥ रात्रौ यजमानस्य जागरणं॥ स्थापितस्याग्नेः सकलायां रात्रौ शकलैरेव
धारणं॥ गोमयपिंडैरेव वा नसमुक्षितैः॥ ततोऽन्ये वाससी परिधाय परिहिते वाससी क्षा
लयित्वा शोषणार्थं विस्तार्य तिलउषसि स्नात्वा पुनः परिदधीयातां॥ रात्रौ द्विभागायां अ
रुणोदयकाले ध्वर्युः स्नात्वा तं स्थापितमग्निं स्वप्रयत्नेनोपशामयेत्॥ अथ वा यदि तमेवाग्निम
न्वा[illegible]न्वाहार्यपचनं करिष्यं भवति तदेनमग्निं तत उद्धार्य दक्षिणाग्निस्थापनावसरं याव

ते॰ १

दाक्षिणास्यां दिशि कांचित् सुगुप्ते पार्श्वे स्थाने पशुभयेत्। ततोऽध्वर्युर्वाचंयच्छा पूर्णाहुते[illegible]रिति यज
मानं प्रेष्यति। ततो यजमानः पूर्णाहुति होमपर्यंतं वाग्यतो भवति। ततोऽध्वर्युर्गार्हपत्यखरे पंचभूसं
स्कारान् कृत्वा पुनस्त्रिरुल्लिख्य यजमानेनान्वारब्धे पुनरभ्युक्ष्य हिरण्यशकलं मध्ये निधाय ऊषान्म
ध्ये निवपति। ततस्तैरुषैर्वृत्तः खरकार्यः। ऊषाः क्षारमृत्तिकाः। ततो मध्ये आखूत्कराणां आ
खुभिर्मूषकैः कृत्वा तानां पांसूनां निवापं कृत्वा वर्त्तं संपादनीयं। ततः खरस्य परितः [illegible] पंचाशत
शर्कराः संलग्ना निदधाति। एके संभाराणामुपरि हिरण्यनिधानं कुर्वंति। ततो गार्हपत्यखर
मध्याद् दत्वा सुपक्रमेषु पदप्रमाणेषु एकादशसु द्वादशसु वा। मत्या वा आहवनीयखरस्य
मध्यं कर्त्तव्यं। तत्रापि पूर्ववदेव परिसमूहनादीन् पंचभूसंस्कारान् कृत्वा पुनरुल्लिख्य यजमानेना
रब्धेऽभ्युक्ष्य हिरण्यशकलं निधायो[illegible] खूत्करणामावापं कृ[illegible] वाते भ्यत्तु रश्रमाहवनीयस्य

खरं स्थंडिलं कुर्यात्। ततस्त्रिसप्ततिसंख्याभिः शर्कराभिः परितः खरस्य तथा संलग्नं वेष्टनं कुर्यात्।
यथोषाखरं केशानि सत्यन पांति एवं सर्वखरेषु ज्ञेयं। ततो दक्षिणाग्निखरे पंचभूसंस्कारान् कृत्वा तत उ
ल्लिख्याग्निवारश्रेभ्यः क्षाद्धिरण्यं निधायोषाखून्कर निर्वापं कृत्वा तेर्द्धचंद्राकारं खरं कुर्यात्। ततो द्वाविंश
तिशर्कराः परितः संलग्ना निदधाति। ततो गार्हपत्यखरवद्धभ्यस्य खरं संस्कुर्यात्। तत्रापि पंचाश
त्। शर्कराः। ततउदिते अनुदिते वाग्निमंथनं कुर्यात्। तत्र पूर्वमध्वमानयेति प्रेषमग्नीध्रं प्रति ब्रूयात्।
। ततोग्निर्दध्यमानीय पुरस्तात्प्रत्यङ्मुखं स्थापयति। अश्वस्तारुणो भवति। तदभावेऽतरुणः। त
दभावे अनड्वान्। अश्वाभावे प्रेषाभावः। अनभिधानात्। प्रकृताश्वु दस्यानिषिद्धत्वाच्चो हो
पिनभवति। ततो गार्हपत्यायतनमपरेण दर्भाद्या स्तृतायां भूमौ अधरारणिमुत्तराग्रां निद
धायोत्तरारणेरीशानदिक्कस्थमष्टांगुलं प्रमंथं छित्वा तस्य प्रमंथस्याग्रं श्लक्ष्णं कृत्वा चात्र बुध्नगर्त

मध्येप्रवर्त्तते। ततो धरारणेर्मूलादष्टांगुलं त्यक्त्वा अग्नाच्च द्वादशांगुलं त्यक्त्वा तत्र यच्चतुरंगुलांतरालं भवति तन्मध्ये
श्रं मंथनार्थं तीर्थं कृत्वा प्राच्यां माग्निर्निःसरणार्थं वा छिद्रं कृत्वा चात्र शुष्कं प्र । मंथतीर्थस्योपरि निदध्यात्। ततो
यजमानः प्राङ्मुखउपविश्य चात्राग्नेयो लोहकीलको भवति। तस्योपर्यौवीलीमुदगग्रां निधाय यावच्चम्य यंत्र
कं परिहितं धारयेत्। ततः पत्नी चात्रं नेत्रेण त्रिर्वेष्टयित्वा मंथति। ततोध्वर्युः प्रत्यङ्मुखो मंथति। अग्नौ
जाते यजमानोध्वर्यवे वरं ददाति। अध्वर्यो वरं तुभ्यमहं संप्रददामीति वाच्य। मनसैके संकल्पं कुर्वंति
ततस्तमाग्निं सुश्रुक्गोमयचूर्णकीर्णे कर्परे निधाय तं जातमाग्निमभिलक्षीकृत्य यजमानो मुखे
नश्वासं प्रेरयति। फूत्कारं करोति प्राणममृते दधृतीति मंत्रेण। ततः सुसमिद्धेग्नौ जाते अग्नेर्ज्वालांकु
द्वीश्वायेन मुखमध्ये गृह्णाति। अमृतं प्राणआदधृतीति मंत्रेण।।८।। अष्टमीकंडिका।।८।। ततोग्निं
यज्ञीयदारुभिर्ज्वलंतं कृत्वा गार्हपत्यखरे स्थापयति। तत्र मंत्रः ॐ भूर्भुवस्व आदित्यानां त्वा देवानां व्रत

पतेव्रतेनाद्धइति।येषामंगिरःप्रवरोभवतितेषामंगिर[सां]त्वादेवानामितिस्थापनमंत्रः।।येषांचभृगुः
प्रवरस्तेषांभृगूणांत्वादेवानामितिभृग्वंगिरोन्यतिरिक्तानामादित्यानांत्वादेवानांत्वादेवानामित्येवभवति।
वरुणस्यत्वेतिक्षत्रियमात्रस्यमंत्रः।इंद्र[]स्यत्वाव्रतपतइतिराज्ञःक्षत्रियस्य।मनोस्त्वाग्राम[]ण्योव्रत
पतइतिवैश्यस्यऋभूणांत्वादेवानांव्रतपतइतिरथकृतोमंत्रः।ततोरथंतरंगायेतिब्रह्माणंप्रेषयति।ततो
ब्रह्मारथंतरंसाम[]गायति।ततोपरिमितिकाष्ठंत्रिवृन्नबद्धमिध्मंगार्हपत्येमूलभागेधिश्रयेत्।ततः
प्रदीप्तमिध्ममुल्मुकस्योपयमनीभिर्मृद्भिःकर्परस्थाभिरधस्तादुपयम्याहवनीयखरंप्रणयति
।अग्रेध्मंपुरस्ताद्धरतोग्नीध्रोयजमानश्चधूममनुगच्छति।गमनप्रारंभएववामदेव्यंगायेतिप्रेषःब्रह्म
णोवामदेव्यगानांततःआहवनीयखरसमीपगतोपावि[]श्यामध्यस्यपूर्वदक्षिणपादेनाहवनीयखरे
ऽपूताःसंभाराननुविष्टाण्याक्रमय्यततोग्निंप्राचंनीत्वादक्षिणमावर्त्यसमुखंस्थापयति।ततोब्रह्मा

येति प्रैषः। ब्रह्मणेन बृहत्साम गायं ततोऽध्वर्युराग्नीध्रस्य पदं द्विर्वारमुपस्पृश्य तृतीयेनोपस्पर्शनेनाग्निं स्था
पयति द्वितीयेन वा प्रथमेन वा। तत्र मंत्रः। ॐ भूर्भुवः स्वः आदित्यानां त्वेति। तदृयं निधावेवोपयमनीरुप
निवपति। ततो यजमानोऽग्नेः पुरस्तात्परिक्रम्योपविश्याध्वर्युस्य पूर्वार्द्धे गृहीत्वा द्यौरिव भूम्नेति मंत्रं जप
ति। तत उत्तरायां गोरित्याद्याभिस्तिसृभिः सार्पराज्ञीभिरुपतिष्ठते। अत एवेध्मपूर्वार्द्धस्य ग्रहण
विधानादिध्ममूलस्योद्दीपनं। ततोऽध्वर्युर्गार्हपत्यात्केनापि पात्रेणाग्निमादाय ज्वलंतं दक्षिणाग्निखरे स्था
पयति भुवः आदित्यानां त्वेति। ततो गार्हपत्यवदेव सभ्यस्य मंथनं। ततो यजमानो गां दीव्यध्वमिति
त्विजः प्रेष्यति। ततो ब्रह्मादयश्चत्वारो विजो विहारस्यान्तरतः आनडुहं चर्मास्तीर्य तस्योपर्यधोमुखं कां
स्यपात्रं निधाय पंचकपर्द्दिकान् हस्ते गृहीत्वा समेन अयामिति जमेणजीयसद्दत्यक्त्वा कांस्यपात्र
स्योपरि चतुर्वारं प्रक्षिपंति। तदलाभे शलाकादिभिर्वा द्यूतं कुर्वंति। ऋत्विज एव दीव्यंतीति नय

गमानः॥ तस्य प्रेषणे कर्तुर्वा तत्र तत स्तांगंतेभ्य ऋ विश्योर्दध्यात्॥ अग्निमन्थ्यकृते पत्नीकृतांगं ब्राह्मणे
होत्रे अध्वर्यवे आग्नीध्रेषु समविभागेनादं संप्रददाति॥ द्यौस्त्वेति प्रातिग्रहमंत्रः॥ ततो दारुभिः
ज्वलं तं सभ्यं स्थापयति। भूर्भुवः आदित्यानां वेति। अतः प्रभृति सभ्यस्य धारणमुपस्थानं च सदा
कार्यं॥ ९॥ नवमी कंडिका॥ ततस्ते तं गायेति प्रेषः॥ तत्कार्नं। ततो वारवंतीयं गायेति प्रेषः॥ तत्कार्नं।
ततो यज्ञायज्ञीयं गायेति प्रेषः॥ ततस्तत्कार्नं। अथवा समुदित एव यथा सूक्तः प्रेषः॥ इयेत वारवंती
यज्ञायज्ञीयानि गायेति। आग्नेण ः क्रमेण गानं। ततः सर्वान्नग्नीन् दक्षिणं परित्याग्य मुदगुदस्य अध्वर्युः
जतिं॥ अजस्तु प्रातरुत्सृष्ट एवा अत्र वसंतादीनामृतूनां कृत्तिकादीनां नक्षत्राणामभ्युक्षणादीनां संभा
राणां रथंतरादि साम्नां वपनस्य चालुष्याद्यस्य जागरणस्ये धन पूर्वाद्गुरिभणस्य सार्पराज्ञीनां च
विकल्पः॥ ततः पूर्णाहुति होमः॥ तत्र विधिः॥ पात्रांतरादाज्यस्थाल्यामाज्यनिर्वापः॥ गार्हपत्याधि

न्नयणं॥ स्वादिरस्रुवस्यदर्भैः संमार्गः जुहूप्रभृत्यग्नेरंतरतः प्राक्मूलैः बर्हिस्ततः प्रत्यक् आज्यस्थ्या द्वासनं।
पवित्राभ्यामुत्सवनं॥ अवेक्षणं॥ स्रुवेणाज्यं गृहीत्वा व गृहीत्वा स्रुक्कपूरणं॥ स्रुचो धस्ताद्रोजनादिनिधानं य
थास्कंदनं न भवति॥ ततः एकां पालाशीं प्रादेशमात्रीं समिधमुपसंगृह्योत्थाय गत्वाहवनीयस्योत्तरत उपविश्या
हवनीयं परिस्तीर्यान्वाधानसमिधमाधायोपविश्य दक्षिणं जान्वाच्याग्निं मनसा ध्यायन् स्वाहाकारेण यजमानेन्वार
ब्धे जुहोति इदमग्नय इति त्यागः॥ ततो यजमानो वरं ददामीति मंत्रेण वाग्यं विसृजते॥ ततो यजमानो ध्वर्यवे वरं ददाति
॥ अस्याः पूर्णाहुतेः समृद्ध्यै वरं दक्षिणां ब्राह्मणेध्वर्यवे वाहं संप्रददे इति॥ गव वरशब्देनात्र यस्मै दीयते तदभिल
षितं॥ यद्यजमानेन दातुं शक्यते वस्त्रहिरण्यधान्यादि तदुच्यते इति हरिस्वामिनः॥ ततो ध्वर्युरवतूष्णीमाग्नि
होत्रं जुहोति॥ तत्र पूर्वं यजमानो गार्हपत्यदक्षिणाग्न्योरंतरालेनाहवनीयसमीपमागत्याप्रदक्षिणमाहवनी
यं परीत्य स्वस्थाने उपविश्य तूष्णीमाचामति॥ पत्न्यप्येवमेवागत्य स्वस्थाने उपविश्याचामति॥ ततो ध्वर्युर

३१

परेणाहवनीयं कूर्चं प्रागग्रमुदग्रं वा निदधाति। तत आहवनीयस्य परिस्तरणं। पुरस्तात्पश्चाच्चोदगग्रैर्दर्भैः
दक्षिणतउत्तरतश्च प्रागग्रैः पुरस्तात्प्रथमं ततः प्रदक्षिणमुदक्संस्थं। ततो गार्हपत्यस्य परिस्तरणं। ततो
दक्षिणाग्नेः। ततो गार्हपत्यस्य पर्युक्षणं। ततो दक्षिणाग्नेः। ततो गार्हपत्यादारभ्याहवनीयं यावदुदकधा
रां संततां निनयति। तत आहवनीयस्य पर्युक्षणं। ततोऽशूद्रेण पुंवत्स्या अग्निहोत्रीं गां दोहयति। संकेतादि

वोदग्मुखी
वा ५

ना [illegible] दोहने प्रेरयति। स्वाच गोर्विहारं दक्षिणेन प्राङ्मुखीं संस्थाप्यां ताम्रे वा ऽर्मिककृताया मूर्द्धकपालायां
स्थाल्यां दोह्यते। ततोऽध्वर्युर्गार्हपत्यस्य कतिपयानंगारानुत्तरतः पृथक्कृत्वा। तत आहवनीयं पूर्वेण तदु
ग्धमंतरतः कुर्वन्नाहृत्य तेषूत्तरतः स्थितेष्वंगारेषु अधिश्रयति। ततो ज्वलता एकेन दर्भस्तरणेन स्थाल्या उप
रि धृतेन दुग्धमवज्योत्य स्रुवेण दुग्धमध्ये उदकमवनीय पुनस्तथैवावज्योत्य उत्तरतउद्वास्य निद
धाति। हस्तं विमुच्य पुनरादाय ततउत्तरतो निदधाति। पुनरप्यादाय ततो प्रकृतरतो निदधाति। एवं त्रि

रुद्रशुद्धास्य वैकंकतं स्रुकं स्रुवं प्रतप्य पाणिना संमृज्य पुनः प्रतप्य यजमानं संकेतादिना पृष्ट्वा तिष्ठता यजमा
नेन स्थैवानुज्ञातो ऽग्निहोत्रद्रव्ण्यां सव्यहस्तगृहीतायां स्रुवेण चतुरुन्नयति पंचार्षे ऽत्तिनः पंचस्वधानुंन
यति ततः स्रुवं स्थाल्यां मुक्त्वा पालाशादियज्ञीयवृक्षसंबंधिनी प्रादेशमात्री समिधं प्रागग्रां स्रुग्दंडस्योपरि
स्थांगुल्या व्यंतरितां धारयन् गार्हपत्यस्योपरि समीप एव स्रुचं धृत्वा ततो मुखमात्रे स्रुचं धारयन्नाह
वनीयं प्रतिहरति ततो गार्हपत्याहवनीययोर्मध्ये स्रुचं नीचैः धृत्वा पुनर्मुखमात्र एव धारयन्नाहवनी
यं प्राप्य तत्समीपे उत्तरत उपविश्य सव्यहस्ते स्रुचं धृत्वा तूष्णीं समिधमाधाय प्रदीप्तायां समिधि
द्व्यंगुलं समिधो मूलात् त्यक्त्वाग्निध्यानं वा गृहीतस्य चतुर्थांशं तूष्णीं जुहोति इदमग्नये इति यज
मानस्य त्यागः ततः स्रुक्कर्पभवाञ्चिदं दयः पात्रांतरे धृत्वा तत्रैव निधाय प्रत्यागत्य पुनः संकेता
दिना यजमानं पृष्ट्वा तथैव तिष्ठता यजमानेनानुज्ञातः पुनश्चतुरुन्नीय तथैव समिधमुपरि धार १२

स्त्रयपर्याप्तमाहुतिंप्रजापतिमुद्दिश्यजुहुयात्॥ इदंप्रजापतयइतित्यागोयजमानस्य। ततः स्रुचं२

यंस्तथैवाहवनीयेपुनःसमिधमभ्याधायसूर्यंमनसाध्यायंश्चतुर्थांशंहुत्वापूर्वमन्यत्रपात्रांतरेहुतंप
यःस्रुच्यानीनीयतांस्रुवंकूर्चेनिधायगार्हपत्यमवेक्षेत।पुनःस्रुचमादायपूर्ववद्धुतेरुत्तरतःस्रुचौद्वि
रुद्धृत्यमुत्क्षिप्यकूर्चेनिदधाति।ततःस्रुगग्रंप्राक्प्रत्यक्त्रीपमृज्यकूर्चेनिमार्ष्टितूष्णीं।पुनरुत्तानेनह
स्तेनतथैवद्विरुपमृज्यकूर्चस्यदक्षिणतोभूमौपाणिमुत्तानंनिदधाति।ततःउदकंस्पृष्ट्वागार्हपत्यंग
स्थाप्य त्वातत्रसमिधमाधायस्रुक्पात्रेएकंस्रुवंगृहीत्वापात्रांतरेद्वितीयंस्रुवंस्थापयित्वातृतीयंस्रुवंगृही पात्रांतरेस्थ ती हा
त्वापूर्वगृहीतेनसहतूष्णींगार्हपत्येजुहोति।इदमग्नयेगृहपतयेरयिमतेपुष्टिपतयइतिमनसात्या
गः।ततश्चतुर्थंस्रुवंगृहीत्वाद्वितीयवारपात्रांतरस्थापितेनस्रुवेणसहजुहोति।इदंप्राजापतयइति
त्यागः।ततोदक्षिणाग्नावेवमेववारद्वयंजुहोति।इदमग्नयेन्नादायान्नपतये।इदंप्रजापतयइति
त्यागः।ततःस्रुचंगृहीत्वाबर्हिर्निःक्रम्यानामिकयास्रुक्स्थंदुग्धंगृहीत्वाप्राश्याचम्यपुनरनामिक

येव गृहीत्वा प्राश्नाति ततः आचम्य स्रुचः सकाशात्सर्वं पयो दहस्तेन गृहीत्वा प्राश्य दुग्धालिप्तं हस्तं जिह्व-
या सकृन्निर्लेढि आस्वादयतीति ततः आचम्याहवनीयस्य समीपं आगत्य स्रुवं दक्षिणहस्ते नोदकं निनीय यथोक्तेन स्रु-
चोत्तरत उदकमुत्सिंचति तूष्णीं ॥ ततोऽपसव्यं कृत्वा ॥ स्रुचमुदकेन पूरयित्वा दक्षिणत उत्सिंचति पितृतीर्थेन
तूष्णीं ॥ ततः सव्यं कृत्वा उपस्पृश्य पुनस्तृतीयवारं स्रुचं पूरयित्वा प्रागुदीच्यां दिश्यूर्ध्वमुदकमुत्क्षिपति ॥ पुनः
स्रुचं पूरयित्वा कूर्चस्थाने आहवनीयमपरेण प्राक्संस्थं त्रिर्निषिंचति ॥ ततः स्रुक्स्रुवमाहवनीये प्रतप्य
वेदिमध्ये निधाय गार्हपत्यदक्षिणाग्न्याहवनीयेषु क्रमेण तिस्रस्तिस्रः समिध आदधाति तूष्णीं ॥ अत्रा-
ग्न्योरुपस्थानं न भवति ॥ ततो गार्हपत्यदक्षिणाग्न्याहवनीयानां क्रमेण पर्युक्षणं ॥ ततः पत्नीयजमानौ
वाचं विसृज्याचम्याहवनीयं प्रदक्षिणं परीत्य गार्हपत्यदक्षिणाग्नी अंतरेण यथाप्रविष्टं निष्क्रामतः

॥ ॥ इति तूष्णीमग्निहोत्रहोमः समाप्तः ॥ ॥ अथ तनूहवींषि लिख्यंते ॥ तत्राग्नये पवमानाय प्र

थमाराधिर्भवति ॥ तत्र विशेषः ॥ उद्धरणाभावः । त्रिष्वप्यग्निष्वग्न्याधाने । ब्रह्मवरणाभावः । तदभावात् ऋ
त्विजपस्याप्यभावः । यत्तु शासनं ब्रह्मासमंत्रकमहे दैधिजन्य इत्यादिनासनं संस्थायोपाविशति । ततो यज
मानस्यव्रतग्रहणं ॥ प्रणीताप्रणयनं । पत्रासादने अष्टौ कपालानि दक्षिणार्थे तिस्रो गावः षड्वा द्वादश वा त्र
योदशप्रभृतिपरार्द्धपर्यंतमिध्मसंख्या वा ॥ अष्टादशे ध्मकाष्ठानि । पांच द्रव्यं च सामिधेनीनामितिशं
स्वाथनो नौ ॥ [illegible]
। अन्यत्सर्वं प्रकृतिवत् ॥ ग्रहणे ॥ अग्नये पवमानाय जुष्टं । प्रोक्षणे अग्नये पवमानाय वो । जुष्टं । प्राणदा
ने । अग्निं पवमानं गच्छ । अवबाधने इदमहं पंचदशेन वज्रेणेति । उत्तमे प्रयाजे त्यागे । इदमग्नये सोमा
यास्नये पवमानाय देवेभ्य इत्यादि प्रधानयागे । देवतापदमात्रं उपांशु ॥ अग्नये पवमानाय । उपांशु ।
अनुब्रूहीति प्रथमस्थाने न । अग्निं पवमानं । उपांशु । यजेति प्रथमस्यैरेणा । इदमग्नये पवमानाय ।

द: प. च.

ततः स्विष्टकृदादि प्राशित्राद्दि सर्वं। दक्षिणालंभमंत्रे। ऊर्गसीति पदस्य स्थाने त्रिगवसीति वा षडूवमसी
ति वा। द्वादशगवमसीति वा। त्रयोदशगवं पंचदशगवं शतगवं सहस्रगवमित्यादि परार्ध्यपर्यंतं विकल्प्ये
नशेयं। अन्यत्सर्वं प्रकृतिवत्। अस्मिन्निमा ... स्ति स्तोगावः प्रतिश्रुतीति। एवं षड्दोषज्ञा दक्षिणाः द्वादशगाद
क्षिणाः। शतंगाः। सहस्रं गा इत्यादि। अत्र भूयसीदानं चतुर्थपक्षांतरमेव। ननु भूयसीनां षड्भिः समु
च्चयः। न्यूहने। अग्नेः पवमानस्योज्जितिं। अग्निः पवमानस्तपनुदत्विति प्रस्तारत्यागे। इदमग्नये सोमाया
ग्नये पवमानाय देवेभ्य इत्यादि। शेषं प्रकृतिवत्। कर्मापवर्गांतं। इति प्रथमेष्टिः। अथ द्वि ... या द्विहविष्का। अग्नये पाव
काय अष्टाकपालः पुरोडाशः। अग्नये शुचये अष्टाकपालः। तत्र विशेषः। अग्न्याधानं। चतुर्होतारः। स मंत्रकं अलोप
वेशनं। व्रतग्रहणं। प्रणीतादि पात्रासादने षोडशकपालानि दैव्याः पक्षाः पूर्वैद्यिवत्। अष्टादश ध्मकाष्ठानि पंचदशसं २४
च्ये सामिधेनीनामितिरुक्षणं वा यत वचनात्। अन्यत्प्रकृतिवत्। ग्रहणे ये पावकाय जुष्टं। अग्नये शुचये जुष्टं
अग्न

अग्नये शु
चये स्वाहा
इदं न

प्रोक्षणे। अग्नये पावकाय स्वाहा नुद्रव्यं विभज्याज्यभागौ। इदमग्नेः पावकस्य। इदमग्नेः शुचेः। प्राणदाने। अग्निं पावकं श
त्रूः। अग्निं शुचिं मध्ये। अवदाने इदमदः प्रत्यवदानं वशे ॥ गेति। उत्तमप्रयाजस्यान्ते। इदमग्नये सोमायाग्नये पा
वकायाग्नये शुचये देवेभ्य इत्यादि। प्रधानयोरपि यागयोः उपांशु देवतापदं। अन्यदुच्चैः। अग्नये पावकाया
नु। अनुब्रूहि। अग्निं पावकं यज। अग्नये शुचये अनुब्रूहि। अग्निं शुचिं यज। इदमग्नये शुचये।
[illegible] स्विष्टकृदादि प्राशित्रादि सर्वं
दक्षिणालंभे दानं नं पूर्ववत्। सूक्तवाके अग्नेः पावकस्याग्नेः शुचेरूर्जितिं। अग्निः पावकोऽग्निः [illegible] शु
चिरस्तमु प्रस्तुतं दत्तामित्यादि। शेषं कर्मा पवमानेष्टिवत्। इति द्वितीयेष्टिः। अथ तृतीयोच्यते। तत्रादित्ये
चरुरेके हविः। तत्र विशेषः। अग्न्याधानं ब्रह्मवरणाभावः। चतुरासनं ब्रह्मोपवेशनं [illegible] समंत्रकं
व्रतग्रहणं। प्रणीताप्रणयनादि पात्रासादने कपालस्थाने चरुस्थाली। उपवेषाभावः। दक्षिणार्थे धेनुः। गविंशतिरि

धर्मकार्याणि। सप्तदशादित्या याभिरिति शांखायनसूत्रात्। पात्र्या अभावः। प्रेक्षणं। शेषं प्रकृतिव
त्। यद्गृहे अदित्यै जुष्टं प्रोक्षामि अदित्यै वा जुष्टं चरुधर्मा अवारंभणीया यामुक्ताः पात्र्यं
नयो नोऽ गुरुर्लि प्रक्षालनं निनयेऽर्थे भावः। प्राणदाने अदितिर्गच्छ प्राधान्ययोः शांखायनसूत्राद्देवतापदमुपांशु
अदित्यै अनुब्रूहि। अदितिं यजा इदमदित्यै। ततः स्विष्टकृदादिभागचतुष्टयकरणादि सर्वं भवति। दक्षि
णालंभे। धेनुरस्यूर्जमिति अस्या इषे ऽसमृद्ध्ये धेनुं दक्षिणां ब्राह्मणे इत्यादि। ब्राह्म
णाः इयं वो धेनुः प्रतिगृह्णीतेति। ब्रूहनो अदित्या उज्जितिः। अदितिस्समपनुद
विति। प्रस्तरत्यागे इदमग्नये सोमायादित्यै देवेभ्य इत्यादि। अन्यकर्मापवर्गांते सर्वप्रवृ
त्ति वत्। उद्दूरणब्रह्मवरणवर्जं अग्न्यन्वाधानादिकर्मापवर्गांते सर्वेष्टिषु सर्वं भवति। कर्मापु ३५
नः प्रतीतौ ब्राह्मणवरणवर्जं अग्न्यन्वाधानादिकर्मापवर्गांते सर्वेष्टिषु सर्वं भवति।

।कर्मापवर्गान्ते शतं ब्राह्मणाननुभोजयेत्। आधाने च परो गौः शतमिति परिशिष्टात्। अ-
स्य श्रौताग्नीनामाधानकर्मणः समृध्यर्थं यथासंपन्नेन तत्तिपर्यंत भोजनं पर्याप्तेनाग्नेर्न न-
तं ब्राह्मणाननुदत्तं पृथामति प्रयोगः। ततो न्यानि वस्त्राणि परिधापय [illegible] ति दित्तान्यदत्वा सोस्य ध्वर्यवे ददा-
ति [illegible] ग्नीधे दानं। संछितेद्याद्दितिक एव पादत्। इमम ज्ञमग्नी तुभ्यमिति। [illegible] यजमा-
[illegible] ततो यजमान-
स्यातिलकादिमांगल्यमाशीर्वादाः [illegible]। अथ वा त्रयाणां तनूहविषां स्थाने केवलमग्नेर्योष्टा-
कपालः पुरोडाशो भवति। तत्र षट् द्वादश वा चतुर्विंशतिर्वा पिंचविंशतिप्रभृति परार्धसंख्या वा यथाश्रद्धं गा-
वो दक्षिणा भवंति अत्रापि देवतापदं पुंपात्। अन्यत्सर्वं तनूहविर्वत्। इत्येकाद्य चि। अथ द्वितीये
ष्ठिरदित्यै चरुः पूर्ववद्भवति। नवोऽपि विशेषः। रणं रवायनस्थ एतस्मिन पक्षे आग्नेय्यां

यजमानः। आसवाससी पत्नीवाससी चाध्वर्यवे तुभ्यामिति॥ ततोग्न्येहवि धमानस्यामस्या ८

दे॰प॰च॰

प्रथमाया भिष्टेर्विकल्पिकोयं विशेषः ॥ तथाच सूत्रं ॥ आग्नेयीयाचाद्द्वयोः पूर्वाज्येन तनूदेवताः पुरस्तात्स्विष्टकृतो ऽग्रा
स्याग्निं पवमानं पावकं च शुचिं चोपरिष्टादिति ॥ तेनौ आज्यभागां तेनंतरं प्रधानयागात्पूर्वं अग्नये पवमानाया
उपांशुयाग २ ज्येन यागो वतु ॥ प्रधानादूर्ध्वं प्राक् ॥ स्विष्टकृतो ऽग्नये पावकायाग्नये शुचये चाज्येन यागद्व
यं ॥ उपांशु देवतापदं ॥ उपांशु याजवन्नं ततः ॥ स्विष्टकृदादि ॥ आसमाप्तेः ॥ अनेनैव आसेणोत्तमप्रया
जादिषु देवतानां संकीर्तनं कर्तव्यं ॥ अग्नेः पवमानस्याग्नेः पावकस्याग्नेः शुचेरा जिर्तिः ॥ अग्निः पवमानो
ऽग्निरग्निः पावकोऽग्निः शुचिस्तमपनुदं विविन्नूहे ॥ शेषं पूर्ववत् ॥ इदमग्नये सोमायाग्नये पवमानाया
ग्नये पावकायाग्नये शुचये इदं देवेभ्य इति उत्तमप्रयाजे प्रस्तरहोमे च त्यागः ॥ ऽग्नयं वा ॥ अनानां द
क्षिणायां विशेषः ॥ षड्वर्षो दक्षिणा द्वादश वा ॥ अश्व॰ शतमानं रथः वासो जा [illegible] ऽतिरेताः स्तुतिसर्वेष्विषु पुर २
समं विभज्य दीयं स इति त [illegible] ॥ छन्दोगानां तु विशेषः ॥ धेनुमनड्वाहं वत्सतरं ॥ वत्सतर मर्ज ३६

पूर्णपात्रं तत्प्रथमायामिष्टौ दद्यात् देवमित्तरयोरन्यत्राजपूर्णपात्राभ्यामिति । तत्र हूं हुं कं षड्भावैनेकवचनांतं
दक्षिणापदमूर्गसीत्यस्य स्थाने । प्रयोज्या । धेन्वनडुद्वस्त्रीवस्त्रतरा अपूर्णपात्रमसीति प्रथमायां ।
धेन्वनडुद्वस्त्रतरीवस्त्रतरमसीत्युत्तरयोः । शाखायनानां मपि द्विगवाश्वशतमाषमसीति प्रथमा
यां । द्विगवरथवाससौ सीति द्वितीयायां । द्विगवाजमसीति तृतीयायामिति । अथ यजमानस्य नियमा उच्यं
ते । आधानानंतरं यजमानो यावज्जीवमनृतं न वदेत् । अतिथिमागतं नापनुदेत् । दुर्गंधिकाष्ठस्याग्नौ
प्रक्षेपं न कुर्यात् ॥ अथवा पूतिदारुषशब्देनाग्निं तं दारु कथ्यते । नाग्निं ज्वदा वादद्यादिति शाखांतरात्
। पृथिव्यां गर्तं पत्रं लिंदुकादिना श्रीयात् । अग्निहोत्रार्थमुद्धृते उदकदानं पानं च वर्जयेदिति कर्कः
। अथवानाविनौ कामध्येयदुक्तं तस्य पानं यजमानो न कुर्यात् ॥ पात्रं तर्नाव्यापः स्पर्न्तासां
आवामेदिति । तथा अंतर्नाव्यापांनाश्रीयादिति च सूत्रांतरे एना वेध्यौ जीवं । ततो द्वादशरात्रं वाषष्ठा

दे-प-प-

रात्रं त्रिरात्रं वा यजमानो ब्रह्मचारी स्यात् ॥ गार्हपत्याहवनीयदक्षिणाग्नीनां नित्यं धारणं कुर्यात् ॥ दुग्धेनैवाग्नि
होत्रं जुहुयात् ॥ अग्निसमीपे भूमौ शयीत ॥ एते नियमाः त्रिरात्रादिकालपर्यंतं शक्त्यपेक्षया ज्ञेयाः ॥ त
त्राधिककालपक्षाश्रयणं फलाधिक्यं भवति ॥ पुनराधाने आधानवत्सर्वं भवति ॥ तत्रैकेन चिन्निमि
त्तेन विनष्टेष्वग्निषु विनष्टानग्नीनुत्सृज्य पुनराधानं कुर्यात् ॥ ब्रह्मचर्याग्निधारणादयो नियमा अपि
भवंत्येव ॥ १० ॥ दशमी कंडिका ॥ समाप्तमग्न्याधेयं ॥ अथ पुनराधेयमुच्यते ॥ आधानानंतरं संवत्सराद
र्वागेव यस्य महत्त्वस्य कीर्तेर्हानिर्भवति धनधान्यादिहानिर्वा तस्य पुनराधेयं भवति ॥ पुनराधेयमाधाना अप्रतिज्ञातः।
प्रतिज्ञातस्येति सूत्रं ॥ प्रतीतः प्रसिद्धो विख्यातो ज्ञातः प्रतिज्ञातः ॥ न प्रतिज्ञातः अप्रतिज्ञातः ॥ अधानेन निमि ३७
त्तेनाप्रतिज्ञातः अप्रसिद्धोऽज्ञातः अप्रतिष्ठ इव जातः अधानात् प्रतिज्ञातः ॥ तस्येदं भवतीत्यर्थः ॥ अथवा प्रति
ज्ञातं प्रियं ॥ एतद्वस्य प्रतिज्ञातं समं धाम यद्धाम यस्या प्रियो वा पुत्रो हृदयं चेत्यत्र तथा दर्शनात् ॥ न प्रतिज्ञा

तमप्रतिज्ञातं।पुत्रमरणसर्वस्वहानिप्रतिष्ठाहान्याद्यनिष्टफलदर्शनादाधानमप्रतिज्ञातमप्रियं यस्याः सा
वाधानाप्रतिज्ञातः।तस्य पुनराधेयं भवतीत्यर्थः॥तथा राज्यकामस्य यशस्कामस्य वा पुनराधेयं भवति
तत्र पुनराधेयकरणादिनात्पूर्वं त्रिरात्रचतूरात्रप्रभृति यथा वत्सरपर्यन्तं अग्नीना[illegible]सर्गः कर्त्तव्यः॥संवत्सरप
रार्द्धमनुत्सृष्टाग्निर्भवतीत्यापस्तंबः॥अथवा सद्योग्नीनुत्सृज्य पुनराधेयं कर्त्तव्यं॥तत्र सभ्यस्याऽस
र्गो न भवति अग्नीनुत्सृजेदिति बहुवचनस्य त्रिष्वप्युत्सृष्टेषु चरितार्थत्वादिति कर्कः।अविशेषात्सभ्यस्या
प्युत्सर्ग इत्यपरे।गतश्चेत्पुनराधेयं वर्षामूलतो भवति।मध्यंदिने वा पुनर्वसू नक्षत्रे भवति।तत्राग्न्याधेय
वत्सर्वः सर्वं भवति।नस्येदं अमुकनिमित्तं पुनराधेयमहं करिष्य इति वरणं।तथाग्न्यगारकरणावपनं
॥अहतक्षौमपरिधानं।गार्हपत्यागारेग्नेः स्थापनं।देवाः पितर इति जपः॥यजमानस्य पूर्वद्वारेण प्रवेशनं।द
क्षिणद्वारेण पत्न्याः॥अग्नेः पश्चात्तयोरुपवेशनं।अरणिप्रदानं।अजवं धनं वा मानाद्विवरदानांतं चानुष्ठा

दे॰ प॰ ध॰

धृतं वा ॥ स्थापितस्याग्नेरुपशमनं ॥ वाचंयमत्वापूर्णाहुतेरिति प्रैषः ॥ वाग्यमनं यजमानस्य ॥ ततो गार्हपत्यखरे पंच
भूसंस्काराः ॥ पुनस्त्रिरुल्लेखनं ॥ संयोग्ययउसत्स्थाप्य व्रीहिमयमपूपं श्रपर्णयोः कपालस्थानीयपात्रे लौकिकाग्नि
पक्वं आवसथ्याग्निना वा गार्हपत्यस्थाने स्मिन्नवसरे निदधाति ॥ ततो वारद्वैभक्षणादि शार्करांतं ॥ ततः सभ्याहवनीय
खरे पंचभूसंस्कारानुल्लेखनं वा पुनरुद्धिरव्ययवमयमपूपं पूर्ववदपूपवत्सकमाहवनीयस्थाने निधाय वारद्वैभक्षणादि
शार्करांतं ॥ सभ्यखरे गार्हपत्यवदपूपवर्जं ॥ ततो मंथनादि उद्धृतो सोपि भवत्येव ॥ उद्धृतो ज्वलतोग्नेः स्थापनं ॥ इध्मस्थाने
उखैरेवोद्धरणं ॥ सभ्यस्य मंथनादि स्थापनांतं भवत्येव ॥ अन्यदग्निहोत्रहोमांतं सर्वमग्न्याधेयवत् ॥ ततस्तन्नूहविषां स्था
ने आग्नेयः पंचकपालः पुरोडाशो भवति ॥ तत्राग्न्याधानादिकर्मापवर्गांतं सर्वमुपांशु भवति ॥ उत्तममनुयाजं वर्जयित्वा सन्न
त्रैर्भवति ॥ तत्र विशेषः ॥ अग्न्याधानं ब्रह्मवरणाभावः ब्राह्मणः समंत्रकासनसंस्कारपूर्वकमुपवेशनं ॥ व्रतग्रहणं ॥ प्रणी
ताप्रणयनादि ॥ पात्रासादने पंचकपाला ॥ निदक्षिणार्थे हिरण्यमनड्वान्वा ॥ अष्टादशेध्मकाष्ठानिग्रहणे ॥ आग्नेयेषु

त्रिरात्रमुत्स
र्गपक्षेऽपु
पाभावः ॥ त
तो दक्षिणा
ग्निखरे प्र
कृतिवत्स
र्धरांसं ५

३८



प्रोक्षणे अग्नये त्वा जुष्टं। कपालोपधाने आद्यानि चत्वार्युपधाय चतुर्थस्य पश्चात्पंचमम् उपदध्यात् [३ ४ / १ / २ ५] आग्निं गण। प्रथम
प्रयाजे ॥ आ आज्याग्नीन्यजेत्येव प्रेषः। द्वितीयादिषु यज यजेत्येव प्रथमे इदमग्निभ्य इति त्यागः इदमग्नय इति
द्वितीयादिषु त्यागः। त्यागो इदमग्नये पवमानायाग्नयेग्निभ्य आज्यपेभ्यः। अथवा इदमग्नये अग्नय इंदुमते अग्नयेग्नि
भ्य आज्यपेभ्य इति। शांखायनमते देवेभ्य आज्यपेभ्य इत्येव न त्वाग्निभ्य आज्यपेभ्य इति विशेषः। पूर्वोपि त्यागः। प्रकृ
तिवद्देवतमते अन्यत्यागः प्रकृतिवत्। प्रथम आज्यभाग आग्नेयः। द्वितीये अग्नये पवमानायानुब्रूहि अग्निं पव
मानं यज इदमग्नये पवमानाय अथवा अग्नय इंदुमते नुब्रूहि अग्निमिंदुमंतं यज। इदमग्नय इंदुमते। प्रधानयागे
। अग्नयेनुब्रूहि अग्निं यज। इदमग्नये। ततः स्विष्टकृदादि प्राशित्रादि सर्वं भवति। दक्षिणा त्वं मे हिरण्यमसीति अ
नड्वानसीति वा। ब्राह्मणाय इदं वो हिरण्यं प्रतिगृह्णीत। अयं वो नड्वान् प्रतिगृह्णीतेति वा। प्रथमे नुयाजे अग्नीन्यजेत्येव प्रे
षः। द्वितीयतृतीययोर्यजेत्येव। इदमग्निभ्य इति त्यागः। व्यूहने अग्ने रुग्जिति। अग्निस्तमपनुदद्विति। प्रस्त

रहीमे॥ इदमग्नये अग्नये पवमानाय अग्नयइंदुमते वा अग्नये पाग्निभ्य आज्यपेभ्योग्नये होत्रायेति॥ अन्यत्कर्मापवर्गां
तं प्रकृतिवत्॥ तदंते शतब्राह्मणभोजनं॥ परिहितादहतवस्त्रदानमध्वर्यवे॥ ब्रह्मचर्याग्निधारणादिनियमाभवंतीति॥ अ
थ शंतपथोक्तं होत्रं लिख्यते॥ आयमनादि आद्वाहने॥ आवदहे वान्यजमानाय॥ अग्निमग्न आवह॥ अग्निंपव
मानमावह॥ अग्निमिंदुमंतमावहेति वा॥ अग्निमावह अग्नीनाज्यपानावह॥ अग्निं होत्रायावहेत्यादि प्राकृतं॥ प्रयाजे
षु॥ प्रथमे अग्नीन्यजे तनुं के येयजामहे अग्न आज्यस्य व्यंतु ३ वोत्रकृ॥ ये॰ हे अग्निमाज्यस्य वेतू वौ ३ कृ॥ ये॰ हे अग्नीनाज्य
स्य व्यंतू ३ वौ १ [illegible] कृ॥ ३ ये॰ हे अग्निराज्यस्य वेतु ३ वौ ३ कृ कृ॥ ये॰ हे स्वाहाग्निं स्वाहाग्निंपवमानं स्वाहाग्निमिंदुमंतमिति
वा स्वाहाग्निं स्वाहाग्नीनाज्यपां जुषाणो अग्निराज्यस्याव्यंतू वौ षट्॥ अग्निः सोमेनबोधयेत्याग्नेयाज्यभागस्य
पुरोनुवाक्या॥ ये॰ हे अग्निं जुषाणो अग्निराज्यस्य वेतु ३ वौ ३ वौ ३ षट्॥ द्वितीय आज्यभागो अग्नये पवमानाय वा॥ अ
ग्नयइंदुमते वा॥ तत्र प्रथमे पक्षे अग्न आयूंषि पव॰ छुनौ ३॥ ये अग्निंपवमानं जुषाणो अग्निः पवमान आज्यस्येवेतू ३ वौ ३१



वे२

३ षट्।। द्वितीयपक्षो एह्युष्वाणि ० दुभो३ मा ये ० हो अग्निमिदुं मन्तं जुषाणो अग्निरिदं मानाज्यस्यावेतु३ वौ३ षट्। अ
ग्नेय याजे। अग्निं तं मन्ये ० भरो३ मा पुरोनु० ये ० हो अग्निः सो अग्नि यो ० भरा३ वौ३ षट्।। याज्या स्विष्टकृती अग्ने मम द्या ०।
पुरोहोता३ पुरो० ये० हे अग्निः स्विष्टकृतममयाऽग्निरग्नेः प्रि० न्ययाऽग्नेः पवमानस्य प्रि०। अथवा अयाऽग्निरिदं महः
प्रियेति। न्ययाऽग्नेः प्रि० याऽग्नी नामाज्यपानां प्रिया धामानि यक्षद् ० द्रविः। अधाह्यग्ने क्रतो० भद्रा३ वौ३ षट्।
अनुयाजेषु देवं बर्हिरग्नेर्वसुवने वसुधेयस्य वेतु३ वौक्क ० देवो नराशंसोऽग्नावुवसुवने ० तु३ वौक्क। देवो अ
ग्निः स्विष्टकृदिति प्रकृतिवत्।। ३ अयमनुयाजऊहेः। अन्यसर्वमुपांशु सूक्तवाके अग्निरिदं हविः ० स अग्निः पव
मानो इदं ० [illegible] ० ता। अथवा अग्निरिदं मानक्र हविः [illegible] ० ता अग्निरिदं ० ता अग्नय आज्यपा हविरजु
षंता ० ध्वं नः ० ता। अग्निहोत्रेणेत्यादि। एकोऽयं पुनराधेयस्य पक्ष उक्तः। अथ मपुनराधेयस्य पक्षान्तरमुच्यते।। पूर्वे
व परपराह्णे मैत्रावरुणीं वशामालभ्यांस्तमपात् [illegible] पुरोडाशं [illegible] कर्मत्वारात्रोपशुविधानादि अपणान्तं कुर्यात् प्रा

मर्तुक्कृषदाज्यमादायेत्याद्यभ्युपचरणादिकर्माप्यवर्गान्तं कुर्यात्॥ ततः सद्योग्नीतुस्त्रज्यं यथोक्तं पुनराधेयं मित्र्यं
तं कुर्यात्॥ नात्र शिरात्रावरमुख्यैर्गोना पूपाद्विति कर्कः॥ मैत्रावरुण्यां वरायां विशेषः॥ निरूढपशुवद्वरणा
दिकर्माप्यवर्गान्ता॥ मित्रावरुणाभ्यां जुष्टं नियुनज्मि॥ मित्रावरुणाभ्यां वा जुष्टं मिति प्रोक्षणे॥ मित्रावरुणाभ्यामु
स्त्राया वपायै मेदसोनुब्रूहि मित्रावरुणाभ्यामुस्त्राया वपां मेदः प्रेष्य॥ वपायामाज्यभागे पशुपुरोडाशा या
मैत्रावरुण एकादशकपालः॥ मित्रावरुणाभ्यां पुरोडाशस्यानुब्रूहि मित्रावरुणाभ्यां पुरोडाशं प्रेष्य॥ हवियांगे
मित्रावरुणाभ्यामुस्त्राया हविषोनुब्रूहि॥ मित्रावरुणाभ्यामुस्त्राया हविः प्रेष्य॥ मित्रावरुणयोर्वनस्पते रुजि
ति मित्रावरुणौ वनस्पतिस्त्वामपनुदं विति शेषमनुवंशनि रूढवत्॥ इति पुनराधेयं समाप्तं॥ ॥ एकादशीक
डिका॥ ॥ अथ सक्रमेणाग्निहोत्रांगं वाक्सप्रोपस्थानमुच्यते॥ सायमग्निहोत्रहोमे समिदाधानानंतरं ८० २ समिदसीति
यजमानो वाक्सप्रेणाग्नीउपतिष्ठते नोपतिष्ठते वा॥ तत्रोपस्थानपक्षे आहवनीयसमीपे स्थित्वोपप्रयंत इति

त्रिःपठित्वा अग्निर्मूर्द्धा गुह्यायां॥ अयं ते योनिः॥ अयमिहेत्येता ऋचो जपित्वास्य प्रत्नामिति त्रिर्जपेत्॥ ततस्तनू
पा अग्नेसि इंधानास्त्वेति सहेतः जपित्वा॥ विश्वावसो इति त्रिर्जपेत्॥ एतावत्पर्यंतं तिष्ठन्नु जपति॥ अथाहवनीय
समीपएवोपविश्य संवम अग्न इति जपेत्॥ ततोधस्थे ति गां प्रतिगच्छति॥ ततः संहितासीति गामालभेत॥ ततो गा
र्हपत्यसमीपे आगत्य गार्हपत्यमुपतिष्ठेत॥ उपवोम इति॥ यत आरभ्याध्यायतः समस्मादित्येतेनात ऊर्ड
एहीति पुनर्गां प्रतिगच्छति॥ ततः काम्या एतेति गामालभेत॥ तत आगत्यापरेणाहवनीयं प्राङ्मुखं अग्निमीस
माणः सीमानं स्पृशन्नित्यारभ्य तस्य विद्युरित्यंतं जपित्वा परि त्वाग्न इति त्रिर्जपेत्॥ ततस्तत्रोपसितं पुरसी
तिप पार्थिवा इदं मे कर्मेदं वीर्यं पुत्रो यज्ञदत्तशर्मानुसंतनोत्वित्येकपुत्रनाम गृह्णाति॥ प्रतिपुत्रं मंत्रावृत्तिः॥ अविद्यमाने
पुत्रे इदं मे कर्मेदं वीर्यममुकशर्मानुसंतनोत्विति स्वनाम गृह्णीयात्॥ अथवा इदं मे कर्मेदं वीर्यममुकशर्मा इदं न संतन
वानीति प्रयोगः॥ तंतवेत्वा ज्योतिषेत्वा अनुसंतनोत्विति वा॥ एतद्वाग्न्युपस्थानं॥ अथवा संक्षेपोपस्थानं॥ स्य स्थाने

न्यग्रमानो भुसं स्फारस्पुर्वकं प्रवत्स्यदुपस्थानार्थं गार्हपत्याहवनीयदक्षिणाग्नी

भूर्भुवः स्वः सुप्रजा इत्यनेनाहवनीयमुपस्थाय गार्हपत्यमप्यनेनैवोपतिष्ठेत। एतदुपस्थानद्वयं सायमेव भवति
प्रवासः। अथोपस्थानप्रसंगात् प्रवसदुपस्थानं प्रवासधर्माश्चागतोपस्थानं चाभिधीयते। तत्र प्रवासन्नाम स्वदार्थमा
दूकादिकाकार्यः ग्रामान्तरेण गर्भिणीपत्न्यां वान्यत्र वा क्वचित् ग्रामसीमामतीत्य चैकरात्रौ वासः प्रवसनं स्मृतं। तत्र प्रवासं
करिष्यन्नग्नीनुद्धृत्य प्रदीप्तानूरूवा नर्य प्रजामिति गार्हपत्यमुपतिष्ठेत। शंस्य पशूनित्याहवनीयं। अथर्वपि
तुमिति दक्षिणाग्निं। ततः सभ्याय नमः इति सभ्यं। ततः आवसथ्याय नमः इत्यावसथ्यं। ततो वाग्यमनं य
थार्थगमनं विवाग्निसंबाधि गृहस्य च्छदिषादर्शनं यावद्भवति तस्य वाग्यमनं भवति। ततऊर्ध्वं वा वाग्विसर्गः
। तथा चोक्तं। अग्न्यंतिकं समारभ्य तावन्मौनी प्रतिष्ठेत। यावत् छदिः पश्यते हव्यवाहन सद्मनः इति। अनलाद
र्शनं पावकस्याकत्वांरवाया सक्रोशः स्यनुद्ध्रकाल्पितो देशा इति वाजसनेयिनः। बलाद्राजादिपुरुषा यजमानं
नयंतिचेत्तु। नप्रयंतां स्थुपस्थानावसरं कृत्येच्छिला। तदा कुर्यादुपस्थानं तद्देशागतएव सं॰ तत्र प्रकारद्वे

०१ प्र२

यं॥ होमाद्यर्थमुद्धृत्य संभाव्य प्रवत्स्यदुपस्थानेनैवोपस्थानमिति कठसूत्रे॥ अनेन वा मंत्रेण॥ इहैव संस्तत्र संतं त्वा
ग्नेहृदा वाचा मनसा वा बिभर्मि शोभा संतमायुर्मा प्रहासीर्ज्योतिषा वेश्यानशेषेणोपतिष्ठे इति मंत्रेणाग्नीनुपतिष्ठेत्
॥ शांखायनोपि॥ अनुपस्थाय प्रसर्येत्प्रतिदिशमुपस्थानं उपस्थाय प्रसर्गे यथाप्रोष्येति॥ आगमिष्याम्निचा
द्येवेत्यानुपस्थाय निर्गतः॥ देवान्तवास्थिलिः दुर्यादिदमेवेति केचन॥ विस्मृत्याबुद्धिपूर्वं वा यातेप्येष विधिर्भवे
त्॥ वाग्यमनस्य लोपोत्र भाष्यकारेण दर्शितः॥ अरण्यारोपितेव ह्रौ प्रवसेद्यावजेत्तु वा॥ उभयथाप्युपस्थानं
नास्ति कौषितकि स्मृतेरिति॥ अथ प्रोषितस्य यजमानस्य कर्तव्यमुच्यते॥ प्रवसन्नाग्निहोत्रकालेऽग्निहोत्र
स्य विद्याभिमुखो भूत्वा सर्वं याजमानं करोति॥ पौर्णमासकाले पौर्णमासस्य दर्शकाले दर्शस्य॥ यजमा
नमपि न सर्वं॥ किंतु यदात्मसंस्कारकं धर्ममात्रं च तदेव॥ यथा वपनविस्मृभ्रमण व्रतग्रहणमयीदमितिज
पादि॥ नान्यत्॥ यथा वेदबंधनपात्रासादनादि॥ अन्यत्सर्वं कर्माध्वर्य्वादिभिर्होत्रीयमाणं मनसा चिंतनी

यं। तथाऽन्वाकात्यायनः॥ निक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा। प्रवसेत्कार्यमाविश्रो मृषेव न चिरं क्वचित्॥ म
नसा नैत्यकं कर्म प्रवसन्नप्यतंद्रितः। उपविश्य शुचिः सर्वं यथाकालमनुद्रवेदिति। तेन प्रवसताग्निहोत्रादि
नित्यं कर्म स्वस्वकाले सर्वं मनसा चिंतनीयं। तथाऽग्निहोत्रे मंत्रेणाचमनं॥ यथा देवतास्यागः। उपस्थानं पुनरा
चमनं॥ एतावन्मंत्रकं कर्त्तव्यं॥ अन्यत्सर्वं मनसा चिंतनीयं। दर्शपूर्णमासयोरपि पर्वणि। दुग्धक्षीरविकारां
श्च आज्यं भक्ष्यान्यवांस्तथा। फलमूलानि चाश्नीयात्पर्वणि प्रोषितोऽग्निमान्॥ तथा पराग्निपक्वं नाश्नीयात् कु
उगोरसमंतरा। इत्याद्युक्तानुसारेण व्रतं कुर्यात्॥ रात्रौ भूमौ शयीत तथा। अग्ना सामर्थ्ये शरीरस्य भक्ष
द्रव्याद्यभावतः। स्वसत्तयापत्यैदं न मम स्त्री या प्रोषितोऽग्निमानिति। प्रवासे स्थितिकाले सर्वं कर्म मनसा चिंत
येत्। आगमिष्यतुं व्रतग्रहणं कुर्यात्॥ पूर्णपात्रमासाद्य देव्यायेति प्रोक्षेत् तूष्णीं द्विलातस्यायेत्पार भ्यप सर्वांस्या
गान् कुर्यात्। प्रयाजानुमंत्रणाग्निचा कारहूयं मथीदमिति जपश्चस्य कालो। ततः संवर्चयेति केन यद्विग्रि

नीयमानं पूर्णपात्रं प्रतिगृह्य मुखं विमृज्य ततो विष्णुक्रमणादि प्रत्यादि समर्यातं कुर्यात्॥ प्रांच मेव विष्णुक्रमाः
। न दिशाभिमुखाः। तथा चापस्तंबः॥ प्रवसन् दिशाभिमुखो यजमानं जपति प्राचो विष्णुक्रमान् क्रमतीति।
तत्र भागभूमिश्चाहवनीयेन गार्हपत्योपस्थानानां मनसे वाचिंतनं नानुष्ठानं। एवमिति गता नाम प्रविद
व धनाव बधनात्र पितरो वेद्यालंभादीनां च मनसे वाचिंतनं। एवं पक्षादिकर्मणोपि याजमानं कार्यं। याजमाने
हतेपि यदा गृहे ऋत्विक् पक्षादिकर्मणः समाप्ति चिंते आना ति तदनंतरं भुंजीतान्न तलः। आक् एवं प्रित्य यज्ञाद
क्वादेरपि नित्यस्य गृहे क्रियमाणस्य याजमानं मनसा चिंतनं च कार्यं। अदूरयानां रगांरवायनसूत्र भाष्येय
सर्वेषां नित्यकर्मणां आग्रयणाचातुर्मास्यप्रभृ बंधाग्निष्टोमानां प्रवसति यजमाने नुष्ठानं॥ तेषां याज
मानं च प्रवसता कर्तव्यमित्युक्तमस्ति॥ आगच्छता यजमानेन यथालाभं यज्ञियवृक्षस्य मिधो हस्ते गृ
हीत्वा पूर्वदिग्दर्शने वाग्यतेन सता आगंतव्यं॥ उपस्थानादर्वाक् पितरं मातरं गुरुं वा राजानं वा नोपगच्छेत्।

दै॰प॰च॰

॥ स्यपमेव समीपमागतानामेषां नमस्कारादिकं न कुर्यात् । तत्कालमेव स्नात्वा शुचिर्भूत्वा भूसंस्कारपूर्वकमा
हवनीयदक्षिणाग्ने आगतोपस्थानमार्थमिति विकृत्य समिधो हस्ते गृहीत्वा स्योपयस्य आगन्मेति मंत्रेणाहवनी
यमुपस्थायोपविश्य तूष्णीं समिधमाधाय परितः पतितानि तृणानि परिसमुह्य प्रक्षिपेत् । [illegible] नरोमाग्निः पु य२
रीष्य इति दक्षिणाग्निमुपस्थायोपविश्य तूष्णीं समिधमाधाय तृणानि समुह्याग्नौ प्रक्षिपेत् । ततः सभ्या
यन मइति सभ्यं नमस्कुर्यात् । आवसथ्यायन मइति आवसथ्यं नमस्कुर्यात् । ततो गृहामाबिभीतेति
वा स्वाध्यान्तु गृहानुपतिष्ठेत क्षेमायवइति गृहं आविशति । ततः पुत्रं दृष्ट्वा अंगादंगात्संभवसीति जपति । तत
सो पुत्रस्य मस्तकमवजिघ्रति प्रजापतेष्ट्वेति । अस्मा वित्यस्य स्थाने अमुकशर्मन्निति संबुध्यंतं पुत्रस्य ना
म गृह्णाति । ततो गवां हिंकारेणावजिघ्रामि सहस्रायुषा अमुकशर्मन् जीव शरदः शतमिति मंत्रेण सहस्र सु ७७
त्र ॥ शिरोवघ्राय तूष्णीं द्विरवजिघ्रति । ततः पुत्रस्य दक्षिणे कर्णे समीपं यं धीति जपति । ततः सव्ये कर्णे

इंद्र श्रेष्ठानीति जपति ॥ पुत्रदर्शनजपादि प्रतिपुत्रमावर्तनीयं ॥ पुत्रस्याशीः प्रार्थनार्थत्वात् ॥ पुत्र्याश्च तूष्णीं
मूर्द्धवि घ्राणमात्रमेव ॥ कठसूत्रे विशेषः ॥ प्रवसतउपस्थानं याजमानंचेत्युक्ते नेति लौगाक्षिः ॥ प्रवसन्यदा
द्रुतं मन्येताथ भुंजीतपर्वण्युपोष्य यदा संस्थितं मन्येताथ भुंजीतेति ॥ तथा अनुपस्थायप्रवसन्प्रवत्स्यन्
दुपस्थाने न प्रतिदिशामुपतिष्ठेतेति ॥ तथा यदाग्निहोत्रसंस्थितेवातत्र आगच्छेदागतोपस्थानमेवस्या
न्नित्येतिनित्यमग्न्युपस्थानं याजमानमित्युक्तेर्विसंस्थितेवातत्र आगच्छेदागतोपस्थानेनोपस्थाय यदहीतं या
जमानं तत्सर्वमपि आलीलं जपेदिति लौगाक्षिरिति ॥ ॥ अथवा प्रवत्स्यतां प्रवासादागच्छतां चाग्नीनामुपस्थानं तू
ष्णीमेव कर्तव्यं ॥ गृहामेत्यादि तूष्णींपक्षेपि भवत्येव प्रवासादागमनं दिन गृहाणां पुत्रभार्याभृत्यादीनामप
राधेसत्यपि क्रोधादिकं न संवत्सरमतिप्रवसतस्तेषाचेत्यविशेष्योक्त्या यजमानतिबोधागार्हपत्याहवनीयदक्षिणा
कर्तव्यं किमपि न वक्तव्यं ॥ सति कारणेत्वः सर्वं कर्तव्यं ॥ १२ ॥ द्वादशीकंडिका ॥ ॥ अथाग्निहोत्रमुच्यते ॥ त

त्र सायं। प्रातर्यजमानो होमकर्त्तारं प्रत्यक् हुहेति प्रेषं ब्रूयात्। स्वयं कर्त्तव्ये प्रेषाभावः। अनस्तमिते सूर्ये उ
द्धरणं कर्त्तव्यं। तत्र सायमग्निहोत्रहोमार्थं गार्हपत्यादाहवनीयमुद्धरामीति संकल्प्याहवनीयं ज्वलन्तमुद्ध
रति। सायमग्निहोत्रहोमार्थं गार्हपत्याद्दक्षिणाग्निमाहरामीति संकल्प्य दक्षिणाग्निमुद्धरति। सायं
काले प्रत्यङ्मुखो वा [illegible] हवनीयं स्थापयेत्। अस्मिन्पक्षे सायमुद्धृत एव प्रातर्होममप्येके कुर्वन्ति। ए
के प्रातः पुनरुद्धरन्ति। [illegible] संद्धृतो दक्षिणाग्निरेष सर्वदा नित्य एव। न कदापि तस्योद्धरणं। अनु
गतस्य चास्य योनेराहरणं। गतश्रियस्तु सर्वेग्नयः सदा धार्यन्ते। त्रयो हवै गतश्रियः शुश्रुवान्ब्रा
ह्मणः क्षत्रियो विजयी राजा वैश्यो ग्रामणीरिति। अथवा सदाहवनीयवद्दक्षिणाग्नेरप्याहर
णमेव कर्त्तव्यं केषांचिन्मते पौर्णमास्यमावास्ययोरेवाहरणं न सर्वदा। उपवसथात्तरं यावत्त नर
स्यैव धारणं। अथवा यदा नवगृहं हृतं भवति तदा तत्र नवगृहे दक्षिणाग्निराहरणीयः। न सर्वदा ६०

॥ नाप्युपवस्यस्य सथे ॥ अस्मिन्पक्षे तस्मिन्नेव गृह्याद्दक्षिणाग्नौ यत्किंचित्संपद्यते तत्सर्वं पचे
न्मांसवर्जं ॥ पक्वान्नं च ब्राह्मणान्भोजयेत् ॥ पाकद्रव्याभावे गोः पयोधिश्रयितवा इति यजमा
नो ध्वर्युं प्रेष्यति ॥ ततोध्वर्युर्दक्षिणाग्नौ गोदुग्धस्याधिश्रयणं ॥ ततस्तद्ब्राह्मणाय पितवा इति
प्रेषं यजमानं प्रति ब्रूयात् ॥ ततस्तत्पयो ब्राह्मणो पाययेत् ॥ अन्यार्थमुद्धृते [illegible] ग्निहोत्रकाले
आगते तस्मिन्नेवाग्निहोत्रहोमः ॥ पशुवरुणप्रघासादावुत्तरवेदावाहवनीये प्रणीते होमकाले आ
गते [illegible] प्रणीत एव होमः ॥ तथा चापस्तंबः ॥ प्रणीते चेदग्निहोत्रस्य कालः स्यात्तस्मिन्नेवाग्निहोत्रं
जुहुयादेवमन्यत्रेति पशुप्रकरणसूत्रं ॥ अथ प्रकृत्वा प्रथमम [illegible] ग्निहोत्रं जुहुयात् ॥ तत्र यज
मानो गार्हपत्यदक्षिणाग्न्योरंतरालमार्गेणाहवनीयं प्रतिगच्छेत् ॥ अथवा अग्न्योर्दक्षिणतो गत्वा अ
प्रदक्षिणमाहवनीयं परीत्य स्वस्थाने उपविश्य याचामति वृष्टिरसीति ॥ ततो वाग्यमनं पुनराचमनं या

५८

श्रीः ४

वत्नः पत्न्यापि यजमानवद्देवसंचरेण प्रविश्य गार्हपत्य दक्षिणतः ईशानाभिमुखी उपविश्य नूदकेमेकाग्रआ
चम्य वाचंयच्छति ॥ उपवेशनव्यतिरिक्तं पत्नी किमपि न करोतीति संप्रदायः ॥ तच्चे साधुतरं ततो ध्वर्युराहवनीयस्य
पश्चात् प्रागग्रमुदगग्रं वा वाहुमात्रमासनं पीठं सदर्भं कूर्चं निधाय प्रदक्षिणमाहवनीयस्य परिस्तरणं दर्भस्तरणैः
कुर्यात् गत्वा निदर्भतृणानि पुरस्तात्पश्चाच्चोदग्राणि दक्षिणोत्तरयोः प्रागग्राणि ॥ प्रथमं पुरस्तात्परिस्तरणं ॥
ततो दक्षिणतः पश्चादुदगिति क्रमः ॥ ततः एवमेव गार्हपत्यस्य परिस्तरणं ॥ ततो दक्षिणाग्नेः ॥ ततो हस्तेनो
दकमादाय प्रथममाहवनीयस्य पर्युक्षणं ॥ (ईशानदिशः आरभ्य प्रदक्षिणमुदकमादाय प्रथममाहवनीय
स्य पर्युक्षणं ॥ ईशानदिशआरभ्य प्रदक्षिणाग्नेः ॥ ततो हस्तेनोदकमादाय प्रथममाहवनीयस्य पर्युक्षणं)
॥ ईशानदिशआरभ्य प्रदक्षिणमुदकं स्पृष्टं ततः आहवनीयादारभ्य गार्हपत्यं यावत्स्रत्तीचीमुदधारां निनयं ८५
च्छति ॥ ततो गार्हपत्यस्य प्रदक्षिणं पर्युक्षणं ॥ ततो दाक्षिणाग्नेः पर्युक्षणं ॥ अथवा पूर्वं गार्हपत्यं दक्षिणाग्निं

वपर्युक्ष गार्हपत्यादारभ्याहवनीयं यावत्प्राचीमुदधारां संततां निनयन् गत्वाहवनीयस्य पर्युक्षणं कुर्यात्। उद
कस्थालीं चैवोदकमंडलुं वादाय गार्हपत्यादग्रेण्याहवनीयान्निनयतिन्त्रीयादिति शाय क्षित्तपकरणेन गच्छतो धारा
निनयनदर्शनादिह्यापित्तथैव कल्प ज्ञात ॥१३॥ अथोदगीकंडिका ॥ ततोऽग्निहोत्रीं धुक्षेत्ति दोग्धा
रं शंति प्रैषः ॥ ॥ दोग्धा च शूद्रव्यतिरिक्तो भवति। ततः प्रेषितो दोग्धा विलात्मस्य दक्षिणतः प्रांङ्मुखीं वोद
ङ्मुखीं वाग्निहोत्रीं गामवस्थाप्य वत्सं संसृज्यापनीय च त्रेय र्त्किक पिंतलायामूर्ध्वे कपालायां मन्मयां स्था
ल्यां पयो दोग्धि अध्वर्यो दोहप्रभृति होमसमाप्ति पर्यंतं विकल्पेन वाग्यमनं भवति। नियमे नेति केचि
त्। दक्षिणाग्निहोमानंतरं वाग्विसर्गः॥ ततोऽध्वर्युर्गार्हपत्यात्कतिपयानंगारान् दुग्धश्रपणार्थमुत्तरतः पृथ
क शांतीरवरमध्य एवोत्तरतो भूमिसंलग्नानेव प्रेरयति। न तू साद्य॥ ततो गोः समीपगवा दुग्धस्थालीमा
दाय तामभ्यंतरेणैवाहवनीयं पूर्वेणाहृत्य गार्हपत्यस्य पश्चादुपविश्य पृथक्कृतेष्वंगारेषु तां दुग्धस्थाली

द॰प॰ ५

॥ भाति। पंचावत्तिनः पंचकृत्वाऽवद्यनं कार्यं॥ ततः प्रादेशमात्रीपालाशादियज्ञियवृक्षोद्भवां समिधं स्रुचं दद्भ्योपर्यंगुल्या धृतरितां धारयं
स्तां [illegible] स्रुचं गार्हपत्यस्या परिसमीपेत्वनीयैः रहात ततो मुखमात्रे स्रुचं धारयन्नाहवनीयं प्रति गच्छति। गार्हपत्याहवनी
ययोर्मध्यदेशे स्रुचं नीचैः रहीत्वा पुनरप्युद्धृत्य मुखमात्रे च धारयित्वा आहवनीयं गत्वा समीपे धाय्या प्राङ्मुखो विश्य दक्षिणं
जान्वाच्य सव्येन स्रुचं गृहीत्वा सामिधमाहवनीये आदध्यादग्निर्ज्योतिरिति प्रदीप्तायां समिधि सामिधोमुख भागादग्न्युद्धृत्य
मधिश्रयति। ततो गार्हपत्ये परिसरेभ्यो ऽन्यत्दर्भतृणमेकं प्रदीप्तं रत्वा तेन तृणेन स्थालीस्थं पयो वज्योत्य स्रु
वेणापः प्रत्यानीय पुनस्तथैवावज्योत्योदग्दूस्य निदधाति। ततो हस्तं विसृज्य पुनः स्थालीमादाय तत्तदुन
रतो निदधाति। पुनरपि स्थालीमादाय तत्तोऽप्युत्तरतो निधत्ति। एवं त्रिरुद्धूस्यैवैकं कृत्वा स्रुक् स्रुवं गार्हपत्ये
प्रतप्य हस्तेनाभसंस्पृश्य तथा संमार्ष्टि यथोभयोरपि परिस्पर्शस्ताश्च सर्वहस्तेन संमर्शनं भवति। अथ वा पूर्वं
स्रुवमंतर्[illegible] बाह्यं दस्तेन संमृज्य पश्चात् स्रुचमपि तथैव संमा[illegible]र्ष्टि। ततः पुनः स्रुक् स्रुवं गार्हपत्ये प्रतप्योन्नेष्या
मीति यजमानं पृच्छति यजमानं पृच्छति। यजमानं तिष्ठन्नुन्नय इत्यध्वर्युमनुजानाति। ततोऽध्वर्युः सव्यह
स्ते ग्निहोत्रहवणीममुत्तानां निधाय दक्षिणेन स्रुवमादाय स्थालीतोग्निहोत्रहवण्यां स्रुचि चतुरुन्नीय स्रु
वं स्थाल्यामेव निदध्याद् [illegible] अग्निर्वर्च इति मंत्रेण पूर्वामाहुतिं जुहोति। इति पूर्वाहुतौ तत्रयो मंत्रविकल्पाः। एवं पूर्वाहु
तिसंकल्पं कृत्वा स्रुचं कूर्चे निधाय हस्तं विसृज्य गार्हपत्यमवेक्षते। पुनः स्रुचमादाय प्रजापतिं मनसा ध्याये ५६
त्सा समिध्युपर्याहुतिं जुहोति। अग्निर्ज्योतिरिति मंत्रेण गृहीतस्य पयसश्चतुर्थांशं जुहोति इदमग्नये इति त्यागः। अथ वा सजू
र्देवेनेति मंत्रेण रात्र्यग्निपदसंयुक्तेन पूर्वाहुतिं जुहोति। ब्रह्मवर्चसकामो ऽयं समानस्य अ

तूष्णीमुत्तराहुतिमग्नेरुत्तरभागे पूर्वाहुत्यासंसर्गमकुर्वन्पूर्वाहुतितो भूयसीं जुहोति। तूष्णीमिति कृते स्वा
हाकारस्याप्यत्राभावः। इदं प्रजापतय इति त्यागः। भक्षार्थं द्वितीयाहुतितो ज्वलितद्रुपयः स्रुचि परिशेष
येत्। ततः स्रुवमुदीचीं द्विरुल्लिप्य कूर्चे निदधाति। ततः स्रुचमधोमुखेन दक्षिणेन हस्तेन प्रत्यगुपमृज्य कूर्चस्योत्तरभा
गे पयोलेपं निमार्ष्टि नमो रुद्रेभ्य इति। तत उत्तानेनैव दक्षिणेनांगुल्याधोभागेनैव। पुनः स्रुगग्रं प्रत्यक्परिमृज्य कू
र्चस्य दक्षिणतो भूमावुत्तानपाणिं निदधाति स्वधा पितृभ्य इति। ततः केवलमुदकोपस्पर्शनं। नात्रासव्यं न दक्षिणाभि
ष्पमा ८ मुखता। ततो गार्हपत्यं गत्वा तिष्ठन्समिधमाधाय वायव्यां प्राङुपविश्य दक्षिणं जान्वाच्य स्थाल्याः स्रुवेण पयो गृहीत्वेह
पुष्टिमिति समिस्यामर्धे जुहोति गार्हपत्येऽग्नौ। इदमग्नये गृहपतये रयिमते पुष्टिपतये। ततो द्वितीयं स्रुवं गृहीत्वा
तूष्णीं द्वितीयामाहुतिमुत्तरतो जुहोति इदं प्रजापतये। तत उत्थायापरेण गार्हपत्यं दक्षिणाग्निं गत्वा तस्मा
द्वायव्यां स्थितः समिधमाधाय तत्रैवोपविश्य स्थाल्याः स्रुवेण पयो गृहीत्वा दक्षिणाग्नौ समित्यामर्धे जुहो

पं.प.

ने
न्नादायामतये

ति श्रग्नये न्नादायेति मंत्रेण इदमग्नये पुनः स्रुचात्याः स्रुवेण पयो गृहीत्वा द्वितीयामाहुतिमुत्तरतस्स्रुवेणैव जु

होति । इदं प्रजापतये । सर्वत्र होमः प्रदीप्ते ग्नौ कर्तव्यः ॥ यो नार्चिषि जुहोत्यग्नौ व्यंगारिणि च मानवः । मंदाग्निराम

यावी च दरिद्रश्च स जायत इति दोषस्मरणात् । समिद्धहोमेन हैव सम्बद्धाश्वादुलयइति स्रुतैश्रातत स्रुचमा

दाय भक्षार्थं बहिः शागत्योपविश्यानामिकया स्रुक्स्थं पयो गृहीत्वा भक्षयित्वाचम्य पुनरनामिकयैव गृहीत्वा भक्ष

यित्वाचामति । ततः सर्वं पयो दक्षिणहस्ते कृत्वा प्राश्य पयोलिप्तं हस्तं सकृदेव निर्लेढि । जिह्वयास्वादयतीत्यर्थः

। ततो हस्तं प्रक्षाल्य दूर्वाश्च मध्यगद्धाहवनीयसमीप उपविश्य दक्षिणहस्तेनोदपात्रमादाय स्रुचमुदकेन पूरयि

त्वा तदुदकमाहवनीयादुत्तरस्यां दिशि स्रुचोत्क्षिंचति देवाञ्जिन्वेति । ततः पुनः स्रुचमुदकेन पूरयित्वाहवनीयस्य

दक्षिणतः स्रुचा तदुदकमुत्सिंचति पितृतीर्थेन प्राचीनावीति दक्षिणामुखः पितॄञ्जिन्वेति । ततो उपस्पृश्य पुन

स्तृतीयवारं स्रुचं पूरयित्वा प्रागुदीच्यां दिश्यूर्ध्वमुदकमुत्क्षिपति सप्तऋषीञ्जिन्वेति । ततश्चतुर्थं स्रुचं पूरयित्वाह

८७

वनीयस्य पश्चात् कूर्चस्थाने प्राक्संस्थमुदक्संस्थं वा त्रिर्निषिंचति [illegible] अग्ने पृथिवीक्षित इत्यादिभिस्त्रि
भिर्मंत्रैः स्वाहांतैः ततः स्रुवस्रवमाहवनीये प्रतप्य कूर्चे निदधाति ततः पर्युक्षणक्रमेण सर्वेष्व अग्निषु तिस्र
स्तिस्रः समिध आदधाति पर्युक्षणं स्य प्राक् द्वौ पश्चाद् द्वौ पूर्वमाहवनीये ततो दक्षिणाग्नाविति अथ गार्हप
त्ये दक्षिणस्य प्राक् द्वौ पश्चाद् द्वौ पूर्वमाहवनीये ततो गार्हपत्ये ततो दक्षिणाग्न्याविति अथवा गार्हपत्ये दक्षि
णाग्नौ आहवनीये चेति अतो येन क्रमेणादौ पर्युक्षणं कृ तं तेनैव क्रमेण समिधातीत्यर्थः तत्र समिदसी (margin: ध्यआद ५)
त्येतावता मंत्रेण प्रथमां समिद्धो मे अग्ने दीदिहीति द्वितीयां समिद्धोसि अग्ने दीद्यास समिति तृतीयां अथ
(margin: ब) वासदेवति स्वस्तिस्रः समिधः सर्वेष्वग्निषु आदधाति तेदौ समिदसि समिद्धो मे अग्ने दीदिहि समिद्धोसि अग्ने (margin: ततसक्षे ७)
दीद्यास समित्येतावता मंत्रेण ततो यजमानः पूर्वोक्तेन वा स्वप्रेणाग्नीनुपतिष्ठेत न वा अथवा वासप्रस्थाने
भूर्भुवः स्वरित्यनेनैवाहवनीयं गार्हपत्यं चोपतिष्ठते पूर्वमाहवनीयं ततो गार्हपत्यमिति ततः पुनराहव

दे·प·च· २ इत्याहवनीयायनमइति चाह ॥ ततोत्थाय गार्हपत्यसमीपे उपविश्य २

नीयं गार्हपत्यं चोपतिष्ठेत ॥ पूर्वमाहवनीयं ततो गार्हपत्यमिति ॥ ततः पुनराहवनीयं देवेत् [illegible] मुपस्थाय तत्समी
पेक्षणमुपविश्य शर्वरीं वा पमायत गार्हपत्यायनमइति चाह ॥ ततोध्वर्युः पूर्वं पर्युक्षणे सर्वेषामग्नीनां पर्युक्षणं करो (क्रमेण २)
ति ॥ ततो यजमानो वाचं विसृज्य विद्युदसीत्यपस्पृश्य यामति ॥ पत्न्यपि नूत्थी मायामति ॥ ततो यजमानो यथाप्रविष्टं नि
ष्क्रामति ॥ तत्र यद्यपराग्नीध्रं तरेण प्रविष्टस्तदा आहवनीयं प्रदक्षिणं परीत्य दक्षिणाग्निमुत्तरेण गत्वा गार्हपत्यद
क्षिणाग्न्योरन्तरालेन प्रत्यङ्निष्क्रमेत् ॥ अथवा यद्यपराग्नीदक्षिणेन प्रविष्टस्तदाहवनीयं प्रदक्षिणीकृत्यापरासी
दक्षिणेनैव प्रत्यङ्निष्क्रामति ॥ तत्र निष्क्रमणं कुर्वन् अयनेषु धाया वाहार्यपचनायनमइति मनसा दक्षिणाग्निमुप
स्मरेत् ॥ तत आवसथ्येग्नौ होमं कुर्यात् (ततो वैश्वदेवं ॥ तदुक्तं ॥ होमं वैतानिके कृत्वा स्मार्तं कुर्यात्) ततो वैश्वदेवं ॥ त [illegible]
दुक्तं ॥ होमं वैतानिके कृत्वा स्मार्तं कुर्याद्गृह्यलक्षणः ॥ स्मृतीनां वेदमूलत्वात् स्मार्तं केचित्तु नाविदुः ॥ तथा ॥ पालाशाः समि
धः कार्याः खादिर्यस्तदभावतः ॥ शमीरोहीतकाश्वत्थास्तदभावेर्कवेतसोः ॥ तथा ॥ पाला (शाखायां सायंप्रात)

स्थो र ५

वैश्वदेवौ उक्तौ द्विषष्टं स्वदिशाभ्यच्छ शाम्युदुंबरजा अपि॥ आपमार्गार्कि दूर्वाचकुशाश्चेत्यपरे विदुरिति॥ होमद्रव्या
ण्याह कात्यायनः तैलं दधि पयः सोमो यवागूरोदनं घृतं तंदुला मांसमापश्च दशद्रव्याण्यकामतः इति॥ इति सा
यंहोम उक्तः॥१७॥ चतुर्दशी कंडिका॥ अथ प्रातर्होमविशेषमुच्यते॥ यजमाने नोद्धरेत्युक्ते अनुदिते प्रातरग्निहो
त्रहोमार्थं गार्हपत्यादितराग्न्योरुद्धरणं॥ अनुदित एव संध्यासमुपास्य होमः कर्तव्यः॥ य एव रात्रौ [illegible] मंत्र
रो गृहीतः स एव प्रातरिति संप्रदायः॥ पर्युक्षणं प्राक्संस्थमेवाधारादि प्राक्संस्थैव वा न सायंहोमवत् [illegible] संस्थमेव तद्
यं॥ तुं नेष्यामीत्यस्य स्थाने उन्नयामीति वक्तव्यं सूर्यज्योतिषं वेत्याहवनीये समिदाधानं॥ सूर्यो ज्योतिरिति
पूर्वाहुतिहोम मंत्रः॥ सजूर्देवेनेत्ययं वा उषःसूर्यपदयुक्तः॥ अथ वोषसेत्यस्य स्थाने अग्नेन्द्रवत्येति प्रातः प्र
योज्यं॥ ब्रह्मवर्चसकामस्य सूर्यो वर्च इति वा हुतिचत्वारो मंत्रविकल्पाः॥ प्रातः पूर्वाहुतौ इदं सूर्यायेति त्यागः
स्रुगग्रस्योपमार्जनं प्राक्संस्थमेव वारद्वयमपि॥ समिदसीति समिदाधानं प्राक्संस्थमेवं गार्हपत्ये दक्षि

स्य ५

रे.प.-

णाग्नो आहवनीयेपेति। वात्सप्रोपस्थानेभूर्भुवस्स्वरित्युपस्थानं च प्रातर्नैभवत्येव। केवलं तूष्णीमाहवनीयस्योपस्थानं त
समीपेआसनं चर्द्धा पाहवनीयायतनमसीति च। ततो गार्हपत्यं प्रतिगत्वा तत्समीपे आयतनमासनं वा। यमायश
रोसीति च। ततः प्राक्संस्थमेव पर्युक्षणं। कार्यं विसर्ज्याचमनं। अतीत्य निष्क्रामतो दक्षिणाग्नेर्मनसा ध्यानं। गत
तो भोजनात्प्राक् तस्य समीपे भूत्वा तमुपविश्य याने असते सांगमनायसंभ्यायनमसीति वदेत्। ततः सर्वाग्निभ्यो भ
स्मोद्धृत्य यत्र राशिः कृतो भवति। तत्समीपे गच्छेत्। असते पाठं सवायभस्मोद्वापायनमसीति वदेत्। अथ यत्रै
व भस्मोद्धृत्य तमुपनिमदेदिति श्रुतेः। भस्मोद्धृतमुपयादिति सूत्राच्च। ततः आवसथ्येग्नौ प्रात
र्होमं कुर्यात्। अथ सायंप्रातर्होमयोः कात्स्निकं संप्रदानमुच्यते। उत्तरतः सकाशात् पूर्वेणाह
वनीयं प्रदक्षिणमागत्य दक्षिणाग्नेरुत्तरतः गार्हपत्यदक्षिणाग्न्योरंतरालेन प्रत्यङ् गत्वा गार्ह
पत्यं प्रदक्षिणं परीत्य स्वस्थाने आगत्योपविश्याभाति। अथवोत्तरतः सकाशादाहवनीयं पूर्वेण द

५१

क्षिणाग्निं गार्हपत्यं च दक्षिणेन गार्हपत्यं प्रदक्षिणं परीत्यस्य अपराग्न्योरंतरेण प्रत्यग्द्विः श्र
म्य स्वस्थाने गवोपविश्याचामति॥ होमांते च यथा प्रविष्टं निष्क्रमणं॥ एवमग्निहोत्रे वैकल्पि
कं संचरचतुष्टयमुक्तं॥ अथाग्निहोत्रहोमस्य काम्याः काला उच्यंते॥ ॥स्वर्गकामस्यास्तमि
तमात्रे उदयसमीपे च होमकालः॥ आयुःकामस्य सायमंधकारागमे प्रातरंधकारे विगच्छति हो
मकालः॥ पशुकामस्य सायं पशुषु ग्राममध्ये समागतेषु॥ प्रातर्ग्रामान्निःक्रांतेषु होमकालः॥
श्रीकामस्य सर्वस्मिँल्लोके सुप्ते अबुद्धे एव प्रातर्होमकालः सायंहोमकालस्तु श्रीकामस्य प्रा
कृत एव॥ ॥निष्कामस्य तु यावत्सम्यक् न भाव्यंते नभस्यृक्षाणि सर्वतः॥ न च लोहितिमा यैत्ति
तावत्सायं च हूयते इत्यादि॥ अथ काम्या अग्न्यवस्था अभिधीयंते। यो राजा प्रजाभ्यो बलात्का
रेण प्रजाद्रव्यं वा अन्नादिकं गृहीतुमिच्छति तस्य प्रथमत एव समिद्धधूमश्रिग्नो होमः॥ योरा

प्रजाभ्यो १ जाबलेन गृहीत्वोपरुध्यैयत्नेभ्योऽन्नादिकं गृहीतुमिच्छति ॥ तस्यातिबहुलज्वालायुक्ते प्रदीप्ततरेऽग्नौ होमः ॥ सर्वेषां
ब्राह्मणादीनां श्रीकामानां यशस्कामानां वा प्रदीप्ततमेऽग्नौ होमः ॥ यो मित्रभावेन प्रजाभ्योऽन्नादिकं गृहीतुमि
च्छति तस्य ज्वालापसरणे जायमाने होमः ॥ यो ब्रह्मवर्चसकामस्तस्य चाकश्यमानेषु दीप्यमानेष्वंगारे
षु होमः ॥ निष्कामस्य तु समिद्धतमे मन्यतनदाहुतीर्जुहुया दिति स्मृतेः ॥ अथ काम्यानि होमद्रव्याणि पुर्यं
ले सर्वस्वर्गकामः पशुकामो वा पयसाग्निहोत्रं जुहोति ॥ ग्रामकामो यवाग्वा ॥ बलकामस्तंदुलैः ॥ श्रीहृस्यामाक
नीवारापवर्गो धूमश्यामलयः ॥ एतेषां तंदुलान्होम्यान्वाबाल्लः ॥ प्रियं गवः ॥ इंद्रियकामो दध्ना ॥ तस्य इद्धोऽभिश्रय
णाभावः ॥ तंदुलानां च यवाग्वां च स्थलेचोदकस्य कपुनरवर्ज्यातनवर्जितं सर्वं भवतीति तेजस्कामो घृतेन जुहो
ति ॥ एतेषां प्रागुक्तानां कालानां आग्न्यवस्थानां होमद्रव्याणां च मध्ये एकैकेन कालादीनां संयोगेन संवत्स
रं निरंतरं होमे कृते उक्तफलसिद्धिः ॥ मासं पासं होममात्रेण वा ॥ तत्राग्न्यवस्थानां संवत्सरानियमो नान्येषां ॥

एव होमः ॥ य
त्रयरवस
मिश्रमे

वा

॥ अग्निहोत्रहोमे सर्वास्वि(?)ष्टिषु च गार्हपत्यागारस्य दक्षिण द्वारेण प्रवेशनं कर्त्तव्यं। अयं प्रवेशने यदाग्नेय मः ॥ स
र्वदा यजमानः स्वयमग्निहोत्रं जुहुयात् ॥ अध्वर्युणा वा होमयेत् ॥ न च स्वयं होमपक्षे तु न यन तु द्वारेण चैव प्रभा
वः अन्य समानं। अमावास्यायां पौर्णमास्यां च नियमेन स्वयं होमः कर्त्तव्य इत्युक्तं ॥ सं...ग्ध्यां वा कर्मा(?)सान्ने यद
तु स्वयं होमं समाचरेत् ॥ स्वयं होमे फलं यत्स्यात् तदन्येन जायते किं तदन्येन हुते फलमित्यपेक्षिते स एवाह।
होमे यत्फलमुद्दिष्टं जुह्वतः स्वयमेव तु ॥ हूयमाने तदन्येन फलमर्द्धं प्रपद्यते तथा। ऋत्विक्पुत्रो गुरुर्भ्राता भा
गिनेयो यथा विट्पतिः ॥ एतैरेव हुतं यस्यात्तद्धुतं स्वयमेव तु ॥ विट्पतिर्जामाता। अत्र सिद्धं ...स्मृत्यर्थसारे। न्य
प्रधान७ यजमानो स्यात्पत्नी पुत्रश्च कन्यका। ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः ॥ एतैरेव हुतं यत्तु तद्धुतं
स्वयमेव तु। पत्नी कन्या च जुहुयाद्विना पर्युक्षणादि क्रियामिति॥ नवैकन्या न युवती ना...ल्प विद्या न बालिशः होता
स्यादग्निहोत्रस्य नार्त्तो नासंस्कृतस्तथा। नरकं हि पतंत्येते जुहुयात् ...स च यस्य तत्।न स्याद्वेतान कुशलो होतास्या

द्वेदपारगः॥ प्रोषितेप्यथवाशक्ते स्वामिन्यनधिकारिणि॥ पुत्रो भ्राताथवा पत्नी शिष्यो वा जुहुयादिति॥ सूतके च
प्रवासे चाशक्तौ श्राद्धभोजने॥ एवमादिनिमित्तेषु शिष्यो वा जुहुयादिति॥ सूतके च प्रवासे चाशक्तौ श्राद्धभोजने
॥ एवमादिनिमित्तेषु हापयेन्न तु होमं यैर्तुजन्मनहाने वितानस्य कर्मत्यागो न विद्यते॥ शालाग्नौ केवलो होमः कार्यए
वान्यगोत्रजैः॥ शिवविष्ण्वर्चनं दीक्षा यस्य चाग्निपरिग्रहः॥ संततं कर्माणि कुर्वीत स्नात्वा शुद्धिमवाप्नुयात्॥ सूतके कर्म
णां त्यागः संध्यादीनां विधीयते॥ होमः श्रौते तु कर्तव्यः शुष्कान्नेनापि वा फलैः॥ श्रौते कर्मणि तत्कालं स्नातः शु
द्धिमवाप्नुयात्॥ वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात् इत्यादिवचनात्सूतके मृतके च तत्कालं स्नात्वा श्रो
तस्मार्तहोमः [illegible] शुष्कान्नफलादिना कर्तव्यः॥ दुग्धदध्यादीनां त्वसं[illegible] गोत्रेणैव कारयितव्यः॥ न च दे

स्वयं ७

यं दध्यादिहानिप्रसक्ते त्रिषु क्रिया [illegible]॥ न च तत्कर्म कुर्वाणः सनाभ्योप्यशुचिर्भवेत्॥ शंखोपि॥ श्रा
ग्निहोत्रं धर्मस्नानोपस्पर्शनादि तत्कालं शौचमिति॥ सुहुतान्याग्निहोत्राणि न यांति परमां गतिं॥ अ

सन्निधौ यजमानः स्याद्दक्षिणे त्यागकारकः ॥ असंनिधौ तु पत्नी स्यादुद्गाता त्यागकारकः ॥ अ

था

त्र स्वर्गस्य मोक्षस्य यायावरो गंतुमिच्छति संनिधौ पत्न्याः स्यादध्वर्युस्तदनुज्ञया ॥ उभावप्यसंनिधाने च नैव कुर्वीत तावुभौ यावद्वा ॥ सर्वदा यजमानो वा त्यजेन्नदि स्मृखः श्रुतिरिति ॥ तथा चापस्तंबः ॥ प्रवसंश्च होताभिमुखो याजमानं जपतीति ॥ प्राचीनवीतीति क्रमात्क्रमतीति ॥ मंत्रनः ॥ त्यागं तु सर्वथा कुर्यात्तत्रा प्यन्यतरस्तयोः ॥ उभावप्यसमर्थौ चानियुक्तः कश्चन त्यजेत् ॥ १५ ॥ पंचदशी कंडिका समाप्ता ॥ ग्रंथिकासंख्या २ ३०० ॥ इति श्रीत्रिराग्निचित्सम्राट्स्थपतित्रिंशत्क्रतुकृन्महायाज्ञिकश्रीप्रजापतिसूनेन याज्ञिकदेवेन कृतायां कात्यायनसूत्रे पद्धतौ चतुर्थोऽध्यायः समाप्तः ॥ संवत । ग्रंथसंख्या १२६

दे.प.-क

५२

५२

॥ श्रीगणेशाय नमः ॥ श्रुतिमंत्रक्रमानुसारिणाचार्येण चातुर्मास्यान्युक्तानि तदनंतरं ज्योतिष्टोमस्यावसरस्तं प्रो
क्त्वार्थहविर्यज्ञलक्षणमाम्नायानिमित्रविंशौ। अथ हविर्यज्ञलक्षणमाम्नायादेव पाशुकेषु चातुर्मास्येषु हविर्यज्ञलिंघ्यप शु
ग नामुक्तत्वात्पश्वनिरूढोपि हविर्यज्ञविधः पशुबन्धाख्यो तोतस्तमुपदिदिक्षुः प्रथमं तस्य कालमाह॥ ॥पश्विज्यासं
वत्सरे संवत्सरे प्रावृषि॥ ॥इज्या यागः पशुनारज्या पश्विज्या पशुयागः संवत्सरे संवत्सरे प्रतिवर्षं यावज्जीवं प्रावृषि
वर्षासु तौ पश्विज्या भवति॥ तत्र प्रमाणमस्यायां पौर्णमास्यां यां वा। यजेतेति वाक्यात्॥ श्रावण भाद्रपदश्चेमौ मासौ
नभोऋतुः। स च चान्द्रः। तदलाभे सौरः॥ कुतः। श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चान्द्रेषु सर्वेषु॥ चतुर्षु॥ तदलाभे तु सौ
रे स्थिति स्मृतिविदां मतमिति स्मरणात्। एवं सोमादौ सर्वत्र ऋतूनां सौरचान्द्राणामाश्रणे व्यवस्था॥ पशुबन्धेनय
जेतेति प्रकृत्य अनेन सुवयसे यजेतेति तं वै संवत्सरो नानीजानस्य तीयादिति श्रुतत्वात्॥ श्रौ भन्ना नियवसा नि
रूढानि यस्मिन्नसौ सुयवसो वर्षर्तुरिति॥ तेन सुयवसे इति वर्षर्तावित्यर्थः॥ निरूढं चास्य परिभाषायामुक्तमेव॥
केचिदस्य प्रारंभे प्रथमप्रयोगे हारंभणीयामिच्छंति॥ नेति कर्काचार्याः॥ संप्रदायपद्धतिकाराश्च। कालांतरमा
ह॥ ॥आवृत्तिमुखयोर्वा॥ ॥आवर्तनमावृत्तिः सूर्यस्य दक्षिणायनमुदगयने तयोर्मुखं प्रथमं मतः संक्रमण
कालसंनिहितं तत्रैवं पश्विज्या भवति दक्षिणायने दिने उत्तरायणदिने चेत्यर्थः॥ अस्मिन्पक्षे प्रतिवर्षं पशुद्वयं भव
ति। अत्रापि संवत्सरे संवत्सरे इत्यनुवर्तत एव॥ नात्र पौर्णमास्यमावास्ययोरपेक्षा। संक्रान्तिदिने एव विधानात्॥

संक्रांतिपूर्वदिने तु तरदिने वा यस्मिन्नह्नि स्मृतिशास्त्रतः पूर्वाह्णे पूर्वाह्णकाललब्धे तत्र पशुयागः कर्तव्यः॥ शारदो
नरेषु अस्य कालो तमप्युक्तं॥ प्रावृषि शरदि वसंते वेति॥ ॥गृहेषु यूपाहुतिं जुहोति॥ ॥अग्नीषोमीयविकारात्
सादस्य देवयजने यागप्रासाद्वाह॥ अयं पुनश्च यागो गृहे कर्तव्यः॥ पशुबंधेन यजेत इति प्रकरणस्थानेन गृहेषु यजेते
ति श्रुतत्वात्॥ ॥यूपाहुतिं जुहोति चतुर्गृहीतं स्रुवेण वोरु विष्णवितिः॥ ॥अत्र पूर्वमग्निज्योर्वहासाप्ना
या प्रविकरणत्वादनुदितः। एवोपकृम्य निरूढपश्वपश्वर्थमाहवनीयदक्षिणाग्नी विहृत्याग्न्यन्वाधानं चतुरासनं
प्रस्तवरणं च वा कृत्वा यूपाहुत्यर्थं पूर्णाहुतिवदाज्यं संस्कृत्य उरु विष्णवितिमंत्रेण स्रुचा स्रुवेण वा यूपाहुतिं जु
होति॥ स्रुचा चेच्चतुर्गृहीतमाज्यमाहवनीये जुहोति। स्रुवेण चेत्तेनैव गृहीत्वा॥ अत्र पूर्वतरं परिस्तरणं तिष्ठत्सा
समिदाधानं आहवनीये कर्तव्यं॥ आहवनीये होमाः इति परिभाषितत्वादाहवनीये होमः॥ तस्य होमो नादेशो
इति वचनादाज्यं चतुर्गृहीतं॥ जुह्वा वचनेः इति परिभाषितत्वाज्जुह्वा॥ नन्वचातुर्गृहीताभिसनेनसकृद्गृही
तो वाक्षिप्रिति वचनात्तास्य सकृद्गृहीतस्य निवृत्तिः॥ इदं विष्णुर्वः इति त्यागः। यूपं वृश्च्य वेष्णवं चेजु
होतीति कैप्रेष्य स यक्षीति श्रुतत्वात्॥ आहृत्य गत्वादत्र परिस्तरणं॥ तिष्ठत्समिधः सर्वत्रे होतृत्वादत्र समिदाधानं
च॥ यजपति शब्दस्थाने कयजमानं कर्ड्यते॥ प्रप्रयजपतीतिरेति द्वियजमानके॥ यजपतीस्तिरेति बहुयजमानके॥
॥ ॥आज्यशेषमादायस तथा गच्छंति॥ ॥भ्रन्यस्थाली स्वं यूपाहुत्यर्थं संस्कृताज्यशेषमध्वर्युरादायसत
क्षा सुत्रधारेण सहितो यूपच्छेदनाय अरण्यं प्रतिगच्छति॥ यदा यूपे परिक्लिष्टं भवति तदा दत्ते यत्तक्षणः शास्त्रं भवति तत्त
क्षादत्ते तआनयतीति श्रुतेः॥ ॥यूपमभिमंत्रयसत्यान्यानिति॥ ॥अयन्या नित्यमुं मंत्रं यूपमभिमंत्र्य यजपति
सर्थः॥ सयं यूपं जोषयं ते तमेवमभिमंत्रय जपतीति श्रुतत्वात्॥ तेऽपि यजमानाध्वर्यवः सतक्षा वोरण्ये समाग

ताः संलोये वृक्षं यूपं युपप्रवृत्तिं जोषयंते परस्परमेवलक्षण्यो यूप वृक्षः इति तं वृक्षं अभिमंत्रयत उपतीति सूत्रार्थः॥ ॥[illegible]
प्राङ्तिष्ठन्नभिमंत्रयतेवा॥ ॥अथ धा स्रुपस्यप श्चात्प्राङ्मुखस्तिष्ठन्नसन्यानि सने नमे त्रेण स्रुपमभिमंत्रयते। स्रुपं विलो
क्य नमुंमंत्रं पठतीत्यर्थः॥ पश्चादेव प्राङ्तिष्ठन्नभिमंत्रयतइति सूत्रत्वात्॥ किंजातीयं यूपमित्याकांक्षायामाह॥ ॥पाला
शं बहुलपर्णमशुष्काग्रमूर्ध्वशाकलशाखं मध्याग्नोपनतमव्रणं॥ ॥कीदृशं यूपं पालाशं पलाशस्य वृक्षस्य विकारो
वा अवयवो वा पालाशः तं पालाशं। तस्मात्पालाशमेव यूपं कुर्वीतेति श्रुतेः॥ पुनः कीदृशं बहुलपर्णं बहूनि पर्णानि
यस्यासौ बहुलपर्णीस्तं। तथा अशुष्काग्रं अशुष्कमार्द्रमग्रं यस्यासावशुष्काग्रस्तं। तथा ऊर्ध्वशाकलशाखं ऊर्ध्वाः शा
कलाः वेष्टनत्वचः ऊर्ध्वाश्चाशाखाः प्रहीरो हान्यस्यासावूर्ध्वशाकलशाखस्तं। तथा मध्याग्नोपनतं मध्ये अग्रे चोपन
तं स्थान न्दयेपिवग्रं। तथा अव्रणं नास्ति व्रणो यस्यासावव्रणस्तमव्रणं। व्रणमीर्मं अरुः। रोगजोगंथिरित्यर्थः॥ अथ य
एष आनतः उपरिष्टादुपनतो मध्ये सोन्नधस्यरूपमिति सूत्रत्वात्॥ मध्याग्नोपनतमित्युक्तं॥ अन्यहलवैरखांतरात्।
॥ ॥अभावे खादिरबिल्वरौहितकान्॥ ॥निरूढे पालाशस्य यूपस्याभावे खदिर बिल्वरौहितकान्यूपान्कुर्वीत। शा
खांतरात्॥ ॥खादिराभावे सोमऽइतरान्॥ ॥सोमेमुख्ये खदः खादिरो यूपो भवति। तस्मात्खादिरो यूपो भवतीति श्रु
तत्वात्॥ खादिरस्याभावे भाविइतरान् बैल्वान् रौहितकान्वा यूपान्कुर्यात्॥ केचिद्बहुवचनात्पालाशमपि खदिरा
भावे सोमे इच्छंति। नेत्यपरे॥ सोमशब्देन तदंगभूते[illegible]ग्नीषोमीयो लक्ष्यते॥ सोमयागस्य यूपेन प्रयोजनाभावात्॥ ॥
॥ ॥स्रुवेणोपस्पृशतिविष्णवेत्वेति॥ ॥स्रुवेणाच्छेत्तेनात्तेन च्छेदनप्रदेशो यूपवृक्षस्योपस्पृशति विष्णवे त्वा वेष्टने
नमंत्रेण॥ अथ स्रुवेणोपस्पृशति विष्णवेत्वेति सूत्रत्वात्॥ तत्राहापस्तंबः। दिवस्त्वास वितामध्यानं स्पृशति स्रुवेणस

र्वतो मुलं पर्याणक्तीति ॥ मानवे च ॥ विष्णवे त्वेत्यनेन पर्यनक्तीति ॥ काठके ॥ देवस्त्वा सुक्षोः इति ॥ अतः स्रुवेण स्थाल्या
ज्यमादाय यूपवृक्षस्य मुले छेदनस्थाने परितो ऽञ्जनं कर्तव्यमित्यर्थः ॥ ॥ओषधे इति कुशं तरुणं तिरस्कृत्य स्व
धितेः इति परशुना प्रहरति ॥ ॥ओषधे इत्यनेन मंत्रेण कुशं तरुणं तिरस्कृत्य स्वांतर्द्धाय स्वधितिस्ते मैनमिति मं
त्रेण परशुना कुठारेण ॥ तर्हि तस्य तृणस्योपरि प्रहरति छेदनाय प्रहारं करोति ॥ अथ दर्भस्तंबाकमंतर्धा ओष
धे त्रायस्वेति ॥ तथा ॥ अथ परशुना प्रहरति स्वधिते इति च श्रुतत्वात् ॥ ॥प्रथमं शकलं निदधाति ॥ ॥
यूपे छिद्यमाने यः प्रथमः शकलः पतति तं प्रथमं शकलं निदधाति यूपावटमध्ये प्रक्षेपार्थं कस्मिंश्चिद्देशे अना
शार्थं स्थापयतीत्यर्थः ॥ यथा न गच्छति ॥ स यं प्रथमं शकलमवछिनत्ति तमादत्ते यूपावटे बध्नाति ॥ अन्यान्यपि वादत्तः
एव ॥ स्वरवे स्रुकामंथि प्रयोजयवेति ॥ ॥अनक्षस्तंभं वृश्चेति ॥ ॥तं प्रवृक्तं यूपवृक्षमनक्षस्तंभं वृश्चति ॥ छ
न्नः शुष्कं दहने ॥ छिनत्तीत्यर्थः ॥ सामर्थ्यात् तदेकदेशः स्थाणुरनसो ऽक्षस्तंभातिसक्षस्तंभः ॥ अनक्षस्तंभः ॥ यथा
गच्छतः शकटस्याक्षमनतिक्रम्य स्थाणुर्न शस्तंभातितथा नीचं छिंद्यादित्यर्थः ॥ तं वा अनक्षस्तंभं वृश्चेदिति
श्रुतेः ॥ ॥एकजं वा ॥ ॥वा एकजं वा सहाय एव भूम्यं जातस्तमेकजं यूपं वृश्चति ॥ ॥प्रांमालेखीरिति पततम
भिमंत्रयते ॥ ॥प्रांमालेखीरिति मंत्रेण छिन्ने यूपवृक्षं पतंतं तमभिमंत्रयते ॥ तं प्रच्यवमानमनुमंत्रयते
इति श्रुतेः ॥ प्रच्यवमानं पतंतं ॥ ॥न दक्षिणा पतेत् ॥ ॥तथा यत्नः कर्तव्यो यथा स यूपो दक्षिणा दक्षिणस्यां दि
शि न पतेत् ॥ तस्यां दिशि पतनं बाध्यते इत्यर्थः ॥ अत एव दक्षिणापायेंतन प्रतिषेधात् प्राची च वा प्रसंगं पातश्चेदि त्युच्य
ते ॥ तथा च श्रूयते ॥ तं प्राचं पातयेत् प्राची हि देवानां दिगथोदंचमुदीची हि मनुष्याणां दिगथो प्रसंचं दक्षिणा यद्वे

तेवैनं दिशः परिविवाधिषे तेषु वेदिविपर्यणामिति॥ ॥अयं ए हि स्वेति सोधनं॥ ॥अय ए हि लेति मंत्रेणाग्निष्ठस्य
यूपवृश्चस्य छेदनं कुठारेण शाख्याः पर्णादिषा तनं करोति। यूपस्यावश्यमर्थप्राप्तं शोधनमस्ति। अयं यमं त्रस्तदे
वाभिधातुं शाकः। अतो लिंगात्सूत्रकृता तत्रानियुक्तः। कथं पुनरेकैष मंत्रः शोधनमभिदधाति। परशुना शो
धमानस्य यूपस्यासौ भागयंदशनीयतं भवति। एवं वाभिधीयते। अयं ए ह्लास्वधितिस्तेतिमानः प्रणिनायम
हते सौभगायेति। तस्मादनेन मंत्रेण शोधनं कर्तव्यमिति प्राप्ते आह॥ ॥अभिमंत्रणशेषो वा विशेषापदेशा
त्॥ ॥वाशब्दः पूर्वोक्तपक्षनिरासार्थः॥ अभिमंत्रणशेष एव वा यमं त्रो यए हि लेति। नानेन शोधनं कर्तव्य
मिति। कुतः। अविशेषापदेशात्। अमतो नायं मंत्रो विशेषेण शोधने केनचिदुपदिश्यते। अतोभिमंत्रण
मंत्रस्य शोभमाले खीरित्येयथायं शेषो न मंत्रांतरमिति॥ यदुक्तं लिंगाद्धादनेबानि योग इति तत्र। मंत्राणाम
विधायकत्वादिति। वस्तुतस्तु तादृशं लिंगमपि नास्ति यद्बलोच्छोधने विनियुज्यते। तस्मादभिमंत्रणशेष एव
वा। शोधनं तु चौकर्तव्यं॥ ॥अतस्त्वमिसाव्रश्चनेजुहोति॥ ॥आज्यस्थाल्याः सकाशात्स्रुवेण हृतं जुहोट
होता परिस्तीर्यान स्वदेवेति मंत्रेण। व्रश्चने जुहोति। अथाव्रश्चनमभिजुहोति सजुहोत्यतस्त्वमिति श्रुतत्वात्। आ
व्रश्च्यते यूपो यस्मात्प्रदेशात्स व्रश्चनः स्थाणोश्छेदनप्रदेशः। तमभिजुहोति होमेन संस्करोति॥ ॥यूपे वा तत्संस्कारा
त्॥ ॥अथवा यूप एतामाहुतिं जुहोति न स्थाणो। कुतः। तत्संस्कारात्। आहुत्या हि यूपः संस्क्रियते न स्थाणुः। अ
व्रश्चनशब्देन छेद उच्यते। स च यूपेप्यस्ति स्थाणावपि। तत्र च यूपस्थे आव्रश्चने होमः कार्य इति प्राप्ते आह॥
॥ ॥स्थाणौ श्रुतेश्च॥ ॥स्थाणावेव होतव्यं न ~~[illegible]~~ यूपे। कुतः। श्रुतेः। चकारान्मंत्रवर्णाच्च॥ श्रुतिस्ताव
त्। अथाव्रश्चनमभिजुहोतीति प्रवृत्तस्य न देवलोकात्प्राग्रक्षाए स्थानुत्तिष्ठानिति न खोवा आज्यं तद्यद्येणैवैतं नाप्रारभाए
स्येवबाध्यते तथा तो नाद्वारथाशसिनानुत्तिष्ठसर्थो रेतो वा आज्यं तद्वनस्पतिष्वेव तद्दधाति तस्मात्तस आव्रश्च तो

नाद्वनस्पतयो नुप्रआयंतरति। वनस्पतिप्ररोहणं चस्थाणा नैवोपपद्यते। नयुपे। युपविरोहणे प्रायश्चित्तविधानात्। म
तस्कंदेन वनस्पते शतवल्शो विरोहेति मंत्रवर्णात्। हे वनस्पते त्वं अतः अस्मात् स्थाणोः सकाशात् शतवल्शः श
तशाखो विरोह। प्रस्तरे इति मंत्रार्थः। केचित्सिमास्त्र्याश्रुते श्चैसैव व्याचक्षते। शाखांतरे स्थाण्वाहुतिरिति समाख्या श्रु
यते। यदुक्तं युपसंस्कारादि सत्रक्रमः। स्थाणावपि क्रियमाणो होम आरादुपकारकत्वान्न वसेव युपस्य संस्कारको
कुर्वीयः स्थाणुरिति वक्ता। शेषाभिमर्शनवत्। अयथा शेषस्याभिमर्शने कृतेऽपि न तस्य हविषः संस्कारो भवति
तु हंसं वध्वि स्यात्। एवमत्रापीति॥ ॥परिवास्याछेदनं पुनः॥ ॥ध्रुवं मानं वक्षावशिष्टमयं परिवास्य छित्वा पु
नरछेदनं पुनर्द्वितीयवारं छेदनं कर्तव्यमित्यर्थः। तथायत्नः कर्तव्यो यथा माने वक्षा परिवासने कृते पुनः सम्मी
करणाय छेदनं कर्तव्यं न भवति। तं परिवासयतीति यावंतमेवाग्रे परिवासयेत्तावांस्त्र्यादिति श्रुतेः। परिपूर्व
वासयति छेदने वर्ततेऽरति सामर्थ्याद्वसीयते। किंप्रमाणं परिवासयेदित्याकांक्षायामाह॥ ॥त्र्यरत्निः॥
त्रयोऽरत्नयः प्रमाणमस्यासौ त्र्यरत्निः। त्र्यरत्निः प्रमाणः परिणासनीयः॥ ॥चतुररत्निर्वा॥ ॥चत्वारो
रत्नयः प्रमाणमस्यासौ चतुररत्निः परिणासनीय इत्यर्थः। सन्नाहत्र्यरत्निर्वैव चतुररत्निः। निर्वाप पशुबंध
युपो भवतीति निरूढप्रकरणे एव [illegible] श्रुतत्वात्॥ ॥एकादशिनिप्रभृतीनेके॥ ॥एके आचार्या एकादशिनि
प्रभृतीनपि कारत्न्यादिप्रमाणकानि युपानि निरूढेच्छंति। सयस सुनाय क्ष्यमाणे एकादशिनि युपे कुर्व
तः रममेवतेन लोकं जयसथय त्र्यरत्निं मथय त्र्यरत्निं मथय चतुररत्निमिति श्रुतहोत्। अन्येपुन
रेकादशिनि त्र्यरत्निमिति मो अयुपस वादो मन्यते। कुतः। सवा एष त्र्यरत्निर्वै चतुररत्निर्वैतिपश्चादि
यस्यैनोऽसंहारात्॥ तथा चाहापस्तंबः। त्र्यरत्नि श्चतुररत्निर्वा पाशो निरूढपशुबंधस्यात्तो सोम्यस्यौध्वे
रस्येति वाजसनेयकमिति। तस्मात् त्र्यरत्निर्वा चतुररत्निर्वा इति द्वादावेव पक्षौ नैराकांक्षे इति त्र्यरत्नि
त्र्यरत्नि नेति पक्षाविति साधु॥

॥ ॥अष्टाश्रिं करोत्युपरवर्जं॥ ॥तं परिवासितं यूपं तक्षा तक्षणेन अष्टाश्रिं अष्टकोणं करोति। उपरवं उपरोपठः तत्संबंधिनं
निखननार्हं यूपस्य प्रदेशं मूलतः पंचभागं शं वर्जयित्वा अन्यः सर्वोपि तक्षणेनाष्टकोणः कार्य इत्यर्थः॥ स वा अष्टाश्रिर्भवती
ति श्रुतत्वात्॥ लोकेपि मिथ्यादर्श्यं खननार्हप्रदेशस्य तक्षणादर्शनादुपरवं वर्जमिति सूत्रितं॥ ॥अग्र्याच्चषालं पृ
थमात्रमष्टाश्रिं मध्यसंगृहीतं॥ ॥यूपपरिवासनानंतरं यदवशिष्टं पृथक्कृतं अग्र्यं ततश्चषालं कर्तव्यं॥ किंप्र
माणं पृथमात्रं। प्रसारितांगुलिः पाणिः सरपाणिर्बुध्नात् पृथुरित्युच्यते॥ पृथः प्रमाणमस्येति पृथमात्रं। चषालमि
ति संज्ञा सव्यवहारार्था॥ उलूखलाकारं तदाहि सादो॥ पुनः कीदृशं अष्टाश्रिं अष्टकोणं। तदपि तक्षणेनाष्टकोणं कुर्यादित्यर्थः॥ तन्म
ध्ये॥ तथा मध्यसंगृहीतं ॥उलूखलवन्मध्ये संगृहीतमिव भवतीति प्रसिद्धं यूपं चारत्न्यादि पंचदशारत्निपर्यंतो यूपो भवति।
पंचारत्निं परिवासयेत्। अष्टारत्निं परिवासयेत्। नवारत्निं परिवासयेत्। द्वादशारत्निं परिवासयेत्। त्रयोदशार
त्निं परिवासयेत्। पंचदशारत्निं परिवासयेदिति श्रुतत्वात्॥ दशसप्त[illegible] तद्दशारत्न्यादेः श्रुतत्वात्तद्वर्जमित्युक्तं। इदा
नीमग्नीषोमीयविकारं निरूढपशुप्रसंगादग्नीषोमीयधर्मा अभिधीयंते॥ ननु अग्नीषोमीय एवाग्नीषोमीयधर्माः कुतो
ऽभिहिताः। किमिति हविर्विकृतावुपदिश्यंते॥ अग्नीषोमीये धर्मा नाधिकेषा मिके धर्मे रसातं व्यतिषंगात्तत्रोपदेशे सतिन
ज्ञायेत किमग्नीषोमीयधर्मा इति। अतो नि[illegible]व्यतद्विकारे निरूढे केवलाः सर्वे ग्नीषोमीयधर्मा उपदिश्यंते॥ तेनात्र
वैशेषिकाणां निरूढधर्माः अपि वक्तव्याः अग्नीषोमीयधर्माश्च॥ तेनोच्यते। पंचारत्निः पंचदशारत्निः सोमः इति॥ ॥अ
परिमितो वा॥ ॥अपरिमितप्रमाणो भूयस्त्वात् लोदति प्रमाणातिशयेनाधिकप्रमाणोपरिमित इत्युच्यते॥ वाशब्दो वि
कल्पार्थः॥ अथवा सोमे तदंगभूते ग्नीषोमीये अधिकेः उक्तत्वात्॥ ॥ऊर्ध्वमग्रे प्रतिमुंचति॥ ॥तं चषालं यूपस्या
ग्रे ऊर्ध्वं प्रतिमुंचति। अग्रए वोर्ध्वं प्रतिमोक विधानाच्चषालस्य तथा वेष्टं कार्यः। अग्ने प्रतिमुंचतीत्युक्ते तत्तदग्रे॥
मध्ययदूर्ध्वं चषालाद्द्व्यंगुलं वा त्र्यंगुलं वेति वचनात्प्रतिमुंचतीति वचनाच्च[illegible] यूपः चषालं च सुरश्मि
रिंगं स्पृशेत् इत्याह रिस्वाभिनः॥ [illegible]पस्तंबः॥ स्थलेनोत्तमुपरमष्टाश्रिरनुपूर्वाग्रतोणीमान्मज्ञाना
मिष्टाश्रिरिति॥

लं द्व्यंगुलं त्र्यंगुलं वातराप्रातिक्रान्तं यूपस्य ॥ ॥ यूपस्य यूपाग्रस्य द्व्यंगुलं त्र्यंगुलं वा चषालं अन्तराप्रातिक्रान्तं यूपस्य ॥ चषालच्छि-
द्राग्रे प्रत्यादतिक्रान्तं भवति ॥ अतिक्रम्योर्ध्वं निःसृतं भवति। तथा चषालस्योर्ध्वं प्रवयणं कर्तव्यं। यथा चषाली यूपाग्रं यादृशो
द्व्यंगुलेन वा तिष्ठतीत्यर्थः ॥ अथ यदूर्ध्वं चषालाद् द्व्यंगुलं वा त्र्यंगुलं वा त्र्यंगुलं वा साध्या इति देवाः इति श्रुतत्वात् ॥ ॥ पंचार-
त्निः पंचदशापर्यन्तः सोमे दशासप्तदशचतुर्दशावर्जं ॥ ॥ सोमे सोमांगभूते ग्नीषोमीये दशसप्तचतुर्दशवर्जं दशारत्निः सोमो
रत्निः चतुर्दशारत्निः सप्तदशारत्निः च वर्जयित्वा पंचारत्निप्रभृति परिमितप्रमाणो वा षोडशारत्निप्रभृति यूपो भवति। अपरिमित एव स्यो-
दिति श्रुतत्वात् ॥ ॥ सप्तदशो वाजपेये ॥ ॥ वाजपेये वाजपेययागांगभूते ग्नीषोमीये सप्तदशारत्निर्यूपः स्यात्। सप्तदशारत्निर्वाजपे-
ये यूप इति श्रुतत्वात् ॥ वाजपेयप्रकरणे पि सप्तदशारत्निर्भवतीति श्रुतत्वाच्च ॥ ॥ एकविंशत्यश्वमेधे ॥ ॥ सर्वे यूपा एकविंश-
त्यारत्नयो भवन्ति। एकविंशतिर्यूपाः पूर्व एकविंशत्यरत्नय इति स्मृतौ श्रुतत्वात् ॥ ॥ यथाकामं स्थविमा ॥ ॥ स्थविमा स्थौल्यं
यूपानां यथाकामं भवति। कामस्य यूपदेशस्यानुरूपं योग्यं यथाकामं। लोकप्रसिद्ध्यैव दीर्घप्रमाणानुसारेण तद्योग्यं स्थौल्यं कु-
र्यादित्यर्थः ॥ ॥ वेदिं करिष्यन् षड्ढोतारं पंचगृहीतं मनसानुद्रुत्य जुहोत्येकामाहुतिं वा द्यौः पृष्ठमित्यादि ॥ वेदिं करिष्यन् वेदिक-
रणात् प्राक् आज्यं संस्कृत्य पंचगृहीतमाज्यं गृहीत्वा द्यौः पृष्ठमितीमं षड्ढोतारं मन्त्रं मनसानुद्रुत्य मनसैवोच्चार्य तेन पंचगृहीतेनैका-
माहुतिं जुहोति। अथवा तेनैव पंचगृहीतेन द्विभागं पंचाहुतीर्जुहोति। आहवनीये परिस्तरणसमिदाधानपूर्वकं द्यौः पृष्ठमि-
ति मन्त्रस्य षड्ढोतेति नामधेयं ॥ इयं चाहुतिर्निरूढपशावेव ॥ भवतीति तत्प्रकरणे एव पठितत्वात्। तद्धि कारेषु चातुर्मास्यसौत्रामणि-
गतेषु हविर्यज्ञपशुषु च निरूढप्रकरणे श्रूयते। तदाहुरध्वर्यो यद्दीक्षितस्य नाम वमाथो न कल्पते कैममदिक्षीधार इत्यावभ्रथा
द्रुजुहुयात् पुरस्ताद् ध्वर्युः प्रतिप्रस्थाता चमसे त्रावरुण अथ ब्रह्मा चाग्नीध्रश्चैते वा एष षड्ढोतारमनुद्रुत्य षड्ढोतारं जुहोत्येकामाहुतिं द्वा
पंच वाज्यान्न द्यौः पृष्ठमित्यादि श्रुतत्वात् ॥ अत्र केचिदाहुः। अध्वर्य्वादिभिः षड्भिर्ऋत्विग्भिरयं पशुरेव षड्ढोता। तं पशुमे-
व मनसानुद्रुत्य संविद्य साहुतिं जुहुयादिति ॥ येषां चमसं त्राः षड्ढोतास्तेषामपि ऋत्विग्भिः पशुः षड्ढोतास्तद्योगान्मन्त्रोपि षड्ढोतेति।
॥ १ ॥ वेदिं करोति वरुणप्रघासवत् ॥ ॥ अत्र निरूढपशुबन्धे वरुणप्रघासवद्वेदिं करोति। वरुणप्रघासवदिति आहवनीयस्य
पुरस्तात् रथमात्री चतुररत्निर्वा पश्चात् पप्राचीष त्रयः पुरस्तादिसे वप्रमाणं वा। अपरिमितां वा वेदिं कुर्यादित्यर्थः ॥ वेदि-
मेलेकैव चनाद्वेकां करोति। केचिद्वेदिं करोतीसंतं सूत्रे फलादर्श पूर्णमासिकीमेव वेदिं पशुबन्धस्येति ॥ तदसत् ॥

तथा सति वरुणप्रघासवेदि सति देशस्यैवेष्यत्वापत्तेः। स्फ्याद्यग्निनिधानादि सेतावतैव सिद्धत्वात्॥ नहि वरुणप्रघासादन्यत्रेतप्राक् क्वचित्
स्फ्याद्यानाद्यग्निनिधानान्तं कर्मोपदिष्टमस्ति येन वरुणप्रघास्याप्यासवदिति अतिदिश्यते। तस्माद्वेदिं करोति वरुणप्रघासवेदिरेव
मेनत एव सूत्रच्छेदः कर्तव्यः। शाखान्तरसूत्रेष्वपि निरूढप्रघासिक्ये वेदिः पठ्यते॥ तथापस्तंबः। रथमात्री निरूढपशुबं
धस्य वेदिरसंमिता पश्चात्तिर्यग्गीषया प्राची विपथयुगेन पुरस्तात्तावतावती भवतीति। त्र्यरत्निर्भिवर्या चतुरभिः प्राच
न्दिः प्राचीत्रिः पुरस्तात्तां वेदिं कल्पयेत् दर्शपूर्णमासवत्संनमनवर्जं प्रागुत्तरास रिग [illegible] परेणयूपावटं संचरमवशिष्य दे
ध्यामुत्तरवेदिं दशपदां सौमेकुर्यात् [illegible] तृतीयंसी पुरस्तादिति सेवे यावता युगेन यजमानस्य नापदे विमाय शम्यया परिमिमीते। श
म्यामात्री निरूढपशुबंधस्योत्तरवेदिरिति॥ तथा च काठके॥ प्रागग्रेरथमात्रीं वेदिं प्राक् परिगृह्णीयात् तस्याः पूर्वार्धा
द्वात्रिंशदङ्गुलामुत्तरवेदिं चतुस्स्रक्तिं प्रसम्यपदे [illegible] मात्रे भुवन यशि [illegible] अपरिमितां वेदिं यदा स्याच्छपदो त्तरवेदिः संभवे सा
वेदिं कुर्यादिति लौगाक्षिरिति। मानवेऽपि। वेदिं करोत्विति यथोत्तरां वरुणप्रघासिकीं निःसारणां तां कृत्वा वसतीति [illegible] तपा
णीपूर्भात्ल्यव हारं परिस्तीर्येति। संभारान् उत्तरनाभौ [illegible] पिवेतदत्तपूर्वधुःस्यादिति काठके। आपस्तंबोऽपि। प्रोक्षणान्त
कृ औदुंबरशाखाभिः पूर्वशाखाभिर्वा प्रथयेद्वसतिसंध्यस्काले पशुर्भवतीति। अतश्च सर्वसूत्रेषु दर्शनात् [illegible] लियकी
र्दहः कालेनापि पक्षो भवतीति। ननु कथमनवसरे वेदिकरणमुक्तं। पत्नीसंनहनाद्युपरि [illegible] उच्यते [illegible]
मेष्वुत्तरवेदिर्विहिता तत्राहवनीयः सत्याग्निसंस्कारः अग्निश्चागप्रध्वानार्थस्याग्नीषोमीयेऽप्युत्तरवेदिरपकल्प्यते तेन वे
दिं करोतीत्युक्तं। स्फ्याद्यग्निनिधानात्। अत्र वरुणप्रघासवत्प्रमाणत्रयमध्ये अन्यतमेन प्रमाणेन वेदिमानमुपकरणं तत्कृत्वा
स्फ्यादि। स्फ्यादानादि आ अग्निनिधानं तेष्वग्निं निदध्यातीत्यन्तं पर्यन्तं कर्म करोति। ततः पूर्वं तत्र यजमानवाचं यच्छेति प्रैषदे
लाघवं आसादनादि त्रिकपोशणान्तं कृत्वा वेदिमानादि कुर्यात्॥ ॥ [illegible] प्रणयति॥ ॥ [illegible] मग्निं [illegible] प्रणय
नि अयं वारुणप्रघासिकातिदेशमध्ये विशेषः। [illegible] प्रणयनमुक्तं। [illegible] प्रणयति न [illegible] ॥ न प्रति प्रासक
वर्जं यथा [illegible] प्रणयनं [illegible] प्रासानुवादः [illegible] ॥ [illegible] बंधस्याहवनीयायतनं प्रणय
लिसगार्हपत्यः प्रणीतेत्येव [illegible] कालए त [illegible] होत्रं [illegible] तीति। अत्राह सप्रदायप्रवृत्तिकारः॥

अतिप्रणीतेनाग्निहोत्रहोमः अनंगत्वादग्निहोत्रहोमस्येति। अयं सन्न्यायः सत्यापस्तंबवचनं नाधिकं तत्समर्थ इत्यसतिप्रणीत
ए नाग्निहोत्रं होतव्यमिति युक्तं। अत्र वेदेः उत्तरभागे नेध्माहरणं कार्यं॥ तथा च कारिका। त्रिस्तृणात् उत्तरेण वेध्यं ते नगत्वात्पूर्वेणो
त्तर वेदिं प्रसर्पतीति निरासादि॥ ॥ व्रतोपायनं प्रणीताज्यभागभागावदानपूर्णपात्रविष्णुक्रमान् कुर्यादिति यज्ञविध्ये॥ हवि
र्यज्ञविधेय पशौ व्रतोपायनादीन्विष्णुक्रमान्तान्पदार्थान्कुर्यात्॥ अर्थात्सवविध्ये न कुर्यादिति गम्यते॥ व्रतोपायनं व्रतग्रहणं। तच्च
श्रेसंवरणोत्तरकाल एवाग्निनिध्यानानंतरं वा पत्नीं कर्तव्यं। प्रणीताप्रणयनमप्याग्निनिध्यानानंतरं कर्तव्यं॥ आज्यभागौ वपायां
न तव्यौ॥ भागावदानानि तु क्लोमभस्लोणइत्याग्नीषोमीयमागतानि तत्र च शास्वांतरे प्रतिषिद्धानि। अतो विकारपशु
षु गच्छंति॥ अलस्हैतेषां निष्ठानमग्नीषोमीये एतानि न भवंतीत्येवमर्थं॥ अतः पश्वंतरे ये तानि क्लिप्यमेन न भवंति। तत्रापि निरूढे
एषां विकल्पं वक्ष्यति। क्लोम प्लीहा च पुरीतत् [illegible] चेध न्निति। अतः एषां निरूढे निरूढविकारेषु च विकल्पः। पश्वंतरे नियमः। अग्नी
षोमीये अभाव एवेति। पूर्णपात्रं च पशावभवति। तत्र च पशुपात्रासादनकाले आसादनप्रोक्षणे न स्यभवतः। विष्णुक्रमोपि पशौ
भवति। विष्णुक्रमशब्देन दिवि विष्णुरित्यत आरभ्य तु [illegible] माहवनीयोपस्थानांतं कर्माभिधीयते। तत्कथं। सूत्रकारप्रस्था
त्। ब्रह्मणे नमाहाहवनीयं वोपस्थायेध्मनादीनि चेदिति। अतएवगम्यते। आहवनीयोपस्थानांतो विष्णुक्रमा इति। अतः अग्नीषो
मीयदक्षिणाग्निहोम्यांतः इत्येप यवः समिष्टयजुरंताः। निरूढस्याहवनीयोपस्थानांत इति। निरूढविकाराः हविर्यज्ञोप र
वो चाहवनीयोपस्थानांता इति। हविर्यज्ञविधो हवा अन्यः पशुबंधः सवविधोन्यः सोमयज्ञविधो यस्मिन्नेतमुपनयति य
स्मिन्नपः प्रथायति यस्मिन्पूर्णपात्रं निनयति यस्मिन्विष्णुमाक्रमयति अथहैषसवविधो यस्मिन्नेतानि न भवंति न त्रि
यंते इति श्रुतेतात्। तथा चापस्तंबः। इष्टिविधो वा अन्यः पशुबंधः सोमविधोन्यः सयत्रैतदपः प्रणयति पूर्णपात्रं निनयति विष्णु
क्रमान्क्रमति सइष्टिविधोन्यः सवविधइति वाजसनेयकमिति। सवनिधे तु पशावेतेषां प्रतिषिद्धत्वात् पशुपुरोडाशे प्रणीताप्रण
यनादीनि भवंति। तत्राग्नीषोमीये पशुपुरोडाशे प्रणीताप्रणयनमाज्यभागौ चसेतावदेव। अन्येषां प्रतिषिद्धत्वात्॥ ॥ परिस्त
रणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणनिरूहोत्तरपरिग्रहादिकरोत्याज्यासादनांतं॥ ॥ दर्शपौर्णमासिका नीपधनि
षयान्गृहणादीन्पदार्थानर्थलुसान्परिस्तरणस्यासंमोहायपरोक्तर्तव्याः पदार्था स्ताननुपदिशति। तत्र पाकुर्तवेदत्र पुर्व व्रतग्रहणं ततः प्र
णीताप्रणयनं ततोमध्याहवनीये वर्जं सर्वेषां परिस्तरणं ततः शूर्पार्थं [illegible] पूर्णपात्रीसादनं। अत्रोहापस्तंबः यथार्थं पात्राणि प्रयु
नक्ति [illegible] समयमग्निहोत्रहवणी वेसाहोमहवनीं द्वितीयां जुहूं पृषदाज्यधानीं द्वितीयामुपभृतं द्वे आज्यस्थाल्यौ हृदयशूलं मसिकुं

भौंपूक्षशाखां शाखापवित्रं काश्मर्यमय्यौ वपाश्रपण्यौ द्विशूलां औदुंबरं मैत्रावरुणदंडमास्यदघ्नं बुबुदं कूदघ्नं वा रशने चेति। अत्र मानवे व्रतोपेत
स्येध्मान्बर्हिः सन्नह्य सावालेः प्रस्तरो विधृती च काश्मर्यमयाः परिधयो विंशति दारुध्मं वेदिं करोति। यथोत्तरावारुणप्रघासकेनिः
सारणांतां कृत्वा च वसति। श्वोभूते पाणी प्रक्षाल्य विहारं परिस्तीर्य पात्राणि प्रयुनक्ति तत्र प्रथमो सतितए शकलं पूक्षशाखां
वपाश्रपण्यौ रशने शूलं मैत्रावरुणदंडमादानं अपणस्वस्वस्त स्वधितिं चेति। कण्डिका। आहरस्याज्यपात्री व्यरुणी प्रथमं परापुतं तितर
स्वर्वधितिमथनौ च शाकलौ काश्मर्यमयौ वपाश्रपण्यौ रशने त्रिव्यामां द्विरज्जुणां द्विव्यामां प्लक्षीमध्यवदानी स्वधितिं विकंभी दंडं शूलं
मुपप्रस्थानिति तंत्र शुरुनातं पच्चदमव्यगं येन चार्थो विहारं परिस्तीर्य पात्राणि प्रयुनक्तीति॥ अत्र पूर्वाणामपि पात्राणां मासादनं विहित
मस्ति। अतः शाम्यासमुपादीनामथासादनं प्रोक्षणं च कर्तव्यं। स्रुवौ जिह्वाहवण्यादीनादीनर्थलुप्तान्पदार्थान्परिस्यज्य पात्रप्रोक्षणं॥
आहवनीयादीनर्थलुप्तान्मुक्त्वा आज्यानिर्वापो वेदकरणं च॥ स च नादयः पदार्थाः अर्थलुप्ता स्तानं तरा मुक्त्वा आज्याधिश्रयणपर्यग्नि
करणं च कृत्वा स्वननं च कृत्वा उत्तरपरिग्रहादि आज्यासादनांतं आज्यसादनानंतरं मामालंभोदकालंभांतं कुर्यात्। उत्तरपरिग्रहादीन्यत्र
तरपरिग्रहस्याव लोकायिति जुहूवदसाहोममहवनीयमुपभृदस्य पृषदाज्यधानीमिति। तथा उपभृत्स्थ पृषदाज्यधानी सादयतीति च।
अत्र विशेषमाह॥ ॥सप्तदशाज्यमाज्यग्रहणं॥ ॥आज्यग्रहणमत्र सप्तदशाज्यं भवति। चतुर्गृहीतेज्जुह्वां चोपभृति च गृह्णाति पृष
ग्दीतं ज्योतिरसीति श्रुतत्वात्। अत्र काठके विशेषः दध्नी च निर्वपति यथा च्यदे तु प्रभ च्मंत्रे च तु र्गृहीता त्वाज्या निर्द्धितीयस्यामुपभृतितेज
स्युपयं ज्योतिरसीतिदध्यासिच्यो तमाभ्यामभिघार्य शेषं घृतमासिच्यतस्यप श्वभिघारणं वनस्पतिं च यतीति॥ आपस्तंबेपि। अत्र
आज्यं निरूप्य दध्नि निर्वपस्य श्रयणनर्जं दध्नानिक्रियते नोत्पत्स्यदघृं संस्कारो विधतरस पर। आज्यग्रहणकाले चतुर्जुह्वां गृह्णाति च
तुरुपभृतिदध्न्याज्यमानीय महीनां पयोसीति। पृषदाज्यधान्यां पंच गृहीतं ज्योतिरसीति [illegible] ति॥ ॥बर्हिषि पूक्षशाखा स्तृणाति॥ ॥
बर्हिषि स्तीर्णे बर्हिषः पूक्षशाखाः स्तृणाति बर्हिषैव वेदेर्दक्षिणभागे। तासामुपरि हृदयादीनामवदानं छेदनं करिष्यते यतः पूक्षशाखा
बर्हिर्भवति। अध्वर्युः स्यतीति श्रवणात्॥ तत्र श्रुत्वाऽमीमेवरूस्तृणाति न मंत्रेण अपूर्ववत्॥ ॥देवस्य त्वेति सप्तिमादाय यूपावट परिलिखती
दमहं मियो हवनीयस्य पुरस्ताद् तवै धिर्ज॥ ॥आज्यासादनानंतरं देवस्य त्वेति सप्तिमादायाहवनीयस्य पुरस्ताद्यूपावटं यूपनिखन
नार्थं श्वभ्रं गर्तं परिलिखति॥ इदमहमिति नेन मंत्रेण पुनरपि यूपावटस्य स्थानं विशेषयति। अंतर्वेदि बहिर्वेदि मध्ये अर्धं अर्धं दध्ये
बहिर्वेदि आहवनीयात् पूर्वस्यां दिशि तत्रावटं खनेतियर्हि स्यातः सकजेद्धं मंतर्वेदि अर्धं बहिर्वेदि स्यात्। अग्निमादत्ते देवस्य त्वा सवितुरिति॥

अथ वेदिं परिलिखति इदमहमिति श्रुतत्वात्॥ ॥उपरसंमितं खनति॥ ॥उपरो यूपस्य मूलभागो तस्योन्निखननार्थः त्रिः पंचमो भागः
तेन संमितं तत्प्रमाणं निम्नं अवटं खनति। उपरेण समा यावत् खनतीति श्रुतत्वात्॥ छंदोगसूत्रे यूपावटे बेल्वेऽपि उपघातः स्यात् सर्वत्र
खनने अतुरंगुलं निखाय पांसुभिः पर्युपस्तिष्ठे यथा सारस्वते नादेशे सर्वत्रेति॥ ॥प्राचः पांसूनुद्वपति॥ ॥प्राच्य अवटस्य प्राच्यां
दिशि पांसुमुत्खननेनोत्थितं धूलिराशिमुद्वपति॥ अवटाद्बहिर्निष्काशयति॥ अथ खननादि प्राचं उत्करमुत्किरतीति श्रुतत्वात्॥ ॥तद
ग्रेण यूपं प्रांचं निदधाति॥ ॥तस्यावटस्याग्रेण पुरस्तात् प्रांचं प्रागग्रं यूपं निदधाति। तदग्रेण प्राञ्चं यूपं निदधातीति श्रुतत्वात्॥ तमवटम
ग्रेणावटस्य पुरस्तादिति हरिस्वामी॥ ॥कुशमुष्टिमुपरि तस्मिन्॥ ॥तस्मिन् यूपे कुशमुष्टिमुपरि निदधाति। एतावन्मात्राणि बर्हींषि उपरि
ष्टाद्दधि निदधातीति श्रुतत्वात्॥ ॥प्रथमशकलं च॥ ॥चकारात्तस्मिन्नेव यूपे प्रथमशकलं निदधाति। यूपे छिद्यमाने यत्प्रथमापतितं शक
लं तत्प्रथमशकलं। तदेवोपरिष्टाद्यूपशकलमप्यभिनिदधातीति श्रुतत्वात्॥ ॥अग्रमन्तरेण चषालं॥ ॥अग्रमन्तरेण यूपाग्रस्योत्तरतः स
मीपएव चषालं निदधाति। तदेवोपरिष्टाद्यूपशकलमपि पुरस्तात् सोऽथ तच्चषालमुपनिदधातीति श्रुतत्वात्॥ ॥यवोसीसप्र
भृत्याग्रप्रोक्षणमध्यमूलानि दिवेत्वेति प्रतिमंत्रं॥ ॥यवोसीस नेन मंत्रेणाप्सु यवं क्षिप्त्वा तत्र स्थयेषु लोकेषु यवनानोप्ययवान्तरिक्षि
त्वा दिवेत्वेति प्रतिमंत्रं क्रमेण यूपस्याग्रं यूपस्य मध्यं यूपस्य मूलं च प्रोक्षति। ताभिर्यवमिश्राभिरद्भिरग्रादिषु त्रिषु प्रदेशेषु यूपं प्रोक्ष
तीत्यर्थः। अतो यवमत्यः प्रोक्षण्यो भवंतीति सोसावेव बन्धुः स यवानामावपति यवोसीति। अथ प्रोक्षतीति श्रुतेः सर्वं प्रोक्षति दिवे त्वेत्यादि श्रु
तत्वात्॥ ॥प्रोक्षामीति सर्वत्र साकांक्षत्वात्॥ ॥दिवेत्वेत्यादयः त्रिभ्य आपूर्वाभावात्तस्मात्तत्र करणे प्रोक्षामीति पदं सर्वेषु प्रयोज्यं
॥ ॥अवटे शेषमासिंचति शुंधंतां लोका इति॥ ॥प्रोक्षणीशेषमवटे गर्ते आसिंचति शुंधंतां लोका इति मंत्रेण। शुंधंतां पितृषद इत्युत्तरादस्य
मंत्रस्य पितृषदनादुदकालंभो भवति। अथया प्रोक्षण्यः परिशिष्यंते ता अवटे ऽवनयति शुंधंतां लोका इति श्रवणात्। यूपैकादशिन्यां
प्रत्यवटं शेषसेकः। तमेवैतन्मेध्यं करोतीति वाक्यशेषे अवटसंस्कारस्यावगमात्। अपरे त्वेवमाहुः। प्रोक्षणीनां प्राकृतार्थे नाऽ
यं शेषप्रतिपत्तिरेव। न च वटसंस्कारः। तमेवैतन्मेध्यं करोतीत्येतत्तु अर्थवादमात्रं॥ ॥बर्हींषि प्राचीरुदीचीर्वा स्तृणाति पितृषदन
मसीति॥ ॥पितृषदनमसीति मंत्रेण तस्मिन्नवटे प्राचीः प्रागग्राणि उदगग्राणि वा बर्हींषि असंस्कृतानेव कुशान् आस्तृणाति प्रक्षि
पति। यत्पूर्वं कुशमुष्टिं यूपस्योपरि निहितं तस्यायं विनियोगः। अस्यापि मंत्रस्य पितृषदनादुदकालंभः। अथ बर्हींषि प्राचीनाग्राणि प्राची
दीचीनाग्राणि वा स्तृणाति पितृषदनमसीति श्रुतत्वात्॥ ॥प्रथमशकलं प्रागग्रं उरसीति॥ ॥प्रथमशकलं च यूपावटे प्रक्षिपति।
अग्रेणीरसीति अनेन मंत्रेण। अथ यूपशकलं प्रास्यतीति श्रुतत्वात्। समप्रास्यस्य अग्रेणीरसीति श्रुतत्वात्॥ ॥स्रुवेणावटे जुहोति तूष्णीं॥ ॥
तत आज्यस्थाल्या आज्येनैव स्रुवेण तूष्णीमवटे जुहोति। अथ स्रुवेणोपहत्याज्यमवटमभिजुहोतीति श्रुतत्वात्॥

मंत्रांतराभावाच्चुष्मीमिसैंहसनेनस्वाहाकारोनिवार्यते। इदंप्रजापतयइति सागः। अवटस्यतूपरिस्तरणं॥ ॥पुरस्तात्सरिक्रम्याध्वर्युर्य
जमानोवायूपमनक्त्युदङ्पविश्य॥ ॥यूपंपुरस्तात्परिक्रम्याध्वर्युर्यजमानोवाऽउदङ्मुखउपविश्य अर्थाद्यूपस्यदक्षिणतः ततो
यूपंलौकिकेनाज्येनांक्तीति। अत्र परिक्रमणविध्यानादभ्यादानाध्वरहोमांतमुत्तरेतउपविष्टेनकर्तव्यं। उदङ्ङासीनइत्यनेन
सामर्थ्यादेवाध्वर्योः परिक्रमणंप्राप्तोसेव। यजमानस्यतुनप्राप्नोति। तदर्थमुच्यते पुरस्तात्सरिक्रम्येति। माभूत्सन्निध्यानादप
रिक्रमणमिति। अथपुरस्तात्सरीत्सोदङ्ङासीनोयूपमनक्तीतिश्रवणात्॥ ॥यूपायाज्यमानायानुवाचयति॥ ॥अध्वर्युर्यज
मानोवायोयूपमनक्ति सएवयूपायाज्यमानायानुब्रूहीत्येवंहोत्राअनुवाचनंकारयति। सआह यूपायाज्यमानायानुब्रूहीतिश्रुतत्वात्॥
॥ ॥देवस्त्वेसनक्ति॥ ॥देवस्त्वासवितेत्यनेनमंत्रेणयूपमनक्ति आज्येनपूर्वत्यतिसर्थः। सोनक्तिदेवस्त्वेतिश्रुतत्वात्। एतआज
नउपरदेशंवर्जयित्वाविशिष्टस्यसर्वस्ययूपस्यसर्वात्रिषुकार्यं॥ ॥चषालमुभयतः॥ ॥चषालमुभयतइत्संलग्नतर्बहिआने
नैवमंत्रेणानक्ति। अथचषालमुभयतः प्रमुच्यप्रतिमुंचतिसुपिप्पलाभ्यस्त्वोषधीभ्यइतिश्रवणात्। देशाभेदान्मंत्रावृत्ति
र्भवतीतिप्रतिपादितमग्निसंमार्गात्पूर्वमिध्मेनक्तितबर्हिः॥ ॥भ्रातंप्रतिमुंचतिसुपिप्पलाभ्यइति॥ ॥सुपिप्पलाभ्यइतिमं
त्रेणतमेवाक्तंचषालंयूपाग्रेप्रतिमुंचतिपूर्वोक्तेस्थाने। ऊर्ध्वमग्नेप्रतिमुंचति द्व्यंगुलंत्र्यंगुलंवांतरत्नातिक्रांतंयूपस्येति। अ
त्रशाखिशद्गहणेपठ्यते। आग्रावयवंसत्लंकुर्वंसहतेनवाससाच्छादयंतीति। अविरुद्धत्वात्तदपिकर्तव्यं॥ ॥सोपरमग्निष्ठा
देशमक्तापरिव्ययणदेशं समंतंपरिमृशस्वर्ध्वर्युर्नाभिदघ्नेदापरिव्ययणात्॥ ॥सोपरंसहोपरिष्ठावर्ततइति सोपरं यूपस्य
ग्निष्ठादेशंअग्निसंमुखाग्रिदेशंपुनस्तेनैवमंत्रेणोक्ता ततोध्वर्युः परिव्ययणदेशंयूपस्यरशनाबंधनस्थानं समंतंपरिमृशेच्च
सर्वतोहस्तेनगृहीत्वा आपरिव्ययणादध्वर्युर्नाभिमग्नेशोत्तु भवस्तुजेत्। अग्निष्ठादेशस्य सोपरस्याजनविधानात्पूर्वं यूपांजनं
परदेशंवर्जितंकार्यमितिगम्यते॥ आंतमग्निष्ठामनक्तीति। आंतमग्निष्ठामितिच्छेदः॥ अग्नौ अग्निसमीपेतिष्ठतीत्यग्निष्ठा॥
यूपस्याग्नेःप्रत्यासन्नाआश्रितां अत्र अंतात् आंतमुत्तरेणानक्तीत्यर्थः। ननुचोपरदेशस्याप्यग्निष्ठास्ति। सत्यं। ऊपर्यधःस्थित
यास्त्वदेशोयःसचलक्ष्यतेतदर्थंवचनं। अन्यथातुसर्वाएवाश्रयो यूपेऽज्यमाने अज्यतेकोग्निष्ठाविशेषः। यजमानकर्तृकोंज
नपक्षेसोपराग्निष्ठांजनांतंयजमानएवकरोति। ननुसुत्रेण्यवादेशादर्शनादध्वर्युः। सत्यं तत्रपूर्वकालतामात्रे। अंजनस्यवा
चनिककर्तृकत्वात्। इदंवैयूपमुच्छ्रितसाध्वर्युरापरिव्ययणान्ताच्जेतीतिश्रुतेः। तथाचापस्तंबः। देवस्त्वासवितामध्वा

नक्षिति स्रुवेण संवतमनवधिंदन्नग्निष्ठामग्रिमनत्यो पराद्विति। अधुना अग्निसमीपे च स्थानाभावात् सूत्रे ग्निष्ठादे
शमिति सूत्रे। तथा च्यालालंदे शंकुपरन्वदेशादंतः पासदेशेरत्नादि इत्येवं यथा परिव्ययणदेशमिति॥ ॥उध्रीयमाणाया
नुवाचयति॥ ॥ततोध्वर्युरुध्रीयमाणायानुब्रूहीत्येवं होत्रा उच्चवाचनं कारयति। अथाह उध्रीयमाणायेति श्रुतत्वात्। आ
पस्तंबः। यूपायोध्रीयमाणायेति संप्रेष्यस्तु। ध्रीयमाणायेति वेति॥ ॥धामन्ग्रेणेति धूपयति॥ ॥तेनाभिमन्त्र्य सर्वतो गृहीतं
यूपं धामन्ग्रेणेति मंत्रेणो धूपयति प्राच्यं भुमो निष्ठितं संतमयूनोर्जं करोतीत्यर्थः। स तु धूपयति धामन्ग्रेणेति श्रुतत्वात्॥ ॥या
तेइति मिनोति॥ ॥याते धामानीति मंत्रेण यूपमवटे मिनोति अवटमध्ये यूपस्य मूलं प्रक्षिपति प्रवेशयतीत्यर्थः। अथ
मिनोति याते धामानीति श्रुतत्वात्। तुमि प्रक्षेपण इत्यस्य मिनोतिरूपं॥ ॥अग्निष्ठासंप्रत्याहवनीयं॥ ॥तथा यूपमवटे
मिनोति यथा अग्निष्ठा अश्रिः आहवनीयसंप्रति आहवनीयसंमुखी भवति। या अश्रिः पूर्वं सोपरा अतो चितिता
रुहा क्ष्वुनाता माहवनीयसमीपे कुर्यादित्यर्थः। स यूपसग्निमग्निष्ठामिनोतीति श्रवणात्। संप्रतिरुच्यो अग्निमाहवनीयंअ
ग्निष्ठामश्रिं मिनोति। तथा च यूपमवटे प्रक्षिपति अ यथाग्निष्ठाग्नेर्न्द्र सुर्भवति इति हारस्वामिनः। यूपैकादशिन्यां
सर्वयूपानां अग्निष्ठा आहवनीयं प्र संप्रति कर्तव्या॥ ॥ब्रह्मवनिं सेति पांसुभिः पर्युहति॥ ॥ब्रह्मवनिं सेति मंत्रेण
यूपावटं पांसुभिः पर्युहति पुरयतीत्यर्थः॥ अथ पर्युहमीति श्रुतत्वात्॥ ॥ब्रह्मदृंहेति मैत्रावरुणदंडेन समंतत्रि पर्युहति।
ब्रह्मदृंहेति मंत्रेणाध्वर्युर्मैत्रावरुणदंडेन तं पांसुभिः पुरितं गर्तं समंतं सर्वतः स्त्रिः पर्युहति परितः कुटनेन पांसुन वटेध्वः
प्रवेशयति पिदृयतीत्यर्थः। अथ पर्यूहतीति श्रवणात्॥ ॥समंभूमिं कल्पाद्भिरुपसिच्य विष्णोः कर्माणीति वाचयति यूपम
न्वारध्वं॥ ॥तमध्वर्युर्दंपिहितेन। समंभूमिं कृत्वा परितो वर्तमानया भूम्याः समं कृत्वाद्भिर्लौकिकै रूपसिच्य यूपमन्वार
ध्वं कृत्वा यजमानं विष्णोः कर्माणीति अमुं मंत्रं वाचयति। अथ पर्यूहस समथ पर्यं शाति समंभूमिपष्टं करोतीति अथायाद्रुम
निनयति अथैवमाभिपद्य वाचयति विष्णोः कर्माणीति श्रुतत्वात्। अत्र यूपमन्वारभस्वेत्यध्वेषणा कात्यायनाकृतः। अथैव
मभिपद्य वाचयतीति [struck-through] समानायामेन श्रौतौ सोमालंभे औदुंबर्यालंभे च। तथा सूत्रं। अनेकयजमानके सर्वेषा
वाचनं। यूपान्वारंभो गृहपतेरेव परार्थत्वात्॥ ॥तद्विष्णोरिति चषालमीक्षमाणं॥ ॥ईक्षमाणं यजमानं तद्विष्णो
रियमुं मंत्रं वाचयति॥

अथ चषालं मध्यस्तने तद्धि ज्योतिरिति श्रुतत्वात्। ईक्षमाणं वाचयतीति केचिदत्र चषालमीक्षस्वेति अध्येषणं कुर्वन्ति। तद्
युक्तं। श्रुतौ सूत्रे चादर्शनादिति। तथा चापस्तंबः। तद्धि ज्योतिरिति अनेकयजमानके सर्वेषां वाचनं। चषालेक्षणं यूपरार्थत्वा
दुपहतेरेव॥ ॥परिव्वीयमाणायानुवाचयति॥ ॥परिवीयमाणायानुब्रूहीति होतारं संबोधयति। आपस्तंबः। यूपाय
परिव्वीयमाणायानुब्रूहीति संप्रेष्यति परिव्वीयमाणायेति वा। यूपाये सर्वे यूपेषु॥ ॥त्रिगुणा त्रिव्यामा कौशी रश
नातया नाभिमात्रे त्रिवृतं परिव्ययति परिवीरसीति॥ ॥त्रिव्यामा कौशी रशना रज्जुर्भवति तया रशनया रशनाम
ध्यभागेन नाभिमात्रे प्रमाणता यजमाननाभिसंमिते यूपस्य संमिते देशे यूपस्य नाभिमात्रे मध्यदेशे वा त्रिवृतं त्रि
गुणं प्रदक्षिणं परिव्ययति। व्येञ् संवरणे। संवृणोति परिव्यानस्थाने नाभिमात्रे परिव्ययतीत्युक्तं। तथा चापस्तंबः।
नाभिदघ्ने रशनया त्रिः प्रदक्षिणं यूपं परिव्ययति। मानवे च। परिवीरसीति नाभिदघ्ने त्रिवृता त्रिः परिव्ययत्युत्तरं प्र
दक्षिणमिति॥ अनेकयजमानकेस्य मंत्रस्योहः। परीमो यजमानो। परीमान्यजमानानिति॥ ॥सरं सज्यान्यतरस्याम
तं प्रवेषयति॥ ॥परिव्ययणानंतरं तां रशनां सरसज्य तस्याः रशनायाः मध्ये वेष्टितायाः अविशिष्टावुभौ प्रांतौ परस्परं सं
सज्य मिश्रीकृत्य अन्यतरस्यां सिचि प्रांते अंतं प्रवेशयति। अत्राह मनुः। प्रादेशमात्रौ समस्यान्तौ यो संस्थं वीयसीति। कठसूत्रे।
प्रादेशमात्रं संवेष्ट्यानीय संस्थास्थवीयसी मतिषष्ठ्येति॥ आपस्तंबः। अथादुरं परिव्ययेद्धविष्कामस्योपदिदुरं सर्व हविष्काम
स्ये के यं कामयेत स्याययेतेति। ऊर्पां तेतस्य व्यतिवेष्टयन वेद्यै धं कामयेते पुमानस्यात्रायेते सांतं तस्य प्रवेस्याणिमतिस्थ
विमलं वीर्येति। अथ मयथाशाखांतरे दशनां सूचकता अन्यतरस्यामिति सूत्रितं। यूपस्य मध्यदेशे परिव्ययणपक्षे
णामवेयेयुपे का शिन्यादोनिः श्रेणीमारुह्य यूपस्य मध्ये परिव्ययणं कर्तव्यं॥ ॥यूपशकलमस्यामवगूहत्युत्तरेणाग्नि
मां दिवः सूनुरसीति॥ ॥अग्निष्ठामग्निमुत्तरेणास्थां यूपे त्रिर्वेष्टितायां रशनायां यूपशकलं स्वरुमवगूहति अघोम
खं रशनायां यूपांतराले प्रवेशयति सर्वथा। दिवः सूनुरसीति मंत्रेण। अथ यूपशकलमवगूहति दिवः सूनुरसीति श्रुतत्वा
त्॥ उत्तरेण मध्यमे रशनागुणे अवगूहत्युत्तमेवा सर्वेषु वाद्ययोरधरयोरिति वा जन्मेय कमिसापस्तंबः॥

वहुषु यथास्वं॥ ॥एकादशिन्यश्वमेधादौ बहुषु यूपेषु सत्सु यथास्वं स्वस्वरूमवगूहति। यो यस्य यूपस्य स्वरुः स तं तस्मिन्नवगूहेत्। तस्मा
द्यदि यूपैकादशिनी स्यात्तथैव मेवागूहेद् विपर्यासमिति वचनात्। एकादशानां वर्ग एकादशिनी। यूपानामेकादशिनी। यूपैका
दशिनी सा चापशवैकादशिनी भवति। तत्र विकल्प्यते। अतस्ता कृता। चिह्नाच्छिन्नी संगीकृत्याह यदि यूपैकादशिनी। यूपा
नामेकादशकः स्यात्तदा स्वस्वमेव यस्मिन् यूपे निबध्यमानेयः शकलोऽभेन गृहीतः स एव तस्मिन्नवगूहसाविपर्यासं। विपर्य
स्यतीति विपर्यासः। न विपर्यासः अविपर्यासः। अन्यदीयस्यान्यत्र प्रतिनिनयनं विपर्यासः। स न भवतीति तत्॥ ॥उपावीरसी
ति तृणमादाय तेन पशुमुपस्पृशत्युपदेवानिति॥ ॥उपावीरसीत्यनेन मंत्रेण स्तृतेर्बर्हिषस्तृणादन्यमादाय तेन तृणेन पुरस्ता
त्पश्चाच्च यथावस्थितं पशुमुपस्पृशति उपसमालभते उपदेवानिति मंत्रेण। अथ यत्तेनापाकरोतीति प्रवृत्तस्य सारणमादत्त उ
पावीरसीति श्रुतत्वात्। कात्ये उपदेवानिति पशुमुपाकरोति प्रसज्युस्त्व इति। आपस्तंबोऽपि। पशुंस्तनपयंतिकुटक
र्णिकाण खंड ... सप्तशफवर्जं यथांग हीनः स्यादंगतो वा निरुद्धे ... कोऽपि सार्स्वतीं बार्हस्पत्यामिति
मंत्राम्नानात्॥ ॥धागमेन पशुमुपाकरोति। कुत एतत्। मंत्राम्नानात्। होतायक्षदग्निर्नो धागस्ये तादि
षु मंत्रेषु धागस्याम्नानात्। तथा अग्नी अग्नीषोमाभ्यां धागस्य वपाये मेदसोऽनुब्रूहीति। यदि च धागो यागसा
धनं भवति तदायं मंत्रः संगतार्थो भवति नान्यथा। तस्मात् धागमेनोपाकुर्यात्। पुनः कीदृशं॥ ॥पञ्चदं॥ ॥प
ञ्चदीजातदंतं ... तिनिगमे श्रुतत्वात्। तं पञ्चदंतजातदंतं पशुमुपाकुर्यात्। पुनः कीदृशमित्याह॥ ॥अव्यंगं॥ ॥विगतमंगं यस्य कर्णादिकं
यस्यासौ व्यंगः न व्यंगः अव्यंगः स तं अव्यंगं अन्यूनांगमविकलांगं पशुमुपाकरोति। सोऽस्वांतरात्। अलातं वापस्तंबः। कुटकर्णकाणखंड बं
डः श्लोणसप्तशफवर्जमिति॥ ॥यथाम्नं वर्णं प्रोक्षणे॥ ॥प्रोक्षणे प्रोक्षणमंत्रे अनुसामा। सामान्यतामिमसरस्मिन्यादृशः पशुरमिति
वं। यदुक्तं प्रोक्षणमंत्रे यादृशः प्रतीयते तादृशं पशुमुपाकरोतीति। कुतः। अचोदितत्वात्। नह्येवं विधायोदनास्ति मानमंतं आर
मंतं जोषुकुर्यादिति। तस्मान्न्याय्य नियमः॥ ॥अग्निं मथ्य सा होमा करोति॥ ॥उपाकरणानंतरमग्निं मथति। तत्र परा कलास्ता

नादि आहोमात्करोतीति भगवानग्निर्हिसादुरिति होमान्तं करोतीत्यर्थः। चैवदेवपर्णालिकमन्थनं धर्मसम्पादनार्थं माहोमात्करोतीत्युक्तं। अन्यथा अनाम
धेयान्मन्थनं धर्ममात्रं स्यात्। अथोपाकृत्य पशुमग्निं मथित्वा युनक्तीति श्रुतेः॥ ॥उपाकरणं मन्थने वा॥ ॥उपाकरणमन्थने वा भवतः
विकल्पेन भवतः इत्यर्थः। लक्षणेन पशोरुपस्पर्शनं यज्ञाङ्गुक्तं तदुपाकरणं तत्पुनर्वचनं मन्थनेन सह सन्निधौ माथं। तेसंयु
क्तयोरन्यतरोऽधिकारः। यदि भवतस्ताभ्यां भवतः। न तु नयोरेकं भवतीति। तदाहुर्नोपाकुर्यान्नाग्निं मन्थेदिन्दुरुत्तानामेवादा
याञ्जसोपपरेसाभिध्याय नियुञ्ज्यादिति। तदुतथा न कुर्याद्यथाधर्मतिरन्यथाप्नियेकीर्षेदेवं तस्मादिदं देवानुपरेयादिति श्रुतेः
। नोपाकुर्यादिति नियक्षान्तरं। रशनां पशुनियोजनीमादायगृहीत्वा अं गसाकं तु नैवमार्गेण पशुमुपगम्य अथ मन्थनार्थं
होमार्थं मान्मन्त्र गच्छेदित्यभिप्रायः। अभिध्याय अभिप्रवीदध्यातिर्वं नैवर्तते। रशनया बध्वा पशुं यूपे नियुञ्ज्यादिति।
यथाकश्चिज्जुर्मतिरन्यथातिशिगमयितुं हिंसाविकीर्षेदेवं स्यात्। तिरस्तु वं स्याच। तर्व्यं तस्यभ्याप्तुस्यपरस्तु मर्थो व्ययं।
अवेस्व दिपुनर्लोपो। तस्माद्देवयथोक्तमुपाकरणं मन्थनं हवनेचानुपूर्वेण परिसर्वतोयथादर्शमियात्। गच्छेत्कुर्या
दित्यर्थः। इति हरिस्वामी॥ ॥द्विगुणरशनया द्व्यामया कौश्यापाशं वं लोतराश्रङ्गमभिबध्नीं दक्षिणं बध्नात्यत स्य
वेति॥ ॥अन्तस्य हेतिमन्त्रेण द्विगुणरशनया द्विगुणा चासौ रशना च द्विगुणरशना तया पशुबन्धनार्थया रज्जुः तया कौ
श्यादर्भमय्या पाशं भागपाशं कृत्वा अन्तरा शृङ्गयोरन्तरालेपशुं बध्नाति। कथं। अभिदक्षिणं दक्षिणशृङ्गसंमुखं पा
शं प्रतिमुञ्चेदित्यर्थः। पाशं कृत्वा प्रतिमुञ्चस्तस्यलेति श्रुतत्वात्। पाशं नागपाशमिति हरिस्वामिनः॥ ॥देवस्य त्वेति
यूपे॥ ॥देवस्य त्वेति यूपे पशुं नियुनक्ति बध्नातीत्यर्थः। दक्षिणे [illegible] शिरसि पाशो ना [illegible] प्रतिमुञ्च पर्षा मानुषः इत्युत्तरलोपु
पस्य नियुनक्ति सापस्त बः॥ ॥ऐन्द्राग्नः सौर्यः प्राजापत्यो वा॥ ॥ऐन्द्रं निरूढपशुरैन्द्राग्नः इन्द्राग्नीदेवतो भवेत्। अथवा सौर्यः सूर्य
देवतो भवेत्। अथवा प्राजापत्यः प्रजापतिर्देवतो वा भवेदिति। अत्र त्रयो विकल्पाः। तदाहुः किंदेवत्य एष पशुः स्यादिति प्राजापत्यः
स्यादित्याहुरन्यो अन्याहुः सौर्य एवैष पशुः स्यादिति सौर्यो अन्याहुरैन्द्राग्न एवैष पशुः स्यादिति श्रुतत्वात्॥ ॥यमिच्छेत्॥ ॥ए
तेषां त्रयाणामैन्द्राग्नादीनां मध्ये यमिच्छेत्तं यद्देवत्यं पशुं कर्तुमिच्छेदैन्द्राग्नं वा सौर्यं वा प्राजापत्यं। यावज्जीवं कुर्यादिहस्तादिर्विक*
ल्पो यं। प्रथमप्रयोगे यः आरब्धः स यावज्जीवं कर्तव्य इत्यर्थः। न प्रतिप्रयोगमिच्छया॥

श्रुतिक्रमाध्यक्रमेण सूत्रेण प्रथमप्रयोगेऽध्वाविकल्पार्थं। अतः प्रथमे प्रयोगेऽध्वाविकल्पः। द्वितीयादिप्रयोगेष्वादिर्वा विकल्पोऽयः आ
रभ्य समेव यावज्जीवं कुर्यादिति॥ पित्र्यमुसापायी स्तु प्रयोगमिध्वा विकल्पार्थमेवेदं सूत्रं व्याख्यातवन्तः। व्याख्यातारश्चक्तवन्तः॥
तथाहि। सवनीयानुवैध्ययोर्निरूढस्य वाग्नीषोमीयप्रकृतित्वं वक्ष्यति। अग्नीषोमीयाश्रुपिस्त्रापेषशार्वो स्तेषां निरूढप्रकृतित्व
मुच्यते॥ यमिष्टे तं। यमिष्ट्वे समुं कर्तुतन्निरूढमाणं कुर्वीत। चोदनासामान्यात्। लिंगं च सौत्रामण्यास्विष्टकृल्लेषे आज्यभाग
यो रूपलक्षणं॥ ॥अभ्युक्ष्येति पशुं प्रोक्षणीभिः प्रोक्षति॥ ॥अभ्युक्ष्येत्यनेन मंत्रेण प्रोक्षणीभिः संस्कृताभिः पशुं प्रोक्षति। अ
अपुर्वं ब्रह्म[illegible]-हविः प्रोक्षिष्यामीति ब्रह्माणमामंत्र्य तेन। ततस्तेन प्रोक्षय यज्ञमिसनेनानुज्ञातः पशुं प्रोक्षेदिति। स प्रोक्ष्य
समभ्युक्ष्यो शौषधीभ्यो इति श्रुतत्वात्॥ ॥अपां पेरुरित्यास्यः उपगृह्णाति॥ ॥अपां पेरुरित्यनेन मंत्रेण प्रोक्षणीः पशोरास्ये मुखे उ
पगृह्णाति मुखस्याधस्तात् संलग्ना एव प्रोक्षणीर्धारयतीत्यर्थः॥ अथोपगृह्णाति सपां पेरुरसीति श्रुतत्वात्। उपगृह्णाति आस्ये
पानार्थं॥ कुत एतत्। तदनन्तरं तो मेध्यकरोतीति हरिस्वामिनः। ततश्चोपग्रहणं पानार्थं। तथा चाश्वमेधे श्रूयते। अथोप य
गृह्णाति आग्नेः पशुरासीदिति प्रकृत्य तत्पायित्वा अपुनः संस्कृत संप्रोक्षणीभिरेतस्याप्सु श्रोक्षतीति॥ तत उदकाभावे पिपायनोपाय॥
॥ ॥आपो देवीरित्यधस्तादुपोक्षति॥ ॥आपो देवीरित्यनेन मंत्रेणाधस्तात्सक्थ्नोरूदरे हृदयप्रदेशेऽप्योक्षति। अथाधस्तादुपोक्ष
त्यापो देवीरिति श्रुतेः॥ ३॥ इध्मप्रेषादि करोत्याप्रयाजेभ्यः॥ होतारमामंत्र्य होतृषदनं सादयित्वाग्नये समिध्यमानायेति
इध्मप्रेषादि इध्मप्रेषादारभ्य प्रयाजेभ्यः प्रयाजहोमपर्यन्तं प्राकृतं कर्म करोति। वैकृतावसरे प्राकृतकर्मप्रवृत्त्यर्थमिदमुक्तं॥
अथाधस्तादुपोक्षणीत्यस्यानंतरमथाहाग्नये समिध्यमानायानुब्रूहीति। स एव तरमाघारमाघार्य[illegible]सादि। तथ त्रैतमेव ततो हो
ता होतृषदनमुपविशति। अथाप्रीभिश्चरंतीति वाएतत् एकादशप्रयाजा भवंतीत्येवमंतस्य श्रवणात्। तत्र विशेषमाह॥ ॥उत्त
राघारमाघार्य पशुं समनक्ति ललाटे स श्रोणिषु सं ते इति प्रतिमंत्रं॥ ॥उत्तरमाघारमाघार्य उत्तराघारहोमानंतर
पूर्वं ध्रुवास मं नादवगेव प्रथमपशुं ललाटे सं श्रोणि शुल ललाटे भाले सं सयोर्द्वितीयोत्तरस्कंधयोः श्रोण्योर्द्वितीयोत्तरकाव्यो
श्च अंशुस्थे नाश्वेनजुहैव समनक्ति। एतेषु स्थानेषु पशुं म्रक्षयति। सं ते प्राणा इति त्रिभिः प्रतिमंत्रं। स उत्तराघारमाघार्य
संस्रवंशायं स्त्रुचोपर्यध्रुवाया पशुं समनक्तीति प्रकृत्य स ललाटे समनक्ति। सं ते प्राणो वातेन गच्छतामिति स मंगा

नि मत्रत्रे रिखु ३ सयो: सयज्ञपति राशिषेति ओ व्या हीति श्रुतत्वात्। तत्रोसयोः ओ व्यो श्रमं त्रावस्ति:। ततो ध्रुवासमंजनं तस्य ब्रह्मादनं च।
अनेकपशुके प्रति पशु जना झे स ओ मि समंजनं। प्राकृतं च विकृता विद्येनैन न्यायेन प्राकृतं ध्रुवासमंजनं वैकृतान्ह् श्रुसमेजु
नासुवं मा भूदिति यत्नः कृतः स्रुवसंकृतापशुपूर्वं समनन तीति। अत्र वृष त्रय वचनाभावः तत्र प्राकृत वैकृत कर्म संपाते
प्राकृतपूर्वं भवतीति। तथेथापिष्टयागमिडानंतरं पिंडदानात्मा स्यान्नेनोदक्षिणादानादि। यथा वैश्वदेवादीपदर्वे पिन्ह् विरा
सादनानंतरं प्रागग्निमंथनाद्व विशालेभामालंभोदकस्पर्शनानि। यथा चेनणानुप्रहरणानंतरं प्रागवाजिनयागादा
मालंभो मृथासवनीये पुनिर्वापानंतरमेव हविषां प्रोक्षणाभिवासनोतं प्राक्प्रचरणी होमादिति॥ अनेकयजमान
के पशु ओष्या: सुमंजनमंत्रे ऊहः। सयज्ञपती आशिषेतिद्वि यजमानके। सयज्ञपतय आशिषा गाधंतां बहुषु॥ ॥प्रवृक्षे होतारमा
श्राव्याहाग्निर्हदैवीनां विशांपुर एतायं यजमानो मनुष्याणा२ सुन्वन्तिसुसेतयोरस्थूरि गार्हपत्यं दीदयद्धतं हिमा वायुराधाय२
सीसंपृचा नावसंपृचा नौतन्व३ इति॥ ॥ होतारं प्रवृणीत्यप्रवृति वदा श्रावण पूर्वकर्मणि निर्दे व्यो होतेति मंत्रेण होतृवरणं
कृत्वापनरा आश्राव्याग्निर्हदैवीनामिति समुमंत्र अ संपृचा नौ तन्व३ इसे वमंतमध्वर्युराहप्रवोति। अत्र मंत्रे यजमानो मनुष्या
णामिस त्रसुसेह निकृतया स्यार्थे वरणे सुन्वन्यजमानो मनुष्याणामिति प्रयोगः। सुन्वन्मनुष्याणामिसेतावद्देवेति केचि
न्। तन्नोपपन्नं। सर्वेषु सारस्वातसूत्रेषु सुन्वन्यजमान इति प्रयोगस्य दर्शनात्। अथ प्रवराया आवयति सो सावेवबंधुरथ द्वि
तीयमा आवयति यो स त्रे होतारे भवतः समैत्रावरूणाय देवा आश्रावयंति यजमानं सेवप्रवणीत घनर्हदैवीनामिति श्रुतत्वात्। तथा चा
तापस्तंबः दैवंचमानुषंचहोतारौ वृत्वा पुनराश्राव्य मैत्रावरूणं प्रवृणीत इति। अनेकयजमानके पाससमं तस्य विपारणा मः। अग्नि
र्हदैवीनां विशांपुर एत इमे यजमाना मनुष्याणां तेषामस्थूरि गार्हपत्यं दीदयधतं हिमा स्त्रयो वायजोराधाय२ सीसंपृचा नौ
तन्व इति। एवौ यजमानो तयो: पायू संपृचानो असंपृचानौ द्वियजमानके। सास्त२ हिमा स्त्रहोतारो पायवो पचेवायवः। षड्डाय
वः इत्यादि यजमानसंख्यात एव यो विध्यमुखास राध्या२ सीसंपृचा नास्तन्व इति बहुयजमानके॥ ॥ ॥ मैत्रावरुणायदंडप्र
यच्छति मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा प्रयच्छामीति॥ ॥ वरणानंतरं अध्वर्युर्मैत्रावरूणाय दंडं समर्पयति
मित्रावरुणयोस्त्वेति सूत्रपठितमंत्रेण उपविस प्रयच्छति। शास्त्रांतरे यजमानः प्रयच्छतीत्युक्तं। कीदृशं दंडमित्यपेक्षा
यामाह॥

९मौ

औदुंबरमुदुंबरदध्नावयवं। तथा यजमानमुखमात्रं। यजमानस्य मुखं प्रमाणमस्यासौ यजमानमुखमात्रस्तं यजमानमुखमात्रं॥ ॥
दीक्षितदंडं सोमे॥ ॥ सोमे सोमयागे दीक्षितदंडमध्वर्युर्मैत्रावरुणाय प्रयच्छतीति। तत्र मैत्रावरुणानंतरमेवाग्नीषोमीयेपशौ॥
अत एव दीक्षितग्रहणादध्वर्युः प्रयच्छतीति गम्यते। अन्यथा स्वदंडं सोमे सेवमेवायभवत्। सोमे दंडं प्रयच्छति। अनेन मंत्रेण अ
ग्नीषोमीयमने प्रयच्छे॥ ॥ क्रीते वा॥ ॥ याज्ञिका विकल्पार्थः। दंडस्य प्रतिपत्तिः कृता मानने। चिरस्थाप्ति प्रणीते तु धर्मीदंडमवदध्यादिति।
आश्वलायनसूत्रे पि। समाप्यप्रेषमग्नौ दंडमनुप्रहरेदनभ्यते ऽवभृथे वा यजेति॥ ॥ एकादश प्रयाजाः॥ ॥ अत्र प्रश्नो एकाद
श प्रयाजा भवंति। तेऽपि एकादश प्रयाजा भवंतीति श्रुतत्वात्॥ ॥ अनुयाजाश्च॥ ॥ अत्र प्रश्नो अनुयाजाऽपि एकादशैव
भवंति। त्रीणि हि वै पशोरेकादशान्येकादश प्रयाजाः एकादशानुयाजाः एकादशयजनत्र इति श्रुतत्वात्॥ तेषां प्रयाजानुयाजानां
एकादशसंख्याऽऽसंभसंयोगिनी। तत्र औदकं पालेषु प्रयाजानुयाजेषु श्रूयते। अतोऽभ्यासेन वैपुरणीया। तत्र प्रयाजानां पंचमा
भ्यासेन संख्यापूरणं। अनुयाजानां मध्यमो द्वाः प्रभृतीनां नाराशंसो नाम द्विनायस्य नाराशंसस्याभ्यासः। वनस्पतिप्रभृती
नामेति भस्याभ्यासः इति। तत्र द्वाः प्रभृतीनां पंचमाक्षीनां पंचमस्य नतस्ये सतुमंत्रणं। पुर्वंपुर्वं चाभिक्रामभि तिपथ्यं पंचमे
एवस्थाने होमइति। अनुयाजेषु द्वितीयादीनां नराशंसोत्तानां द्वितीयस्थाने होमः। वनस्पत्याक्षीनां त्र्याणां तृतीयस्थान इति। आ
पस्तंबसुत्रे विरोधः॥ ॥ निरुतिपशौ एकादशप्रयाजान्यजति समिध्यः प्रेष्येति प्रथमं संप्रेष्यति प्रेष्य प्रेष्येति तरांश्चतुर्थीमे
वोप्रति समानीय पद्श्रे [illegible] एकादशायाम्यमवशिनं हिनान्ययजमानः पाकले सादिंत अनुरो तुमंत्र्य चातुर्थस्यानुमंत्रणे
नद्वारः प्रभृतीस्वीनुतमेनं शेषप्रसाकमयमनुक्रमे स्वरुस्वधितीअन ति। तत्र प्रयाजानां इध्मस्तनूनपान्नराशंसइडो
बर्हिर्द्वारः उषासानक्तादैव्याहोतारा तिस्रोदेवीस्त्वष्टा वनस्पतिः स्वाहाकृतयः। होता आप्रीर्दयता इत्युक्तवा इदं समिध्भ्युस्तनूनपा
ते नराशंसायेड्भ्यो बर्हिषे द्वार्भ्य उषासानक्ताभ्यां दैव्याभ्यां होतृभ्यां तिसृभ्यो देवीभ्य स्त्वष्ट्रे वनस्पतये स्वाहाकृतिभ्य इति॥
अनुयाजानां तु इदं देवाय बर्हिषे ~~नाराशंसाय~~ द्वार्भ्य उषासानक्ताभ्यां जोष्ट्रीभ्यामूर्जाहुतिभ्यां दैव्याभ्यां होतृभ्यां देवीभ्यस्तिसृभ्यस्त्रि
सृभ्यो देवीभ्यो देवाय नराशंसाय देवाय वनस्पतये देवाय बर्हिषे देवायाग्नये स्विष्टकृते इति॥ ॥ समैत्रावरुणे प्रैष्यस्थाहयज
स्थाने वचने॥ ॥ समैत्रावरुणे मैत्रावरुणसंयुक्ते पशुसोमादौ कर्मणि यजस्थाने प्रैष्यस्थाहवचने सति। यत्र मैत्रावरुणप्रैषाभ्या
वे प्रेषवचनमस्ति तत्र यथा आग्नेयभागयोरग्नये प्रेष्य सोमाय प्रेष्येति समिध्योयजेत्यत्र समिध्यः प्रेष्येति देवेभ्यः प्रेष्येति च। समै
त्रावरुणेपि वचनाभावे पत्नीसंयाजादौ यजेत्येव न प्रेष्यति। सऽआश्राव्याह समिध्यः प्रेष्येति च प्रेष्य प्रेष्येति चतुर्थे प्रयो

जे समानयमानो दशभिः प्रयाजैश्चरतीत्येवमादि श्रुतत्वात्॥ ॥दशेष्ट्वा प्रयाजानाह शासमाहरेति॥ ॥दशप्रयाजानिष्ट्वा शासमाहरेति
शासहस्तं विशासितारं प्रसव्यध्वर्युराह। विशासितारमाहेति हरिस्वामिनः। दशप्रयाजानिष्ट्वा शासमाहरेति श्रुत्यादि श्रुतत्वात्।
असिर्वै शासः इत्यानुवचनादिति श्रुतत्वात्। असिः शासः कृपाणिका हस्त्या सामर्थ्यात्स्रुव इत्यन्ये इति हरिस्वामिनः॥ ॥स्वरुमादा
याञ्जौ गुह्यायेतान्यां पश्वोर्ललाटं यूपस्य शानित्यत्तेनाञ्जीत॥ ॥ततो विशासित्रा दत्तं शासं दक्षिणहस्ते स्वयमेव यूपास्व
रुमादाय तानुभावसिस्वरू अग्रेण अक्त्वा अग्रे प्रणालिकायां च तेनाक्ता विसृजेन्नेन मन्त्रेण अञ्ज्यादित्यर्थः। अथ यूपशक
लमादत्ते तावग्ने गुह्वा अक्त्वा पशोर्ललाटं यूपस्य शानित्यत्तेनाक्ता विसादि श्रुतत्वात्॥ ॥स्वरुमवगुह्यासिं प्रयच्छन्नाह घातेप्र
शाता श्रीरसीति॥ ॥ततः स्वरुं यथास्थाने वगुह्य शामित्रे असिं प्रयच्छन् रक्षाते प्रशाता श्रीरसीत्याह। ब्रवीति। पुनर्यूपश
कलमवगूहसे घातेप्रशाता श्रीरसीत्याह शासं प्रयच्छन्निति सो इति श्रुतत्वात्। असिं शासं शामित्रे प्रयच्छत् श्रीरसि घातप्र
शाता चिह्निता भवतु तेनैव। यथा वपश्चुर र्कः पुनरेव यथे वनपा माभि विधास्यामीति। शामित्रे स्पष्टितिं प्रयच्छन्नाह शामितरे
घातेप्रः स्पष्टाक्षिप्तासाप स्तंबः। अत्र धारया ऽष्टतस्यान्वधस्ति पशुमिति स्यादि शसीतीति भापस्तंबे मानवे च। असेः कृ घारि
कया धारयाघ्नं। तच्छेत्ता अधाऽपरानता भवति। तथा ससयं विकल्पः इति॥ ॥स्वरु सादयित्वा स्रुचौ चात्वाले मुत्तरेण शामित्रा
योक्षिस्वति॥ ॥स्रुचौ सादयित्वा जुहूपभृतौ स्वस्थाने आसाद्य चात्वालम् उत्तरेण चात्वालं दुत्तरस्यां दिशि शामित्राय शामित्राग्नेः
स्थापनार्थं मुक्षिस्वति। उक्षेस्वनं चाप्य्विकं। स्मार्ताः पञ्चपदार्थाः संस्काराः पूर्वं प्रवर्तन्ते तदेव। शामित्रेः पशुः श्रपणो ग्निरु
च्यते। तथा चापस्तंबः। अग्निं पर्यग्निकृते देशाद् उल्मुकं दधाति स शामित्र इति॥ ॥पर्यग्नयेनुवाचयति॥ ॥ततोध्वर्युः
पर्यग्नयेनुब्रूहीत्यनुवाचनं कारयति मैत्रावरुणेन। अथाह पर्यग्नयेनुब्रूहीति श्रुतत्वात्। परिस्तीर्यतोग्निर्यस्य सपर्यग्निः प
शुः तस्मै पर्यग्नये। अथवा पापरितोग्निः पर्यग्निः सास्मै पर्यग्नय इति वा॥ ॥आहवनीयोल्मुकमादायाग्नीध्रः समं
तं पर्येति पश्वाज्यशामित्रदेशयूपचात्वालाहवनीयान्॥ ॥अग्नीदाहवनीयस्याग्नेरुल्मुकमादाय पत्निवारं समंततं सर्व
तः प्रदक्षिणं पश्वाज्यशामित्रदेशयूपचात्वालाहवनीयान् पर्येति परितो गच्छति। उल्मुकमादायाग्नीत्पर्यग्निं करोतीति तथा
वैनं अपर्येति तदभिपरिहरतीति श्रुतत्वात्॥ ॥आज्यपशुशामित्राणि॥ ॥अथवा आज्यं दीनिजुह्वादिस्थानि पशुः शामित्र
श्च एतानेव पर्यग्निं करोति॥ न पुनर्यूपाञ्जलीन् सर्वान्। नाविकल्पार्थः॥ ॥प्रतिप्रास्यो ल्मुकं तावद्वति पर्येति॥ ॥पुल्मु

र्कं प्रतिप्रस्थाता हरन्नीयमध्य एव प्रति । पिव्या ग्नी सावदिति त्रिरेव प्रतिपर्यति । प्रतेः प्रयोगात् अत्र अप्रदक्षिणं त्रिः पश्वा
दीन्परिगृह्णतीत्यर्थः । पुनरपीरथाव ...मित्यर्थमेकवारं प्रदक्षिणं पर्येति ॥ ॥ पुनरादायोदङ् प्रतिपद्यते ॥ ॥ अग्नीध्र एव
पुनस्तमेवोल्मुकमादायाग्नीध्रः पुरस्तात् प्रतिपद्यत इति श्रुतत्वात् ॥ ॥ पशुश्चान्वेतु ॥ ॥ पश्चात्तमाग्नीध्रमन्वेतु अनुपश्चाद्गच्छ
तीत्यन्वेकुपद्गतो गच्छतीत्यर्थः । शामित्रेनं केदे बध्वा नयतीति श्रुतेः । शामित्रापेक्षया रशनां मस्तकादवतार्य गले बध्वाग्नीध्र
मनुनयति । अथाभयेनानापच्छे पशुं नयतीति श्रुतत्वात् ॥ ॥ प्रतिप्रस्थातान्वारभत एनं वपाश्रपणीभ्यां काष्ठमयीभ्यां वि
शाखाविशाखाभ्यां ॥ ॥ प्रतिप्रस्थाता शामित्रोदङ् नीयमानं पशुं वपाश्रपणीभ्यामन्वारभते । वपा श्रप्यते आभ्यामिति
वपाश्रपण्यौ । ताभ्यां विजातीयाभ्यां काष्ठमयीभ्यां श्रीपर्णीवृक्षा यवबभुताभ्यां । पुनः कीदृशाभ्यां विशाखाविशाखाभ्यां
द्विशृंगैकशृंगाभ्यां । मितिकाष्ठके । द्विशूलैकशूलमिति आपस्तंबः । अत एव एकाविशाखाद्विशृंगा । द्विशूलामेध्या काराग्र
सकर्णकेत्यर्थः । द्वितीयाविशाखा एकशृंगा एकशूला अकर्णकेत्यर्थः । ताभ्यामित्यर्थः ॥ ॥ तमध्वर्युः ॥
तं पशोः कर्तारमन्वारंभं प्रतिप्रस्थातारमध्वर्युरन्वारभते । ॥ यजमानोध्वर्युं ॥ ॥ प्रतिप्रस्थातुः कर्तारं मध्वर्युं यजमानोन्वार
भते । तं वपाश्रपणीभ्यां प्रतिप्रस्थातान्वारभते प्रतिप्रस्थातारमध्वर्युं यजमान इति [illegible] मध्यौ वपाश्रपण्यौ भवतः इति च श्रुतत्वात् ।
॥ ॥ वेदितृणेध्वर्युरादायाश्राव्य होतोपप्रेष्य होतर्हव्या देवेभ्य इति ॥ ॥ ततोध्वर्युस्तृणायाप वेदेर्दृणमादायाश्राव्योपप्रेष्य
होतर्हव्या देवेभ्य इति श्रुतत्वात् ॥ ॥ रेवति यजमान इति वाचयति ॥ ॥ रेवति यजमान इत्समुं मंत्रं यजमानं वाचयति । अथवा चय
ति रेवति यजमान इति श्रुतत्वात् । अनेन यजमानेनैकोन्वारभते वाचनं सर्वेषां श्रुतं ... यथायथमन्वेषणा । अत्र केचित् सूत्रे वि
शेषः । प्रमु... उपासमुपयं सुल्मुकहस्तो ग्नत आग्नीध्रोऽन्तरास्मिन्वेद्यंते पशुमवस्थितं द्विशृंगैकशृंगाभ्यां वपाश्रपणी
भ्यां मुख्यमभिनिधायाश्राव्य होतुःपप्रेष्य होतर्हव्या देवेभ्य इति संचरेण निःक्रम्य रेवति प्रेसमुं मंत्रयत इति । आपस्तंबसूत्रे
च । वपाश्रपणीभ्यां पशुमन्वारंभे तेध्वर्युर्यजमानश्चाश्राव्य प्रत्याश्राविते संप्रेष्यत्युपप्रेष्य होतर्हव्या देवेभ्य इति प्राक् रश्मा आग्नेर्भरत स्त
णीत बर्हिरिति होतुरभिज्ञाया हवनीयादुल्मुकमादायाग्नीध्रः पु... र्वः प्रतिपद्यते शामित्रापशुं नयमहुरो अंतरिक्षे संतरान्वाभा
लौ कराहुदं पंपशुं नयंतीति ॥ ॥ शामित्रे न्यातीयात् ॥ ॥ अन्वश्यमित्र... न तस्य स्थानं लक्ष्यते । अध्वर्युः प्रतिप्रस्थातेः
कर्तान्वारंभः पशुमनुगच्छन् सन् शामित्रं न्यातीयात् । अतिक्रम्य न गच्छेत् । शामित्रसमीप एव न तिष्ठेदित्यर्थः ॥ ॥ शा
मित्रेग्निं निदधाति ॥ ॥ ततोध्वर्युस्तमग्नीध्रस्तदुल्मुकाग्निं शामित्रे निदधाति स्थापयति ॥ ॥ निर्मथ्यमेके ॥ ॥ एकेषां

खिनो निर्मंथ्य मग्निं शामित्रे निदधाति। न प्राकृतमुल्मुकं। तदाहुः पुनरेवैतदुल्मुकं हरेद्यथान्यमेवाग्निं निर्मथ्य शामित्रेनं अव
येयुरिति श्रुतत्वात्। अतो निर्मथ्यस्य श्रपणार्थत्वादस्मिन्पक्षे आहवनीयादुल्मुकाहरणं न भवति। यदाग्निमेवैतत्पुरस्ताद्धरेत्ती
त्वादि तदर्थमात्रमितीपीत्यभुक्तिः॥ ॥पश्चात्तृणमुपास्यति वर्षीवर्षीयसीति॥ ॥शामित्रस्य पश्चात्प्रागग्रं तृणमुपास्यति
हस्तस्थयोर्वेदितृणयोर्मध्ये अन्तरतृणात्तत्प्रक्षिपतीत्यर्थः॥ तथा चैनं विशसंतित्पुरस्तात्तृणमुपास्यति वर्षीवर्षीयसीति
श्रुतत्वात्॥ अत्रानेकयजमानके मंत्रस्योहः कार्यः। यज्ञपती इति द्वयोः। यज्ञपतीनित्यादि इति बहुषु। अनेकयजमानके पश्चान्ना
रभं एकत्वं करोति। वाचनं सर्वे वा बुवते इति चप्रैषः॥ ॥तस्मिन्नेनं निदधाति प्रसक्तुशिरसमुदक्पादं॥ ॥तस्मिंस्तृणे एनं पशुं नि
दधाति नितरां स्थापयति। कीदृशं प्रसक्तुशिरसं प्रतीच्यां दिशि शिरो यस्य सो प्रसक्तुशिरास्तं प्रसक्तुशिरसं। तथा उदक्पादं उदीच्यां
पादौ यस्य सोदक्पादस्तं॥ ॥प्राक्शिरसं वा॥ ॥अथवा प्राक्शिरसं पशुं निदधाति। उदक्पादं तु स्थितमेव॥ अत्र अशिरस
सो दक्षिणे पिंडदानादाकर्तव्यापत्त्याभावेनात्॥ ॥संगृह्य मुखं तमयंत्यनायमानं॥ ॥पशोर्मुखं संगृह्य श्वासरोधो यथा स्या
त्तथा दृढं मुखग्रहणं कृत्वा शब्दं नाश्रयमाणं न यथा मार्यमाणः शब्दं न करोति तथा तमयंति। तमुक्तार्थं कांश्रावयो। पशुर्हि विरुद्धप्रा
णं संज्ञप्ता सम्यक् प्राणान्ति तान्मयति। ताम्यंते प्रयुंजते तमयंति तथा कुर्वंति यथा सताम्यति प्राणमाक्रामति। श्वासरोधं कुर्वाणा
रयंतीति तात्पर्यार्थः। तस्यन्कुर्वन्नप्रदधाति मानुषं कृतं नो एव पश्चात्कुर्णं पिस्ते विशसं किंतदपि गृह्य पेवमुखं तमयंतीति श्रुतत्वा
त्। मुखं गृह्य संगृह्येत्यर्थः॥ ॥वेष्टकेन वा॥ ॥अथवा वेष्टकेन तमयंति। वेष्टको गलवेष्टकः। गलं वा वेष्ट्य तमयंति संज्ञप
यंति मारयंतीत्यर्थः। वेष्टकरा कुर्वंतीत्यर्थः। वेष्टका कुर्वंतीति श्रुतेः॥ ॥एत्याहवनीयमावृत्यासते॥ ॥पशुमारणदेशादा
गत्य उत्तरेणाहवनीयसमीपे एत्यागत्याहवनीयमभिमुखा आवृत्य प्रदक्षिणमावर्तनं कृत्वा परावृत्या आसते अध्वर्यु
यजमानप्रति प्रस्थातारनीध्राः। अथ पुनरेत्याहवनीयमभ्यावृत्यासते नेदस्य संज्ञप्यमानस्याध्यक्षा असामेति श्रुतत्वात्। पुनः शब्दाधावं
लेऽआग्नीध्रपुरोगा गतास्ते सर्वे पुरस्ताहवनीयाभिमुखा आवृत्योपविशंति नेदस्येति हेतुवचनाद्ध्यात्। प्रविश्य संज्ञपयेदिति। ततः श्री
मितारं क्रियाजमानेभ्योऽन्य ऋत्विजः इति सिद्धं। तथा चानेनाध्वर्युर्भवति शमितरि तदेनोभवतीति सनेनाध्वर्युर्नाभिरिति रिक्त एव शमितेति
गम्यते॥ ॥संज्ञपयान्वगन्निति ब्रूयात्॥ ॥संज्ञपयान्वगन्निति ब्रूयात्। संज्ञपयान्वगन्निति वरमवमेव प्रैषमनुब्रूयान्नार्थलेशेण म
न्यशोकप्रसिद्धं। न हि मारयेत्यादिकमिसेवकारार्थः। तदाहुर्न हि मारयेति मानुषं हि। तत्संज्ञपयान्वगन्निति तद्धि देवत्रेति श्रुतत्वा
त्। हे शमितः सम्यगेनं संज्ञपय मारय। अयं पशुः संज्ञप्तः सन्नन्वगन् देवाननुगच्छतीति प्रैषार्थः। अन्वगतामितिपशुद्वये कृतः। अन्व
गमन्निति बहुषु पशुषु॥

स्वाहा देवेभ्य इति जुहोति ॥ ॥ ततोऽध्वर्युः संजुह्वती तमाज्यं व सा हुतो महावन्या स्वाहा देवेभ्य इति मंत्रेण सभिमुखं कृत्वाहवनीये जुहोति । देवदेवेभ्य
इति लागः । तथ्यत्रैन निर्विच्छ्यति तस्मुरासं तपनात् जुहोति स्वाहा देवेभ्य इति श्रुतेः ॥ ॥ संज्ञस प्रभुरिति प्रोक्त श्येता नुमुहूर्त मिसाहा सोमे ॥
स तसः पशुरिति रामित्राप्रोक्ते ध्वर्युरसोमे सा मा द्व्यत्रनिरूढपशौ सेतानु मुहूर्तमिसाहप्रवीति । यतो निरूढप्रकरणे एव श्रूयते । तस्मा
दुपांशु संस्ससश्रुश्याचे तानुमुहूर्तमिति स यावंतम ध्वमेध्येन छ्यालोकं जयति तावंत मनेन जयतीति । संतसोऽपशुरेतिप शुंदये । संसासः
पशावह इति बहुपशुषु ॥ निरूढपशुविकारेषु हवियेष्ववियपशुषु स्येतानु मुहूर्तमितिभवसेव । सवनविधेषु ग्नीषोमीय सवनीयानुबंध्या
दिषु न भवति । सो ग्रामण्या त्रिपरसो हविर्य लवि ध्यलेस्येतानु मुहूर्तमिसुहः । सपाशुकं भुवरुण प्रघासेषु बहुनापशुध्यवे सायातानुमुहूर्तमि
ति ॥ ॥ देवेभ्यः स्वाहेति जुहोति ॥ ॥ ततोऽध्वर्युर्वसाहोमहवन्यां सवं रुहीतमाज्यं जुहीसाहवनीये समिध्यविनाजुहोति देवेभ्यः स्वाहेसनेन मंत्रेण
यागरूपुर्ववत् । अथ यवदा प्राक संशसः पशुरिस अथ जुहोति देवेभ्यः स्वाहेति श्रुतत्वात् ॥ ॥ नवैतेजुहुयात् ॥ ॥ एतेपरिपशव्याहुतीर्जुहुयान्नजुहु
याद्वा ॥ वाशाक्रो विकल्पार्थः । तेवाएतेपरिपशव्ये इत्साहुतीसमदिकामयेत जुहुयादेतेयद्युकामयेतापिनाद्रियेतेति श्रुतत्वात् ॥ ॥ वपाश्र
पणीभ्यां वियोजनी चात्वाले प्रास्यति मा हिर्भूरिति ॥ ॥ वपाश्रपणीभ्यांकरणभूताभ्यांनियाजनीप शुबंधनरज्जुं हि गुणदर्शनांमाहिर्भु
रितिमंत्रेण चात्वाले प्रास्यति प्रक्षिपति । रशना बहुत्वे माहिर्भूतमापदाकुरिति । द्वित्वे चमाहिर्भूतमापदाकुरिसुहः । अहिरूपदा कुरे
क्षौरूपमनार्थसा गंधविपरिणम्यते । उपमायामवगंतत्वात् । अगभूतं हि प्रकाशितं तथा । चनोपमां गभुतेति । भुरिसैतत्तुरशनापरः । अतोविपरि
णम्यत एव ॥ ॥ प्रतिप्रस्थातः पत्नीमुदानयेत्याह ॥ ॥ प्रतिप्रस्थातः पत्नीमुदानयेतीसेवमध्वर्युराह ॥ ॥ नेष्टरिति सोमे ॥ ॥ सोमांगभूतेषु अग्नी
षोमीयसवने सुनेष्टः पत्नीमुदानयेत्येवमध्वर्युराह । यदा प्राह संशसः पशुरिस्येवाध्वर्युराह नेष्टः पत्नीमुदानय [illegible] इति श्रुत
त्वात् । सोमइति सोमांतर्भूतपशुष्वेव । यतस्तत्रैवनेष्टा विद्यते । अतः सोमबाह्येषु पशुषु प्रतिप्रस्थातरित्येवप्रैषो भवति ॥ प ॥ ॥ पान्ने
जनहस्तां वाचयति नमस्त आतान इति ॥ ॥ पान्नेजनं पान्नेजनार्थं तुदकं कलशः । पादग्रहणमवयव प्रदर्शनार्थं । पान्नेजनोमुखा
ध्यवयवशोधनार्थं । जलकुंभो हस्ते यस्याः सा तां पत्नीमानयन् प्रतिप्रस्थाता नेष्टा वा गार्हपत्यसमीपात् पशुश्रोध्वानाय नयन्नुसन नमस्त
आतानेसमुंमंत्रंवाचयति नेष्टा पत्नीं पान्नेजनं बिभ्रतीं तां वाचयति नमस्त आतानेति श्रुतत्वात् । अनेकपत्नीके एकैव पान्नेजनहस्ता ।
वाचनं चास्या संस्कारत्वादिति ॥ ॥ पशोः प्राणाञ्छुन्धति पत्नी ॥ ॥ पशुसमीपे उपविश्य तस्य पशोर्मृतस्य प्राणान् मुखादीनि प्राणाय
तनानि अद्भिः शुंध्यति । शोधयति अद्भिः स्पर्शतीत्यर्थः । अथ पशोः प्राणानद्भिः पत्न्युपस्पर्शयतीति श्रुतत्वात् । तान्येवाह ॥ ॥ मुखनासि
के चक्षुषी कर्णौ नाभिं मेढ्रं पायुं पादान्त्संहत्य वाचं ते शुंधामीति प्रतिमंत्रं ॥ ॥ वाचं ते शुंधामीत्येवमादिभिर्मन्त्रैः प्रतिमंत्रं एकैकेन मंत्रेण
मुखनासिकादीन् पत्नी शुंध्यति । सोयं स्पर्शः । ति शुंधामीति मुखं प्राणं ते शुंधामीति नासिके चक्षुस्ते शुंधामीत्यक्ष्यौ श्रोत्रं ते शुंधामि
ति कर्णौ नाभिं ते शुंधामीति वायमनिमें भर्हः प्राणो मेढ्रं ते शुंधामीति वा पायुं ते शुंधामीति याः पश्यप आत्माण [illegible] स प्राणादध्यातिलह्स
मीरयतीति श्रुतत्वात् ।

मेढ्रं शिश्नं प्रजननेन्द्रियमुच्यते। पायुर्गुदः अन्यत्प्रसिद्धमेव। नासिकयोश्चक्षुषोः कर्णयोश्च भेदेनोपस्पर्शनं। न युगपदशक्यत्वात्। मेढ्रे चर्म
त्रोच्छित्तिः कर्तव्या। तदेतद्बहुरूपत्वात् पार्श्वभेदे मंत्रावृत्तिः सान्निपातिकत्वादिति। पादास्ते घस्य चतुरो व्येककत्वात् सान्निः पुंपतिचरित्रास्तोदपि।
अथ सर्वं दत्स्वपदं आरत्रांस्तो मुंचामीति श्रुतत्वात्।। ।।शेषेण यजमानश्च शिरः प्रभृतीन्यनुषिंचतः।। ।।शेषेण पात्नेजनशेषेण
यजमानश्च कारादध्वर्युश्च पशोः शिरः प्रभृतीन्यंगान्यनुषिंचतः। अथ या आपः परिशिष्यंते ऽर्धा नाया यावसो यातामिरेनं य
जमानश्च स्पीर्वतो येनुषिंचत इति श्रुतत्वात्। कानवानां चाध्वर्युर्ध्वर्युश्च यजमानश्चोतिपस्यंते। तेन चकारेणाध्वर्युः समुच्ची
यते। अन्ये तु यजमानके चैकेनानुषेचनं करोतीति परार्थत्वात्। तत्र शिरसो मंत्रमाह।। ।।मनस्त इति शिरः।। ।।मनस्त इति मंत्रेण
पशोः शिरोनुषिंचतः अद्भिः सिंचतः लिंगग्रहाद्दस्य विनियोग उक्तः शिरइति सूत्रे। वाक्त आप्यायतामित्यादिमंत्राणां लिंगादे
न विनियोगः सिद्ध इति सूत्रकृता नोपदिष्टः। तत्र वाक्त आप्यायतामिति मुखं प्राणस्त इति नासिके भेदेन मंत्राः प्रत्यवयवस्त इति तथै
व चक्षुषी श्रोत्रं त इति तथैव कर्णौ।। ।।यत्ते क्रूरमिति सर्वाणि।। ।।यत्ते क्रूरमित्यनेन मंत्रेण सर्वाण्यंगान्यनुषिंचतः। तावनुषिंच
तो मनस्त आप्यायतामित्यादि श्रुतत्वात्। विलिंगग्रहाद्दस्यापि पृथग्विनियोग उक्तः।। ।।शमहोभ्य इति पश्चात् पशोरनुषिंचतः।। ।।
शमहोभ्य इत्यनेन मंत्रेण पशोः पश्चाद्भागे जघनप्रदेशे पात्नेजनशेषं सुभावयितुं निषिंचतः निनयत इत्यर्थः। शमहोभ्य इति जघ
नेन पशुं निनयत इति श्रुतत्वात्। निनयनं च पशुसंस्कारत्वात् पशुशरीरस्य पश्चाद्भागे निनयनमिति। अन्ये तु पशुमुखप्राणशोधप्य
नादि पश्चात् सर्वशोल्लिंगेकांतमेकैकस्य संस्कारस्येतावत्त्वात्।। उत्तानं पशुं कृत्वाग्रेण नाभिं तृणं निदधात्योषध इति।। ।।ओषधे
नयनानंतरमध्वर्युः पशुमुत्तानं कृत्वा नाभिमग्रेण नाभेरग्रतो नाभितो मुखं तृणं ओषधे त्रायस्व इति मंत्रेण प्रागग्रं तृणं निद
धाति। अथोत्तानं पशुं पर्यस्यंतीति सतृणं मंतर्दधातो बध्नेत्रायस्वेति श्रुतेः। नाभिरग्रतो वपायाः स्थानं। अतोग्रेण नाभिमित्युक्तं।
।। ।।स्वधित इति तिर्यक् तया अभिनिधायाधि सांगं सम्येकत्वाद्दक्षिणं भुजमुभयतो नक्ति लोहितेन रक्षसां भागमिति।। ।।स्वधित इति
मंत्रेण प्रशस्ततया प्रयस्तु तया कर्तविच्छिद्या कृतोतद्वा असिधारया अभिनिधाय तृणस्योपरि असिधारां निधाय तु व्यसाः तृणं
छदः स्वधितिविच्छिद्य तीर्यक् पादयिच्छित्तृणाग्रं यस्य यथाग्रभुतं तत्सव्येहस्तेन कृत्वा दक्षिणहस्तेन तृणमुखं विगुणीकृत्योभयतो
मुखे च लोहितेन च्छेदनस्थाने उत्पन्नेन पशोः रुधिरेणानक्ति म्रक्षयति रक्षसां भागमित्यनेन मंत्रेण। अथवा उभयतः रसं बृं तवे कृ
श्चात्मणं लोहितेनानक्तीत्यर्थः। अत्राप्ययं स्तवः। स्वधितिनापाच्छ्वतास्तिर्यग्मा वधीरिति। अथासि नाभिं विदधाति स्वधित इति सोमे
मं हिंसीरिति। साया प्रस्तुतान्तर्धि स यावाभिनिदधाति सा हितयादुष्टनाभेश्च स्तद्विद्यंतेन स्यतत्सव्ये पाणौ कुरुते यवृ
ध्वांते दक्षिणेनादत्ते सव्ययत्राघ्यातिवश त्वोपूत मुत्पततीति तदुभयतो नक्ति रक्षसां भागोसीति श्रुतत्वात्। असेः पृथाराद्व
यं भवति। तयोर्मध्ये यापुर्वंगुद्य स्त्रे आच्छाद्यपाते प्रवसाना भीरास्त्विति यशामिना रंप्रसुक्तं। तथा चोक्तं आपस्तंबे मानवे च।।

अतृप्यास्तस्या वध्यसनतृणं या विषस तीति ॥ ॥निरस्तमभिसपास्यवि ॥ ॥ तद्रु वेरातृणमुलं निरस्य स्तमिसनेन मंत्रेणापा
स्याविडकरे प्राक्षिपति । मतद्दकोपस्पर्शनं करोति । मंत्रस्पर्शो वा चक्रसात् ॥ ॥इदमहमिमं सामितिछुति यजमानः ॥ ॥इदमहं
भिसनेन मंत्रेण यजमानः साडकरे ध्वर्युणा प्रक्षिप्तं रुधिराक्तं तृणमुलं मभिमतिछुति तस्योपरि तिष्ठति पादेनाक्रामतीत्यर्थः ॥
अत्राप्युदकोपस्पर्शनं यजमानेन कार्यं मंत्रस्पर्शो वाप्यिसात् । अनेक यजमानपक्षे एक एव तृणमभिमतिछुति सर्वे सात् । तदु
पास्याभितिष्ठतीदमहमिति श्रुतत्वात् ॥ ॥ वपामुत्खिद्य वपाश्रपण्यौ प्रोर्णोति घृतेनद्यावापृथिवीइति ॥ ॥ ततोऽध्वर्युः पा
दितानपशोरुदराद्वपामुत्खिद्य डस्यान्वोसाध्यनिष्कास्य तया वपया वपाश्रपण्यौ प्रोर्णोति प्रकर्षेण धादयति । अथ वपामु
त्खिदति । तया वपाश्रपण्यौ प्रोर्णोति घृतेन द्यावापृथिवी प्रोर्णुवाथामिति श्रुतत्वात् । पशोः सान्नाय्यविकारत्वात् समांस
श्रपणार्थानां पात्राणां सान्नाय्यस्थानापन्नत्वात् वपाश्रपण्योस्तद्धर्मपरिप्राप्तौ दुक्रस्यादानमंत्रेणोपहितेनोपधानं कर्तव्यं ।
ध्रोस्यः पृथिवी स्यइति । यजमानेनान्वारब्धयोर्वपाश्रपण्योः प्रोर्णवनं चेति । अत्र ध्रो[illegible]ः पृथिवी स्य दोहोपमानार्थ
सो न विपरिणम्यते । असौ यत्तु वपाश्रपणीपरत्वाद्विपरिणम्यत एव ॥ ॥ परिवास्य शाखालेवासिच्य शामित्रे प्रतपति ।
॥ ॥ वपाश्रपण्योः प्रोर्णवनानन्तरं तां वपां परिवास्योदरसंलग्नां छेदनेन पृथक्कृत्य ततः शाखाशाले वपाश्रपणीस्थामेव वपामवासिच्य अ
वो ध्याभ्युक्ष्य उदकेनोपसिक्तां ततः प्रतिप्रस्थाता शामित्रे प्रतपति । शाखालेवसिक्तां तमध्वर्युः करोति । शामित्रे प्रतपनादि तु प्रतिप्रस्थाता ॥
तां परिवासयति तां पशुश्रपणे प्रतपति तथो हास्या आपि स्टता भवतीति स्पष्टत्वात् । अतः शामित्रे प्रहृतपति सोऽपि श्रपणे कर्दशा एव । श्रप
णे प्रतिप्रस्थातृकर्तृके । दक्षिणतः परीत्य प्रतिप्रस्थाता श्रपयतीति च वचनात् । अतः शामित्रे श्रपयति तदपि प्रतिप्रस्थातैव करोति ॥
शामित्रैकदेशमाहवनीये प्रास्य सम्मीत् ॥ ॥अग्नीध्रः शामित्रैकदेशमाहवनीये प्रास्यति प्रक्षिपति । पुनरुल्मुकमग्नीदाददत इति श्रुव
णात् । आ । दानस्य तत्स्याहवनीयस्य च देशार्थत्वात्तदुल्मुकमाहवनीये प्रास्यतीति गम्यते । पुनः शाखोपादानान्नाग्निर्मथ्यस्य पशो तस्या दा
नं ॥ ॥ तपायं घ्राध्वर्युर्यो यो वेरिति ॥ ॥ वामो वेरसनेन मंत्रेणाध्वर्युस्तृणाग्रं [illegible] यप्राक् सव्येपाणौ कृत्वा तमासीनं तदधुनोति वनीये
प्रास्यति वायो वे स्तोकानामिति श्रुतेः । ते अध्वर्युप्रतिप्रस्थात्राग्नीध्राः शामीपाश्चात्वालं जघनेन [illegible] चात्वालोत्करयोरन्तरेणाहवनीयं प्र
तिर्यन्ति गच्छन्तीत्यर्थः ॥ ॥ उत्तरतस्तिष्ठन्प्रतप्य वपामन्तरा यूपाग्नी हृत्वा दक्षिणतः प्रतिप्रस्थाता श्रपयति परीत्य ॥ ॥ अध्वर्युणा तृणप्र
ध्रोपेकृते सति प्रतिप्रस्थाता उत्तरत आहवनीयादुत्तरदेशे तिष्ठन् सन्नाहवनीये वपां प्रतप्य अन्तरा यूपाग्नी अग्निकूपयोरन्तरालेन वपां
दे सास्वयमपि परीत्य । न तु उत्तरत स्थित एव । दक्षिणत आहवनीयाद्दक्षिणस्यां दिश्यासीन आहवनीय एव वपां श्रपयति । अत्राहापस्तं
बः । आहवनीयस्यान्तमंगारेषु वपां निगृह्णान्तरा यूपमाहवनीयं च दक्षिणातिक्रम्य प्रतिप्रस्थाता प्रगधरति तां दक्षिणत आसीनः प्रतिप्रस्था
ताहवनीये श्रपयतीति । कारके च । परमंगारे वपां निगृह्णान्तरा यूपा[illegible]ग्नी हृत्वाभिघार्य श्रपयतीति ॥

वपामेवांतराग्नीहृत्वाऽवस्तो वा स्थितेनापि दक्षिणप्रदेशे श्रपयितुं शक्यत इति तन्मा भूदिति परीत्येत्युक्तं। परीत्य परिक्रम्य गत्वा दक्षिणत इत्याह
वनीयस्य दक्षिणप्रदेशे वपां श्रपयतीत्यर्थः। अन्यपरीत्येत्यस्य वैयर्थ्यापत्तेः। दक्षिणत इत्यनेनैवार्थलाभात्सत्त्वात्। नामंतरेण रूपं चाग्नेर्
हरंतीति प्रकृत्य दक्षिणतः परीत्य प्रतिप्रस्थाता श्रपयतीति श्रुतत्वात्॥ ॥वपां श्रुत्स्रुवेणाभिघारयत्यग्नि राज्यस्येति॥ ॥प्रतिप्रस्था
ता वपा श्रपयन्नाहवनीयस्योपरि स्थितां वपां स्रुवेणोपहृत्याज्यमध्वर्युर्वपामभिजुहोति अग्निराज्यस्य वेतु स्वाहेति श्रुतत्वात्। श्रुतेन जु
होतीति होमस्य विधानान्मंत्रे स्वाहाकारान्नानाध्यात्रेदमग्नय इति होमोऽनुमेयः। तथा चापस्तंबः। स्रुवेण वपामभिजुहोतीति
॥ ॥स्तोकेभ्योऽनुब्रूयादिति॥ ॥ततोऽध्वर्युः प्राक् भृतेषु स्तोकेषु स्तोकेभ्योऽनुब्रूहीत्येवं मैत्रावरुणं प्रति ब्रूयादित्यर्थः। घृतस्य पतने। घृ
त श्चोतंतीति स्तोकाः बिंदवः। वपायां श्रप्यमाणायां तापवशाद्वपाया ये बिंदवः पतंति स्तोकास्तच्युतौ। तेभ्यः तदर्थं तं मनुब्रूहि [illegible]
सर्थः। अथातः स्तोकेभ्योऽनुब्रूहीति श्रुतेः। आपस्तंबः। प्राक् भृतेषु स्तोकेषु स्तोकेभ्योऽनुब्रूहीति प्रेष्यति अलोहिनीं शृतां कृत्वा सुपिष्ट
ला ओषधीरिति दक्षिणस्यां वेदिश्रोण्यां बर्हिषि पूर्वशाखायां या मा साध्य वपां श्रपणीं प्रगृह्य निधाय च तं व्रतिशाखा जुहूपभृतावादा
येति। काठके च। प्रस्तुतस्तोकेभ्योऽनुब्रूहीति स्वेनीं सुशृतां वेद्यां दर्भेषु दर्भेषु निधायेति॥ ॥शृतायां शृता प्रचरेत्याह प्रतिप्र
स्थाता॥ प्रतिप्रस्थाता यां वपायां प्रतिप्रस्थाता शृता प्रचरेत्याहाध्वर्युं प्रति यदा शृता भवेत्तदा ब्रूयात्प्रतिप्रस्थाता शृतां शृता प्रचरे
ति श्रुतत्वात्। शृतां वपां प्रचरेति स्वाहाकृतिभ्य इति विध्यर्थः॥ शृते प्रचरेति वपायां वदेत्। शृताः प्रचरेति बहुषु। ततोऽध्वर्युर्व
पांतरांसामभिघारं करोति॥ ॥स्वाहाकृतिभ्यः प्रेष्येति॥ ॥ततो वपां प्रतिप्रस्थातैवांतरा यूपाग्नी प्रस्ताहृत्योत्तरत आहवनीयस्य समीप आनी
य वपाश्रपणीस्थामेव निदधाति। ततोऽध्वर्युः प्राणदानं वपाश्रपणीस्थायाः प्रियेण धाम्नेत्यासादनं आलंभं च करोति। आ
पस्तंबेन तु आहवनीयस्य दक्षिणतः दक्षिणस्यां वेदिश्रोण्यां बर्हिषि पूर्वशाखायां वपाया आसादनमुक्तं। कठसूत्रे पोद्ग
त्रे दर्भेषु हुत्वा पुनरभ्याघारं स्रुगादापनमंत्रं पठति। ततोऽध्वर्युर्जुहूपभृतावादाय अतिक्रम्याश्राव्य स्वाहाकृतिभ्यः प्रेष्य
ति। प्रेषणं मैत्रावरुणस्य करोति। तत्र स्वाहाकृतिभ्यः प्रेष्येत्येवं। स्रुचावादायाध्वर्युरतिक्रम्याश्राव्याह स्वाहाकृतिभ्यः प्रेष्येति वषट्
कृते जुहोतीति श्रुतत्वात्॥ ॥हुत्वा वपामभिघारयति पृषदाज्यं॥ ॥उत्तमं प्रयाजं स्वाहाकृतिं हुत्वा प्रथमं वपामभिघारयति प्रयाजशे
षेणाज्येन। ततः पृषदाज्यस्थालीस्थं पृषदाज्यं ततः स्रुवकुस्थं। हुत्वा वपामेवाग्रेऽभिघारयत्यथ पृषदाज्यमिति श्रुतत्वात्। तत आ
यं क्रमः। पूर्वं वपां ततो ध्रुवां ततः आज्यस्थालीं ततः पृषदाज्यस्थालीं ततः पृषदाज्यस्योपभृतमिति। पशावाज्यभागयागापत्ते क्रमां
तरमाह॥ ॥ध्रुवां प्रथममाज्यभागौ चेत्॥ ॥आज्यभागौ चेत् पशौ क्रियेते तदा प्रथमं ध्रुवामभिघारयति। तत आज्यस्थालीं ततो
वपां ततः पृषदाज्यस्थालीं ततः पृषदाज्योपभृतमिति। एवं प्रदानक्रमेणाभिघारणं कर्तव्यं। चोदक यदर्थं।

यथाज्यभागावत्राज्ञायेतेइति। अतएव निरूढे आज्यभागयोर्विकल्पः॥ इदं वैतद्विर्यदुड समेप्रयाजे ध्रुवामेभिघारयति तस्येहि प्रथमा
ज्यभागौ होतव्यौ भवति वपां वा। अत्र प्रथमं होतव्ये भवती संत्रयागक्रमेणैवाभिघारणश्रवणात्॥ ॥आज्यभागौ कुर्वन्॥ ॥पशावाज्यभागौ कु
र्वन्नत्र वपायां करोति। प्रैष्यप्रैषौ। पञ्चपुरोडाशो यत्पशुप्रैषावेव भवतः। तौ च सर्वविच्छेप्र ज्ञिषिञ्जौ। तौ न पशौ करोति न सोमे इति शाखान्तरात्। सर्व
शाखायामपि। न भसौम्येध्वरे न पशौ रति श्रवणाच्च। तद्वर्यशावच्चेन्नु पुनः प्रतिप्रसूतौ। तद्दाकृ यजेदाज्यभागौ वा इति यजेदित्यादुरिति
श्रुतत्वात्। अत्राहापस्तम्बः। जुहूपभृतामसान्त्यसोषेणैव ध्रुवामभिघार्य पृषदाज्यमभिघारयति अथ यवपामे सद्वाविपरीतं नोपभृतमाज्यभागौ
यजति तौ नपशौ करोति न सोमइसेके इति। काठके च। स्वाहाकृतीरिष्ट्वा प्रसाकम्याभिघारयति ध्रुवां पृषदाज्यं वपां नोपभृतं तमाज्यभा
गाविष्टेति॥ ॥वपयाचरिष्यन्नुपस्तीर्य हिरण्यमवधाय वपामवधायाभिहे श्यामभ्यां धागस्य वपायै मेदसोऽनुब्रूहीति॥ ॥वपयाचरिष्यन् जुहूमु
पस्तीर्य ध्रुवायाः सकाशादुपस्तारं कृत्वा हिरण्यशकलमवधाय वपामवधाय वपायै मेदसोऽनुब्रूहीति। प्रयोगोपपद्दर्शनमेतत्। तेन सु
र्यपसे सुर्वायधागस्येति प्राजापत्यपशौ प्रजापतये धागस्येति प्रयोज्यं॥ ॥हिरण्यमनवधाय हिरण्यभिघारणं सोमे॥ वपावदानान्त
रं पुनरुपरि आज्यं हिरण्यमवधाय सोमे द्विरभिघारणं कर्तव्यं। निरूढे तु सकृदभिघारणमिति। अथान्यमुपस्तरणीतेथहिरण्यशकलमव
दध्यात् सथ वपामवधायाहाग्नीषोमाभ्यां धागस्य वपायै मेदसोऽनुब्रूहीति सथाहिरण्यशकलमवदधात सथोपरि आज्येनापरस्माभिघार
यतीस ग्नीषोमीयेसोमे द्विरभिघारणस्य श्रुतत्वात्। उपस्तरणीत आज्यं तस्य थिव्येरूपं करोति हिरण्यशकलमवदधाति तदग्ने रूपं कु
रोति वपामवदध्याति तदन्तरिक्षस्य रूपं करोति हिरण्यशकलमवदधाति तदस्मै रूपं करोति सर्वेभ्य एवैनं दभिघारयति तद्दिवो रू
पं करोति सा वा एषा पञ्चावत्ता वपा भवतीति निरूढप्रकरणे एवसकृदभिघारणस्य श्रुतत्वात्। अत्राहापस्तम्बः। जुहूमुपस्तीर्य हिरण्यश
कलमवदाय स्वाहा वपामवदाय हिरण्यशकलमुपरि कृत्वा द्विरभिघारयेत् एवं पञ्चावत्ता भवति चतुरवत्तिनोऽपि पञ्चावत्तैव स्या
दिति। काठके च। असिना वपां सकृदवदाय द्विरभिघारयेत्। अतो स्वंडैव वपा सकृदेवावदेया न द्विरिति। आश्वलायन ब्राह्मणे।
यद्यपि चातुरवत्ती यजमानः पञ्चावत्तैव वपा अस्योपस्तरणाति हिरण्यशकलो वपा हिरण्यशकलमाज्यस्योपरिष्टादभिघारय
तितकातु यदि हिरण्यं न विद्येत कथं स्यादिति तद्धिराज्यस्योपस्तीर्य वपामवदाय द्विरुपरिष्टादभिघारयेत् स मन्त्रं वा आज्यस्य सम्मतं हिरण्यं
तत्र सकामं उपानोय आज्येतत्र सकामं उपानोयो हिरण्ये तस्य च संपूर्व्यते इति॥ ॥आश्राव्याग्नीषोमाभ्यां धागस्य वपा मेदः प्रेष्येति।
॥ ॥ततिड ह्ठाप्याति कृत्वा आश्राव्याग्नीषोमाभ्यां धागस्य वपां मेदः प्रेष्येति मैत्रावरुणं प्रयाहि। तदपि प्रयोगदर्शनार्थमेव। पशौ सोयं प्रा
जापत्यायोरपि भावात्॥ ॥प्रस्थितमिति च प्रसूते॥ ॥प्रसूते सुत्यायां सवनीये पशौ वपां मेदः प्रस्थितं प्रेष्येति। प्रसूतन शब्देनात्र स
वनीयाङ्गत्वगत्ता ते तद्विकारेषु प्रस्थितशब्दो प्राप्तोपि सौत्रामण्यामुपसत्त्वादन्यत्र न भवति॥ ॥हुत्वा वपां श्रपणी प्रत्यस्यानु प्रास्य
ति प्राचीं विशाखां प्रतीचीमितरां स्वाहाकृते इति॥ ॥

वपां हुत्वा तरलस्विष्टकृत्स्वाहाकृतेऽर्ध्वं नभसमिति मंत्रेण वपाश्रपण्यावाहवनीये प्रास्यति अनुप्रहरति प्रक्षिपति। का प्रसया
दध्यर्धपृषि च॥ नवोः प्रक्षेपप्रकारमाह। विशाखामेकांगं प्राचीं प्राग्गां प्रक्षिपति। इतरां अविशाखामेकांगं प्रतीचीं प्रसग
गां प्रक्षिपति। उक्ता वपा। समीच्यौ वपाश्रपण्यौ स्वाहाकृतानुप्रास्यति स्वाहाकृतेहरति श्रुतत्वात्। समीच्यौ संगते परस्पर संलग्ने
स्वाहाकृतानुप्रास्यत्याहवनीये। ऊर्ध्वं नभस इति प्रतिप्रस्थाताहवनीये वपाश्रपण्यौ प्रहरति स्वाहाकृते ऊर्ध्वं नभसामेसापस्तवः॥ वपा
नेकले स्वाहाकृतावूर्ध्वं नभसं मारुतं गच्छतमिति विपरिणामः॥ ॥ चात्वाले मार्जयंते सपत्नीका इदमापः प्रवहतेति॥ ॥ ततः
सपत्नीकाः सयजमानाः सर्वे ऋत्विजश्चात्वाले मार्जयंते इदमापः प्रवहतेति मंत्रेण। अथ चात्वाले मार्जयंत इति श्रुतत्वात्। चा
त्वाल इति सप्तमी समीपे। चात्वालस्य समीपे मार्जयंते॥ मंत्रश्च॥ सौचात्वालंकारयोर्थोरस्ति स्वार्थे णिच्। अग्निः रात्मानं शोधयं
ति। अभ्युक्षतीत्यर्थः। मंत्रलिंगादेवाद्भिर्मार्जनं कर्तव्यमिति गम्यते। पत्न्यपि मंत्रेणैव मार्जनं करोति। क्वचित्समिदाधा
नादौ पत्नी च गार्हपत्ये दुग्धमिमिति यच्चेदर्शनात्। पूर्वं ब्रह्मादयः षडृत्विजस्ततो यजमानस्ततः पत्नीति। अनेकयजमानके
सर्वे यजमानाः सर्वाः पत्न्यः मार्जनं कुर्वंतीति॥ ८॥ ॥ विशास्ति पशुमन्यः॥ ॥ इदानीमिदं विचार्यते। पुरुषाणामियुक्ताः
तासु संज्ञपनमध्ये किमृत्विजामेव कश्चिदेकतरो विशसितारं लिंग्यो न्यः कश्चिदिति तत्र सूत्रकार एव पशुं परिगच्छति विशास्ति
पशुमन्य इति॥ शासु हिंसायां॥ ऋत्विग्भ्योऽन्यः कश्चित् शमिते सैव संज्ञः पशुं विशास्ति छिनत्ति मारयतीत्यर्थः। कृत एव तु
त। संज्ञाभेदात्। शमिते न कर्तव्यं आनयतीति। संज्ञाभेदाच्च संज्ञिनोऽपि भेदो भवति। यथा चैत्रादन्यो मैत्र इति। अतो ब्रह्मादि
भ्योऽन्य एव पशुं विशास्तीति प्राप्त आह॥ ॥ ऋत्विजां वैकोऽप्रकृतत्वाच्छामित्रे॥ ॥ वाशब्दः पक्षव्यावर्तको। ऋत्विजामेव यः कश्चि
देकः पशुं विशास्ति कुतः प्रकृतत्वात्। कुतः शामित्रे शमितुः कर्मणि मारणे। वेदे ऋत्विग्व्यतिरिक्तस्य शमितुरप्रकृतत्वात् अनुक्तत्वा
त्। ननु संज्ञाभेदादन्यो विशास्तीत्युक्तं। सत्यं। यौगिकात्संज्ञा भविष्यति। ऋत्विजामेव यः शमनं करिष्यति स एव शमिता भ
विष्यति। अतश्च ऋत्विग्व्यतिरिक्तस्य शमितुरनुक्तत्वात्कश्चिदृत्विगेव पशुं विशास्तीति सिद्धं॥ ॥ उपगादर्शनाच्च॥ ॥ होतृस्व
तिम उपगायाबोंरुभितिमम यजमानस्सत्रे ऋत्विजामेवोपगानदर्शनाच्चैवमवसीयते यदृत्विजामेवैकः पशुं विशास्तीति। यथा
ऋत्विग्व्यतिरिक्तानामुपगानं अप्रकृतत्वादृत्विज एवोपगातारः। एवं शमितापीत्यर्थः। ननु होतृस्वर्त्विज इत्यादिको
विधिरेव दर्शनाभिति चेत्। न होतृस्वर्त्विक्परमेतद्वाक्यं न विधिविधिपरं। अतो दर्शनमेवैतदिति। ऋत्विजामपि विधाने
वा कर्मभेदः प्रसज्यते। तस्मान्नाध्वर्युरुपगायतीत्यध्वर्योरुपगानप्रतिषेधादितरर्त्विजामुपगानं भवतीति गम्यते॥

ने चोदि मसेव सिद्धांतं मन्यंते। अपरे त्वेवमाहुः। अन्यस्याप्रकृतत्वात् स्विष्टकृदेव शमनयोगाच्छमिता भविष्यतीति।
तन्न। यतः श्रुतौ ऋत्विग्व्यतिरिक्तः शमिताप्रकल्पितो दृश्यते। शमितैनं कण्ठे बद्धोदंचनं नयति। तथा स्ततं हविः शमितारु
पेतीच। ननु तर्हि यौगिकी संज्ञा। तेन हिंसामेव कुर्वन् स्विष्टकृदेव शमनं कुर्वन् शमिता भविष्यतीति। तन्न सर्वेषु ऋत्विक्पुरुषस्वक
र्मणि व्यापृतेषु शमितृशब्दश्रवणात्। तेभ्यो श्रवणात् तेभ्योऽन्य एव शमितेति गम्यते। तथाहि॥ अथोल्मुकमादायाग्नी
त्पुरस्तात्प्रतिपद्यते शमितैनं कंठे बद्धोदंचनं नयति तं वपाश्रपणीभ्यां प्रतिप्रस्थातान्वारभते प्रतिप्रस्थातारमध्वर्युरध्वर्युं
यजमान इति। मैत्रावरुणो विंशत्प्रैषं होता याज्यां ब्रह्मा च दक्षिणत आसीनः कृताकृतप्रत्यवेक्षणे। एवं सर्वेषु ऋत्विक्षु
व्यापृतेषु शमितृशब्दश्रवणादवश्यं तेन ऋत्विग्भ्योऽन्येनैव भवितव्यं। प्रमादर्शनं वा प्रकृतविषयं। अत्र त्वयं हेतुर्नास्ति। अपि
च पशुश्रपणे ऋत्विक्कर्तृके सति समाख्यया तदध्वर्योः प्राप्नोति। तदा शमित्रं ध्वर्युं सर्वादेशदर्शनोपपद्यते। अनेनाध्वर्युर्भ
वति शमितरि तद्दर्शनो भवतीति। तस्मादन्यः शमितेति॥ अपरा व्याख्या। शमितेति संज्ञाभेदात् सकुमारणमसंदिग्धमर्थ
अन्य एव करोतीति। अतो विकर्तनं चिंत्यते। किं स्विष्टकृद्धिंसामेकः कुर्यादुतान्य एवेति। तत्र पूर्वपक्षमाह॥ विंशातिपशु
मन्यः। ऋत्विग्भ्योऽन्यः पशुविकर्तनं करोति। अतो मारणे शमितुरप्रवृत्तत्वाद्विकर्तनमपि स एव करोतीत्येवं प्रा
से सिद्धांतमाह॥ ऋत्विजो वै कोऽपि प्रकृतस्य द्वयामित्रे। वाप्यर्थः पश्चव्यावृत्तौ। शमित्रे विकर्तनकर्मणि ऋत्विजामे
वैकः कल्पनकर्ता स्यात्। नान्यः। अन्यस्याप्रकृतत्वात्। अनुक्तत्वात्। न ह्येवं कुत्राप्युक्तमस्ति यच्छमिता विकर्तनं करो
त्वीति। यत्रान्यस्य कर्तृत्वं नोच्यते तत्र ऋत्विजामेव कर्तृत्वं भवति। यथैकत्वनियमेऽपि तेषु संज्ञान्येषामप्रकृतत्वादृत्विज
एवैकत्वानि भवंति। प्रमादर्शनाच्चेति पूर्ववत् व्याख्येयं। अग्निश्रं व्याख्यानेदं दर्शिष्यते। यद्वै व्याः शमितरि
उत्पन्नमनुष्ठा आरभध्वमिति संशमिनध्वमिति प्रैषे विकर्तने शमिता संबोध्यते। एकधास्य त्वचमाच्छ्यतात्पुरा नाभ्या इति॥
॥ ॥ विक्रेयी हान्यः शूद्रसंयोगात्॥ ॥ विक्रयी सोमविक्रयी ऋत्विजामेव कश्चिद्भविष्यतीति शंकायां तु शब्दो नानि
राक्रियते। विक्रयी तु ऋत्विग्भ्योऽन्य एव भवति। न ह्येषां कश्चित् कृतः। शूद्रसंयोगात्। पश्चे शूद्रस्यापि सोमवि
केयिसेन संयोगात्। कौत्सात् शूद्रात् सोमं क्रीणातीति। शूद्र ऋत्विक् संदिग्धोऽन्य एव। तस्मादृत्विजोऽन्य एव॥
॥॥ संगाभ्यवधसभंजनम्॥ ॥ ततः पशुशरीरादध्वर्युरंगानि इदया दीन्यवद्यति। अवखंडने शरीराद्यथ
सोनीसर्थः॥

रोतीत्यर्थः। निकृन्तन्। अभंजन्। अंगानां हृदयादीनां भंजनं छेदनमकुर्वन् सकलान्येवावद्यतीत्यर्थः। गात्रं गात्रमस्यानूनं कृणुता
त्कृणुतादिति समाम्नानात्। आविशसे वा स्वनाङ्गानामवदाने प्राप्ते आह॥ ॥हृदयं जिह्वां क्रोडं सव्यसक्थि पूर्वनडकं पार्श्वे यकृद्वृक्कौ
गुदमध्यं दक्षिणा श्रोणिरिति जौहवानि॥ ॥एतानि हृदयादीनि जौहवान्यवद्यति। जौहवानीति जुह्वामवदाने योग्यानि प्रधान
यागसाधनानीत्यर्थः। हृदयमाम्रफलसदृशं। जिह्वा रसना। क्रोडं वक्षो भुजान्तरमित्यर्थः। सव्यस्य सक्थ्नः सव्यस्य बाहोः पू
र्वनडकं प्रथमनडकं अंसादधो वर्तमानं। पार्श्वे द्वे अपि पार्श्वे दक्षिणं सव्यं च एकैकं त्रयोदश त्रयोदश वंक्र्यास्यामवं। षड्विंशति
रस्य वंक्रयस्ता अनुष्ठेया अन्यच्चयता द्विसप्तियुप्रेषेडन्तलात्। वंक्रयो वक्राणि पार्श्वास्थीनि। यकृत् कालेयं। वृक्कौ कुक्षिगौ लकोम
हृदामलनुज्यौ। आम्रफलाकृती इति धूर्तस्वामिनः। गुदमध्यं येन शकृन्निर्गच्छति तं ध्रिरामन्त्रे व्याकृतास्य सोमध्यं यो भा
गो न स्थूलो न च कृशः। दक्षिणा श्रोणिः कटी दक्षिणापरस्ककुत्परिवर्तमानो मांसलः प्रदेशः [illegible]। श्रोणिर्दक्षिणा स्फिक्कटि
रिति धूर्तस्वामिनः। स्फिग्यं स्फिक् श्रौक ही प्रोक्तानि समरः। एतानि गुल्फामवद्यति। अथोपभृत्स उदेयान्याह॥ ॥दक्षिणं सक्थि पूर्व
नडकं गुदतृतीयाणि प्रसव्या श्रोणिरित्यौपभृतानि॥ ॥दक्षिणस्य सक्थ्नो दक्षिणस्य बाहोः पूर्वनडकं प्रथमनडकं मंसादधः
एवानुच्छिद्यते। गुदतृतीयाणि त्रुह्णं गुदस्यात्रस्य याणि ह्रोतिशायेनाणुरिति कृशः तृतीयो भागः। सव्या च श्रोणिः उत्तरापर सक्थ्युपरि
भवो मांसलप्रदेशः कटिशब्दवाच्यः। एतानि त्रीणि औपभृतानि। उपभृत्संबन्धीनि स्विष्टकृदवदानानीत्यर्थः। एतान्येव यथ्येजन्त्र
वद्यति पञ्चदेवतास्यर्थं सगच्छति॥ ॥वनिष्ठुमुपयष्टुः॥ ॥अतिशायेन महद्वनिष्ठु महन्मुदं तृतीय अतिस्थूलं तदुपयष्टुः उप
यष्ट्रो मार्थमवद्यति। स्थविमडुपयष्ट्यु शततवनः॥ ॥अवदानकालेषु भागः॥ ॥गुदतृतीयस्य प्रभागः प्रकर्षेण भागो वनिष्ठुमध्या
भिष्ठु भागेन विभजनं तदवदानकाले भवति जुहूमवदानकाले इत्यर्थः। नेदानीं। इदानीं तु समग्रमेवाविभजन् गुदमवद्यति। अवदा
नकालेष्वेव त्रिधा विभज्य यावदानुश्रवणात्॥ ॥वनिष्ठुमाग्नीध्रायावद्यति॥ ॥वनिष्ठुः स्थूलान्त्रं। आग्नीध्रः जघनप्रदेशभ
वः पुच्छकाण्ड इत्यर्थः। आग्नीध्रः पुच्छमिति हरिधूर्तस्वामिनः। आग्नीध्रं बालदण्डमित्यादि धवाचार्यः। आग्नीध्रेण समशकानपन
यतीति धूर्तस्वामिनः। आग्नीध्रं बाले चिरूच्यत इति ज्ञानदीपिकाकारः। शुष्कार्तो [illegible] मांसागाद्धि ख्यामित्रश्च आग्नी
नी॥ चाण्डालहस्तादादाय धर्माधर्मविचक्षणः। इत्येव आग्नीध्रं पुच्छमिति स्मृति पंक्तिकाकारेण व्याख्यातत्वात्॥
आग्नीध्रः पुच्छमित्यपि करणमालायां तृतीयेऽध्याये आग्नीध्रैक देशत्वादित्यधिकरणे। आग्नीकधीरति पितृभूति
हरिहरौ। तदयुक्तं। कृष्टसंधस्य श्रोणिपर्यायत्वात्। श्रोण्याश्च प्रागुक्तत्वादिति। अतः पुच्छकाण्डमेव आग्नीध्रशब्देनोच्यत इत्य
र्थः। साम्पत्नीभ्यां [illegible]। वनिष्ठु भागावदानं॥

॥क्लोमप्लीहाध्युष्णीपुरीततश्चैश्चैचन्॥ ॥क्लोमो गलनाडिका। प्लीहः पाह्वकइतिप्रसिद्धः। अध्युष्णीशतपुटः। कुक्षस्यडप
रिभवति। पुरीततमितिहृदयंप्रच्छादितंयेनतदुच्यते। हृदयंतत्पुरीततताप्रच्छादयतीतिश्रुतत्वात्। एतानिक्लोमादीनिपुरीततां
तानिभागावदानानीघस्मनबध्नाति। अतश्चात्रैषांभागावदानानांविकल्पइतिप्रागुक्तमेव॥ ॥उदरमेदोवसिष्ठंगुदंप्रास्यति
कृशश्चेत्॥ ॥पशुश्चेद्यदिकृशोदुर्बलःस्यात्तदाअवदानशिष्टंमेदोवपायाग्रहणेक्रियमाणेयन्नगृहीतंतद्गुदेप्रास्यति। आं
त्रमध्येप्रवेशयतीत्यर्थः। सहलेपपशुमालम्भेतयएनंमेधमुपनयेद्यदिकृशःस्याद्दुदर्यस्यमेदसःपरिशिष्टंतद्गु
देन्यवेदितिश्रुतत्वात्। यएनंपशुंमेधमुपनयेत्स्यायतसएवकृशसोऽध्वर्युःपशुमालभेतनान्योजडइत्यर्थः। यदि
सएवपशुःकृशःस्यात्तदोदुदर्शयस्यउदरेभवस्यमेदसःकिंचित्सरिशिष्टंवपायामवदीयमानायांतद्गुदेन्यषेत्॥
नौघागतौ। निपूर्वोनिक्षेपेवर्ततेत। निक्षेपंगमयेदित्यर्थः॥ ॥स्वधिष्ण्यमवधायतस्मिन्लौहितंरक्षसामिति॥ ॥चात्वालेगर्तेशामित्राद्
परस्यांदिशिउत्करादुत्तरस्यांवर्तमानेऊवध्यंपुरीषंतुषीमवदायरक्षसांभागइत्यनेनमंत्रेणतस्मिन्नुवध्येलोहितंपशोरूध्विरं
प्रास्यतिप्रक्षिपति। यथोपएवास्रक्पशोररक्षसांभागोसीतिश्रुतत्वात्। अत्रेदंरक्षोघ्नइतिसामोनुष्ठेयःउदकोपस्पर्शनंच॥ ॥शूले
हृदयंप्रतिधश्शामित्रेश्रपयति॥ ॥शूलेहृदयंप्रतिधायतथाशामित्रेग्नौश्रपयित्वाशामित्रेग्नौश्रपयति। तस्मादुपरिष्टाद्धौवशूला
कुर्यादितिश्रुतेः। तस्मात्उरसिप्राक्पुरणे। स्वधैवशूलेनाभिहन्तितोहृदयंशूलाकुर्वीत्शूलेश्रपयेदित्यर्थः। शूलोनामकइतिशूल
शलाकाप्रसयःप्राक्वाचिनिकूरतोभवति। सांनाय्यधिकारादुखायांश्रपणेप्राप्तेवचनात्शूलेश्रपणं। शूलंचवारणमर
लिमायं। सांनाय्योखास्थानापन्नाहाघ्रौरसीतिमंत्रेणतस्याप्रदानं। आधिश्रयणंतर्थलौसं। यजमानेनान्वक्षेशूलेहृदयपु
तर्जनमिति। पार्श्वतएवेतकाहेप्रत्यञ्चश्रपयेदितिश्रुतत्वात्। काष्ठप्रतिश्रपार्श्वतःपशूखायाःपार्श्वएवशामित्रेश्रपयेदित्यर्थः।
॥ ॥पशुंचोखायां॥ ॥पशुपश्चवदानानिहृदयव्यतिरिक्तानिसर्वाण्युखायांश्रपयेत्। अत्रापिपशोःसांनाय्यधर्मप्राप्त्यातच्छ्रपणा
र्थायाःउखायाःसांनाय्योखाधर्मप्राप्तिः। अतश्चघ्रौरसीत्यादानं। मातरिश्वनइतिमंत्रेणशामित्रेधिश्रपणं। अन्यत्रभावा
त्मुखायाप्रक्षेपइतिसमाख्यानाच्च॥ ॥पशुदेवतायैपुरोडाशएकादशकपालः॥ ॥अत्रपशुदेवतायैएकादशकपालःपु
रोडाशोभवतियद्देवसःपशुर्भवतितद्देवत्यंपुरोडाशमनुनिर्वपतीतिश्रुतत्वात्। यद्देवत्यःपशुस्तद्देवत्यएवपशुपुरोडाशोभ
वति। सचएकादशकपालोभवति। कुतः। अग्नीषोमीयपशुपुरोडाशस्यैकादशकपालत्वात्सप्तकतिहाच्चायमप्येकादश
कपालइतिप्राहआह॥ ॥अग्नीषोमीयोवाविरोधोपदेशात्॥ ॥वाशब्दःपक्षव्यावर्तनो। अयंनिरूढपशोःपशुपुरोडाशः

एकादशकपालो न भवति। अग्नीषोमीय एवैकादशकपालः। कुतः। विशेषोपदेशात्। येनाग्नीषोमीय एव विशेषेणैकादशकपालोप
दिश्यते। तस्य चैव पशावप्यग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपतीत्यभिषेचनीये। न च सर्वे पशुपुरोडाशाः अग्नीषोमीयप
शुपुरोडाशविकाराः। किं तर्हि। पौर्णमासाग्नेयाग्नीषोमीयादिपुरोडाशविकारा एव। तत्र चैकद्विशब्दपरिमाणे साधुत्तप्रकारेणैव
हि पुरोडाशकपालसंख्या। नैकादशकपाल इति। तत्र चैन्द्राग्नो द्वादशकपालः सौर्यप्राजापत्यो वाष्टकपालो विनिश्चितः। इदानीमभि
दनि चार्यते। प्रकृतौ चाह ननु हि विष्णू दाज्ञानयोरेव कालमुक्तं। समन्त्रे च हि विष्णू तमुद्वासयति तदेकोनं मदुपले समाहन्तीति।
हि विष्णुदाज्ञानं चावदानार्थं। अवदानं तच्चोवद्धर्मं तासु पुरोडाश एव भवति। तेन तदर्थं हि विष्णुदाज्ञानमप्यत्रैव भवति न पशौ।
त संनिधिरिति तदाहननमपि किमत्र न भवति उत्पात्रप्रोक्षणात एवेति संदेहे सूत्रकार एवापनयति।। ।।अत्रैव तावद्विष्णुदाज्ञानमित्यै
केनात।। ।।अत्र पशुपुरोडाशे केवलं हि विष्णुदाज्ञानमेव भवति नाहननं। तच्चापाकप्रोक्षणानंतरमेव भवति। कुतः। ऐन्द्रयेकलात्। आ
हननस्य हि पश्विज्यया सहैकवाक्यत्वं न पुरोडाशेज्यया। हि विष्णुदाज्ञानस्य च पुरोडाशेज्ययैकवाक्यत्वं न पश्विज्यया। अतोत्र
केवलं हि विष्णुदाज्ञानमेव कर्तव्यं नाहननमिति।। ।।अवद्य [illegible] नाहि इन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहीति।। ।।अत्र प्रणीताप्रणयनं परि
स्तरणं च तस्य पशोः कृतत्वात्।। उपयुक्त पूर्वादि पात्रासादनं [illegible] प्रोक्षणकंडनपेषणउपपाण्यंगुलिप्रक्षालनं। निनय
न [illegible] तावदानपात्रीसंमार्गानंतरमुद्वासनप्राणदानाद्यालेपनान्तं कृत्वा होता मैत्रावरुणो हि तीतावामंत्र्य स्रुचावादा
यजुह्वामुपस्तीर्य पुरोडाशस्यावदानखंडने कुर्वन् मैत्रावरुणं प्रतीमं प्रैषमाह। इन्द्राग्निभ्यां पुरोडाशस्यानुब्रूही
ति। अत्र च नासनानुवाचनं इत्यो आरणं च। इन्द्राग्निभ्यामिसेन तु प्रयोगशिक्षार्थं न परिसंख्यार्थं। तेन सर्वावप
रोडाशस्य प्राजापत्ये पुरोडाशे सपि तथा भवति।। ।।उपभृति चावद्यति स्विष्टकृद्भ्यः।। ।।अत्र जुह्वामुपभृति चोपस्तीर्य
जुह्वां मध्यात्पूर्वार्धाच्चावदायाभिघारणविधाने प्रसाभिघार्यत उपभृति स्विष्टकृदवद्यति। उत्तरार्धात् सकृदवदानं द्विरभि
घारणं। प्रसाभिघारा भावद्यतिचतेरर्थः। चकारः प्रधानावदानानंतरमेव प्रागवदाना आ स्विष्टकृद्भ्य एव सताः स्विष्टकृद्भ्य इ
ति।। ।।इन्द्राग्निभ्यां पशुपुरोडाशमिति प्रैष्यति।। ।।एवं जुह्वापौ स्रुचावोरवदाय ध्यायानि क्रम्या आज्ये इन्द्राग्निभ्यां पुरोडाशं प्रैष्येति
वं मैत्रावरुणं प्रैष्यति। इदमपि प्रयोगशिक्षार्थमेव। तेन पशौ सर्वाय पुरोडाशं प्रजापतये पुरोडाशमिति प्रैषणाति।। ।।उत्तरा समा
नीयाग्नये प्रदाय।। ।।एतामवद्यतीति तेन सम्यगनेन संबध्यते। प्रधानावदाने जुहूस्थोत्तरादुपभृति यदवत्तं तत्जुह्वां समानीय
निर्गुणाग्नये प्रदानमुच्यते रसाशंक्याह।। ।।सगुणस्थाने गुणः सर्वविकारकलोन।। ।।होत्रे सोविष्टकृते प्रदाने आग्नेयो वाज्या
नुवाक्ये निर्गुणे समामनंति। स्विष्टकृतः प्रैषोपि प्रैषाध्याये निर्गुण एवाग्निदेवस्य पठ्यते। अतश्चायं सगुणस्विष्टकृतः स्या

न

नैयोऽगुणो निर्गुणः स्विष्टकृदुक्तः सगुणएव। यतो हौत्रवेदे याज्यापुरोनुवाक्याप्रैषेषु यः स्विष्टकृतो विकारः निर्गुणतानुरू
पः ससर्वविकारः सर्वेषामपि विकारएवाध्वर्युणामपि तथैव भवति। कुतएतत्। एकत्वात्। एकएवायं यतः स्विष्टकृद्यागः अग्वै
देयविकृतः एकत्वात्स्यसमामदेवताकेन भवितव्यं। इतरथा कश्चित्सगुणः कश्चिन्निर्गुणः इत्ययुक्तमिव स्यात्। तस्मात्सगुणस्थाने
अगुण इति साध्वेवोक्तं॥ ॥यथाम्नातं वा वाचि भेदात्॥ ॥अथवा यथाम्नातं स्विष्टकृद्यागः स्यात्। सर्वेषां विकारः। यस्य यथाम्नातं त
स्य तथा भवति न तो न्टशाशोनचोदकप्राप्तस्य स्विष्टकृद्गुणस्य लोप इति। कुतः। वाचि भेदात्। वचनभेदादित्यर्थः। अन्यद्धि प्रैषानु
वाक्यवचनं। अन्यद्याज्यानुवाक्याप्रैषाणां। तत्रैव चैगुणनिषेधो नानुवचनादौ। तस्माद्याज्यादावेव निर्गुणो नानुवचनादाविति। क
र्कस्यायमेव सिद्धांतः। अपरे त्वाहुः। अत्र शास्त्रांतरे श्रूयते। अग्निं यजतीति। तेन याग एव निर्गुणो ग्निर्विहितः। अतो यागे निर्गुणो
ग्निर्विहितः ससर्वविकारो भवति। सर्वेषां होतृणामध्वर्युणां च विकारो भवति। कुतः। एकत्वात्। यतो नुवाचनप्रैषयाज्यादिष्वेक
एवायमग्निः। न भिन्नः। एकस्य च कश्चित्सगुणः। कश्चिदगुण इति न विरुद्धरूपतामर्हति। कस्मात्सर्वत्र निर्गुण एवेति सिद्धांतः। जैमि
निनापि दमे निर्गुणसिद्धांतितोस्ति। यथाम्नातं वेय यंछपुर्वपक्षः॥ ॥इडासमवद्यति॥ ॥इडाग्रहणं प्राशित्रादीनामप्युपलक्षणार्थं॥
प्रकृतितः प्राप्तस्य लोपवचनाभावात्। तत एव निर्गुणं स्विष्टकृद्यागानंतरं स्वचोदितधाय संचराभ्युक्षणवर्जं प्राशित्रावदाना
दिभागपरिहारं तं यथाश्रुतं [illegible] कर्तव्यं। पवित्रप्रतिपत्तिवर्जं। स्यात्तु पश्चिडाभार्जनोत्तरकालं कर्तव्या। अथेदं चिंत्यते। पुरुप
रोडाशस्य चोदनासारूप्याद्दर्शपौर्णमासिका धर्माः प्राप्ताः। तत्राज्जरणादिनमः कृतायेसंताः सर्वे धर्माः किंपृथग्भ
वंति। उत नेति। तत्र सूत्रकार एव पक्षं स्वीकरोति॥ ॥अक्रियान्यस्य समानार्थत्वात्॥ ॥अत्र पशुपुरोडाशे प्रागुक्तोस्ति धानस्वि
ष्टकृद्यागादन्यस्यावदानादुपकारकस्याग्न्याधानादेरङ्गजातस्य क्रिया भवति। कुतः। समानार्थत्वात्। सहशार्थसाधक
त्वादित्यर्थः। यादृशमेवोपकारं पशौ पयादीनि कुर्वंति पशावनुष्ठितान्येव तादृशमेव पशुपुरोडाशोपीति। अतः पश्वर्थमेवा
नुष्ठितान्यंगप्रणीतादिकुक्षुगाहननसमं [illegible] हारा [illegible] घार प्रयाजोऽन्भागानुयाजादीनामारादुपकारकाणामंगलमाण वि
शेषत्वात् पशुपुरोडाशो व्युपकार प्रसंगादिति। सन्निपत्योपकारकाणि तु पात्रासादनग्रहणकंडनपेषणश्रपणादीनि पृथगेव
भवंति। अन्यथा स्वरूपासिद्धेः। अत एवोक्तं शास्त्रायमेन। पश्वर्थानि विभवार्थं साधयंतीति। अथवा समानार्थत्वादित्येतदेवं व्या
ख्येयं। सदेवामयाधानादीन्यंगानि पशुप्रयुक्तानि। स एव पशुपुरोडाशस्याग्न्याधानादिभिरर्थसिद्धेर्नैवार्थे तानि पशुना प्रयु
क्तानि। तस्मात्तान्येव प्रसंगादत्रोपयुज्यंते। यत्र प्रयुक्तपशुना तत्पुरोडाशः स्वसंनिधावुपयोजयति। यथा सवविचे प्रणीताप्रण
यनाज्यभागादि। यथात्रैव ब्राह्मणतर्पणकर्मापवर्गादि। यद्येवं स्विष्टकृदिडयाऽप्यक्रियाप्राप्नोति॥ ॥

॥ ॥न चोदनाभेदात्॥ ॥ न स्विष्टकृदिडयाः अक्रिया। कुतः चोदनाभेदात्। इष्टकापशौ संवत्सरसंपन्नस्थाने वा केचिद्भिन्ने स्विष्टकृच्चो
दने दर्शयति। धाय्याधारी धौ स्विष्टकृतौ इति। तथा दक्षिणायनक्रमचिच्छिपरे वा केचित् पृथक् पुरोडाशस्येडं दर्शयति। इत्थमेव कु
र्वीत पुरोडाशस्येडा यामेनो पप्लुतायां दक्षिणा नयेदिति। दर्शनमात्रमेतत्। प्राप्तिस्तु तरसूत्रेण॥ ॥गुणभेदाच्च॥ ॥ आसी
नस्था चोयेनास्विष्टकृदिडाभेदेन क्रियते। कुतः। कालभेदाद्गुणभेदाच्च। अन्यः कालः पाशुकेः स्विष्टकृतः। अन्यः कालः
पशुपुरोडाशस्य। अन्यका लापाशुकीडा। अन्यकालाच पशुपुरोडाशस्य। तस्यां धुतः। यम्देदइति। तथा गुणेयाजानु
वाक्ये पशुस्विष्टकृतो निर्गुणे च पशुपुरोडाशस्य स्विष्टकृत इति। अपरा व्याख्या॥ न चोदनाभेदात्। यदुक्तमक्रिया स्यैति
चेन्न। कुतः। चोदनाभेदात्। विधिभेदात्। भिन्ने खेते चोदने। एकापशुचोदना। अग्नीषोमीयमजमालभेतेति। अप
रापशुपुरोडाशचोदना। तद्दिवसपुरोडाशमनुनिर्वपतीति। यत्र पुनरेकेन विधिना विधीयते तोपादाय बहूनां फले विध्यानं॥
यथा मित्रविंदपूर्वो आयुःकामो यजेतेति। तत्रोत्पादयसेन विधानात्सान्निध्यावाम्युगपदंगोपकारापेक्षा। तेनाम
लमाणविशेषहासंन्निध्यानाविशेषात्तंत्रेणांगोपकारसंबंधः। इह पुनश्चोदनाभेदाभेदे तत्र न भवति॥ ॥किंच। कालगु
णभेदात् च। अन्यस्मिन्काले पशोः प्रयाजाः कृताः अन्यकालस्य पुरोडाशस्य कथमुपकारं कुर्युः। अथवा कालभेदात्। अन्य
कालः पशुः अन्यकालः पशुपुरोडाश इति। तथा गुणभेदात्। एकादशसंख्यागुणकाः प्रैष्यप्रैषाश्च पशोः प्रयाजाः। पंचसं
ख्यागुणकाश्च यजप्रैषाश्च पुरोडाशस्य। तथा एकादशसंख्यागुणकाः प्रैष्यप्रैषाश्च पशोः प्रयाजाः। पंचसंख्यागुणका
यजप्रैषाश्च पुरोडाशस्य। तथा एकादशसंख्यागुणकाः पशोः यद्वा व्यकाः प्रैष्यप्रैषाश्च पशोरनुयाजाः। आ यद्वा व्यका
यजप्रैषास्त्रयः पशुपुरोडाशस्य। अतश्चोदनाभेदात्कालभेदाद्गुणभेदाच्च तंत्रेणांगोपकारो न संभवतीति पूर्वपक्ष एवा
चार्येण प्रत्याहृतः सिद्धांतस्त्वेकियाच्यस्य समानार्थत्वादि स्वयमेव। यदुक्तं चोदनाभेदात्कालभेदाच्च तंत्रेणोपकार
संबंधो न भवतीति। अत्र ब्रूमः। माभूत्तंत्रेणोपकारसंबंधः प्रसंगन्यायेन भविष्यति। तथाहि। अंगोपकारसाम्याने
सामर्थ्यादंसपदार्थसमनंतरं प्रधानेन संबंध इष्यते। अन्यथांगप्रधानयोः संगतिरेव न स्यात्। यदांगानि प्रया
गानुयाजादीनि क्रियते। नतदा प्रधानानि प्रधानकाले चांगानीति। यद्येवं नांगीक्रियते तर्हि प्रधानयागेषु कृते
ष्वपुतदुत्तरकालीनानामनुयाजाद्यंगानां केन सह संबंधः स्यात्। तस्मात् प्राच्योदीच्यादिन्यस सर्वांगोपकारार्थं

सर्णत्वएवसंबंगी कर्तव्यः। एवं च सति यद्यप्यत्र चोदनाभेदस्तथापि प्रयाजाज्यादियजतितं अपूर्वं अगम्यमानविशेषं विध्य
मानतास्ति पशुपुरोडाशस्याप्युपकारं करोत्येव। यथा व्रतार्थं मुख्याविलेत दीक्षान्यायोपि शिष्यादीनां पुस्तकादि विलोकनार्थे भ
वति। अतश्चोदनाभेदो न कारणं। तथा कालभेदो गुणभेदश्च। तस्मात्साधूक्तं क्रियायाश्च समानार्थत्वादिति। अन्ये त्वेवं व्याचक्षते।
अक्रियायाश्चस्य समानार्थत्वात्। सन्निपत्योपकारांगयुक्पशुपुरोडाशयागादन्यस्य दर्शार्थस्यांगस्यात्र पशुपुरोडाशे अक्रिया।
अक्रिया अननुष्ठानं कुतः। समानार्थत्वात्। पशौ हि क्रियमाणानामाज्यभागाद्यंगानां साधारणत्वात्। साधारणानि हि उभयोरेतान्यं
गानि उभयार्थानि न पुरोडाशस्य प्रासंगिकानि। समानतंत्रीयं पशुपुरोडाशो न प्रासंगिकस्तदर्थः। अतः प्रासंगिके सामावा
दत्रेडांतमेव कर्तव्यं। नसमनीयशेषसमाप्तिः। अतएवाहापस्तंबः। इडांतः संतिष्ठत इति। तेन स्विष्टकृल्लेपहोम[illegible]राशस्य भागप्राश
णतर्पणप्रैषप्रभृति णतर्पणकर्मापवर्गः प्राकृततन्त्रक्रमेणैव भवति। अंगानां समानसंबंधत्वात्। न सवनीयाभ्यामिवेदानीमे
व समाप्तिरिति। ये भिन्नेस्तु प्रासंगिक एव पशुपुरोडाशः। तन्मते पशुपुरोडाशसंबंधि स्विष्टकृल्लेपहोमादि कर्मापवर्गांतमि
गांतेऽत्र न कर्तव्यं। पश्वंगैरसंबंधात्। अत्राहापस्तंबः। पशुपुरोडाशस्य पात्रसंसादनादि कर्म प्रतिपद्यते यथार्थं पात्रयो
गो निर्वपणकाले व्रीहिमयं पुरोडाशं निर्वपत्येकादशकपालं द्वादशकपालं वा यद्देवत्यः पशुस्तद्देवतो भवति [illegible]षु
तावापं विसस्य पशुशिरस्तो हृदयं जिह्वां वक्षो यकृद्वृक्कौ सव्यं दोरुभे पार्श्वे दक्षिणा श्रोणिर्गुदतृतीयमिति दैवतानि द
क्षिणं दोः सव्या श्रोणिर्गुदतृतीयमिति सौविष्टकृतानि क्लोमानं पुरीततं वनिष्ठुमध्युध्नीं मेदो जघनीमित्युद्धरति गुदं मा नि
र्लोषी[illegible]र्वनिष्ठुं मा निर्लोषीरिति संप्रेष्यति मा विपर्यास्तरसथौ भवतः इदमप्युपविते जुह्वां उपभृत्यवधाय शूलं प्रक्षीरस्य हृदयं शामित्रे
श्रपयति। अवदाने नादि कर्म प्रतिपद्यते। न पर्यग्नि पर्यग्निपुरोडाशेन प्रचरति एतेवा पशुना विन्द्रा
ग्निभ्यां पुरोडाशस्य प्रब्रूहीति संप्रैषार्थं इन्द्राग्निभ्यां पुरोडाशस्यावक्षीयमानस्यानुब्रूहीन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहीन्द्रा
ग्नि प्रब्रूहीति नाग्नये[illegible]नुब्रूह्यग्नये प्रेष्येति स्विष्टकृतः संप्रैषोत्र प्राशित्रमवदायेडांतं नयसमानभागं[illegible] पुरोडाशस्यावक्षीयमा
प्रभृतीडांतः संतिष्ठते ऊर्ध्वं मैत्रावरुणः षष्ठो भक्षयति सा पुर्वं वसतरे मार्जयित्वा स्रुवेण पृषदाज्यस्योपहृतस्य वेदेनोपयमं विराहुती
यत्रिः प्रधाति एतं हविः शमितारिति एताम्मितीतरः प्रसाहाऽर्जा द्वितीयं प्राप्यत्र तीयमिति। काठके चास्पष्टा स्यामव
दानात्प्रयति शूले हृदयमसमिन्द्रे वृक्कौ अग्निं प्रैडितेगुदवनिष्ठुगर्ते स्वाहान्तास्मिन्नुवध्यं कुर्याल्लशुपुरोडाशायपात्रं शेषं
पशुनाक्ति। यद्देवत्यः पशुस्तद्देवत्यं व्रीहिमयमेकादशकपालं वा प्रणयनादिषु ल्लेपमासेच्यो बुद्ध्वर्षि राहोम्यां निनयति

ष्टे तेप-श्वौ सौ परो डाशेन प्रचरति यद्दि बहवः पशवः प-शुपुरोडाशा पास्य जुहूपभृता उपस्तीर्य जुह्वामवदाय अभिघार्योप
भृत्सवदाय न अभिघार्यात्तमस्याभिघारणमनुसो स्विष्टकृतमभिघार्य [illegible] रयेध त्र्यवच सकृदुपभृतं देवमेव कुर्यादिं द्रा
ग्नी पुरोडाशस्यानुब्रूहीत्याश्राव्याह इन्द्राग्निभ्यां पुरोडाशस्य प्रेष्येति इष्टे स्विष्टकृतोपचरणं यत्पुरोडाशस्येति सं
प्रैषः पुरोडाशयोः पुरोडाशानामिति चेन्द्रामुपहृयपषदाज्यस्य स्रुवेण वेदोपयामेना दाया हृष्टं तं हविः शामिता इ
ति स्वस्ति मितिरूपमितात्प्रसाहै वं मध्य एवं गविति। अतः पशुपुरोडाशोपात्रासादनादि भागपरिहारांतं स त्रिपस्रोपकारकं
सर्वं पृथक्कर्तव्यं। आरादुपकारकं तु प्रयाजादि पाशुकमेवात्र प्रसंगादुपकरोति ● सिद्धमेव भवतीति सिद्धं॥ पशु
दक्षिणा धेनुर्वरो वा वरो वा॥ ॥ मार्जति॥ ॥ सत्रिभ्या नाम पशुपुरोडाशे डा मार्जनांते गवादि जातीयः पशुर्दक्षि
णा। अथवा धेनुर्दक्षिणा। अथवा वर इति। वर शब्देन हि गभिलषितं हिरण्यवस्त्रगवादिकं यतः यजमानेन दातुं शा
क्यते तदभिधीयते। मार्जितइति ग्रहणा च भागपरिहारेषि पशु इडा मार्जप्रवित्रप्रतिपत्त्यनंतरमेव प्राकृतक्रमेण
कर्तव्यमित्युक्तं। अपरेतु इह एव करुयामि पुरोडाशे डायामेवोपहूतायां दक्षिणानयेदिति वचनादिग्नभ्यश्चाभुर्वमेवद
क्षिणादानमिच्छंति। तेषां मार्जितइत्युत्तरसुत्रेसंबध्यते। मार्जिते शामितार एरपस्तीति। एतद्व्याख्यानं युक्तमि
वाभातिपरंतु मार्जितइत्यस्युत्तरसुत्रे संबध्यमानो व्यर्थ एव भवति। मार्जनानंतरं शामितुः स्मासनस्य श्रुति विरुद्ध
त्वात्पशुपुरोडाशेन प्रचर्याथ पशुं विशास्तीत्युक्तं। अतो मार्जनानंतरं पुर्वं पशुविशसनादि अयमर्थं। ततः शा
मित्रनुशासनमिति। तस्मात्पुर्व सुत्रेणैवोपपन्नो मार्जितइत्यस्य संबंधः। अथ वार्येणपश्चादिश्रयणानंतरं पशुपुरोडा
शोऽपदिष्टः। सतु वपामार्जनानंतरमेव कर्तव्यः। श्रातपथे तथा श्रुतत्वात्। यद्देवसः पशुर्भवति तद्देवसंपशुपुरोडास
मनु निर्वपतीति प्रक्रम्याथ यद्वपया प्रचर्य तेन पुरोडाशेन परतो पुक्त्वा अथ पशुं विशास्तीत्युक्तं। तथा अभिषे[illegible]
येडाशं निर्वपतीति श्रूयते। अतो वपामार्जनांतरं वपात्रासादनादि मार्जनांतः कर्मापवर्गो तो वा पशुपुरोडाशः
कर्तव्यः। ततः पशुविशसनादि इडाख्यायां जघ्नायां वदानप्रक्षेपणांतं। ततः शामितारं संसतीति। अथ पशुं विशास्तीत्य

ति

८ हे शामितरस्त्वं पशुं त्रिः प्रच्यावयतात् प्रच्यावय। त्रिः पशुमुत्कालयेत्यर्थः ॥८

नंतरं स्वामिनः। हृदयादिभ्यो वदानश्रुतेः पशोर्विशासनमर्थप्राप्तमेव क्रमार्थमुच्यते। पशुपुरोडाशीः प्रचारो सरका
लं कथं नाम विशसनं स्यादिति। विशास्तीति शासुः अनुशिष्टौ इत्येष धातुर्विपूर्वो विशसने वर्तते। कः पुनः पशुं विशा
स्ति। शमिता। कुत एतत्। विशास्ति तु त्रिः प्रच्यावयतादित्यादिना वक्ष्यमाणत्वात्। नस्य चयतो पशोर्धाम्नेंऽहविः शमि=
तार इति स्वशामित्रे वदर्शनात्। काण्वानां च यैनं पशुं विशास्तीति तमाह त्रिः प्रच्यावयतादिति। माध्यंदिनानामपि विशास
नानंतरं त्रिः प्रच्यावयतादिति मंत्रः पठितः सलिंगात्कर्णश्रुतेश्च शामित्रनुशासनं भवति नियोग्य इति। तस्माच्छमितुरपि
पशुविशासनं श्रुतिमूलं॥ आचारोपि तथैवास्तीति सा च्वीय एवेदं मतं॥ ॥ ॥ शमितारं एं शास्ति त्रिः प्रच्यावयतात् त्रिः प्र
च्युतस्य हृदयमुत्तमं कुरुतात् [illegible] एंहविः शमितार इति श्रुतमिसेवनु [illegible] ता नस्तं भगवो न्न स्तन् ऐहीति॥
॥ ॥ अवदानान्युत्खाय प्रक्षिप्यानंतरमेव शामितारं शास्ति शिक्षयति त्रिः प्रच्यावयतादित्यादिना॥ अयमर्थः। त्रिः प्रच्यु
तस्य कृष्णमावत्तस्य हृदयमुपरि स्थापयेति। यच्चदात्तां [illegible] क। हृत् [illegible] कथं स्तं [illegible] विः शमितार इत्येवं। तदा
सं स्तमिसेव वृत्तात् बुद्धि। न पुनरेवं ब्रूयात्। कथं। स्तं भगव इति तथा एवमपि ब्रूयात्। कथं स्तं हीति। एतदुक्तं भवति।
स्तमिसेतावदेव प्रैति वक्तव्यं। भगवच्छब्दो वाक्यशब्दो वान परंतु धारणीय इति। अनेकपशुके त्रिः प्रच्युतयोः हृद
येऽउत्तमे कुरुतादिति पशुद्वये। त्रिः प्रच्युतानां हृदयान्युत्तमानि कुरुतादिति बहुषु च विपरिणामः। केचित्प्रच्युतस्य हविः
परत्वं मन्यामानाः अनूहमिच्छंति। तदयुक्तं। अस्य पशुपरत्वायः शुसैवप्रतिलक्षात्। यत्त्रिः प्रच्युते पशाविति। तेनास्यापि पश्व
नेकत्वे यथार्थमूहो भवत्येव। अत्रेदं अनुशासने। त्रिः प्रच्यावयतादित्येकं। यद्वाधिष्ठादिति द्वितीयं। अतस्तृतीयसवने शामित्रनु
शासनं प्रत्यासनं [illegible] स्येत्यत्र द्वितीयशामित्रनुशासनप्रसक्तौ ज्ञातव्यं॥ पूर्वानुशासनस्य कार्यस्य प्राप्तः सवन एव क्रिय
माणत्वात्तत्रैव कर्तव्यं॥ ॥ त्रिः प्रच्युते हृदयं प्रत्यङ्होत्तमं करोति॥ ॥ एवमनुशिष्टः शमिता पशुं त्रिः प्रच्यावयेभिति त्रि
रुत्कालयति। ततस्त्रिः प्रच्युते पशौ हृदयं प्रत्यन्धपुरोऽन्निः [illegible] अवदानानामुत्तमं करोति उपरि स्थापयतीत्यर्थः। त्रिः
प्रच्युते पशौ हृदयं प्रत्यङ्होत्तमं प्रसर्वं दद्यातीति श्रुतेः॥ ॥ शूलं चाभुमौ॥ ॥ हृदयानि [illegible] सनानंतरं शूलं चापांभूमौ कुर्या
त्। अथ हृदयशूलं प्रयच्छतीति [illegible] परास्य [illegible] प्रसूरिति। श्रुतत्वात्। शामिता हृदयशूलमध्वर्यवे प्रयच्छतिस

स्य
ग

अध्वर्युस्तद्धृदयशूलं नप्त्रिभ्यां नाप्सु निक्षिपेत्। शूलानन्तरकालं यावत्कश्चिदुपदा धारयेदित्यर्थः॥ ॥जुह्वाप्
शादाज्यस्यावदानोपनिष्क्रम्य पृच्छति शृतं हविः शमितारिति त्रिरभिक्रामं॥ ॥जुह्वापृषदाज्यस्थालीस्थस्य पृषदाज्यस्यै
कदेशमादाय चात्वालोत्करावन्तरेणोपनिःसृत्य शमितुः समीपं गत्वा अभिक्राममतिक्रम्य [illegible] शृतं हविः शमितार्
इत्येवं त्रिः शमितारं पृच्छति। एकवारं अभिक्रम्य शमितुः संमुखं क्रमणं कृत्वा शृतं हविरिति शमितारं पृच्छति॥ ॥
॥ ॥शृतं तद्देवानामित्याहोपांशु॥ ॥शृतमित्येवं शमित्रा प्रोक्ते तद्देवानामित्येवमध्वर्युरुपांशु ब्रूयात्। ततः पुनरभिक्रम्य द्वि
तीयवारं पृच्छति। पुनः शृतमिति शमित्रा प्रोक्ते तद्देवानामित्युक्त्वा पुनरप्यभिक्रम्य तृतीयवारं पृच्छति। पुनरपि शृ
तमिति शमित्रा प्रोक्ते तद्देवानामित्याह। अथ जुह्वाप् पृषदाज्यस्योपहत्याध्वर्युरिति। तथा त्रिः कृते पृच्छति त्रिः

मनर ति

त्रिर्वक्ष्यतीहेति च श्रुतत्वात्॥ ॥सं ते हृदयमभिघार्य सर्वं॥ ॥प्रश्नप्रतिवचनानंतरमध्वर्युः पशुखासमीपे उपवि
श्य सं ते मनसेति मंत्रेण जुहूस्थेन पृषदाज्येन हृदयं पूर्वमभिघार्य तूष्णीं सर्वं पशुमभिघारयति। पृषदाज्येनैवेति
केचित्। आज्येनेत्यपरे। तथा चापस्तंबः। शूलात्प्रवृह्य हृदयं कुंभ्यामवधाय सं ते मनसा मनस्तनेरति पृषदाज्येन हृदयमभि
घारयस्तूत्तरतः परिक्रम्याज्येन पशुमिति। काठके च। प्रतप्य शूले हृदयमभिघारयति पशुं चेति। स हृदयं [illegible] मेवा
ग्रेभिघारयतीति संते मनसेति च श्रुतत्वात्। ततः उत्तरतः उरवाया उपासनं। उपासयति पशुमित्युक्तत्वात्। ततो वदाना
शुरवाया उद्धृत्य सकृत्सिद्धि पुलेनं शापा त्र्यादिके पात्रे उद्धृत्य संस्थाप्यनिनिधाय हृदयादीनामेकादशानां प्रत्येकं प्राणदा
नं कुर्यात्। तस्यो विष्टुकानां दीनां तूष्णीं च वसायाः। अत्र च हृदयादीन्येव हविरिति। पशुस्तु गौणिकमेवम्प्रकृतिद्रव्यं। अतो
हृदयादीनां प्रत्येकं यागसाधनत्वात् विप्रमर्शः प्राणदानासादनानि भाभाः भवन्ति। मध्यासु वर्ष्ठादिवदानं च भवतीति हरि
स्वामिनः॥ ॥पश्चसीवपावद्धूलाद्दक्षिणतः प्रतिप्रस्थाता वेद्यां प्लक्षशाखास्ववधाति॥ ॥पश्चसीवपानद्धूत्वा। पशुश्र
पेन हृदयादीन्यवदानान्युद्धृत्य। आसित्वदवदानार्थः। तदुभयं वपा वदिसंतरा जुह्वा पाणी हृत्वा वेद्यं दक्षिणतो वेदेर्द
क्षिणभागे दक्षिणश्रोणिदेशे बर्हिष्यासादयत्यध्वर्युः प्रतिप्रस्थातातु प्लक्षशाखासु हृदयादीन्यवदधाति अवरखंडय
ति। असिनाधिनिवीसार्थः। उत्तरतः आसादने प्राप्ते दक्षिणतः इतिवचनात्ध्यामासादनं। अवदानमात्रे प्रतिप्रस्थातुः प्रे
षणादालभनीतमध्वर्योरिव। जौहवानां बर्हिषि प्रत्येके मंत्रवदासादने मुदन्तसंस्था। आलंभनेन च। आपन्त्याश्च॥

ञ्वदीयमानस्या० शस्त्रांतरात्। उपभृतानामपि द्विर्द्विरवदानं भवति॥ गुदं त्रेधा कृत्वा वध्नातीति १

वसाया स्रुवमादौ सादनालंभनं च। सौविष्टकृतानां भागावदानानां चासादनालंभने नमवतः। तं जघनेन चात्वालमं
तरेण यूपं चाग्निं च हरंति दक्षिणतोग्निं धाय प्रतिप्रस्थाता वध्नाति प्लक्षशाखांतर बर्हिर्मध्ये ति ताश्च वध्नातीति श्रवणा
त्। ताः प्लक्षशाखा अधि तासामुपर्य[illegible]वध्नाति। अवखंडयतीत्यर्थः॥ ॥ जुहूपभृतो रूपस्तृणीते वसाहोमहवन्यांपा
त्र्योश्च॥ ॥ आसादनालंभनानंतरं मध्ये जुहूपभृतो राज्यमुपस्तृणीते। तत्रैव साहोमहवन्यां ततः प्राशित्रहरणे तत्त्व
दपात्र्यामिति। अथ राज्यमुपस्तृणीते जुहूं चोपभृति च वसाहोमहवन्यां च समवत्तधान्यां च यदि हिरण्यशकलमे
नद्ध्याति तत्र जुह्वां चोपभृति चेति श्रुतत्वात्। कुयत्र तत्र इति होमः। वसा चासौ होमश्च वसाहोमः। साहूयते यया वसाहोमहव
नी स्रुक् कृष्टिता याजुहूः। समवत्तं धीयते यया समवत्तधानी इडापात्रीत्यर्थः॥ ॥ मनोतायै हविषोनुब्रूहीत्युक्ते स्रुचोर
वद्यति यथोक्तं द्विर्द्विः॥ ॥ मनोतायै हविषोवदीयमानस्यानुब्रूहीति संप्रैषं मैत्रावरुणे प्रयुक्ते सति प्रतिप्रस्थाता यथोक्तं
द्विर्द्विरिति मध्यात्पूर्वार्धाच्च स्रुचौ जुहूपभृतोरवद्यति। एकादशावैपत्यौ रवदानानि तानि द्विर्द्विरवद्यतीति विशे
षात्। उपरिष्टाद्धिरभिघारणानुपदेशाच्च। यथोक्तमिति जौहवानि गोत्ज्ञा सौमोपभृतान्युपभृतीति॥ ॥ अक्षो गुदं तृती
ये॥ ॥ गुदतृतीये अक्षोवेमि। शेषे अवद्यति द्विर्द्विः। गुदं त्रेधा करोति स्थविमोपयतृतीयं मध्यं जुह्वां द्वेधा कृत्वावद्य
तीति। तथा गुदं द्वेधा कृत्वा वध्नातीति क्रमनयोरेव द्विर्द्विरवदानश्रवणात्॥ ॥ वपावद्धिरण्यं॥ ॥ अत्र जुहूपभृतोर्वपावद्धि
हिरण्यमवद्यति। वपावद्धिरण्यमुपस्तारानंतरं प्रागुपरिष्टादभिघाराच्च। तथैव श्रुतत्वात्। अत्रापस्तंबः। अंतरायु
पमाहवनीयं च दक्षिणातिहृत्य पंचहोत्राय होत्रा चादक्षिणस्यां वेदिश्रोण्यामासाद्योपस्तृणीते जुहूपभृतोर्वसाहोम
हवन्यां समवत्तधान्यामिति जुहूपभृतो हिरण्यशकलौ[illegible] बर्हिषि प्लक्षशाखास्वासाद्य मवदानानि[illegible] संप्रेष्यति मनो
ताया इति। काठके। अग्रे हृदयस्यावद्यत्यथ मनोताया इति। आपस्तंबसूत्रे सौविष्टकृतानां सकृत्सकृदवदानमुक्तं॥
यथोक्तं तदेव तानां द्विर्द्विरवदाय जुह्वामवदधातूपभृति सौविष्टकृतानि सर्वत्र सकृदिति। कठसूत्रे। सौविष्टकृता
नामेव सर्वं पांद्विरिति। अथ मनोतायै हविषोनुवाच आहेति प्रकृतस सहृदयस्यैवाग्रे वद्यतीति श्रुतेः। तस्यार्थः। हृद
यस्य मांसपिंडस्य वेदेशमिति शेषः। अवद्यति अवखंडयतीति मध्यं पूर्वार्धं च। अग्रे प्रथमं जिह्वायाः पृथक्येतिहि स्वा
मिनः। तथा अग्र जिह्वायै साहीमं पूर्वार्धं[illegible] तिष्ठ स्य वक्षस[illegible] तथैकचरणस्य दोष्णो अपार्धयोरथातनिम्ना

यव क्रयोर्गुदं त्रेधा करोति स्थविमोपयज्ञो मध्यं जुह्वां द्वेधा कृत्वा अवद्यसणिमे त्र्यंगेषु वैकवराये श्रोणेरेताव जुहूजुहूपभृदवद्य
तीति क्रमेण तेषां जुहूपभृदवदानेन स्मरणात्। जुह्वामर्धं तानामु भरत्रेतो त्र्यावयति वषट्कृते जुहोति यानि जुहूपभृदवदानानि भवंती
ति। तत्कारेण हृदयादीनां हविषां प्रधानयागसाधनत्वं नसिद्ध्यतीत्येवमर्थमेतावत्तु जुहूपभृदवद्यतीति वचनं। ननु चोदके
नैव जुहूपभृदवदानं प्राप्नोति तेन किमनेन वचनेन॥ नैतदेवं। यदि हृदयादीनां हविष्ट्वं सिद्धं स्यादेवं प्रयासो विकल्पः ततः स्या
दयमसदृशं जुहूपभृदवदानं। अत्र तु अग्नीषोमीये पशुनाप्रकृतिभूते पशावतिदिष्टं तदिति वचने सति पशोरेव सकलस्य मध्यात्पूर्वार्ध
दवदानं जुहूपभृता स्यात् हृदयादीनां। ततश्च सहृदयस्यैवावयवत्वे सत्यादीन्यपि क्रमस्य विशेषप्रदानां तत्र विधि
नाक्यान्येव भवंति। होमकारेण च यागसंबंधे सति चोदकेनैव यदवदानं प्राप्नोति तस्य कार्ये एतान्यवदानानि वर्तंत
इति तद्धर्मा मध्यपूर्वार्धादिरूपादीनि भवंति। तस्मादेतावं जुहूपभृदवद्यतीति विधिरेवायमेतस्यामवस्थायामिति
दृष्टव्यं। जिह्वायाः [illegible] स्नायाः अवद्यतीति सर्वत्र संबंधः। अथ [illegible] थवक्षसः क्रोडस्य। अथ एके चरस्य दोष्णः।
हृदयादिष्वेकादशासु चरतीत्येकादशत्वं। दशसु संख्यालोप [illegible] दश सः। एकचरं दोः तस्य दोष्णः सव्यबाहोः प्र
थमं नडकमवद्यतीत्यर्थः। अथ पार्श्वयोः। अथ तनिम्नः [illegible]तेः कालेयस्येत्यर्थः। अथ वृक्कयोः कुक्षिगो
लकयोः। गुदमात्रं। रज्जुरदृशं मांसं तत्त्रेधा करोति विशसमभागेन। तत्र यत् गुदात् तृतीयं स्थविमः अतिस्थवे
न स्थूलं तदुपयज्ञ्यः उपयडर्थं। मध्यं तु यन्नातिस्थूलं नातितनु तद्द्वेधा कृत्वा जुहूपभृदवद्यति। यत्तु अणिमं
अतितनु तत्र्यंगेषु पशुवस्वद्यति। अथैकवरायै श्रोणेः। हृदयादीन्येकादशासु चरतीत्येकचरायास्तस्याः एकच
रायाः दक्षिणायाः श्रोणेरित्यर्थः। साक्षि सव्येन दोष्णा सह जुहूपभृदवदायत इति दर्शयति। अथ यद् द्वेधा व
द्यति सव्यस्य दोष्णो दक्षिणायाश्च श्रोणेरिति प्रथमपाठ औहवे एते [illegible]व्ये। उत्तरे तु पाठक्रमादेवोपभृ
ते वेदितव्ये। दक्षिणस्य चेद्दोष्णः सव्यायाश्च श्रोणेरिति। दक्षिणस्य चेद्दोष्णः सव्यायाश्च श्रोणेरिति। ए
ताकं जुहूपभृदवदेयं। तथा। अथोपभृति त्र्यंगस्य दोष्णः अवद्यतीति वर्त्तते। त्रीण्यंगानि त्र्यंगेषु भवंदो
दक्षिणं त्र्यंगं। तस्य दोष्णा दक्षिणबाहोः प्रथममवद्यति। गुदं गुदखंडमणिष्ठं तत्सकलमेव द्वेधा

कृत्वा वध्यति। उपमन्तिगम्फाति न तस्यापि हृदयादि वपांच्छमुत्तरकपुर्वाङ्गावदाय व्दिं चिष्टसिरोवयती सूर्थः।
त्र्यंगायेत्र्यंमेषु भवायाः श्रोणेः सव्यायाः उपमन्तावधतीतिवर्तते। त्र्यंग स्तंच दक्षिणस्य दोष्णः सव्याया श्रोणेः
वान्यरेषा हरिष्यती तिदर्शितमेव। अथहिरण्यशकलं वनदधातेगुल्फां चोवमन्तिच प्रकृतहात्। अथोपरिष्टा
दाज्यस्याभिघारयती ते केकंप्रसेकं। न हिरूपमन्ति। एवं तावदेतानि जोहवान्योपमन्ति तानि चावदानानि। ए
वांचोपरिष्टाद्धोमचारेण यथा नुच्यते श्लोत्यन्यध्यते। औपमन्थासां तु स्तोविष्टकृतयासंबंधः। तत उपस्तुचोद
भायामपि पञ्चुशाबो हृदयादिलक्षणार्थमेतावदानादि चोदनासाव्पे प्तो विदास्यते। अथय न्तत्री व्योवध्ये
ति। नाए समीर्णनु कस्य नापरस्यवोरिति। सीपस्तः शिरसः। अंसयो र्बाहुमुले फलकयो व्धिपिष्टिकयोः। अनुक
स्यकायवंशस्य। अपरसध्र्योः श्रोणि मुलफलकयो। व्धिपिष्टयोः। पंचावतिनो हृदयादीनांतुवचनाद्दिद्धिरि
वावदानमिति स्वारस्यंदीपिकायां॥ ॥रेडसीतिवसां गृहीत्वा द्धिरभिघार्य प्रयुतमिति वार्जेन ९ सज्ञित सिनावा॥
॥ रेडसी हविनेन मंत्रेण वसा होमहवन्यां यथाकयंचिदेव वसां गृहीत्वा परिष्टाद्धिरभिघार्य पयुतमिसनेन
मंत्रेण पार्श्वेनाज्यं वसां च संस्रवति मि श्रयहा झालयति असिनावाकदारिकयानाञ्चालयति॥ अथव
साहोमं गृह्णातिरेडसीति अत्रोपरिष्टादाज्यस्य द्धिरभिघारयसथपार्श्वेनवासिनानाप्रयोति प्रयुतंदेवहातीत्र
नहात्। अत्राप्युपस्तराभिघारो धुवायाएवजुहोतिसातुच्छी॥ ॥सोषमिडपात्र्यामासिच्य क्रोडमनस्थीनि
प —— श्रोणिवर्जी। ॥वसा शेषमिडापात्र्यामासिच्याभिनीय क्रोडेवक्षोवक्षि हं प्रास्यतिप्राक्षिपति। अनस्थी
भिन्नान्यरूपा स्थिर्यैबांता। नि अस्थीनि। हृदयंजिह्वा यकृत्व को वेसेतानि। श्रोणिवर्जी। दक्षिणा श्रोणिं वर्जयि
ला। सव्या श्रोणेस्तु अजौहवसादेवी प्राह्येः। अनास्थि से नप्रासा यानिषेध्यः। अपरस्थसद्धुगुपरि वर्तमानस्यापु
धसंलग्नस्य मांसस्यात्रस्य श्रोणिशाक्षावात्प्यत्वात्। अथयधसदिशि ध्यते। तत्समवत्तधान्यामानयति तद्धृदयं
प्रास्यति। जिह्वां वक्षस्तनिम मतस्तो वनिष्ठुमतथोपरिष्टाद्धिराज्यस्याभिघारयतीतिश्रुत स्तात्। यः वसायाः पुरि
शिष्यते तत्समवत्तधान्यामिडपात्र्यामीनवति आसिंचति। तत्र हृदयादीनि शेषमुत्तानि प्रास्यते। वयत्तः क्रोडे।

तन्निमं कालेयं। मतस्तोवक्क्रौ। वनिष्ठुः स्थूलांत्रं। प्रकृतितः प्रसलादिगतः पूर्वतरं जौहवेभ्यो द्विर्द्विः प्राशित्रावदानं कार्यं। इडाप
भ्यो वसासेचनादि। आपस्तंबः। समवत्तधान्यां बडाचनीगमवृध्य जिव वनिष्ठुः सप्तमं षड्भ्यो वा वनिष्ठोः सप्तमादनस्थि
भिष्ठीवर्द्धयतीति श्रीमानपीहानंपुरीतलमिस्र-वयपृध्यो त्रेसि ध्यासिधारयतीति। बडाद्यानि हृदयमेव वक्षो य
कृद्वृक्कौ रहेतानि। शाखांतरे श्रूयते। देवता-न्यवदाय गतावसेवहोतव्यं सो विष्टकृता-न्यवद्यति स्वे विष्टकृता-न्यवदायन
तावसेवहोतव्यं मेग-न्यव ... धतीति। अत्र श्रावदानं प्रधानं न भवति वचनात्। पूर्वं प्रधानावमानं। ततः सौविष्टकृ
तानो। ततऽ ऐडानामिति क्रमः। प्राशित्रं तु कात्यायनापस्तंबमानवकठसूत्रेषु शतपदे च पठितं नास्ति। संप्रदायप्रज्ञप्ति
कारेण कर्ताया यैश्च कर्तव्यं हवेनोक्तं भर्तयज्ञेन चानुक्तत्वान्न भवतीत्युक्तं॥ ॥ आश्वनीगृदं त्वेन्द्राग्नि श्यायाहेन्द्राग्निभ्यां च्छागस्य
हविषोऽनुब्रूहीति॥ ॥ आश्वनीगृदं तं निध्याय कल्पितम्भगुसदेशे स्थापयित्वा पशुदेवपश्यमाणप्रकारेण पशुसंमर्शनं चक्र
तातलोमं त्रावरुणं प्रसध्वर्युरुत्कर इन्द्राग्निभ्यां छागस्य हविषोऽनुब्रूहीत्येवं। एतदपि प्रयोगशिक्षार्थं। तेन पश्वे सुधीयध्वा
गस्य प्रजापतये छागस्येत्येवमपि ज्ञेयं॥ ॥ आश्राव्योहेन्द्राग्निभ्यां छागस्य हविः प्रेष्येति॥ ॥ ततऽ स्थायय मतिदेशं गत्वा श्राव्याहें
द्राग्निभ्यां छागस्य हविः प्रेष्येत्येवं मैत्रावरुणं प्र॥ एतदपि प्रयोगशिक्षार्थमेव। पश्वेआश्रावणं तु प्राप्तमेव प्रैषविशेषार्थमनुव
ते॥ ॥ प्रस्थितमिति च प्रस्तुते॥ ॥ प्रस्तुतशब्देन सवनीये सर्वत्र पशौ हविः प्रस्थितं प्रेष्येत्येवं वक्तव्यं। न प्रस्थितमित्याह प्रस्तुते
प्रस्थितमिति श्रुतत्वात्॥ ॥ अङ्गपातरे वसायैकदेशं जुहोति घृतं घृतपावान इति॥ ॥ याज्यायै इति षष्ठ्यर्थे चतुर्थी। याज्यायाः
अर्द्धपातरे अर्द्धपयोरंतराले एकस्मिन्नर्द्धर्चे इते द्वितीये चानुक्ते वसाहोमहवन्या वसायाएकदेशं जुहोति घृतं घृतपावानः इत्य
नेन मंत्रेण। हवनीयस्योत्तरतऽ उपविश्य सव्ये स्रुचौ कृत्वा दक्षिणेन वसां जुहोति। इदमेतरिक्षायेति सौगमः। ततऽ स्थाय पुनर्यजे
तिदेशं गत्वा वषट्कृते जौहवानि जुहोति। अंतरेणाङ्गपौ याज्यायै वसाहोमं जुहोति समनुहोति घृतं घृतपावानः इति श्रुतत्वात्। त
था वषट्कृते जुहोति यानि जुहूं समवदानानि भवंतीति च श्रुतत्वात्। यानि जुहूं हृदयादिभ्यो वत्तान्यवदानानि भवंति तानि तिरो
बः। एतस्मादेव च प्राकृत होमसंबंधादवदानप्रभृतीनां हृदयादीनां पयः स्थानीयानां हविषां भवसीयते। पशौ सुहविः
प्रकृतेरुपाकरणादि यथा गवां सारवोपस्पर्शनादि तथा द्रष्टव्यमिति हरिस्वामिनः। विरोधादसाहोमः प्रतिप्रस्थातर्के

इति भाष्यकाराचार्याः। तथा चापस्तम्बः। यच्च प्राचा अर्धर्चे प्रतिप्रस्थाता वसाहोमं जुहोतीति। युक्तं चैतत्। विना वचनं अध्वर्योर्यो
गार्थं गतस्य प्रतिप्रस्थातृसाग... मनस्या युक्तत्वात्। तदुक्तं यजुर्वेदे च न विरोधाभ्यामन्यत्र इति॥ ॥दैवतं हुत्वा प्रदक्षिणमावृत्य
जुह्वा पृषदाज्यस्योपघ्नं आह वनस्पतयेऽनुब्रूहीति॥ ॥दैवतं प्रधानदेवतासंबन्धि द्रव्यं यज्जुह्वां सवत्तं तद्धुत्वा जौहवं हुत्वे
सव्यः। ततः प्रदक्षिणमावृत्य जुह्वा पृषदाज्यस्योप... चनं पृषदाज्यस्थालीतः पृषदाज्यं गृह्णीते। वनस्पतयेऽनुब्रूहीति सं
मैत्रावरुणं प्रत्यध्वर्युराह ब्रवीति। प्रदक्षिणग्रहणमितरथा भावनिवृत्त्यर्थम्। औतलेशापनार्थं वा। अस्मिन्पक्षे इतरथावृत्तिर्भवती
ति। अथ पृषदाज्यस्योपघ्नं आह वनस्पतयेऽनुब्रूहीति श्रुतत्वात्। अनुवाचनादि पूर्वकं होमसंबन्धधारेण पृषदाज्यं यागसाधनमि
ति गम्यते॥ स्थानसामान्याच्चायं। स्विष्टकृद्विकारो वनस्पतिरिष्टिः व्य इति हरिस्वामिनः। आपस्तम्बः। प्रत्याक्रम्य जुह्वामुपस्तीर्य सकृ
त्पृषदाज्यस्योपहत्य द्विरभिघार्य च वनस्पतयेऽनुब्रूहीति। काठके च। सकृदन्तुर्वा वदाय वनस्पतिं यजतीति॥ ॥आश्राव्य वन
स्पतये प्रेष्येति॥ ॥ततः आश्राव्य वनस्पतये प्रेष्येति मैत्रावरुणं प्रेष्यति। वनस्पतियागे स्विष्टकृद्विकारं केचिदाहुः। अपरे
तु द्रव्यसामान्यादुपांशुयागविकारमिति तन्न। स्विष्टकृद्विकारता युज्यते। उभयोः प्रेषणप्रधानदेवतासंकीर्तनसामान्यात्
स्थानसामान्यात्॥ ॥हुत्वा समानीय सौविष्टकृतं॥ ॥तस्मिन् जुह्वां गृहीतं पृषदाज्यं वनस्पतये हुत्वा स्विष्टकृद्विकारादुत्तरार्धे ततः उपभृ
त्स्थावदानानि जुह्वां समानीय सौविष्टकृतं यागं कुर्यात्। आश्राव्याह वनस्पतये प्रेष्येति च वषट्कृते जुहोतीति सूत्रं। अथवा उपभृत्स
वदानानि भवन्ति। तानि समानयमानं कुर्वन् ... स्विष्टकृते तो नुवाचनं कर्तव्यं। अथवा उपभृत्स्थ वदानानि भवन्ति तानि समानयमा
नाहेति श्रवणात्॥ ॥पशोरवदानैः वसाशेषेण वाजिनवत्॥ ॥यजति स्थाने जुहोति स्थानं प्रसागतस्य वा। तत्र स्थि
तेषा स्रुचौ सव्ये कृत्वा वसाशेषेणैव वाजिनवद्दिशो व्याघारयति। यथा वाजिनशेषेण दिग्व्याघारणमुक्तं तथैवेत्यर्थः। तं च
दिशो व्याघारयति दिशः इति मन्त्रं प्रदक्षिणं पुरस्तात् प्रथमं मुक्तमाभ्यां मध्ये पूर्वार्धे चेत्संवां॥ वाजिनवद्विशेषभयामथास्यावाह॥ ॥
॥ ॥सर्वं जुहोति॥ ॥इयांस्तु वाजिनवद्विशिष्टातिदेशो विशेषः। वसाशेषं सर्वमपि जुहोति। न भक्षार्थमवशेषयते। अपरे त्वन्यथा व्या
चक्षते। वाजिनवद्व्याघारणस्यैवातिदेशो न भक्षस्य। अथ यद्दिशो व्याघारयति दिशः प्रदिश इत्यादिना व्याघारणमात्रश्रवणात्ताव
न्मात्रस्यैव स्मरणा...र्थं। तस्मात् सर्वं जुहोतीति सूत्रस्यायमर्थः। अनतिशिष्टं सर्वमपि पश्चात् जुहोति होमेन प्रतिपादयति संप्रस्रवाणां तत
र। तथा चानुस्मर्यते। अथ पृषदाज्यं समवशीतीति संभरणेन पात्रमं तद्धुत्वा आह तथापि न महोतीरकुमवान्। एतत्पृषदाज्यं मैत्रः प्राप:

इति मंत्रवचनेन हुतं परिपूर्णं हुतात्तत्रैवाहवनीये अनु समस्यति जुहोतीति। कृत्स्नमेतन्मत्तमिति हरिस्वामिनः। यतो यौ विधिः। किं तर्हि न
अर्थवादमात्रमेतदेति ॥८॥ ॥ऐन्द्रः प्राण इति पशुं संमृशति॥ ॥दिग्व्याघारणानंतरं प्राक् स्रुग्निधानादैन्द्रः प्राण इति मंत्रेण पशुं
अवशिष्टानि शेषभूतानि पृषदाज्यवदानानि संमृशति। आलभते। अथ पशुं संमृशतीति श्रवणात्। पशुं पृषदेकदेशे सांगं कृत्स्नमेव
रूपकं च यद् वर्तते त्यौव शिष्टं तत्संमृशति इति हरिस्वामिनः। तथा चापस्तंबः। अथ पशुं [illegible] च्योतयति नो सयोनानु कस्य नापरस [illegible]
रुनं वदेयाः अवत्तानि [illegible] लैतत्संनिधाय संमृशत्यैन्द्रः प्राण इत्यथ तु विषाप्र [illegible] रतीति। सकृल्लाध्ये तान् निर्दिवितं सौविष्टकृतेहृदि [illegible]
यैकीकृत्य अभिमृशतु भयानि [illegible] तानि मंदे [illegible] तेति स्वामिनः। एतेर्हि संमर्शनस्य कालेऽ इति सारभूतेषु शेषस्वादि प्रति
पत्ति युक्तेत्यभिप्रायः। अथ संमर्शनस्य कालांतरमाह॥ ॥अवदायेडां प्राश्य प्रदानात्॥ ॥अथवाऽइडामवदाय प्रदानात् प्राक् मा
र्जनीयं गुदं त्रेधा [illegible] कालं पशुं संमृशति। अथ यत्सुरा संमृतियदिमं उपतिष्ठते तेविमथि [illegible] इति शंकमानो यथाविमार्थान्त्रेशं
कृतात्रैव संमर्शो [illegible] इति कालद्वये संमर्शनश्रवणात्। अथ पशुपयरेति [illegible] तरासिद्धप्रदानात् [illegible] संमर्शनमनुवर्तते यद्मेठपति
प्रतेमार्गाद् [illegible] स्ते निमाथ्यंते [illegible] तेशंकमानः। यदि तत्क्रिया [illegible] तदा अत्रैव संमर्शनं च
[illegible] प्राशित्र समर्पण [illegible] होत्रे इडामादध्याद्धि समर्पयति प्रकृतिवदेव। इडां होत्रे प्रदाय [illegible] प्र
कारेण। अत्र चांतरा [illegible] इडां प्रसी [illegible] पश्चात् होतुः पाणावादधाति। अन्यथा गार्हपत्याहवनीययोर्व्यवायः स्यात्। दक्षिणे
[illegible] पक्षे [illegible] इति गुदं [illegible] पंचमा [illegible] यद्दक्षिणे यजाः [illegible] वक्ष्यमाणव्याख्यानुसारात्। तथा
चापस्तंबः दक्षिणेन विहारमापद्यनीत्यापत्नीः [illegible] एवं [illegible] प्रसादैव गार्हपत्यं प्रति
[illegible] दक्षिणेन विहारं वा॥ ॥उपहूतायां वनिष्टुमग्नीध्रे॥ ॥उपहूतायामिडायां वनिष्टुमग्नीध्रे ददाति। अध्वर्युर्होत्रे॥ ॥अध्वर्यु
[illegible] होत्रे ददाति। इतरेषामप्यविभागो [illegible] समर्पणकाले। [illegible] यजमानाय
[illegible] तत्र सर्वेषां स्वस्वभागभक्षणे [illegible] स यजमानानां [illegible] भक्षणम्। [illegible] अध्वर्यु [illegible] भक्षयेषु मैत्रा
वरुणस्य होत्रध्वर्युनिकारादिति॥ ॥आपस्तंबः॥ उपहूतां मैत्रावरुणाय भक्षयंति। प्रस्थातास समौध्वर्यु [illegible] वनिष्टुमग्नीध्रे [illegible] संपादय
तीति। आवांतरेडाया॥ ॥आवांतरेडाभ्यां [illegible] ध्वर्युध्नी भवति। यदा [illegible] तरेडावदानेन कार्यं। [illegible] विधानात्।
॥ ॥मार्जितेषु प्रस्वम्य [illegible] दीपय [illegible] रूपसीद [illegible] स्वामिसमिध्य [illegible] इति॥ ॥इडाभक्षणानंतरं
मार्जनं [illegible] मार्जने कृते [illegible] ततः प्रेष्यति अग्नीद् [illegible] गारा [illegible]

तरेसाग्नीध्रं। चपय च्छरुप सीदेतिप्रतिप्रस्थाता सारं। मेक्षणम्प्र नास्याग्नीतिप्रसाणं। समिधमाध्यायाग्निमग्नीत्सं मृड्ढीति अग्नीधं। येषां
मते प्रासे निकृ:प-पुपुरोडाश स्तेषां भागपरिहारस्तदिडा मार्जनांते एवभवति। मार्जनांतिग्रहणं। पवित्रप्रतिपत्सादीनां मुपल
क्षणं। यतो वै कृतप्रैषानंतरमेव प्राकृतं प्रैषमुपदिशति॥ ॥सामित्रादंगाराना हृत्स वेदिश्रोण्यां निवपत्युत्तरस्यां॥ ॥अग्नीध्रः
सामित्रादंगारा नाहृत्सोत्तरस्यां वेदिश्रोण्यां निवपति स्थापयति सामर्थ्याद्दक्षिणस्यां वेदेः सेरक्तहान्निनापोपदेशाच्च।
वर्हिर्वपतित्तत्रोपयजइति॥ ॥आग्नीध्रीयाद्वा सोमेहोतृधिष्ण्ये॥ ॥सोमे आग्नीध्रीयाद्वा सामित्राद्वा अंगारानाहृत्याग्नी
ध्रो होतृधिष्ण्ये निवपति। आपस्तंबः। आग्नीध्रीयाद्वा सोमे होतृधिष्ण्ये। सोमे आग्नीध्रीयाद्वा शामित्राद्वा अंगारानाहृत्या
ग्नीध्रो आग्नीध्राद्दोप यजानंगारानाहरति होतास्तमुपयजति शामित्रान्निरूढपशुबंधउत्तरस्यां वेदिश्रोण्यामिति॥ ॥प्र
तिप्रस्थातोपयतेगुदकंतीयस्यप्रच्छेदंमनुयाजेषु समुद्रं गच्छेति प्रतिमंत्रं॥ ॥अनुयाजेषु क्रियमाणेषु प्रतिप्रस्थाता गुदकं ती
यस्य प्रच्छेदं गदकंतीयं च -- स्याधितं मासीतप्रच्छिद्य समुद्रं गच्छेति प्रतिमंत्रं प्रतिप्रस्थातोपयजते। जुहोतीत्यर्थः उप
यजानंगारान्निसुपदेशात्तेषामाहरणस्य दृष्टार्थत्वाच्च तेष्वेवांगारेषु जुहोति। तथाह स्तेनैव गुदकांडं जुहोतीति शाखांतरेषु
तत्वात्॥ न चात्र तदेकैकाभ्यां नवषट्कारोध्वर्युर्वैयथ्ये वउपयजति निपश्चाधुपयजतिसोपयजति समुद्रं गच्छस्वा
हेति श्रुतत्वात्। तस्मात्त्रैव एतदत्रानुयाजेषु एकैकोहोता द्वाभ्यां वषट्करोति सकृदेव वषट्कुर्वन्नुभयोर्होमि स्वगार्थं तस्य
हाति सर्थः। परस्माथतस्तेनानुयाजेष्यो वषट्करोति नैकस्या अंशइजे। ततश्चात्र पात्रप्रदान सम्मानकालतावं
पुने नोपयजां नाविधीयत इति गम्यते। अध्वर्यवे चानुयाजान्कुर्वते। कुलपतरं। तेनपुरस्तादनुयाजेषु चरतीति नि
दिष्टत्वात्। यश्चैव प्रतिप्रस्थातोपयजति यजतोऽध्वर्योर्हीनियजति। उपशब्दो हि नैककर्मप्रवचनीयः। अथयदुपय
जतीसुपयजामुपतिवान्यं। तेनोपयजः संसपियजतिः शबि ओपयजानंगारान्निसाग्निश्रवणा स्वाहाकारांतहो
ममंत्रश्रवणाच्च। आंबकदर्विहोमा अपुर्वाणि तेद्रव्याः। ततश्च सकृदर्वेत्तमुपविहेन होतव्यं सास्वांतराध्य।
हस्तेनतिसिद्धं भवति। पश्चादुपयजतीति देश। विधि। सदसि नावेदिश्रोण्यां चोत्तरस्यामिति शाखांतरं॥

तथा चाहृतमपसंव्यं। गुदकांडमेकादशधा तिर्यक् छित्त्वा संभिंदन् वर्तयन्ननुयाजान् वषट्कृते एकैकं गुदकांडं प्रतिप्रस्थाता हस्तेन जुहोति
समुद्रं गच्छ स्वाहेत्येतैर्मंत्रैः प्रतिमंत्रं सर्वाणि जुहोत्यध्वर्युर्वा ओषधीभ्य इति बर्हिषि विलेपनं निमृज्य मनो मे हार्दि यच्छेति जपति पृषदाज्यं नु
ज्यामानीय पृषदाज्यधानी जुहूपभृतं च सादयित्वैकादशानुयाजान् यजति देवेभ्यः प्रेष्येति प्रथमं संप्रेष्यति इतरास्तान् यजमानः प्राक् ते
रं मंत्रयतर इति। कात्यायने। तत्रोपयजः पृषदाज्येनैकादशानुयाजान् प्रसौति गुदकांडस्य संभिंदन्नध्वर्युः वाचयतो समुद्रं गच्छ स्वाहेति
प्रतिमिति [illegible] । अथ यदुपयजतेः पश्चादुपयजं सर्वोपयजतिस उपयजतीति। यजति राजा श्रवणादेतदेकोऽध्वर्योनव
षट्कृतेति श्रवणाद्यैषा यजतिलिंगमिध्यति। तेनोपस्तरणं द्विरभिघारणं च वर्ज्य [illegible] प्रतिवषट्कारं प्रदानं कुर्वंति। उपयष्टुरुपसीदेति व
चनादुपविश्य होम इति। अत्र भाष्यकाराः। समुद्रं गच्छेति गुदावयवरूपं हविः [illegible] समुद्राभिमानदेवं गच्छ स्वाहाहुतं [illegible] सुहुतम
र स्तु। एवमुत्तरेष्वपि द्रष्टव्या। येषु मंत्रेषु देवता स्पष्टं न प्रतिभाति तत्र तदभिमानि देवता द्रष्टव्येति॥ ॥प्रतिवषट्कारं जुहुयात् मनो मेति मु
खोपस्पर्शनं॥ ॥प्रतिप्रस्थाता प्रतिवषट्कारं एकैकं गुदकांडं जुहोति सर्वांते मनो मेति मुखोपस्पर्शनं मुखालंभनं करोति। अथ मुख
विमृज्य मनो मे हार्दि यच्छेति श्रुतत्वात्॥ ॥अनुयाजांते स्वरुं जुहोति दिवं ते धूम इति॥ ॥अनुयाजांते इति धारानुयाजांते जुह्वाम् एवच्छा
यदि दिवं ते धूम इति श्रुतत्वात्। अनुयाजांते धारानुयाजांते जुह्वाम् एव धायदि दिवं ते धूम इति
मंत्रेण स्वरुं जुहोति। स्वरुस्वरवरति भागः। तथोपवैष एतद्धूप [illegible] शकलमेव जुहोति दिवं ते धूमो गच्छत्विति श्रवणात्। प्रसारम्य जु
ह्वा स्वरुमवधायानुयाजांते जुहोति दिवं ते धूम इत्यापस्तंबः॥ कात्यायने। संस्थिते यजुषि [illegible] जुह्वा स्वरुं जुहोत्यनुपस्तीर्णमनभिघारि
तं दिवं ते धूम इति। प्रतिपत्तिरियं [illegible] यस्मिंस्तादर्थ्यप्राप्तेः। नास्यादोसादेस [illegible] आज्येन होमः॥ ॥पशुदेव वनस्पतिभ्यां स्वरुग्रहणं॥ ॥
पशुदेवता वनस्पतिभ्यां स्वरुग्रहणं। वनस्पतिरूपं स्विष्टकृद्विकारः। अतस्तस्य ग्रहणेनैतस्य संकीर्तनेन प्राप्नोति। प्रधानदेवता
भ्यां स्वरुग्रहणेन संकीर्तनं दर्शनात्। अतो न वनस्पतेरवधारणं। वनस्पतिग्रहणे एव क्रियमाणे परिसंख्या मा भूदित्यत्र तस्ये [illegible]
रणे च ग्रहणं माभूदिति पशुदेवताग्रहणं। तस्या अपि दर्शपूर्णमासदर्शनेन प्राप्तस्य [illegible] ग्रहणस्य निषिद्धत्वात्। अत्र तु त
स्याएकत्वात् कालगुणभेदाभावाद्व्यवधानाभावः। पशुदेवतापशुपुरोडाशदेवतयोस्तंत्रेणोच्चारणं। यत्र तु व्यवधानं सपशु
चातुर्मास्यादौ तत्र भेदेनेति। यत्र पशुदेवतानां पशुपुरोडाशदेवतानां भेदो भवति यथा सौत्रामण्यां। तद्यथा ऐंद्रवसाः पराबोम
वं संध्य देवसाः पुरोडाशा इति। तथा च [illegible] पशौ पंचपशुपसेवैश्वानरः पशुपुरोडाश इत्यत्र तत्प्राप्नोति अपशुदेवता
त्वात्। प्रासंगिकता विशेषानुजत्रापि भवति। एवं प्रासंगिकानां चातुर्मास्यहविर्देवतानां देवसुदेविकाहविरादीनां च पशु

२५

हूतेसंश्रीसर्नें केपि तुपशुदेवताश्री र्तनं पशुपुरोडाशदेवता व्युदासार्थमाहुः। तेषांमते पशुपुरोडाशदेवताया एतमनुवि
हित चातुर्मास्यहविर्दैवसुदेविकाहविरादिदेवतानां कुत्रापि व्यूहनं न भवति। तेषामभिप्रायः। यथा बहूनामेव विधीनां
परतंत्रो संख्यानामाबाहुल्यस्विष्टकृत्सु तद्वाक्येषु संश्रीर्तनाभावः। एवमेव व्यूहनमपि न भवतीति। तेषां पूर्ववचनं नपशु
तंत्रे हविःषु बिचोध्यमानानिगमान्लभेतइति। तथा च यथा तेषां चोदकप्राप्तस्य आवहनादेरभावः। एवं व्यूहनस्याप्यभा
वएवं युक्तः समानन्यायात्॥ अयेपक्षो युक्ततर इव दृश्यते॥ ॥जाघन्यापत्नीसंयाजान्॥ ॥आघन्यापत्नीसंयाजानूप
सोः पुच्छरूपेण हविषाकुर्यात् सूत्रार्थः। अथ आघनी विधानादाज्यस्यानाप आजाघनी तत अहविरासादनकाले जौह
वानां मासादना लंभानंतरं तस्या अप्यासादनालंभेभवतः। जघने भवा जाघनी पशोः पुच्छमिति हरिस्वामिनः। आघनी
बालदंडः पुच्छदंड इति माधवाचार्याः। जाघनी येन मशकानपनयतीति धूर्तस्वामिनः। तेन पशोः पुच्छदंडेन पत्नीसंयाजाः
कार्याः। अत्राहापस्तंबसूत्रे विशेषः। ध्रुवावर्जं चतुर्गृहीतैः पत्नीसंयाजानभिजुहोति दक्षिणेन प्रहारं जाघनीं हस्तात्स्यापत्नीः
संयाजयंसाज्येन सोमत्वष्टारा बिहुतां नायैजा यन्ये देवानां पत्नीभ्यो वद्यतिनीच्या अग्नये गृहपतये उत्तानायै होत्रे
इडामवद्यतिनीच्या अग्नीधे तां पत्न्यै प्रयच्छति तां सांध्वर्यवे न्यस्मै वा ब्राह्मणायेति। अत्र तत्र पुरोभिः सूत्रभिः संस्थेहो
मः। ध्रुवास्थ आहर्यौपा हवस्य सुमेन्माध्यतेति धुरिनिधानमंत्रे विपरिणामः॥ ॥उत्तानायादेवानां पत्नीभ्यो वद्यति॥ ॥
उत्तानाया जाघन्या अंतरतो मध्यवर्तिपार्श्वाद्देवानां पत्नीभ्यो वद्यति अन्यतरतो देवानां पत्नीभ्यो वद्यतीति श्रुतत्वात्। अंत
रतोऽधस्तात् आलोमकात्। आदिसर्थः॥ ॥इडां च॥ ॥पश्चाद्धादुत्तानाया एव जाघन्याः पैः पानतामकावद्यति॥ ॥परिव
सौ मन्येगृहपतये॥ ॥गृहपतयइति श्रुतत्वादुपरितनस्मात्पार्श्वे जाघन्या परिवर्सेत्तानाया उपरिभागादग्नये गृहपतये
चातुरवद्यति। उपरिष्टादग्नये गृहपतयइति श्रुतत्वात्। उपरिष्टादुपरिशासलोमकात्साध्यति॥ ॥अग्नीधे च॥ ॥पश्चात्पुर्व
स्तु श्रोण्यादेव जाघनीप्रदेशाद मध्येग्नीध्रे भागमवद्यति॥ इदमिदानीं विचार्यते। किं पश्चोपि पत्नीसंयाजदेवता आघन्या
हविष्याः उतपूर्वं द्वि देवते सोमत्वष्टाराज्येनेति। तत्र सूत्रकार एवपूर्वपक्षमाह॥ ॥आज्येनैव पूर्वे॥ ॥प्रथमेद्वे पत्नीसंया
जदेवते सोमत्वष्टारा आज्येनेति। कुतः। उत्तरयोरेव यागयोर्जाघन्या अवदानस्य श्रुतत्वात्। अथ जाघन्या पत्नीः संया

अयंती तिप्रवृक्तस्य अंतरतो देवानां पत्नी भ्यो वषट्‌ करोति उपरिष्टाद्‌ग्नय गृहपतये यदलिपं ॥ अनन्तरतो लीय चतुर्थ यो देवानां पत्नी श्रवणा
त् । प्रथम द्वितीये देवते भाज्येनैव यष्टव्ये इति सिद्धांतमाह ॥ ॥ सर्वा वाज्यान्या विशेषात् ॥ ॥ धारा इदः पूर्वपक्ष भ्रान्ति
रासे । सर्वा अपि चतस्रो पि देवता आज्येनैव यष्टव्याः । नाज्येन पृथुरौ । कुतः अविशेषात् । चतुर्णामपि याज्यानां पत्नीसंयाज
त्वाविशेषात् । पत्नीः पत्नीसंयाजा इति श्रुतिनिर्देशात् । अतश्च तस्रो पि देवता आज्येनैव यष्टव्या इति सिद्धांतः । आज्य
एव यागसाधनत्वेन विधानात् भाज्यान्नात तस्या एव चत्वारि पत्नीर्थे वदाति नोपस्ता रामिधारौ इति याज्ञिकाः पूर्तस्था
मिनश्च ॥ ९ ॥ ॥ बर्हिर्हुत्वा वा गच्छंति [illegible] हृदयशूलमादाय ॥ ॥ बर्हिर्हुत्वा हृदयशूलमादायावोगच्छंति तडागादि
स्थमुदकं प्रति गच्छंतीत्यर्थः । बहुवचनात्सर्वे ऋत्विजः सयजमानाः सपत्नीकाश्च ॥ सर्वविशेषेषु पशुषु अयमेव पशु
वावभृथस्य कालः । हविर्यज्ञविशेषेषु तु वैकल्पिक कालांतरमाह ॥ ॥ आहवनीयं वोपस्थाय व्रतादानि चेत् ॥ ॥
पशौ व्रतादीनि चेत्तोपायन प्रणीतादीनि चेत्क्रियमाणानि भवंति तदाहवनीयमुपस्थाय वा नुष्ठीमाहवनीयोपस्थानानंत
रं वा हृदयशूलमादायापः प्रतियंति गच्छंति । तेन हविर्यज्ञविधेषु पशुषु यं । बर्हिर्होमांते आहवनीयोपस्थानांते वेति ।
सर्वं व विधेषु बर्हिर्होमांते एवेति । अथ हृदयशूलेनावभृथयंतीति श्रवणात् । हृदयं विध्यते यस्मिन्निति स हृदयशूलः
तेन सह अवभृथं अवभृथदेशं गच्छंती त्युपन्यास मात्रमेवेतत् ॥ ८ ॥ तत्रैव यत् विधास्यतः इति । अपः एवाभ्यवेत्य अ
त्र शुष्कस्य वार्द्रस्य च संधिः स्यात् तदुपगूहेदिति तस्येदमुपन्यासमात्रं ॥ इतरथा तु विधावेत स्मिन्न सति सोमिका
वभृथे धर्म वीर्ययामो नाम्ना परिक्रमेत ॥ ॥ अभ्यवेत्य शुष्कार्द्र संधौ हृदयशूलमुपगूहति शुगसि तमभिशोचयो
स्मान्द्वेष्टि यं च वयं द्विष्मो मापो मोषधीरिति ॥ ॥ अध्वर्युरभ्यवेत्योदकमध्ये वतीर्य प्रविश्य शुष्कार्द्र संधौ हृदयशूल
मुपगूहति भूमिमध्ये धामुखं बलान्निवेशयति शुगसि तमभि शोचेत्यादिना द्विष्म इत्यंतेन मापो मो षधीर्हिंसीरित्यं
न च मंत्रेण । अप एवाभ्यवेत्य यत्र शुष्कस्य चार्द्रस्य च संधिः स्यात् तदुपगूहेदिति श्रुतत्वात् । हृदयशूलेनावभृथ
यंती त्युपन्यासाद्धागारं कायां प्रसक्तायामवधारयति अप एवाभ्यवेत्य । नान्यथा लिंग चिह्न होति ॥ ॥ ग्लाय उदपात्रं नि
षिच्य पूर्वेण यूपं यथोक्तमुपगूहति ॥ ॥ तडागादिस्थाः अपः प्रतिगमनाय ग्लायन् अनुत्सहमानो गंतुमशक्तो वे
त् यूपं पूर्वेण यूपपूर्वदेशे अदूरे निम्नभूमौ उदपात्रं उदकस्य पात्रं निषिच्य निनीय यथोक्तमुपगूहति यथोक्तमि

तिष्ठन्त्वा इंद्रसंधौ हृदयशूलमुपगूहतीत्यर्थः। यद्यु अभ्यवायान्नाय ग्लायेदग्रेण यूपमुदपात्रं निनीय यत्र शुष्कस्य
स्य चार्द्रस्य च संधिर्भवति तं ऽपगूहतीति मापो मौषधी रिंसादिति श्रुतत्वात्। यद्यु अभ्यवायान्नाय ग्लायेदं तुं न शक्नुयात्। ततोऽग्रे
ण यूपमुदपात्रं निषिच्योपगूहेदिति ब्रुवन्न सुतरां यागाभावं दर्शयतीति हरिस्वामिनः॥ ॥धाम्नो धाम्नः सुमित्रिया न इत्यु
पस्य शांसापः॥ ॥धाम्नो धाम्नो राजन्नित्याभ्यां द्वाभ्यां मंत्राभ्यां मण्डपस्य शाखिसर्वे ऽत्र हिंग्यमभ्या नाश्ताऽऽगादित्यर्थं यु
पष्ठवेण गृमौ निषिंचोदकमासेभंत इत्यर्थः। अथापऽपस्य शांतीति का प्रपाप्तत्॥ ॥ऽपगूहनं सोऽबोधापुर्वः॥ ॥अथवा
पूर्वाभ्यां मंत्राभ्यां धाम्नो धाम्न इत्यनयोः ऽपगूहनं मंत्रस्य शेषश्च भवति। मापो मौषधी रिंसस्येवैकदेशो नयवो भवति। अयमप्युपगूहने
एव। करणत्वमापादनीयेत्यर्थः। वाराहो व्याचष्टे॥ ॥अभिमंत्रणं वोत्तरेण॥ ॥ऽउत्तरेण सुमित्रिया न इत्यनेन मंत्रेण अपोऽभिमं
त्रणं वा कर्तव्यं ऽपस्य स्नानं वा। माध्येयं द्विनानो ऽभिमंत्रणं पद्यते। अथाभिमंत्रयते सुमित्रिया न इति। काण्वानां चोपस्थानं॥ अ
थापऽपस्य श्रातीति। अतो वाराहो विकल्पार्थः॥ ॥नसोमेऽनुबंध्यावर्जं॥ ॥सोमे अनुबंध्यावर्जं अनुबंध्यावर्जं विहा। अ
नुबंध्यातोऽन्यत्राग्नीषोमीये पशौ चषालं वर्ज्यो न भवतीत्यर्थः। अनुबंध्यायां तु भवत्येव। सवे भाग्नीषोमीयस्य पशोः
करोतिनाग्नेयस्य वशायाएवानुबंध्यायास्तत्र इत्युक्तं स्वर्गे उपयत्नः संतिष्ठंते तदुक्तं ह्यग्नीषोमीयस्य च पशोराग्नेयस्य च द्वदशपु
रोडाशेन चरितं भवति यद्वशयाश्चरंतीति श्रुतत्वात्। अत्र हरिस्वामिनः। सवे भाग्नीषोमीयस्यैदिना शूलावभृथः साधारणत्वं
याणामाधिपशूनामिसे तदुच्यते। सामर्थ्याच्च शूलस्यापि साधारण्यं नाव्याथोत्तरस्यानुपपत्तेः। कथमनुपपत्तिः। अत्र
हि प्रतिषेधो दृश्यते एकस्य विधिः। नत्र चानुबंध्यायाः एककेरोती सेतास्मिन्विधौ सति क्रमादग्नीषोमीयेऽतस्तन्न प्राप्नोति तत्रा
भावादाग्नेये वप्राप्तिरिहानुवादो वैतो प्रजायेत। एवं सत्येकवाक्यरूपेन बाधिष्यते। प्रसज्यप्रतिषेधेऽत्र सति विकल्पः प्रसज्येत। प
र्युदासस्तु सामान्यप्राप्त्यभावादनुपपन्न एव। तस्मात्प्रतिषेधो नावश्यमावेवदृष्टव्यो। यो ऽवेष विधिर्वशयायाएवानुबंध्या
यैकरोतीति एष पदार्थविनियुक्तस्य क्रमेणाग्नीषोमीयार्थस्य प्रसंख्यमानस्य नशार्थतया विनियुक्तस्योत्तरत्वो ऽआदिष्टस्या
नुष्ठान साधनत्वाच्च [illegible] मात्रेण करोतीति संदिग्धे वाक्यशेषात्प्रयोग साधारण्यं क्रियत इति गम्यते। न सामर्थ्याच्च शूलस्य
स्य साधारण्यं। तदा चायमक्षरार्थो भवति। नाग्नीषोमीयस्य सर्वविकारवत्त्वात्संत्र शूलावभृथं करोति नाग्नेयस्य। कु
तो यदस्य संपन्नं करोति वशायाएवानुबंध्यायाः। किं कारणं। तां हि संतिष्ठमानानामनुसर्वो यज्ञः संतिष्ठते न ततः परं पशुप्रयोगो
ऽस्ति यदर्थं शूलो धार्येत। नप्रतिषिध्येत [illegible] सभिप्रायः। इतश्चानैवंतामनुयज्ञः संतिष्ठते वोदवसानीयायाः परतो वि
धमानत्वात्॥ एवं च ब्रुवन् अनुबंध्याभावे पक्षे आग्नेयस्यैवांसकृत्स्नमीपयत्वाच्छियत इति दर्शयति। एतदुक्तं स्यैतिप्रयोग
प्रकाशकृते केवलवसार्थहासां[illegible]कां। निराकरोति। यद्यप्यग्नीषोमीय सवनीययोः साग्निचोकरोतितत्याप्य तदेवाग्नीषो

मीयस्य चपक्षे प्रातस्त्र गस्य च संबंधि अंगभूतं भवति यद्वत्सायाः सन्निध्यौ पठंति अस्येति यजमानस्येत्यर्थः। एवमेतत्साक्षादेवसाध्या
रणेन शूलावभृथः कृतः। इतरथा तु तांकि सर्वोऽपि नु यज्ञोऽग्निष्टोमादिः संक्षिप्तः स्यात् इति हेतुवचनमसंगतं स्यात्। अथ यदा यमभिप्रा
यः संस्थारूपो यः शूलावभृथः सुरायस्तस्य संस्थायानेन कल्पतर इति अग्नीषोमीयस्याप्यपि संबंधापरिज्ञानात् सवनीयस्य। तदं
ते एव सौमिकोऽवभृथः क्रियते किं पुनरयं गौणो न क्रियते तदा एतदुक्तं स्यात् सु पदेशात् तिदेशयोरन्यतरेणापि संबंधापरिज्ञानादन
संसितानुग्रहवचनमत्रानुपपन्नं स्यात्। तस्मादुपपन्नमेतत् प्रयोगसाधारण्यमनेन वचनेन क्रियत इति साधारणेन च शू
लप्रतिपत्तिः साधारण्युपपद्यत इत्यर्थः धुली पि साधारणो गम्यते। युक्तं च। एवं च सति सर्वपशुबंधेषु शूलावभृथः
सिद्धो भवति। इतरथा प्रकृतावभावे विकारेष्वनुबंध्यातिरिक्तेषु न स्यात्। तं चात्र दर्शयति। स यद्धृदयशूलेन चरंति
सहैवभृथं यइति। केचिदाचार्यास्तु पर्युदासमाहुः। तथाहि तत्र शास्त्र न प्रतिषेधता। अतुल्यप्रमाणत्वाद्विकल्पः स्यात्। प्रकरणेन ह्य
ग्नीषोमीयस्य प्राप्तौ लिङ्गान्येन च प्रतिषेधः। विकल्पस्य चान्याय्यत्वात्। अन्याय्यो हि विकल्पः पक्षे बाध्यात्। अतः पर्यु
दासरूपेणाग्नीषोमीयस्य सवनीयेषु शूलावभृथ इति वर्णयाया एवानुबंध्याया इति नियमानुवादः। एवं व्याख्याय मा
ने अनुबंध्याभावे सवनीयपश्वंते शूलावभृथो न भवति शूलस्यापि साधारण्यं न भवति। हरिस्वामिमते तु शूलस्य
साधारण्यं। अनुबंध्यांते पशुत्रयसाधारणः शूलावभृथः। अनुबंध्याभावे तु सवनीयपशौ बहिहोमांतं भवतीति॥
॥ ॥वरुणप्रघासेषु समिधां दधानं॥ ॥ अत्र वरुणप्रघासेषु समिदाधानं भवति। तत्रोक्तं यथाग्निमेवाहवनीये समिधा
नं देवानाइ समिदसीति पत्नी च गार्हपत्ये नुध्मी मिति। तद्वदत्रापि भवतीत्यर्थः। अनेकयजमाने गृहपतिरेवाहवनीये स
मिधमादधाति तत्पत्नी च। स सर्वं गार्हपत्ये तु। समिदाधानस्याग्नीध्यनार्थत्वात्सकृत्प्रथमे बहुकेषु कः कुर्यादित्युक्तत्वात्। प्रपंचितं चैत
द्वरुणप्रघासेषु॥ ॥शूर्पं विसृज्याग्नीध्रनां पूर्वं चतुर्गृहीतं जुहोतीति वत्। हविर्यज्ञविधे यदि तु पुंसी माहवनीयोपस्थानांते शु
लावभृथवत्तस्य समिदाध्यानांते विसृज्योत्तरवेदिकाहवनीयसमीपे भूतविसर्गं कृत्वा अपराग्नीनां पूर्वं मध्याहवनीये यूपा
हुतिवच्चतुर्गृहीतं जुहोति। उरु विष्णो विति मंत्रेण ब्रह्मं विसृज्य सत्र तान्यत्रैव श्रांतं त्रैवयमाहुतिर्नसर्वेदवेरति गम्यते। यूपाहुति
वद्विसेत्यावतैवासिद्धिः पुनः चतुर्गृहीतग्रहणं स्रुवेण वैसर्जनस्या त्रावि विवक्षार्थं। केचिदाज्यं पूर्णाहुतिवदाज्यं संस्कृत्य कुर्वंति।
अन्ये तु पश्वर्थसंस्कृतेनैव। नैमित्तिकाहुतिशंकया नपवत्त्वादिति हरिस्वाम्यभिप्रायः॥ ॥ सविहारांतः॥ ॥ अतः परं स एव
विहारो भवति। अग्निप्रणीतो पवत्स्यति। कर्मापि वर्गाध्वानोद्धृत्य चैव कर्तव्यं। मितिपितृभूतिः। अग्निप्रणीत एवेति कर्कः।

सर्वेषां साधारणपक्षे च मध्याहवनीयस्य धारणं कर्तव्यमित्येतदर्थमिदमुक्तं ॥ ॥समारूढे निर्मथिते वा ॥ ॥अथवा समा
रूढे निर्मथिते वा विहारे इयमाहुतिर्भवति। तत्र अग्न्यगारपक्षे समारोप्य निर्मथ्याहवनीयमुद्धृत्य तस्मिन्नित्यर्थः। अस्मिन्पक्षे
कर्मापवर्गाहुति समिदुपस्थानादिकमप्यत्रैव भवति। केचिदेवमाहुः। तमेवमध्याहवनीयं समारोप्य निर्मथ्याहुतिरिति।
तथा च संप्रदायकारः। तत्रैव च समारोपं कृत्वा निर्मथ्याहुतिरिति। कर्कोपि। समारूढे निर्मथिते अपाग्नीनां पूर्वः इयमाहुतिर्भ
वतीति। तदा कर्मापवर्गादि प्रणीतेपि क्रियमाणं नावरुध्यते। आहुतिमात्रार्थं वा चाग्निकं मध्याहवनीयस्य समारोप्यनि
र्मथनमिति। पुनराधानानंतरं प्रतेष्वेवाग्निषु यदा निरूढः क्रियते तदा मध्याहवनीयदक्षिणाग्न्योरेव धारणं। इतरे तु किं काभ
वंति। स विहारोत इति सूत्रात्। एवं च रूपप्रयासे महताविघ्नापि प्राप्नोति। परंतु तत्र समारोपेण क्रतुधर्मेण पुरुषार्थमग्निनित्य
धारितं बाध्यते। तेनन भवेदिति ॥ ॥यथोक्तमाहवनीयादस्यां ॥ ॥अस्यामाहुतौ यथोक्तमाहवनीयशान्तिर्दध्यात् यद्यग्निरण्यधा
रणस्यादिकातुं शक्यते तदध्वर्युर्वेदध्यादित्यर्थः। तस्यैव सन्निधानात्। ततः पशुपुरोडाशभागप्राशनं ब्रह्मयजमानयोः।
अग्निप्रणीतस्य सन्निधानेव पशुपुरोडाशांगत्वेन प्राशनं तर्पणप्रैषः। पश्चाद्विंश्यकर्मात्स्यात्। ब्राह्मणतर्पणं। तन्मयः कृता
ये सूत्रेनोत्तरवेदिकाहवनीये समिदाधानं आहुतिहोमो गार्हपत्यागं वेति। नाप्रहोमांते शूलावभृथकरणपर्यंतं समिदाधा
नांते प्रणीताविमोकादि व्रतविसर्गांतं। ततो वैश्वाव्याहुतिस्ततो भागप्राशनादीनि। येषांमते प्रासंगिकः पशुपुरोडाशः। तेषां
मते भागप्राशनादि कर्मापवर्गांतं पशुपुरोडाशोप्यार्जनं। भागपरिहारानंतरमेव कृतान्नपात्रस्य भागावेक्षणं यत्कृता कर्तव्यं।
नेदानीं। व्रतविसर्गांते वायं पशुर्भवति। ऐंद्राग्न्यादयनेकदेवतस्य तु भागाभावः ॥ ॥अग्निप्रणीयसदोहविर्धानाग्नीध्रहोतृ
धिष्ण्या यथोक्तं गृहीतान्याहताग्नीध्रप्रणयनमग्नीषोमीयदर्शनात् ॥ ॥अत्र निरूढे ग्निं प्रणीयाग्निप्रणयनानंतरं स
दोहविर्धानाग्नीध्रहोतृधिष्ण्यान् यथोक्तं कृत्वा यादृशान्येतानि येन प्रकारेण कर्तव्यानि तानि तेनैव प्रकारेण कृत्वा
ततः आज्यानि गृहीत्वा आग्नीध्रे अग्नेः प्रणयनं कर्तव्यं। कुतः। अग्नीषोमीयदर्शनात्। यतोग्नीषोमीये तानि दृश्यंते।
तथापि अग्नीषोमीये हविर्धाने सामिधेन्यनुवचनं आग्नीध्रे प्रस्रावणं सदसि वषट्कारः होतृधिष्ण्येऽप्ययं होमः।
आग्नीध्रीयादुपयहोमार्थमंगाराहरणमिति। अग्नीषोमीयएतेषां दर्शनादत्राप्येतानि कर्तव्यानि। अग्नीषोमीयविकारत्वादि
ति पूर्वपक्षः। सिद्धांतमाह ॥ ॥न सोमार्थत्वात् ॥ ॥अत्र सदोहविर्धानादिकं न भवति। कुतः सोमार्थत्वादेतेषां। यतः सदआ
दीनि सोमार्थानि। सोमप्रवृत्तयत एतानि श्रूयंते।

ऽदरमेस्य ब्रास्य सदः शिर एवास्य हविर्धानं बाहू एवास्याग्नीध्रीयश्च मार्जालीयश्चेत्येवमादीनि। ननु यदि एतानि सोमार्थानि तन्
दा कथमेषामग्नीषोमीयदर्शनमिति सारं व्याह॥ ॥ प्रसंगाद्दर्शनं॥ ॥ प्रासंगिकमित्यर्थः। अन्यार्थमनुष्ठितस्यान्येनोपजीवनं
प्रसंगः। सोमार्थमेव निष्पादितान्येतानि प्रसंगादग्नीषोमीयेणोपभुज्यन्ते। नन्वेतेषामग्नीषोमीयस्याल्पोपि न स्वसंबं
न्धो येन प्रविकारेषु प्रवृत्तिरपि स्यादिति। तस्मान्नैवात्रैतानि भवंतीति॥ ॥ दर्विहोमाः पौर्णमासधर्मा जुहोतिचोदनात्॥ ॥ दर्वि
होमाः शानरुद्रियादयो जुहोतिचोदनाचोदिता जुहोतयः। तेषां पौर्णमासधर्मा भवंति। पौर्णमासस्य पूर्णं दर्शं स्यादुपलक्षणं। दर्शपौ
र्णमासधर्मा भवंतीत्यर्थः। शुक्लं वत्सा पयसाभिजुहोति अन्वारब्धेषु पयो जुहोति। औदुंबरे पात्रे आसिच्य पयश्चेत्यादिषु पयः
साध्यनुकेषु दार्विकपयसो धर्मप्रवृत्तेरिष्टत्वात्। कुतः पौर्णमासधर्मा भवंतीति। जुहोत्यविशेषात्। यजतेः संकाशाज्जुहोते
र्विशेषो नास्ति यतः। ऽपयत्र हि द्रव्यदेवतावत्वं। अथ मारुतान् जुहोतीति सेवमादिचोदनासामान्याच्च धर्मप्रवृत्तिर्भवति। त
स्माद्दर्शपौर्णमासधर्मा दर्विहोमेषु भवंतीति। किंच॥ ॥ जुहुदर्शनाच्च॥ ॥ जुह्वादियजतिधर्माणां जुहोतिषु संपत्तिदर्श
नादप्येवं ज्ञायते यद्दर्विहोमेषु दर्शपौर्णमासधर्मा भवंतीति। अमारुता प्रकृतैवं श्रूयते। तथाहुः कथमस्मैते पुरोनुवाक्य
वंतौ याज्यानुवंतौ वषट्कृते स्रुचा हुता भवंतीति होते वां वै सप्तपदानि मारुतानि यानि त्रीणि प्रथमानि पदानि सा त्रिपदा गाय
त्री पुरोनुवाक्याथ यानि चत्वारि सा चतुष्पदा त्रिष्टुब्याज्येदमेव कपुलकं लमयं दण्डः स्वाहाकारो वषट्कार एवमनुप्रस्यो
पुरोवाक्यवंतौ वषट्कृते स्रुचा हुता भवंतीति। अत्रैषां यजतिधर्माणां दर्शपूर्णमासदृष्टानामिह प्रकारांतरेण संपादनं ब्रुव
न् दर्विहोमानां दर्शपौर्णमासधर्मत्वं दर्शयति। तदेवं समंत्रकसर्वधर्मप्राप्तावाह॥ ॥ तूष्णीं॥ ॥ तूष्णीं दर्शपूर्णमा
सधर्मा दर्विहोमेषु भवंति तूष्णीं मंत्रवर्जिता भवंति। अमंत्रिकाः सर्वे पदार्था भवंतीत्यर्थः॥ ॥ अनर्थलुप्ताः॥ ॥ दृष्टार्थेनाऽ
लुप्ताः इत्यर्थलुप्ताः। यथैवैकाग्निहोत्रेपि गार्हपत्यस्थापनादिनेति॥ ॥ एकाग्नयः॥ ॥ एकाग्निसाध्यहोम इत्यर्थः। एवं चात्र
होमा भवंति। ये एकस्मिन्नाहवनीये क्रियंते। अनेनात्र परागिहोमाः पत्नीसंयाजदक्षिणाग्निहोमा निषिध्यंते॥ ॥ अप्र
याजाः॥ ॥ अत्र दर्विहोमेषु प्रयाजा न भवंतीत्यर्थः॥ ॥ अननुयाजाः॥ ॥ न संति अनुयाजा येषु तेऽननुयाजाः। अनुयाजा अ
प्यत्र दर्विहोमे न भवंतीत्यर्थः॥ ॥ असामिधेनिकाः॥ ॥ न संति सामिधेन्यो येषु ते असामिधेनिकाः। मंत्ररूपाणां
सामिधेनीनां तूष्णीमित्यनेनैव निषिद्धत्वादनेनैव सामिधेनीसहचरितेध्मकाष्ठानां लक्षणया निषेधः क्रियते॥
मुख्यार्थासंभवात्॥ ॥

॥ ॥ अनिगदाः ॥ ॥ मंत्ररूपाणां निगदानां तूष्णीमिति सूत्रेणैव निषिद्धत्वादनेन कथमपाद्यायामिलतसंबंधीनि कर्माणि स्विष्टकृ
दिडप्रस्तरहोमरूपाणि लक्ष्यंते। तत्र अपदार्विहोमेषु स्विष्टकृद्धोमो न भवति। इडावदानं च न भवति। प्रस्तरहोमोऽपि न भवती
सर्थः। संप्रदायपद्धतौ तु जुहोतिषु यः प्रस्तरहोम उक्तः स तेषां मते ध्रुव एव। यत्र तेषां प्रस्तरहोमस्य सूक्तवाकस्य च पर
स्परं संबंधो नास्ति। येषां तु सूक्तवाको याज्या प्रस्तर आहुतिः। सूक्तवाकेन प्रस्तरं प्रहरतीति सूक्तवाकस्य प्रस्तरहोमं प्र
ति करणभावस्तेषां तु न भवत्येव। अनिगदा इत्यनेन स्विष्टकृन्निषेध्यात्। अतो स्याके प्रस्तरहोमं प्रति सूक्तवाकस्य कर
णभावमंगीकृत्य जुहोतिषु प्रस्तरहोमो न भवत्येव ॥ ॥ प्रतिनिगद्य होमाः ॥ ॥ देवतां प्रतिनिगद्य देवतापदं चतुर्थ्यंतमुच्चा
र्य स्वाहाकारेणात्र होमः कर्तव्यः। तद्यथा अग्नये स्वाहा सोमाय स्वाहेति सौम्य भागयोर्होमः ॥ ॥ स्वाहाकारप्रदानाः ॥ ॥ तू
ष्णीमिति सूक्ते स्वाहाकारस्याप्यभावः प्राप्नोतीत्यस्माद्बुद्धिसेवमर्थमिदमुच्यते। स्वाहाकारेण प्रदानं होमो येषु जुहोतिषु ते स्वा
हाकारप्रदानाः। तत्र चतुर्थ्यंतं देवतापदं स्वाहांतमुच्चार्य होमः कर्तव्य इत्यर्थः। तद्यथा प्रजापतये स्वाहेंद्राय स्वाहेत्या
घारौ अग्नये स्वाहा सोमाय स्वाहेति सौम्यभागौ। विश्वेभ्यो देवेभ्यः स्वाहेति सर्वहोमः। दिव्याय नभसे स्वाहेति बर्हिर्हो
म इति। एवं सर्वजुहोतिषु प्रसक्तौ कश्चिदपवादमाह ॥ ॥ परतंत्रोऽसन्नयो जुहोतिमात्राः ॥ ॥ परस्यान्यस्य कर्मणस्तंत्रेऽ
सतिर्येषां जुहोतीनां परतंत्रोपनयः। ते जुहोतिमात्रा भवंति। सन्निपत्योपकारकांगसूक्ताः। आरादुपकारकाणि तु ते
षु न भवंतीत्यर्थः। तद्यथा साकमेधेषु सांतपनीया यात्र मध्ये दर्विहोमः प्रतिनः स तु होममात्र एव भवति। तथापि येषां
सांतपनीया सर्वं चिव र्हि र्हो म वर्जितं सर्वं समाप्य गृहमेधीया क्रियते। तेषां तस्मिन्नपि दर्विहोमे सर्वेऽपि पौर्णमास्यधर्मा
स्तु च मी भवंत्येवेति। यथा च प्रवाजपेये सर्वौषध्योदकपयः साधको जुहोति। परतंत्रोऽसन्नः सोऽपि हविर्निर्वापादिमात्र
सान्निपातिकधर्मोपेतो जुहोतिमात्रे भवति। एवमन्वारब्धेषु पयो जुहोतीत्यादौ वापि वाच्यं। तेन च परतंत्रोऽसन्नतादुपस
न्डुपरोडाशावदंगाथाम प्रयोजकाः अन्यानुष्ठिताः यैनान्येवा आरादुपकारकाव्युपजीवंतीति न तेषां पृथगंगानुष्ठा
नापेक्षा। तदुक्तम्। क्रियान्यस्य समानार्थत्वादिति ॥ ॥ पाकयज्ञेष्वव तस्यां सर्वहोमः ॥ ॥ पाकः यज्ञः उच्यते। पच्यते
अन्वाहार्यमनेनेति पाको गृह्याग्निरावसथ्यः। पाके आवसथ्येऽग्नौ हि ये यज्ञाः पश्वादिकर्माणि पाकमन्वाच्चप्राशानश्र
वणाकर्मादयः। तेषु होमार्थे स्तुच्येवाऽवतस्या अप्यरूध्यानादेरसर्वहोमः कर्तव्यः। अवत्तस वेंन होतव्यं। प्रतिहो
मं भक्षार्थं किंचित्संरक्षणीयमित्यर्थः ॥

तभ्यप्रलिहोमं पात्र्यां तरेनिधेयं। अथ तस्यावशेषितस्य प्रतिपत्तिमाह॥ ॥हुताशेषप्राशनं॥ ॥हुतासांगपाकयज्ञंस
माप्य सर्वहोमांते कस्मिंश्चित्पात्रे स्थापितानां होमशेषाणां आज्यचरुधानादीनां होमकर्ता प्राशनं करोति। हुतएतदि
ति हि अपेक्षायां हेतुंतरमाह॥ ॥अग्निहोत्रेतदस्य पाकयज्ञस्यैवेति श्रुतेः॥ ॥यतोऽग्निहोत्रे अवत्तस्य सर्वहोमस्तस्ये
भक्षणं च विधा... यवर्तते एवं श्रूयते। तद्धोवाच याज्ञवल्क्यो न वै यज्ञ इव मंतवे पाकयज्ञ इव वा इदं हि यदन्य
स्मिन्नग्नौ स्रुच्यवद्यति सर्वं तदग्नौ जुहोत्यथ तदग्नौ हुत्वोद्यर्थ्यां प्राश्नाति निर्लेढि तदस्य पाकयज्ञस्येति। अ
तोऽग्निहोत्रे शेषभक्षणे पाकयज्ञस्य शेषभक्षणं सिद्धवत्कृत्वं तद्दृष्टांतत्वेनाब्रुवन्पाकयज्ञेष्ववत्तस्य सर्वहोमे हुता
वशेषप्राशनं कर्तव्यमिति दर्शयति॥ ॥अग्नीषोमीयासु पशुषु॥ ॥पशुषु सवनीयानुबंध्यानिरूढेष्वग्नीषो
मीयासु रूपः सोमांगभूताद्धर्माः प्रवर्तंते। चोदनासारूप्यात्प्राप्तिसाधकत्वसामान्याच्च। तद्धि प्रकृतौ वपायां हुतायां
नंदक्षिणा नयंतीति। तथा हृदयमेवाध्युद्धौ पुरोडाशेडायामेनो पहूतायां दक्षिणा नयेदिति तस्यानुपशुसंक्षेपेण भूया

काल

ध्येतानुकुर्वीतेति च। अत्र दक्षिणादानं विधिपरे वाक्ये वपापशुपुरोडाशपदिकं प्राप्तं दर्शयति। सवनीये पिव
पया प्रातःसवने चरंति पुरोडाशेन माध्यंदिने अंगैस्तृतीयसवन इति। अनुबंध्यायामपि अनुबंध्यपशुपुरोड
शस्य तनुदेविकानामिडादि। एतस्य पशुत्रयव्यतिरिक्तपशुषु निरूढपशोर्धर्मा भवंतीति याज्ञिकाः। हरिस्वामिनाम
प्ययमभिप्रायः। यतस्तानि नाएतानि नव समिद्यजूंषि जुहोतीति सत्रे तएवमाहुः। निरूढे तु प्रसंख्यानाभिधानाद्धि
ष्टत्वात् श्रौत्येव तादर्थ्यकारस्थापितान्येव दर्शितानि। तदा हुतैतस्य पशोः समिद्यजूंषि जुहुयादित्यादिना। एवंप्रा
प्तिसाधकत्वसामान्यात्सर्वपशुष्वपि धर्मप्राप्तौ विशेषमाह॥ ॥शाखानियोजने॥ ॥पाकपशुषु स्थलगवा
लंभादिषु अत्र शाखायां पशुनियोजनं कर्तव्यं। न यूपे। तदुक्तं पारस्करेण पशुश्चेत्काम्यगामग्रेणाग्नी
मुशि सपक्षलाशशाखां निहंतीत्यादिना॥ ॥वपांहुत्वा त्रीणि पंच सर्वाणि वावद्यति॥ ॥वपां हुत्वा वपाहोमानं
तरं पशुशरीरात् श्रौत्येव इमानि हृदयादीनि अवदानानि अवद्यति गृह्णाति हृदयं जिह्वां क्रोडमित्येतानि। अथवा
पंच। हृदयं जिह्वां क्रोडं। सव्यसक्थि पूर्वमनडकं। पार्श्वे चेति। अथवा सर्वाण्येव हृदयादीन्यवदानान्यव
द्यति। इति अत्र त्रयो विकल्पाः।

॥ सर्वाभावे शेषात्स्विष्टकृतः ॥ ॥ सर्वाभावे सर्वावदानाभावपक्षे त्रीण्यवद्यति सकृत्प्रपक्षे पंचावद्यति सकृत्प
क्षे च शेषात्स्वाभावनार्थाभिलत शेषाद्बुदयादेः सकारणा स्विष्टकृतो वदानं भवति स्विष्टकृज्ञोमार्थं तेभ्य एवावद्यति सर्वः।
सर्वावदानपक्षे तु त्र्यंगेभ्य एवेति ॥ ॥स्थालीपाकेन सहप्रदानं ॥ ॥पाकयज्ञेषु च नदानानां स्थालीपाकेन सह
प्रदानं भवति। स्थालीपाकेन सत्र सह श्रुतेः प्राधान्यादिति लीला। तेन स्थालीपाकस्य प्राधान्यमत्रावगम्यते।
अतः स्थालीपाकावदान विस्मरणे केवलावदानैर्होमे निष्पन्ने अनावृत्तिरिति विचारस्य प्रयोजनं ॥ ॥पूर्ण
पात्रो दक्षिणा ॥ ॥पाकयज्ञेषु तंडुलमुद्गगोधूमादि यज्ञियधान्यपूर्णः पूर्णपात्रो दक्षिणा भवति। धान्यस्य मा
नमात्रं पञ्चाशत्पलिकादि पूर्णं पूर्णपात्रमिति कर्कः। छंदोगपरिशिष्टकारा सायनस्तु प्रकारांतरमाह। यावता ब
हुभोक्तुः तृप्तिः पूर्णेन विद्यते। नापरार्ध्यमितः कुर्यात्पूर्णं पूर्णमिति स्थितिरिति ॥ ॥वरो वा वरो वा ॥ ॥अ
थवा पाकयज्ञेषु पश्वादिकेषु वरो दक्षिणा भवति। वरशब्देन यस्मै दीयते तदभिलषितं यजमानेन यद्दातुं श
क्यते धान्यवस्त्रकृष्णहिरण्यगवादि तदभिधीयते ॥ द्विरभ्यासोऽध्यायपरिसमाप्तिद्योतनार्थः ॥१॥ ॥इति
श्रीसोमाङ्कस्थपतित्रिरश्मिचित्रिंशत्क्रतु महायाज्ञिक श्रीश्रीप्रजापतिसुतेन महायाज्ञिकश्रीदेवकृतौ का
सायनसूत्रव्याख्याने ब्रह्मोऽध्यायः समाप्तः ॥ ग्रंथसंख्या १५५८ श्लोकगणनया। पाठकलेखकयोः शु
भं भवतु ॥ शाके १७९२ प्रमोदनामाब्दे दक्षिणायने हैमंतर्तौ मार्गशीर्षमासे कृष्णपक्षे प्रतिपत्तिथौ गुरुवास
रे रोहिणीनक्षत्रे प्रथमयामे दशसहस्त्रे सुपनामक रामचंद्रतनुभव महादेवेन लिखितं ॥

[OrderDescription]
,CREATED=21.09.19 15:55
,TRANSFERRED=2019/09/21 at 16:50:32
,PAGES=434
,TYPE=STD
,NAME=S0001891
,Book Name=M-2184-KATYAYAN SUTRAVYAKHYASAH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF

FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF

FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF

FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF

FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF

FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF

FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF

FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF

FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF

FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF

FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF

FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF

FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF

FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF

FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF

FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF

FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF

FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF

FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF

FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF

FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF

FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF

FILE410=00000410.TIF
,FILE411=00000411.TIF
,FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF

FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF
,FILE432=00000432.TIF
,FILE433=00000433.TIF
,FILE434=00000434.TIF
,